Govinda Nanda

Atha sharirik sutra bhashye
ratna prabhayam. V 3-4

अथ शारीरक सूत्र भाष्ये रत्नप्रभायां
अध्याय 3-4

Sanskrit

Handwritten onpaper

Sambat-1943 (132 years old)

134 Folios

14"X 7.2"

Completed (bound volume)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शारीरिकसूत्रभाष्य. अ. ३. ४.

८५

नं ५

Jangamwadi Math Collection. Digitized by eGangotri

शैव भारती भवन

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथशारीरकसूत्रभाष्येरत्नप्रभायांतृतीयाध्यायस्यप्रथमपादःप्रारम्भः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा॰भा॰ श्रीगणेशाय नमः ॥ ॐ ॥ यं हि वैराग्यसंपन्नास्तत्त्वमर्थविवेकिनः ॥ लभंते साधनैर्दांतास्तं सीतानायकं भजे ॥ १ ॥ तदंतरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननि- अ॰पा॰
टी॰ रूपणाभ्यां ॥ वृत्तमनूद्य तृतीयाध्यायार्थमाह ॥ द्वितीय इत्यादिना ॥ अविरुद्धे वेदांतार्थे तत्त्वज्ञानसाधनचिंतावसर इत्यनयोर्हेतुहेतुमद्भावः लिंगोपाधिसिद्धौ तदु- ३।१
र॰प्र॰ पहितजीवसंसारचिंतेति पादयोरपि तद्भावः संगतिः ॥ अत्र प्रथमपादे वैराग्यं द्वितीये स्वप्नाद्यवस्थोक्त्या त्वंपदार्थो ब्रह्मतत्त्वं चोच्यते तृतीये वाक्यार्थस्तद-
२८९ र्थमुपासनाश्च विचार्यंते ॥ चतुर्थे पादार्थमाह ॥ सम्यग्दर्शनादिति दर्शनोपायाः संन्यासादयः मुक्तिरूपफलस्य स्वर्गवत्तारतम्यनियमाभावस्त्वेकरूपत्वा-
मिति पादवत् ॥ प्रसंगागतं देहात्मदूषणं ॥ पंचसु द्युपर्जन्यपृथिवीपुरुषयोषित्स्वग्नित्वध्यानं पंचाग्निविद्या ॥ यस्मात्क्रमेणागत्यागतिरूपो ऽर्थस्तस्मात्कर्म-

श्रीगणेशाय नमः ॥ हरिः ओम् ॥ १ ॥ तदंतरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्यां ॥ १ ॥ द्वितीये ऽध्याये स्मृतिन्यायविरोधो वेदांतवि-
हिते ब्रह्मदर्शने परिहृतः परपक्षाणां चानपेक्षत्वं प्रपंचितं श्रुतिविप्रतिषेधश्च परिहृतस्तत्र च जीवव्यतिरिक्तानि तत्त्वानि जीवोपकरणानि
ब्रह्मणो जायंत इत्युक्तं ॥ अथेदानीमुपकरणोपहितस्य जीवस्य संसारगतिप्रकारस्तदवस्थांतराणि ब्रह्मसतत्त्वं विद्याभेदाभेदौ गुणोपसं-
हारानुपसंहारौ ॥ सम्यग्दर्शनात्पुरुषार्थसिद्धिः सम्यग्दर्शनोपायविधिप्रभेदो मुक्तिफलानियमश्चेत्येतदर्थजातं तृतीये ऽध्याये चिंत-
यिष्यते प्रसंगागतं च किमप्यन्यत् ॥ तत्र प्रथमे तावत्पादे पंचाग्निविद्यामाश्रित्य संसारगतिप्रभेदः प्रदर्श्यते वैराग्यहेतोस्तस्माज्जु-
गुप्सेतेति चांते श्रवणात् ॥ जीवो मुख्यप्राणसचिवः सेंद्रियः समनस्को विद्याकर्मपूर्वप्रज्ञापरिग्रहः पूर्वदेहं विहाय देहांतरं प्रतिपद्य-
त इत्येतदवगंतव्यं अथैनमेते प्राणा अभिसमायंतीत्येवमादेरन्यन्नवतरं कल्याणतरं रूपं कुरुत इत्येवमंतात्संसारप्रकरणस्थाच्छ्रुत्वा

फले जुगुप्सां घृणां विरक्तिं कुर्वीतेति पंचाग्निविद्योपसंहारे श्रवणाद्वैराग्यार्थे प्रदर्श्यत इत्यन्वयः ॥ श्रोत्रादिसूत्रेति ((इमो धर्मफलोपभोगसं-
न्यानित्यविवेकहेतुं वैराग्यमुक्तं इह तद्दार्ढ्याय गत्यागतिक्रमभावनाकृतं तदुच्यत इत्यपौनरुक्त्यं ॥ अधिकरणविषयमाह जीव इति ॥ अविद्याप्रसिद्धा वि-
द्येति पाठे उपासना ग्राह्या कर्म धर्माधर्मौ स्वपूर्वप्रज्ञा जन्मांतरसंस्कारः अथ मरणकाले प्राणा हृदये जीवेनैकीभवंतीत्यर्थः ॥ रूपं शरीरं पंचीकृतभूतभागाः
उत्तरदेहपरिणामिनो भूतसूक्ष्माः वेदांतार्थज्ञानसाधनविचारत्वात् सर्वाधिकरणानां श्रुतिशास्त्राध्यायसंगतयः वैराग्यफलकत्वादेतत्पादसंगतिः ॥ ६ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पूर्वाधिकरणेऽवहारार्थं पंचीकरणमुक्तं स व्यवहारोऽत्र निरूप्यत इति फलफलिभावो वांतरसंगतिः अत्र पूर्वपक्षे निराश्रयमाणगत्याभावान्न वैराग्यं सिद्धं ते भूताश्रयमाणगते वैराग्यमिति फलभेदः॥ तेजोमात्राश्चक्षुरादयः पश्यति जिघ्रतीति वाक्यशेषात् आपः पंचस्वग्निहुताः॥ पंचम्यामाहुतौ हुतायां यथा पुरुषशब्दवाच्याः पुरुषाकारतापरिणमंते तथा किं त्वं वेत्थेति श्वेतकेतुं प्रति राज्ञः प्रवाहणस्य प्रश्नः तस्य चोत्तरं राज्ञा तेन तस्मिन्नेतरं प्रति राज्ञो वाचासौ वाव लोको गौतमाग्निस्तत्र श्रद्धाख्या आपः आहुतिः पर्जन्याग्नौ सोमरूपाः इह स्वल्पग्निहोत्रे श्रद्धया हुता दध्यादिरूपा आपो यजमानसंलग्नाः स्वर्गलोकं प्राप्य सोमा नकारणा॥३॥

स किं देहबीजैर्भूतसूक्ष्मैरसंपरिष्वक्तो गच्छति॥ आहोस्वित्संपरिष्वक्त इति चिंत्यते॥ किं तावत्प्राप्तं॥ असंपरिष्वक्त इति॥ कुतः करणोपादानवद्भूतोपादानस्याश्रुतत्वात्॥ स एतास्तेजोमात्राः समभ्याददान इति ह्यत्र तेजोमात्राशब्देनासुपादानं संकीर्तयति॥ वाक्यशेषे च चक्षुरादिसंकीर्तनान्नैवं भूतमात्रोपादानसंकीर्तनमस्ति॥ सुलभाश्च सर्वत्र भूतमात्राः यत्रैव देह आरब्धव्यस्तत्रैव संति तासां नयनं निष्प्रयोजनं॥ तस्मादसंपरिष्वक्तो यातीत्येवं प्राप्ते पठत्याचार्यस्तदंतरप्रतिपत्तौ रंहति संपरिष्वक्त इति॥ तदंतरप्रतिपत्तौ देहांतरप्रतिपत्तौ देहबीजैर्भूतसूक्ष्मैः संपरिष्वक्तो रंहति गच्छतीत्यवगंतव्यं॥ कुतः प्रश्ननिरूपणाभ्यां॥ तथाहि प्रश्नो वेत्थ यथा पंचम्यामाहुतावापः पुरुषवचसो भवंतीति॥ निरूपणं च प्रतिवचनं द्युपर्जन्यपृथिवीपुरुषयोषित्सु पंचस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपाः पंचाहुतीर्दर्शयित्वा इति तु पंचम्यामाहुतावापः पुरुषवचसो भवंतीति॥ तस्मादद्भिः परिवेष्टितो जीवो व्रजतीति गम्यते॥ नन्वन्याश्रुतिर्जलूकावत्पूर्वदेहं न मुंचति यावन्न देहांतरमाक्रमतीति दर्शयति तद्यथा तृणजलायुके

स्य दिव्यदेहात्मना स्थिताः कर्मानेहुताः पर्जन्ये हूयंते ततो वृष्टिरूपाः पृथिव्यां॥ अन्नरूपाः पुरुषे रेतोरूपाः योषिति हुताः आपः पुरुषशब्दवाच्याः पुमान्मका भवंतीति निरूपणं कृतं॥ नन्वेन देहं त्यक्ताद्भिः सह गतस्य पश्चाद्देहांतरप्राप्तिरित्युक्तमयुक्तं यथा तृणजलायुका तृणांतरं गृहीत्वा पूर्वं तृणं त्यजति तथा जीवो देहांतरं गृहीत्वा पूर्वदेहं त्यजतीति श्रुतिविरोधादिति शंकते॥ नन्वन्येति॥ इहैव कर्मायत्तभाविदेहं देवोऽहमित्यादिभावनया गृहीत्वा पूर्वदेहं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तत्रापीति॥भावनायादीर्घीभावोभाविदेहविषयत्वंघटाकाशवदुपहितोजीवःसूक्ष्मोपाधिगत्यालोकांतरंगच्छतीति पंचाग्निश्रुत्युक्तःप्रकारस्तद्विरो
धादन्याःकल्पनाःसर्वाअनादर्तव्याइत्यन्वयःसांख्यकल्पनामाह॥व्यापिनामिति॥सुगतकल्पनामाह॥केवलस्येति॥निर्विकल्पकज्ञानसंतानरूपस्या
त्मनोदेहांतरेशब्दादिसविकल्पकज्ञानाख्यवृत्तिलाभोभवतीत्यर्थःकाणादकल्पनामाह॥मनइति॥देहांतरंप्रतिमनोमात्रंगच्छतिइंद्रियाणितुनूतना

तत्राप्यपरिवेष्टितस्यैवजीवस्यकर्मोपस्थापितप्रतिपत्तव्यदेहविषयभावनादीर्घीभावमात्रंजलूकयोपमीयतइत्यविरोधः॥
एवंश्रुत्युक्तेदेहांतरप्रतिपत्तिप्रकारेसतियाःपुरुषमतिप्रभवाःकल्पनाः॥व्यापिनांकरणानामात्मनश्चदेहांतरप्रतिपत्तौकर्मवशा
द्वृत्तिलाभस्तत्रभवति॥केवलस्यैववात्मनोवृत्तिलाभस्तत्रभवति॥इंद्रियाणितुदेहवदभिनवान्येवतत्रतत्रभोगस्थानेउ
त्पद्यंते॥मनएववाकेवलंभोगस्थानमभिप्रतिष्ठते॥जीवएवोत्प्लुत्यदेहाद्देहांतरंप्रतिपद्यतेशुकइववृक्षाद्वृक्षांतरमित्येव
माद्याःसर्वाएवानादर्तव्याःश्रुतिविरोधात्॥१॥ननूदाहृताभ्यांप्रश्नप्रतिवचनाभ्यांकेवलाभिरद्भिःसंपरिष्वक्तोरंहतीतिप्राप्नो
त्यप्शब्दश्रवणसामर्थ्यात्॥ तत्रकथंसामान्येनप्रतिज्ञायतेसर्वैरेवभूतसूक्ष्मैःसंपरिष्वक्तोरंहतीति॥अतउत्तरंपठति॥
त्र्यात्मकत्वात्तुभूयस्त्वात्॥२॥तुशब्देनचोदितामाशंकामुच्छिनत्ति॥त्र्यात्मिकाह्यापस्त्रिवृत्करणश्रुतेस्तास्वारंभिका
स्वभ्युपगतास्वितरदपिभूतद्वयमवश्यमभ्युपगंतव्यंभवति॥त्र्यात्मकश्चदेहस्त्रयाणामपितेजोबन्नानांतस्मिन्कार्योपलब्धेः॥१८॥
॥पुनश्चत्र्यात्मकस्त्रिधातुत्वात्त्रिभिर्वातपित्तश्लेष्मभिर्नसभूतांतराणिप्रत्याख्यायाद्भिःकेवलाभिरारब्धुंशक्यते॥तस्माद्भू
यस्त्वापेक्षोयमापःपुरुषवचसइतिप्रश्नप्रतिवचनयोरप्शब्दोनकैवल्यापेक्षः॥सर्वदेहेषुहिरसलोहितादिद्रवद्रव्यभूयस्त्व

न्येवारभ्यंते॥दिगंबरकल्पनामाह॥जीवइति॥१॥ननुपाकस्वेदगंधसरूपकार्यत्रयोपलब्धेस्त्र्यात्मकोदेहइत्युक्तंप्राणावकाशयोरप्युपलब्ध्या
देहस्यपंचभूतात्मतादित्यरुच्याव्याख्यांतरमाह॥पुनश्चेति॥देहधारकत्वाद्धातवस्तेस्त्रिधातुत्वात्त्र्यात्मकइत्यन्वयः॥देहस्यकेवलाब्जत्वेबाधंनपि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किंच देहनिमित्तानां कर्मणामप्बाहुल्यात्ताभिर्भूतांतराण्युपलक्ष्यंत इत्याह कर्मचेत्यादिना ॥२॥ उक्तौ तौ प्राणा देहबीजपंचभूताश्रयाः प्राणत्वा
ज्जीवदेहस्थप्राणवदित्याह ॥ प्राणगतेश्चेति ॥३॥ प्राणानां गतिरसिद्धेत्याशंकां निषेधति ॥ अग्न्यादीति ॥ अदर्शनादोषधिवनस्पतिगमनस्येति शेषः लो

ननु पार्थिवो धातुर्भूयिष्ठो देहेषूपलक्ष्यते नैष दोषः ॥ इतरापेक्षयाप्यपां बाहुल्यं भविष्यति ॥ दृश्यते च शुक्रशोणितलक्षणेपि
देहबीजे द्रवबाहुल्यं ॥ कर्म च निमित्तकारणं देहांतरारंभे ॥ कर्माणि चाग्निहोत्रादीनि सोमाज्यपयःप्रभृतिद्रवद्रव्यव्यपाश्रया
णि ॥ कर्मसमवायिन्यश्चापः श्रद्धाशब्दोदिताः सह कर्मभिर्द्युलोकाख्येग्नौ हूयंत इति वक्ष्यति ॥ तस्मादप्यपां बाहुल्यप्रसिद्धि
र्बाहुल्याच्चाप्शब्देन सर्वेषामेव देहबीजानां भूतसूक्ष्माणामुपादानमिति निरवद्यं ॥२॥ प्राणगतेश्च ॥३॥ प्राणानां च देहांतरप्रति
पत्तौ गतिः श्राव्यते ॥ तमुत्क्रामंतं प्राणोनूत्क्रामति प्राणमनूत्क्रामंतं सर्वे प्राणा अनूत्क्रामंतीत्यादिश्रुतिभिः ॥ सा च प्राणानां गतिरा
श्रयमंतरेण न भवतीत्यतः प्राणगतिप्रयुक्ता तदाश्रयभूतानामपामपि भूतांतरोपसृष्टानां गतिरवगम्यते ॥ नहि निराश्रयाः
प्राणाः क्वचिद्गंतुं तिष्ठंति वा जीवतोऽदर्शनात् ॥३॥ अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥४॥ स्यादेतत् नैव प्राणा देहांतर
प्रतिपत्तौ सह जीवेन गच्छंत्यग्न्यादिगतिश्रुतेः ॥ तथा हि श्रुतिर्मरणकाले वागादयः प्राणा अग्न्यादीन्देवान्गच्छंतीति दर्शयति ॥
यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राण इत्यादिनेति चेन्न भाक्तत्वाद्वागादीनामग्न्यादिगतिश्रुतिर्गौणी ॥ लोमसु केशेषु चा
दर्शनादोषधीर्लोमानि वनस्पतीन्केशा इति हि तत्राम्नायते न च लोमानि केशाश्चोत्प्लुत्य ओषधीर्वनस्पतींश्च गच्छंतीति संभवति
॥ न च जीवस्य प्राणोपाधिप्रत्याख्याने गमनमवकल्पते ॥ नापि प्राणैर्विना देहांतरे उपभोग उपपद्यते ॥ विस्पष्टं च प्राणानां सह जी
वेन गमनमन्यत्र श्रावितं ॥ अतो वागाद्यधिष्ठात्रीणां अग्न्यादिदेवतानां वागाद्युपकारिणीनां मरणकाले उपकारनिवृत्तिमात्रमपे
मान्यपि यंतीत्यर्थः ॥ प्राणानामग्न्यादिषु लयस्य मुख्यत्वे जीवस्य गतिभोगयोरयोगात् ((क्ष्य वागादय अग्न्यादीन्गच्छंतीत्युपचर्यते ॥४॥
सर्वे प्राणा अनूत्क्रामंतीति विस्पष्टश्रुतेर्लोमादिषु गौणलयपाठाच्च गौणत्वमित्यर्थः ॥४॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा॰भा॰ तत्रापीति॥भावनायादीर्घीभावोभाविदेहविषयत्वंघटाकाशवदुपहितोजीवःसूक्ष्मोपाधिगत्यालोकांतरंगच्छतीति पंचाग्निश्रुत्युक्तःप्रकारस्तद्विरो अ॰पा॰

टी॰ धादस्याःकल्पनाःसर्वाअनादर्तव्याइत्यन्वयःसांख्यकल्पनामाह॥व्यापिनामिति॥सुगतकल्पनामाह॥केवलस्येति॥निर्विकल्पकज्ञानसंतानरूपस्या ३१

र॰प्र॰ त्मनोदेहांतरेशब्दादिसविकल्पकज्ञानाख्यवृत्तिलाभोभवतीत्यर्थःकाणादकल्पनामाह॥मनइति॥देहांतरंप्रतिमनोमात्रंगच्छतिइंद्रियाणितुनूतना

२९०

तत्राप्यपरिवेष्टितस्यैवजीवस्यकर्मोपस्थापितप्रतिपत्तव्यदेहविषयभावनादीर्घीभावमात्रंजलूकयोपमीयतइत्यविरोधः॥
एवंश्रुत्युक्तेदेहांतरप्रतिपत्तिप्रकारेसतियाःपुरुषमतिप्रभवाःकल्पनाः॥व्यापिनांकरणानामात्मनश्चदेहांतरप्रतिपत्तौकर्मव
शाद्वृत्तिलाभस्तत्रभवति॥केवलस्यैववाऽऽत्मनोवृत्तिलाभस्तत्रभवति॥इंद्रियाणितुदेहवदभिनवान्येवतत्रतत्रभोगस्थानेउ
त्पद्यंते॥मनएववाकेवलंभोगस्थानमभिप्रतिष्ठते॥जीवएवोत्प्लुत्यदेहाद्देहांतरंप्रतिपद्यतेशुकइववृक्षाद्वृक्षांतरमित्येव
माद्याःसर्वाएवानादर्तव्याःश्रुतिविरोधात्॥१॥ननूदाहृताभ्यांप्रश्नप्रतिवचनाभ्यांकेवलाभिरद्भिःसंपरिष्वक्तोरंहतीतिप्राप्नो
त्यप्शब्दश्रवणसामर्थ्यात्॥तत्रकथंसामान्येनप्रतिज्ञायतेसर्वैरेवभूतसूक्ष्मैःसंपरिष्वक्तोरंहतीति॥अतउत्तरंपठति॥
त्र्यात्मकत्वात्तुभूयस्त्वात्॥२॥तुशब्देनचोदितामाशंकामुच्छिनत्ति॥त्र्यात्मिकाह्यापस्त्रिवृत्करणश्रुतेस्तास्वारंभिका
स्वभ्युपगतास्वितरदपिभूतद्वयमवश्यमभ्युपगंतव्यंभवति॥त्र्यात्मकश्चदेहस्त्रयाणामपितेजोबन्नानांतस्मिन्कार्योपलब्धेः
॥पुनश्चत्र्यात्मकस्त्रिधातुत्वात्त्रिभिर्वातपित्तश्लेष्मभिर्नसभूतांतराणिप्रत्याख्यायकेवलाभिरद्भिरारब्धुंशक्यते॥तस्माद्भू
यस्त्वापेक्षोयमापःपुरुषवचसइतिप्रश्नप्रतिवचनयोरप्शब्दोनकैवल्यापेक्षः॥सर्वदेहेषुहिरसलोहितादिद्रवद्रव्यभूयस्त्व

न्येवारभ्यंते॥दिगंबरकल्पनामाह॥जीवइति॥१॥ननुपाकस्वेदगंधरसरूपकार्यत्रयोपलब्धेस्त्र्यात्मकोदेहइत्युक्तंप्राणावकाशयोरप्युपलब्ध्या
देहस्यपंचभूतात्मतादित्यरुच्याव्याख्यांतरमाह॥पुनश्चेति॥देहधारकत्वाद्वातवत्त्वेस्त्रिधातुत्वात् त्र्यात्मकइत्यन्वयः॥देहस्यकेवलाज्जन्वेवानंपि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किंचदेहनिमित्तानांकर्मणामप्बाहुल्यात्ताभिर्भूतांतराण्युपलक्ष्यंतइत्याह कर्मचेत्यादिना॥२॥ उक्तौतौप्राणादेहबीजपंचभूताश्रयाःप्राणवा
जीवदेहस्थप्राणवदित्याह॥ प्राणगतेश्चेति॥३॥ प्राणानांगतिरसिद्धेत्याशंकांनिषेधति॥ अग्न्यादीनि॥ अदर्शनादोषधिवनस्पतिगमनस्येतिशेषः॥ लो

ननुपार्थिवोधातुर्भूयिष्ठोदेहेषूपलक्ष्यतेनैषदोषः॥ इतरापेक्षयाप्यपांबाहुल्यंभविष्यति॥ दृश्यतेचशुक्रशोणितलक्षणेपि
देहबीजेद्रवबाहुल्यं॥ कर्मचनिमित्तकारणंदेहांतरारंभे॥ कर्माणिचाग्निहोत्रादीनिसोमाज्यपयःप्रभृतिद्रवद्रव्यव्यपाश्रया
णि॥ कर्मसमवायिन्यश्चापःश्रद्धाशब्दोदिताःसहकर्मभिर्द्युलोकाख्येग्नौहूयंतइतिवक्ष्यति॥ तस्मादप्यपांबाहुल्यप्रसिद्धि
र्बाहुल्याच्चाप्शब्देनसर्वेषामेवदेहबीजानांभूतसूक्ष्माणामुपादानमितिनिरवद्यं॥२॥ प्राणगतेश्च॥३॥ प्राणानांचदेहांतरप्रति
पत्तौगतिःश्राव्यते॥ तमुत्क्रामंतंप्राणोनूत्क्रामतिप्राणमनूत्क्रामंतंसर्वेप्राणाअनूत्क्रामंतीत्यादिश्रुतिभिः॥ साचप्राणानांगतिरा
श्रयमंतरेणनभवतीत्यतःप्राणगतिप्रयुक्तातदाश्रयभूतानामपामपिभूतांतरोपसृष्टानांगतिरवगम्यते॥ नहिनिराश्रयाः
प्राणाःक्वचिद्गच्छंतितिष्ठंतिवाजीवतोऽदर्शनात्॥३॥ अग्न्यादिगतिश्रुतेरितिचेन्नभाक्तत्वात्॥४॥ स्यादेतत्नैवप्राणादेहांतर
प्रतिपत्तौसहजीवेनगच्छंत्यग्न्यादिगतिश्रुतेः॥ तथाहिश्रुतिर्मरणकालेवागादयःप्राणाअग्न्यादीन्देवान्गच्छंतीतिदर्शयति॥
यत्रास्यपुरुषस्यमृतस्याग्निंवागप्येतिवातंप्राणइत्यादिनेतिचेन्नभाक्तत्वाद्वागादीनामग्न्यादिगतिश्रुतिर्गौणी॥ लोमसुकेशेषुचा
दर्शनादोषधीर्लोमानिवनस्पतीन्केशाइतिहितत्राम्नायते नचलोमानिकेशाश्चोत्प्लुत्यओषधीर्वनस्पतींश्चगच्छंतीतिसंभवति
॥ नचजीवस्यप्राणोपाधिप्रत्याख्यानेगमनमवकल्पते॥ नापिप्राणैर्विनादेहांतरेउपभोगउपपद्यते॥ विस्पष्टंचप्राणानांसहजी
वेनगमनमन्यत्रश्रावितं॥ अतोवागाद्यधिष्ठात्रीणामग्न्यादिदेवतानांवागाद्युपकारिणीनांमरणकालेउपकारनिवृत्तिमात्रमपे
मान्यपियंतीत्यर्थः॥ प्राणानामग्न्यादिषुलयस्यमुख्यत्वेजीवस्यगतिभोगयोरयोगात् ((क्ष्यवागादयअग्न्यादीन्गच्छंतीत्युपचर्यंते॥४॥
सर्वेप्राणाअनूत्क्रामंतीतिविस्पष्टश्रुतेर्लोमादिगौणलयपाठाच्चगौणत्वमित्यर्थः॥४॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भूतान्तरयुक्तानामपांगतिमुक्त्वा पुरुषवचस्त्वं तासामाक्षिप्य समाधत्ते प्रथमइति॥ ननुप्रथमपर्याये उत्तराग्निष्वप्पामश्रवणात् इत्याशंक्य सोम
वृष्ट्यन्नरेतसामप्यपत्वाद् इतरत्र तासां श्रवणमस्तीति प्रथमइत्याह॥ यदिनामेति॥ पंचाग्निष्वपामाहुतित्वे सिद्धे तासां पंचम्यामाहुतौ पुरुषवचस्त्वं भवे
त्ततिसिद्धं प्रथमाग्नौ तासामनाहुतित्वादिति शंकार्थः॥ एवंहि श्रद्धाशब्देनापांग्रहे सति प्रश्नोत्तरोपसंहाराणां संगानादेकार्थत्वादेकवाक्यतोपपद्यते अत्र

प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः॥ ५॥ स्यादेतत् कथंपुनः पंचम्यामाहुतावापः पुरुषवचसो भवन्तीत्येतन्निर्धारयितुं पार्य
ते यावता नैव प्रथमेऽग्नावपां श्रवणमस्ति॥ इहहि द्युलोकप्रभृतयः पंचाग्नयः पंचानामाहुतीनामाधारत्वेनाधीतास्तेषां च प्रमुखे
ऽसौ वाव लोको गौतमाग्निरित्युपन्यस्य तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वतीति श्रद्धा होम्यद्रव्यत्वेनावेदिता न तत्रापो होम्यद्रव्यतया
श्रुताः॥ यदि नाम पर्जन्यादिषूत्तरेषु चतुर्ष्वग्निष्वपां होम्यद्रव्यता परिकल्प्येत परिकल्प्यतां नाम तेषु होतव्यतयोपात्तानां सोमादी
नामप्बहुलत्वोपपत्तेः प्रथमे त्वग्नौ श्रुतां श्रद्धां परित्यज्याश्रुता आपः परिकल्प्यन्त इति साहसमेतत्॥ श्रद्धा च नाम प्रत्ययविशेषः प्र
सिद्धिसामर्थ्यात्॥ तस्माद्युक्तः पंचम्यामाहुतावपां पुरुषभाव इति चेन्नैष दोषो यतस्तत्रापि प्रथमेऽग्नौ ता एवापः श्रद्धाशब्देनाभि
प्रेयन्ते कुतः उपपत्तेः॥ एवं ह्यादिमध्यावसानसंगानादनाकुलमेतदेकवाक्यमुपपद्यते॥ इतरथा पुनः पंचम्यामाहुतावपां पु
रुषवचस्त्वप्रकारे पृष्टे प्रतिवचनावसरे प्रथमाहुतिस्थाने यद्यनपो होम्यद्रव्यं श्रद्धां नामावतारयेत्ततोऽन्यथा प्रश्नोऽन्यथा प्रतिव
चनमित्येकवाक्यता न स्यादिति तु पंचम्यामाहुतावापः पुरुषवचसो भवन्तीति चोपसंहरन्नेतदेव दर्शयति श्रद्धाकार्यं च (
सोमवृष्ट्यादि स्थूलीभवदप्बहुलं लक्ष्यते॥ सा च श्रद्धाया अप्त्वे युक्तिः॥ कारणानुरूपं हि कार्यं भवति॥ ((हेतुचतुर्थमितिचेवा

पामाहुतित्वाच्चतुर्थ्यामाहुताविति वाच्यं॥ अतः प्रश्नोपसंहारयोः पंचम्यामिति श्रवणात् प्रथमाग्नावप्याप एव ग्राह्या इति समाधानार्थः॥ अतएव श्रद्धो
त्पत्॥ एतदेवेति श्रद्धाशब्दस्याप्पत्वं दर्शयतीत्यर्थः॥ उपपत्तेरित्यस्यार्थान्तरमाह॥ श्रद्धाकार्यमिति॥ तस्याः श्रद्धाहुतेः सोमः संभवतीत्यादिनाश्र
द्धा सोमादीनां पूर्वं पूर्वं परिणाम उक्तस्तेन तेनोद्भवपरिणामित्वात्॥ श्रद्धाया अप्त्वं प्रत्ययात्मकमुख्यश्रद्धाया आहुतित्वायोगाच्चेत्यर्थः॥ ६ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रद्धाशब्दस्याप्सु सूक्ष्मत्वगुणेन वृत्तिमुक्त्वा लक्षणां वक्तुं श्रद्धाया अद्भिरेककर्मयोगित्वं हेतुत्वं वा संबंधमाह॥ श्रद्धापूर्वकेति॥ असौ यजमानायस्वानाद्यर्थमापः श्रद्धां संनमंते जनयंतीत्यर्थः॥५॥ अपां गतिमुपेत्याद्भिः सह जीवानां गतिमाक्षिप्य समाधत्ते॥ अथापीत्यादिना॥ द्युलोकाग्नौ श्रद्धाहुतेः सोमराजासंभवतीत्युक्त्वा वाक्यशेषे धूमादिमार्गेण आकाशाच्चंद्रमसं प्राप्ता इष्टादिकारिण एष सोमो राजेत्युक्ता अतः सोमराजशब्दसामान्यादिष्टादिकारिणां जीवानां

न च श्रद्धाख्यः प्रत्ययो मनसो जीवस्य वा धर्मः सन्धर्मिणो निष्कृष्य होमायोपादातुं शक्यते पश्वादिभ्य इव हृदयादीनीत्याप एव श्रद्धाशब्दा भवेयुः॥ श्रद्धाशब्दश्चाप्सूपपद्यते॥ वैदिकप्रयोगदर्शनात्॥ श्रद्धा वा आप इति॥ तनुत्वं श्रद्धासारूप्यं गच्छंत्यापो देहबीजभूता इत्यतः श्रद्धाशब्दाः स्युर्यथा सिंहपराक्रमो नरः सिंहशब्दो भवति॥ श्रद्धापूर्वककर्मसमवायाच्चाप्सु श्रद्धाशब्द उपपद्यते मंचशब्द इव पुरुषेषु॥ श्रद्धाहेतुत्वाच्च श्रद्धाशब्दोपपत्तिरापो हास्मै श्रद्धां संनमंते पुण्याय कर्मण इति श्रुतेः॥५॥ अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः॥६॥ अथापि स्यात्प्रश्नप्रतिवचनाभ्यां नामापः श्रद्धादिक्रमेण पंचम्यामाहुतौ पुरुषाकारं प्रतिपद्येरन्नित्येतत्संपरिष्वक्ता जीवा रंहेयुः॥ अश्रुतत्वात्तत्तद्यत्रापामिव जीवानां श्रावयिता कश्चिच्छब्दोऽस्ति॥ तस्माद्रंहति संपरिष्वक्त इत्ययुक्तमिति चेत्॥ नैष दोषः कुतः इष्टादिकारिणां प्रतीतेः॥ अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवंतीत्युपक्रम्येष्टादिकारिणां धूमादिना पितृयाणेन पथा चंद्रप्राप्तिं कथयत्याकाशाच्चंद्रमसमेष सोमो राजेति त एवेहापि प्रतीयंते॥ तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा संभवतीति श्रुतिसामान्यात्॥ तेषां चाग्निहोत्रदर्शपौर्णमासादिकर्मसाधनभूता दधिपयःप्रभृतयो द्रवद्रव्यभूयस्त्वात्प्रत्यक्षमेवापः संति ता आहवनीये हुताः सूक्ष्मा आहुतयोऽपूर्वरूपाः सत्यस्तानिष्टादिकारिण आश्रयंति॥ तेषां च शरीरं नैधनेन विधानेनांत्येऽग्नावृत्विजो जुह्वत्यसौ स्वर्गाय लोकाय स्वाहेति॥ ६ ॥

श्रद्धाशब्दिताद्भिः सह गतिरिह श्रद्धाहुतिवाक्ये प्रतीयत इत्यर्थः॥ तेषां सूक्ष्माभिर्द्रव्यापूर्वरूपाभिः पंचीकृताभिरद्भिः सम्बन्धं वदन् सहगतिं विवृणोति ॥ तेषां चाग्निहोत्रेति निधनं मरणं तन्निमित्तकर्म नैधनं विधानं असौ यजमानः स्वर्गाय गच्छत्विति मंत्रार्थः॥ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नगतिंन१

शा·भा· हुतद्रव्यरूपाणामपांगमनेश्रुत्यंतरमाह तथाचेति॥ अग्निहोत्रप्रकरणेजनकेनयाज्ञवल्क्यंप्रतितत्त्वैवैनयोः सायंप्रातराहुत्योरुत्क्रान्तिंप्रतिष्ठांत अ·पा·

टी· तृप्तिंपुनरावृत्तिंलोकंप्रत्युत्थायिनंचेत्येतेषट्प्रश्नाः कृतास्तेषांनिर्वचनमपिराज्ञैवतेवाएतेआहुतीहुतेउत्क्रामतः तेअन्तरिक्षद्वारादिवंगच्छतस्ते ३।१

र·प्र· दिवमेवाहवनीयंप्रतिष्ठांकुर्वातेदिवंतर्पयतस्तेततः पुनरावर्तेतेततः पृथिव्यांपुरुषेयोषितिचहुते ——— पुरुषरूपेणोत्तिष्ठतइतिवा॥

ततस्ताः श्रद्धापूर्वककर्मसमवायिन्यः आहुतिमय्यआपोऽपूर्वरूपाः सत्यस्ताइष्टादिकारिणोजीवान्परिवेष्ट्यामुंलोकंफलदानायगच्छन्तीतियत्तदत्रजुहोतिनाभिधीयतेश्रद्धांजुह्वतीति॥ तथाचाग्निहोत्रेषट्प्रश्नीनिर्वचनरूपेणवाक्यशेषेणतेवाएतेआहुतीहुतेउत्क्रामतइत्येवमादिनाग्निहोत्राहुत्योः फलारंभायलोकान्तरप्राप्तिः प्रदर्शिता॥ तस्मादाहुतिमयीभिरद्भिः संपरिष्वक्ताजीवारंहतिस्वकर्मफलोपभोगायेतिश्लिष्यते॥६॥ कथंपुनरिदमिष्टादिकारिणांस्वकर्मफलोपभोगायरंहणंप्रतिज्ञायते॥ यावतातेषांधूमप्रतीकेनवर्त्मनाचंद्रमसमधिरूढानामन्नभावंदर्शयति॥ एषसोमोराजातद्देवानामन्नंतंदेवाभक्षयन्तीति॥ तेचंद्रंप्राप्यान्नंभवन्तितांस्तत्रदेवायथासोमंराजानमाप्यायस्वापक्षीयस्वेत्येवमेनांस्तत्रभक्षयन्तीतिचसमानविषयंश्रुत्यंतरं॥ नचव्याघ्रादिभिरिवदेवैर्भक्ष्यमाणानामुपभोगः संभवतीत्यतउत्तरंपठति॥ भाक्तंवाऽनात्मवित्त्वात्तथाहिदर्शयति॥७॥ वाशब्दश्चोदितदोषव्यावर्तनार्थः॥ भाक्तमेषामन्नत्वंनमुख्यं॥ मुख्येह्यन्नत्वेस्वर्गकामोयजेतेत्येवंजातीयकाऽधिकारश्रुतिरुपरुध्येत॥ चंद्रमंडलेचेदिष्टादिकारिणामुपभोगोनस्यात्किमर्थमधिकारिणइष्टाद्यायासबहुलंकर्मकुर्युः॥ अन्नशब्दश्चोपभोगहेतुत्वसामान्यात् अनन्नेऽप्युपचर्यमाणोदृश्यते॥ यथाविशोऽन्नं राज्ञांपशवोऽन्नंविशामिति॥ तस्मादिष्टस्त्रीपुत्रमित्रभृत्यादिभिरिवगुणभावोपगतैरिष्टादिकारिभिर्यत्सुखविहरणंदेवानांतदेषांभक्षणमभिप्रेतं॥ नमोदकादिवच्चर्वणंनिगरणंवा॥

काशेषेणकृतं॥६॥ संप्रत्युत्तरसूत्रव्यावर्त्यंशंकते॥ कथमित्यादिना॥ अत्रसोमास्यचंद्रस्यान्नत्वमुक्तंनेष्टादिकारिणामिति भ्रान्तिनिरासार्थंश्रुत्यंतरमाह॥ तेचंद्रमिति॥ यथायज्ञेचमसस्थंसोमंऋत्विजआप्यायस्वेतिक्रियावृत्तौलोट्पुनः पुनराप्याय्यपुनः पुनरपक्षय्यभक्षयन्ति॥ एवंतेतानिष्टादिकारि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

फलकामनाशास्त्रानर्थक्यवारणाय अनात्मत्वं गौणमिति भावः॥ केन दोषेण तेषां देवभोग्यत्वमित्यत आह॥ अनात्मवित्त्वादिति॥ यथा पशुर्भोग्य एवमज्ञः स भे-
दधीमान् देवानां भोग्य इत्यर्थः॥ आत्मशब्दस्य मुख्यत्वबलेन सूत्रांशं व्याख्याय प्रकृतपंचाग्नयः सूत्रकृतानात्मत्वेनोपचरिता इति व्याख्यान्तरमाह॥ अनात्म-

न ह वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्तीति च देवानां चर्वणादिव्यापारं वारयति॥ तेषां चेष्टादिकारिणां देवानामतिगुण-
भावोपगतानामप्युपभोग उपपद्यते॥ राज्ञोपजीविनामिव परिजनानां अनात्मवित्त्वाच्चेष्टादिकारिणां देवोपभोग्यभाव उपप-
द्यते॥ तथा हि श्रुतिरनात्मविदां देवोपभोग्यतां दर्शयति॥ अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरे-
वं स देवानामिति॥ स चास्मिन्नपि लोक इष्टादिभिः कर्मभिः प्रीणयन्पशुवद्देवानामुपकरोत्यमुष्मिन्नपि लोके तदुपजीवी तदादि-
ष्टं फलमुपभुंजानः पशुवद्देवानामुपकरोतीति गम्यते॥ अनात्मवित्त्वात्तथा हि दर्शयतीत्यस्यापरा व्याख्या॥ अनात्मविदो हि
ते केवलकर्मिणः इष्टादिकारिणो न ज्ञानकर्मसमुच्चयानुष्ठायिनः॥ पंचाग्निविद्यामिहात्मविद्येत्युपचरंति॥ प्रकरणात्पंचा-
ग्निविज्ञानविहीनत्वाच्चेदमिष्टादिकारिणां गुणवादेनानात्मत्वमुद्भाव्य तत्पंचाग्निविज्ञानप्रशंसार्थं पंचाग्निविद्या हीह विधि-
त्सिता वाक्यतात्पर्यावगमात्॥ तथा हि श्रुत्यंतरं चंद्रमंडले भोगमज्ञानां दर्शयति॥ स सोमलोके विभूतिमनुभूय पुनरावर्त-
त इति॥ तथान्यदपि श्रुत्यंतरं अथ ये शतं पितॄणां जितलोकानामानंदाः स एकः कर्मदेवानामानंदो ये कर्मणा देवत्वमभि-
संपद्यंत इतीष्टादिकारिणां देवैः सह संवसतां भोगप्राप्तिं दर्शयति॥ एवं भाक्तत्वादन्नभाववचनस्येष्टादिकारिणो जी-
वा रंहंत इति प्रतीयते॥ तस्माद्रंहति संपरिष्वक्त इति युक्तमेवोक्तं॥ १।७॥ कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमने-
वं च॥ ८॥ इष्टादिकारिणां धूमादिना वर्त्मना चंद्रमंडलमधिरूढानां भुक्तभोगानां ततः प्रत्यवरोह आम्नायते॥ १ ॥

त्यादिना विद्यास्तुत्यर्थमन्नत्वं न मुख्यमित्यत्र भक्त्यंतरार्थं सूत्रशेषं व्याचष्टे॥ तथा हीति॥ एवं गतिपर्यालोचनया वैराग्यमिति सिद्धं॥ ७॥ इ-
दानीं गत्यनंतरभाविनीं मागतिं निरूपयति॥ कृतात्यय इति॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भोक्तव्यकर्मसमाप्त्यानंतर्यमथशब्दार्थः॥ यथेतमित्यारभ्यश्वादियोनिमित्यंतंवाक्यंयावत्तावदाम्नायतइतियोजना॥ अत्रयावत्संपातमितिविशेष
णाद्रमणीयचरणाइतिवाक्याच्चसंशयमाह॥ तत्रेति॥ अनुशयः कर्मात्रपूर्वपक्षेकर्माभावेनागतेरनियमात् वैराग्यादार्ढ्यं सिद्धांतेकर्मसत्त्वे
नागतिनियमाद्वैराग्यदार्ढ्यमितिभेदः॥ तेषामिष्टादिकारिणांयदातत्कर्मपर्यवैतिपरिक्षीणंभवतितदापुनरावर्त्तन्तइतिश्रुत्यन्तरेणापिकृत्स्नकर्म

नस्मिन्यावत्संपातमुषित्वाथैतमेवाध्वानंपुनर्निवर्त्तन्तेयथेतमित्यारभ्ययावद्रमणीयचरणाब्राह्मणादियोनिमापद्यन्ते॥
कपूयचरणाःश्वादियोनिमिति॥ तत्रेदंविचार्यते॥ किंनिरनुशयाभुक्तकृत्स्नकर्माणोवरोहन्त्याहोस्वित्सानुशयाइति॥ किंता
वत्प्राप्तंनिरनुशयाइति॥ कुतः यावत्संपातमितिविशेषणात्संपातशब्देनात्रकर्माशयउच्यते॥ संपतन्त्यनेनास्माल्लोकादमु-
लोकंफलोपभोगायेति॥ यावत्संपातमुषित्वेतिचकृत्स्नस्यतस्यकृतस्यतत्रैवभुक्ततांदर्शयति॥ तेषांयदातत्पर्यवैतीति
चश्रुत्यंतरेणैषएवार्थःप्रदर्श्यते॥ स्यादेतत्॥ यावदमुष्मिंल्लोकेउपभोक्तव्यंकर्मतावदुपभुंक्तइतिकल्पयिष्यामी-
ति॥ नैवंकल्पयितुंशक्यते॥ यत्किंचेत्यन्यत्रपरामर्शात्॥ प्राप्यांतंकर्मणस्तस्ययत्किंचेहकरोत्ययं॥ तस्माल्लोकात्पुन
रैत्यस्मैलोकायकर्मणइत्यपराश्रुतिर्यत्किंचेत्यविशेषपरामर्शेनकृत्स्नस्येहकृतस्यकर्मणस्तत्रक्षयितांदर्शयति॥
अपिचप्रायणमनारब्धफलस्यकर्मणोभिव्यंजकं॥ प्राक्प्रायणादारब्धफलेनकर्मणाप्रतिबद्धस्याभिव्यक्त्यनुपपत्तेः
॥ तच्चाविशेषाद्यावत्किंचिदनारब्धफलंतस्यसर्वस्याभिव्यंजकं॥ नहिसाधारणेनिमित्तेनैमित्तिकमसाधारणंभवितु-
मर्हति॥ नह्यविशिष्टेप्रदीपसन्निधौघटोभिव्यज्यतेनपटइत्युपपद्यते॥ तस्मान्निरनुशयाअवरोहंतीत्येवंप्राप्तेब्रूमः

पश्चल्लोकेमुक्तत्वमुच्यतइत्यर्थः यावत्पदसंकोचोनयुक्तः श्रुत्यंतरविरोधादित्याह॥ नैवमि (॥ कृतात्ययेऽनुशयवानिति॥ ८॥
ति॥ अयंनरोयत्किंचिदिहलोकेकर्मकरोति॥ तस्यांतंफलंपरलोकेप्राप्यकर्मार्थंपुनरायातीतिश्रुत्यर्थः॥ कर्माभावेश्रुतिमुक्त्वायुक्तिमाह॥ अ
पिचेति॥ अभिव्यक्तिःफलोन्मुखतामरणेनाभिव्यक्तस्यसर्वस्यकर्मणः परलोकभोगस्यावश्यंभावात् कर्माभावइत्यर्थः॥ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चरणाख्यशीलमात्रादवरोह इति प्राप्ते सिद्धान्तप्रतिज्ञां व्याचष्टे येनेत्यादिना तत्तत्रावरोहतां जीवानां मध्ये ये केचिदिह कर्मभूमौ रमणीयचरणाः पुण्यकर्माणः पुण्ययोनिभाज इति यत्तदभ्याशो ह अवश्यं हीत्यर्थः ॥ कपूयं पापं ॥ दृष्टशब्दस्य श्रुत्यर्थमुक्त्वार्थान्तरमाह ॥ दृष्टश्चेति ॥ पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेत्यादिशास्त्रेण सुखदुःखयोर्धर्माधर्महेतुकत्वमवगतं तेन तज्जन्मारभ्य दृष्टो भोगः कर्महेतुकः भोगत्वात्स्वर्गभोगवदित्यनुशयसिद्धिः ॥

येन कर्मवृन्देन चन्द्रमसमारूढाः फलोपभोगाय तस्मिन्नुपभोगेन क्षयिते तेषां यदम्मयं शरीरं चन्द्रमस्युपभोगायारब्धं तदुपभोगक्षयदर्शनशोकाग्निसंपर्कात्प्रविलीयते ॥ सवितृकिरणसंपर्कादिव हिमकरकाः ॥ हुतभुगर्चिःसंपर्कादिव घृतकाठिन्यं ॥ ततः कृतात्यये कृतस्येष्टादेः कर्मणः फलोपभोगेनोपक्षये सति सानुशया एवेममवरोहन्ति केन हेतुना दृष्टस्मृतिभ्यामित्याह ॥ तथा हि प्रत्यक्षा श्रुतिः सानुशयानामवरोहं दर्शयति ॥ तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा ॥ अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरञ्श्वयोनिं वा शूकरयोनिं वा चंडालयोनिं वेति ॥ चरणशब्देनानुशयः सूच्यत इति वर्णयिष्यति ॥ दृष्टश्चायं जन्मनैव प्रतिप्राण्युच्चावचरूप उपभोगः प्रविभज्यमानः आकस्मिकत्वासंभवादनुशयसद्भावं सूचयति ॥ अभ्युदयप्रत्यवाययोः सुकृतदुष्कृतहेतुत्वस्य सामान्यतः शास्त्रेणावगमितत्वात् ॥ स्मृतिरपि वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्त इति सानुशयानामेवावरोहं दर्शयति ॥ कः पुनरनुशयो नामेति केचित्तावदाहुः स्वर्गार्थस्य कर्मणो भुक्तफलस्यावशेषः कश्चिदनुशयो नाम भांडानुसारिस्नेहवत् ॥

१ विपक्षे च हेत्वभावाद्भोगस्याकस्मिकत्वप्रसंग इत्यर्थः ॥ स्मृतौ वा आश्रमाः आश्रमिणः प्रेत्य मृत्वा लोकान्तरे कर्मफलं भुक्त्वा ततः शेषेण भुक्तादन्येन कर्मणा अनुशयाख्येन पुनर्जन्म प्रतिपद्यन्त इति संबन्धः विशिष्टादेशादयो मेधान्ता दश गुणा येषु ते तथोक्ताः श्रुतं ज्ञानं वृत्तं आचारः स्वाभिमतानुशयं वक्तुं पृच्छति ॥ कः पुनरिति ॥ कृतस्य कर्मणः स्वर्गभोगेन निभुक्तस्य कर्मणो लेशोऽनुशयस्तद्वानवरोहति भांडे स्नेहलेशस्य दृष्टत्वात् ततः शेषेणेति स्मृतेश्चैवं व्याख्यामाह ॥ केचिदित्यादिना ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रिच्यमानंस्नेहेनवियुज्यमानं॥ ननुभोगनाश्यत्वात् कर्मणोलेशोनयुक्तइतिशंकते॥नन्विति ॥ कृत्स्नकर्मणोभोगेजातेनाशः स्यान्नतुभोगो
जातइतिपरिहारार्थः॥ भोगोनजायतइत्ययुक्तमितिशंकते॥नन्विति॥भोगः सावशेषोजातइतिसमाधत्ते॥ बाढमित्यादिना॥ इदमेकदेशिव्या

यथाहिस्नेहभांडंरिच्यमानंनसर्वात्मनारिच्यते॥ भांडानुसार्येवकश्चित्स्नेहशेषोवतिष्ठतेतथानुशयोपीति॥ ननुकार्यविरो
धिनादृष्टस्यनभुक्तफलसावशेषस्यावस्थानंन्याय्यं॥ नायंदोषः॥ नहिसर्वात्मनाभुक्तफलत्वंकर्मणः प्रतिजानीमहे॥ न
नुनिरवशेषकर्मफलोपभोगायचंद्रमंडलमारूढः॥ बाढं॥ तथापिस्वल्पकर्मावशेषमात्रेणतत्रावस्थातुंनलभ्यते॥ य
थाकिलकश्चित्सेवकः सकलैः सेवोपकरणैराजकुलमुपसृप्तश्चिरप्रवासात्परिक्षीणबहूपकरणः छत्रपादुकादिमा
त्रावशेषोनराजकुलेवस्थातुंशक्नोत्येवमनुशयमात्रपरिग्रहोनचंद्रमंडलेवस्थातुंशक्नोतीति॥ नचैतद्युक्तमिव॥ नहिस्व
र्गार्थस्यकर्मणोभुक्तफलस्यावशेषानुवृत्तिरुपपद्यतेकार्यविरोधित्वादित्युक्तं॥ नन्वेतदप्युक्तंनस्वर्गफलस्यकर्मणोनिखि
लस्यभुक्तफलत्वंभविष्यतीति॥ तदेतदपेशलं॥ स्वर्गार्थंकिलकर्मस्वर्गस्थस्यैवस्वर्गफलंनिखिलंजनयतिस्वर्गच्युत
स्यापिकिंचित्फललेशंजनयतीति॥ नशब्दप्रमाणकानामीदृशीकल्पनावकल्पते॥ स्नेहभांडेतुस्नेहलेशानुवृत्तिर्दृष्टत्वादु
पपद्यते॥ तथासेवकस्योपकरणलेशानुवृत्तिश्चदृश्यते॥ नत्विहतथास्वर्गफलस्यकर्मणोलेशानुवृत्तिर्दृश्यते॥ ना
पिकल्पयितुंशक्यतेस्वर्गफलत्वशास्त्रविरोधात्॥ अवश्यंचैतदेवंविज्ञेयंनस्वर्गफलस्येष्टादेः कर्मणोभांडानुसारि
स्नेहवदेकदेशोनुवर्तमानोनुशयइति॥ यदिहियेनसुकृतेनकर्मणेष्टादिनास्वर्गमन्वभूवंस्तस्यैवकश्चिदेकदेशोनु
शयः कल्प्येत॥ ततोरमणीयएवैकोनुशयः स्यान्नविपरीतस्तत्रेयमनुशयविभागश्रुतिरुपरुध्येत॥ तद्यइहरम
णीयचरणाअथयइहकपूयचरणाइति॥ ११ व्याख्यानंदूषयति॥ नचेति॥ स्वर्गकामोयजेतेत्यादिशास्त्रेणस्वर्गभोगार्थंकर्मचो
दितंतच्छेषस्यमर्त्यभोगहेतुत्वेशास्त्रविरोधइत्यर्थः किंचस्वर्गहेतुकर्मशेषादवरोहेकपूययोन्यापत्तिश्रुतिविरोधइत्याह॥ अवश्यंचेति॥ ११॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वाभिमतमनुशयमाह॥ तस्मादिति॥ पूर्वपक्षबीजमनूद्य दूषयति॥ यदित्यादिना॥ क्षपयित्वा पुनरागच्छंतीति प्राप्यांतमिति वाक्येन गम्यत इति योजना॥ जन्मारभ्य दृष्टभोगलिंगानुगृहीतया रमणीयकपूयचरणश्रुत्यैहिकानुशयाख्यकर्मविशेषपरत्वाविरोधात् यत्किंचेति यावत्संपातमिति च सामान्यशब्दयोरामुष्मिकविषयत्वेन संकोचो न्याय्य इति भावः॥ मरणं कृत्स्नकर्माभिव्यंजकमित्ययुक्तं उक्तानुशयश्रुतिविरोधादित्याह॥ तदपीति॥

तस्मादामुष्मिकफले कर्मजाते उपभुक्ते अवशिष्टमैहिकफलं कर्मान्तरजातं अनुशयस्तद्वन्तोऽवरोहन्तीति॥ यदुक्तं यत्किंचेत्यविशेषपरामर्शात्सर्वस्येह कृतस्य कर्मणः फलोपभोगेनान्तं प्राप्य निरनुशया अवरोहन्तीति॥ नैतदेवमनुशयसद्भावस्यावगमितत्वात्। यत्किंचिदिह कृतमामुष्मिकफलं कर्मारब्धभोगं तत्सर्वं फलोपभोगेन क्षपयित्वेति गम्यते॥ यदप्युक्तं प्रायणमविशेषादनारब्धफलं कृत्स्नमेव कर्माभिव्यनक्ति तत्र केनचित्कर्मणामुष्मिँल्लोके फलमारभ्यते केनचिदस्मिन्नित्ययं विभागो न संभवतीति तदप्यनुशयसद्भावप्रतिपादनेनैव प्रत्युक्तं॥ अपि च केन हेतुना प्रायणमनारब्धफलस्य कर्मणोऽभिव्यंजकं प्रतिज्ञायत इति वक्तव्यं॥ आरब्धफलेन कर्मणा प्रतिबद्धस्येतरस्य वृत्त्युद्भवानुपपत्तेस्तदुपशमात् प्रायणकाले वृत्त्युद्भवो भवतीति यद्युच्येत ततो वक्तव्यं॥ यथैव प्राक्प्रायणादारब्धफलेन कर्मणा प्रतिबद्धस्येतरस्य वृत्त्युद्भवानुपपत्तिरित्येवं प्रायणकालेऽपि विरुद्धफलस्यानेकस्य कर्मणो युगपत्फलारंभासंभवाद्बलवता प्रतिबद्धस्य दुर्बलस्य वृत्त्युद्भवानुपपत्तिरिति॥ न ह्यनारब्धफलत्वसामान्येन जात्यन्तरोपभोग्यफलमप्यनेकं कर्मैकस्मिन्प्रायणे युगपदभिव्यक्तं सदेकां जातिमारभत इति शक्यं वक्तुं प्रतिनियतफलत्वविरोधात्॥

बलवदनारब्धकर्मप्रतिबंधाच्च न कृत्स्नकर्माभिव्यक्तिरित्याह॥ अपि चेत्यादिना॥ तस्य कृत्स्नकर्मव्यंजकत्वे हेतुर्नास्तीति भावः॥ प्रश्नं मत्वोत्तरं शंकते॥ आरब्धेति॥ आरब्धवदनारब्धस्यापि बलवतः प्रतिबंधकत्वान्न सर्वकर्मणः फलदानायाभिव्यक्तिरिति समाधत्ते॥ यथेति॥ अनारब्धफलत्वाविशेषात्सर्वकर्मणामभिव्यक्तिमाशंक्य मिथो विरुद्धस्वर्गनरकादिदेहफलानामेकदेहारंभकत्वासंभव उक्तं विवृणोति नहीति॥ ८ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अस्तु तर्हि दुर्बलस्य कर्मणो नाश इत्यत आह नापीति ॥ नाभुक्तं क्षीयते कर्मेत्येकांतउत्सर्गः स च प्रायश्चित्तब्रह्मज्ञानध्यानैर्वोध्यते नमरणमात्रेणेत्य नराम ॥ ३ ॥
र्थः मरणेन दुर्बलकर्मो विनाशे मानमाह ॥ स्मृतिरिति ॥ कर्मनाशपक्षं निरस्य मरणस्य कृत्स्नकर्माभिव्यक्तिपक्षे दोषांतरमाह ॥ यदि चेति ॥ कृत्स्नकर्मणा मेकस्मिन्देवादिजन्मनि भोगेन क्षयात् जन्मांतरं स्यात् ज्ञानाभावान्मुक्तिरित्यज्ञदेवस्य कष्टं दुःशास्यादित्यर्थः ॥ श्वसूकरखरोष्ट्राणां गोजाविमृ गपक्षिणां चंडालपुल्कसानां च ब्रह्महा योनिमृच्छतीत्यादिस्मृतिविरोधाच्च न सर्वकर्मणामेकजन्मारंभकत्वमित्याह ॥ ब्रह्मेति ॥ नन्वेकस्य कर्मण:

नापि कस्यचित्कर्मणः प्रायणेऽभिव्यक्तिः कस्यचिदुच्छेद इति शक्यते वक्तुं ऐकांतिकफलत्वविरोधात् ॥ नहि प्रायश्चित्तादि भिर्हेतुभिर्विना कर्मणामुच्छेदः संभाव्यते ॥ स्मृतिरपि विरुद्धफलेन कर्मणा प्रतिबद्धस्य कर्मणोऽनवस्थानं दर्शयति ॥ कदाचित्सुकृतं कर्म कूटस्थमिव तिष्ठति ॥ मज्जमानस्य संसारे यावद्दुःखाद्विमुच्यत इत्येवंजातीयका ॥ यदि च कृत्स्नमा रब्धफलं कर्म एकस्मिन्प्रायणे युगपदभिव्यक्तं सदेकां जातिमारभेत ततः स्वर्गनरकतिर्यग्योनिषु अधिकारानवग माद्धर्माधर्मानुत्पत्तौ निमित्ताभावान्नोत्तरा जातिरुपपद्येत ॥ ब्रह्महत्यादीनां चैकैकस्य कर्मणोऽनेकजन्मनिमित्तत्वस्य येमाणमुपरुध्येत ॥ न च धर्माधर्मयोः स्वरूपफलसाधनादिसमधिगमे शास्त्राद्दतिरिक्तं कारणं शक्यं संभावयितुं ॥ न चरदृष्टफलस्य कर्मणः कारीर्यादेः प्रायणमभिव्यंजकं संभवतीत्यव्यापिकापीयं प्रायणस्याभिव्यंजकत्वकल्पना ॥ प्रदी पोपन्यासोऽपि कर्मबलाबलप्रदर्शनेनैव प्रतिनीतः ॥ स्थूलसूक्ष्मरूपाभिव्यक्त्यनभिव्यक्तिवच्चेदं द्रष्टव्यम् ॥ ६ ॥

कथमनेकजन्मफलकत्वं अदृष्टत्वादित्यत आह ॥ न चेति ॥ किंच व्यंजकत्वेऽपि मरणस्य किं सर्वकर्मव्यंजकत्वं कल्प्यते उत यत्किंचित्कर्मव्यंजकत्वं नाद्यः ॥ इह त्वन कारीर्यादेरत्रैव फलहेतोर्मरणव्यंग्यत्वासंभवादित्याह ॥ न चेति ॥ द्वितीयं निरस्यन् परोक्तं दृष्टान्तं विघटयति ॥ प्रदीपेति ॥ स्त्र्याणां प्रदीपवत् मरणं न कस्यचिदपि कर्मणो व्यंजकं किंतु प्रबलकर्मप्रतिबंधाभावे दुर्बलं व्यज्यत इत्यर्थः ॥ एवं मरणस्य व्यंजकत्वानंगीकारेण प्रदीपदृ ष्टांतो निरस्तः अंगीकारेऽप्यननुकूलो दृष्टांत इत्याह ॥ स्थूलेति सूक्ष्मम् अनुद्भूतरूपमिति मरणे सर्वकर्माभिव्यक्त्यसिद्धिरिति शेषः ॥ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं सर्वकर्मसंघ एकजन्मारंभक इत्यैकभविकः कर्माशय इति मतनिरासमुपसंहरति तस्मादिति॥ चरणश्रुत्याऽनन्तः शेषेणेत्यादिस्मृत्या प्रबलप्रतिबंधादिति न्यायेन चानभिव्यक्तकर्मसद्भावादित्यर्थः॥ ननु मुक्त्यनुपपत्त्याङ्गीकार्य ऐकभविक इत्यत आह॥ शेषेति॥ सूत्रशेषं व्याचष्टे॥ तेनैत्यादिना॥ अवरोहमार्ग इत्थं श्रूयते तस्मिन्यावत्संपातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्तेऽतो वै खलु

यथा हि प्रदीपः समानेऽपि सन्निधाने स्थूलं रूपमभिव्यनक्ति न सूक्ष्मं॥ एवं प्रायणमपि समानेऽप्यनारब्धफलस्य कर्मजातस्य प्राप्तावसरत्वे बलवतः कर्मणो वृत्तिमुद्भावयति न दुर्बलस्येति॥ तस्माच्छ्रुतिस्मृतिन्यायविरोधादश्लिष्टोऽयमशेषकर्माभिव्यक्त्यभ्युपगमः॥ शेषकर्मसद्भावेऽनिर्मोक्षप्रसंग इत्ययमप्यस्थाने संभ्रमः सम्यग्दर्शनादशेषकर्मक्षयश्रुतेः॥ तस्मात्स्थितमेतदनुशयवन्तोऽवरोहन्तीति॥ ते चावरोहन्तो यथेतमनेवं चावरोहन्ति॥ यथेतमिति यथागतमित्यर्थः॥ अनेवमिति तद्विपर्ययेणेत्यर्थः॥ धूमाकाशयोः पितृयाणेऽध्वन्युपात्तयोरवरोहे संकीर्तनाद्यथेतंशब्दाच्च यथागतमिति प्रतीयते॥ रात्र्याद्यसंकीर्तनात् अभ्राद्युपसंख्यानाच्च विपर्ययोऽपि प्रतीयते॥

दुर्निष्प्रपतरं यो यो ह्यन्नमत्ति यो रेतः सिंचति तद्भूय एव भवति तद्य इह रमणीयचरणा रमणीयां योनिमापद्यन्त इति धूमाद्यध्वना यथेतं यथागतं तथैतमध्वानं पुनरायान्तीत्युक्त्वा धूमादिरूपपितृमार्गस्थरात्र्यादिकं नोक्तं अधिकं चाभ्रादिकमुक्तमिति मत्वा सूत्रकृतोक्तं यथेतमनेवं चेति॥ अवशिष्टश्रुत्यर्थोऽग्रे स्फुटीभविष्यति॥८॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पुस्तकांतरेषुस्मृतावक्रोधाद्रोहादयइतिपाठोदृश्यते॥ टि.पं.२

शा.भा. संमतिश्रुतिस्थचरणशब्दमाक्षेपपूर्वकंसूत्रकृद्व्याचष्टे॥ चरणादितिचेदिति॥ अद्रोहः सर्वभूतेषुकर्मणामनसागिरा अनुग्रहश्चज्ञानंचशीलमेतत्(

टी. विदुर्बुधाइतिस्मृतावुक्ताअद्रोहादयः शास्त्रार्थज्ञानरूपंशीलंसर्वकर्मांगमुक्तंतद्बोधकंचरणपदमंगिनः श्रौतादिकर्मणोलक्षकंकर्मणश्चोत्तरा

र.प्र. वस्थाधर्माधर्माख्याः पूर्वमितिकर्मलक्षणयैवतदभिन्नापूर्वाख्यानुशयसिद्धिरितिकार्ष्णाजिनिमतं॥९॥ तदेवशंकासमाधानाभ्यामाह॥ आनर्थक्यमि

२१।६ तिचेदित्यादिनासूत्रेण॥ चरणशब्दवाच्यस्यैवग्रहणसंभवान्नलक्षणायुक्तेतिशंकितेनैवसूत्रे नत्विति प्रतिषिद्धंशीलंक्वाधानुमादिरूपं॥ किंचशीलस्यनि

चरणादितिचेन्नोपलक्षणार्थेतिकार्ष्णाजिनिः॥९॥ अथापिस्यात्यास्तुतिरनुशयसद्भावप्रतिपादनायोदाहृतातद्यइहरमणीयचरणाइतिसाखलुचरणाद्योन्यापत्तिंदर्शयतिनानुशयादन्यच्चरणमन्योनुशयश्चरणंचारित्रमाचारःशीलमित्यनर्थांतरमनुशयस्तुभुक्तफलात्कर्मणोतिरिक्तंकर्माभिप्रेतं॥ श्रुतिश्चकर्मचरणेभेदेनव्यपदिशति॥ यथाकारीयथाचारीतथाभवतीति॥ यान्यनवद्यानिकर्माणितानिसेवितव्यानिनोइतराणियान्यस्माकंसुचरितानितानित्वयोपास्यानीतिच॥ तस्माच्चरणाद्योन्यापत्तिश्रुतेर्नानुशयसिद्धिरितिचेन्नैषदोषोयतोनुशयोपलक्षणार्थैवैषाचरणश्रुतिरितिकार्ष्णाजिनिराचार्योमन्यते॥९॥ आनर्थक्यमितिचेन्नतदपेक्षत्वात्॥१०॥ स्यादेतत्कस्मात्पुनश्चरणशब्देनश्रौतंशीलंविहायलाक्षणिकोनुशयःप्रत्याय्यते॥ ननुशीलस्यैवश्रौतस्यविहितप्रतिषिद्धस्यसाध्वसाधुरूपस्यशुभाशुभयोन्यापत्तिःफलंभविष्यति॥ अवश्यंचशीलस्यापिकिंचित्फलमभ्युपगंतव्यं॥ अन्यथाह्यानर्थक्यमेवशीलस्यप्रसज्येतेतिचेत् नैषदोषः कुतस्तदपेक्षत्वात्॥ इष्टादिहिकर्मजातंचरणापेक्षं॥ नहिसदाचारहीनःकश्चिदधिकृतःस्यात्॥ आचारहीनंनपुनंतिवेदाइत्यादिस्मृतिभ्यः॥ पुरुषार्थत्वेप्याचारस्यनानर्थक्यं॥ इष्टादौहिकर्मजातेफलमारभमाणेतदपेक्षएवाचार(स्तत्रैवकंचिदतिशयमारभ्यते॥ कर्मचसर्वार्थकारीतिश्रुतिस्मृतिप्रसिद्धिस्तस्मात्कर्मैवशीलोपलक्षितमनुशयभूतंयोन्यापत्तौकारणमितिकार्ष्णाजिनेर्मतं॥ नहिकर्मणिसंभवतिशीलाद्योन्यापत्तिर्युक्ता॥ नहिपद्भ्यांपलायितुंपारयमाणोजानुभ्यांरंहितुमर्हतीति॥१०॥

ष्फलत्वायोगात्कुतयोन्यापत्तिस्तस्यैवफलंनानुशयस्येत्याह॥ अवश्यंचेति॥ वेदास्तदर्थंकर्माण्याचारं विनानफलंतीतिस्मृत्याशीलस्यकर्मांगत्वात्(एव
कृफलापेक्षाअंगीफलेनार्थवत्वान्नचांगमात्राद्योन्यापत्तिःफलमितिवाच्यंअंगस्यफलासंभवेनमुख्यार्थस्याचारस्यग्रहणायोगाल्लक्षणायुक्तेतिसमाधा
नार्थः॥ सदाचारस्यस्नानादिवत्पुरुषसंस्कारतयापुरुषार्थत्वंतदाप्यविरोधइत्याह॥ पुरुषार्थत्वेपीति॥ अंगावबद्धोपास्तिवदाचारोर्थवानित्यर्थः॥ अस्तुतर्हि

अ.पा. ३।१

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यद्यप्यक्रोधादिरूपं शीलं साधारणधर्मात्मकं विशेषरूपात्कर्मणो भिन्नं तथापि चरणाचारशब्दौ कर्मवाचिनावेव न शीलवाचकाविति नलक्षणावसर इति बादरिमतं सुस्थमिति सिद्धांतमाह ॥ सुकृतेति ॥ चरणशब्दार्थमुपसंहरति ॥ आचारोपीति ॥ कर्मण एवाचारत्वे यथाकारी त्यादिभेदोक्तिः कथमित्यत आह ॥ भेदव्यपदेश इति निरुपपदाचारशब्दात्सदाचाररूपो विशेषो भाति ॥ अनंतरममभिव्याहृतकर्मसामान्यवाचको यथाकारीतिशब्दस्तदितरविशेषपरः एवमनवद्यानि कर्माणीति सामान्यतः अस्माकं सुचरितानीति विशेष इति विवेकः ॥ तस्मादनुशयवत्तादागत्य वर्षभावानुसंधानाद्वैराग्यमिति सिद्धं ॥ ११ ॥ एवं

सुकृतदुःकृते एवेति तु बादरिः ॥ ११ ॥ बादरिस्त्वाचार्यः सुकृतदुःकृते एव चरणशब्देन प्रत्याय्येते इति मन्यते ॥ चरणमनुष्ठानं कर्मेत्यनर्थांतरं तथाह्यविशेषेण कर्ममात्रे चरतिः प्रयुज्यमानो दृश्यते ॥ यो हीष्टादिलक्षणं पुण्यं कर्म करोति तं लौकिका आचक्षते धर्मं चरत्येष महात्मेति ॥ आचारोपि च धर्मविशेष एव ॥ भेदव्यपदेशस्तु कर्मचरणयोर्ब्राह्मणपरिव्राजकन्यायेनाप्युपपद्यते ॥ तस्माद्रमणीयचरणाः प्रशस्तकर्माणः कपूयचरणा निंदितकर्माण इति निर्णयः ॥ ११ ॥ २ ॥ अनिष्टादिकारिणामपि च श्रुतं ॥ १२ ॥ इष्टादिकारिणश्चंद्रमसं गच्छंतीत्युक्तं ये त्वितरे निष्टादिकारिणस्तेपि किं चंद्रमसं गच्छंति उत न गच्छंतीति चिंत्यते ॥ तत्र तावदाहुः ॥ इष्टादिकारिण एव चंद्रमसं गच्छंतीत्येतन्न कस्मात् ॥ यतोऽनिष्टादिकारिणामपि चंद्रमंडलं गंतव्यत्वेन श्रुतं ॥ तथाह्यविशेषेण कौषीतकिनः समामनंति ॥ ये वै के चास्माल्लोकात्प्रयंति चंद्रमसमेव ते सर्वे गच्छंतीति ॥ देहारंभोपि च पुनर्जायमानानां नांतरेण चंद्रप्राप्तिमवकल्पते ॥ पंचम्यामाहुतावित्याहुतिसंख्यानियमात् तस्मात्सर्व एव चंद्रमसमासीदेयुः ॥ इष्टादिकारिणामितरेषां च समानगतित्वं न युक्तमिति चेन्नेतरेषां चंद्रमंडले भोगाभावात् ॥ १२ ॥ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥ १३ ॥

पुण्यात्मनां गत्यागतिचिंतया वैराग्यं निरूप्य पापिनां तच्चिंतया तन्निरूपयति ॥ अनिष्टादिकारिणामपि च श्रुतं ॥ ये वै के चेत्यविशेषश्रुतेर्वैवस्वतं संगमनं जनानामिति श्रुतेश्च संशये प्रथमाधिकरणेन सिद्ध नियमाक्षेपसंगत्या पूर्वपक्षसूत्रं व्याचष्टे ॥ तत्रेत्यादिना ॥ यमराजं पापिजनानां समयगमयं हविषा प्रीणयत इति श्रुत्यर्थः ॥ पूर्वपक्षे पुण्यवतामेव चंद्रगतिरिति नियमाभावात्पुण्ये वैयर्थ्यं पापाद्वैराग्यादार्ढ्यं चेति फलं ॥ सिद्धांते पापिनां चंद्रलोकदर्शनमपि नास्तीति पुण्यार्थेवत्त्वं वैराग्यदार्ढ्यं चेति फलं ॥ पचमाग्नौ देहारंभ इति नियमात् पापिनामपि प्रथमं द्युलोकाग्निप्राप्तिर्वाच्येत्याह ॥ देहारंभ इति ॥ पापिनां स्वर्गभोगा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सिद्धांतसूत्रं व्याचष्टे॥ तुशब्द इत्यादिना॥ संयमने यमलोके यमकृता यातनाः अनुभूयावरोहंतीत्येवं आरोहावरोहाविति योजना सूत्रस्य ज्ञेया॥ प्रयतां मृतानां गच्छतां सम्यक् परस्तात्प्राप्यत इति संपरायः परलोकः तदुपायः सांपरायो बालमज्ञं विशेषणं वित्तरागेण मूढं मोहात्प्रमाद्यंतं॥ अ॰पा॰ ३।१

तुशब्दः पक्षं व्यावर्त्तयति॥ नैतदस्ति सर्वे चंद्रमसं गच्छंतीति॥ कस्मात्॥ भोगायैव हि चंद्रारोहणं न निःप्रयोजनं॥ नापि प्रत्यवरोहणायैव यथा कश्चिद्वृक्षमारोहति पुष्पफलोपादानायैव न निष्प्रयोजनं नापि पतनायैव भोगश्चानिष्टादिकारिणां चंद्रमसि नास्तीत्युक्तं॥ तस्मादिष्टादिकारिण एव चंद्रमसमारोहंति नेतरे॥ ते तु संयमनं यमालयमवगाह्य स्वदुष्कृतानुरूपा यामीर्यातना अनुभूय पुनरेवेमं लोकं प्रत्यवरोहंत्येवंभूतौ तेषामारोहावरोहौ भवतः॥ कुतः॥ तद्गतिदर्शनात्॥ तथा हि यमवचनस्वरूपा श्रुतिः प्रयतामनिष्टादिकारिणां यमवश्यतां दर्शयति॥ न सांपरायः प्रतिभाति बालं प्रमाद्यंतं वित्तमोहेन मूढं॥ अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते म इति वैवस्वतं संगमनं जनानामित्येवंजातीयकं च बह्वेव यमवश्यताप्राप्तिलिंगं भवति॥ १३॥ स्मरंति च॥ १४॥ अपि च मनुव्यासप्रभृतयः शिष्टाः संयमने पुरे यमायत्तं कुत्सितकर्मविपाकं स्मरंति नाचिकेतोपाख्यानादिषु॥ १४॥ अपि च सप्त॥ १५॥ अपि च सप्त नरका रौरवप्रमुखा दुष्कृतफलोपभोगभूमित्वेन स्मर्यंते पौराणिकैः तानतिष्टादिकारिणः प्राप्नुवंति कुतस्ते चंद्रं प्राप्नुयुरित्यभिप्रायः॥ १५॥ ननु विरुद्धमिदं यमायत्ता यातनाः पापकर्माणोऽनुभवंतीति॥ यावता तेषु रौरवादिष्वन्ये चित्रगुप्तादयो नानाधिष्ठातारः स्मर्यंत इति॥ नेत्याह॥ तत्रापि च तद्व्यापारादविरोधः॥ १६॥ तेष्वपि च सप्तसु नरकेषु तस्यैव यमस्याधिष्ठातृत्वव्यापाराभ्युपगमादविरोधः॥ यमप्रयुक्ता एव हि ते चित्रगुप्तादयोऽधिष्ठातारः स्मर्यंत इति॥ १६॥ २५२

वैवस्वतं प्रति न भाति स च बालो यस्मात् वित्तादिर्लोकोऽस्ति न परलोकोऽस्तीति मानी स मे मम यमस्य वशमापद्यत इत्यर्थः॥ पापिनां यमवश्यतावादिविशेषश्रुतिस्मृतिबलात् ये वै के चेत्यविशेषश्रुतिरिष्टादिकारिविषयत्वेन व्याख्येयेति भावः॥ १३॥ सूत्रत्रयस्य भाष्यं सुबोधं॥ १४॥ १५॥ १६

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यदुक्तं मार्गान्तराभावात्पापिनामपि चंद्रगतिरिति तन्न तृतीयमार्गोऽस्तीत्याह। विद्याकर्मणोरिति॥ मार्गद्वयोक्त्यनंतरं तृतीयमार्गोक्तिप्रारंभार्थः तुशब्दः॥ एतयोर्विद्याकर्मणोः पथिद्वयसाधनयोरन्यतरेणापि साधनेन ये नरा न युक्तास्ते जन्ममरणावृत्तिरूपतृतीयमार्गस्था भूतानि भवंति॥ कि

विद्याकर्मणोरिति तु प्रकृतत्वात्॥१७॥ पंचाग्निविद्यायां वेत्थ यथासौ लोको न संपूर्यत इत्यस्य प्रश्नस्य प्रतिवचनावसरे श्रूयते। अथैतयोः पथोर्न कतरेणचन तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवंति। जायस्व म्रियस्वेत्येतत् तृतीयं स्थानं तेनासौ लोको न संपूर्यत इति॥ तत्रैतयोः पथोरिति विद्याकर्मणोरित्येतत्। कस्मात् प्रकृतत्वात्॥ विद्याकर्मणी हि देवयानपितृयाणयोः पथोः प्रतिपत्तौ प्रकृते। तद्य इत्थं विदुरिति विद्यया प्रतिपत्तव्यो देवयानः पंथाः प्रकीर्तितः॥ इष्टापूर्ते दत्तमिति कर्मणा प्रतिपत्तव्यः पितृयाणः पंथाः प्रकीर्तितः तस्मिन्प्रक्रियायामथैतयोः पथोर्न कतरेणचनेति श्रुतं एतदुक्तं भवति येन विद्यासाधनेन देवयाने पथ्यधिकृताः नापि कर्मणा पितृयाणे तेषामेष क्षुद्रजंतुलक्षणोऽसकृदावर्ती तृतीयः पंथा भवतीति॥ तस्मादपि नानिष्टादिकारिभिश्चंद्रमाः प्राप्यते॥ स्यादेतत्। तेऽपि चंद्रबिंबमारुह्य ततोऽवरुह्य क्षुद्रजंतुत्वं प्रतिपत्स्यंत इति॥ तदपि नास्त्यारोहानर्थक्यात् अपि च सर्वेषु प्रयत्सु चंद्रलोकं प्राप्नुवत्सु असौ लोकः प्रयद्भिः संपूर्येतेत्यतः प्रश्नविरुद्धं प्रतिवचनं प्रसज्येत॥ तथा हि प्रतिवचनं दातव्यं यथाऽसौ लोको न संपूर्यते॥ अवरोहाभ्युपगमात् असंपूरणोपपत्तिरिति चेत् न अश्रुतत्वात् सत्यमवरोहादप्यसंपूरणमुपपद्यते श्रुतिस्तु तृतीयस्थानसंकीर्तनेनासंपूरणं दर्शयति॥ एतत्तृतीयं स्थानं तेनासौ लोको न संपूर्यत इति॥ तेनानारोहादेवासंपूरणमिति युक्तं॥ अवरोहस्येष्टादिकारिष्वप्यविशिष्टत्वे सति तृतीयस्थानोक्त्याऽऽनर्थक्यप्रसंगात् तुशब्दस्तु शाखांतरीयवाक्यप्रभवामशेषगमनाशंकामुच्छिनत्ति॥ एवं सत्यधिकृतापेक्षः शाखांतरीये वाक्ये सर्वशब्दोऽवतिष्ठते॥ ये वै के चाधिकृता अस्माल्लोकात्प्रयंति चंद्रमसमेव ते सर्वे गच्छंतीति॥

यावत्तौ लोक इत्येतेन पापिनां चंद्रगत्यभावात् चंद्रलोको न संपूर्यत इति श्रुत्यर्थः॥ प्रतिपत्ताविति प्राप्तिसाधने इत्यर्थः॥ अपि च पापिनां चंद्रगतावसौ लोकः संपूर्येत अतश्च न संपूर्यत इत्येतत्प्रतिवचनं विरुद्धं प्रसज्येतेत्यन्वयः॥ अवरोहादसंपूरणमश्रुतं न कल्प्यं श्रुतहान्यापत्तेरित्याह॥ नाश्रुतत्वादिति॥ अवरो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इममध्वानंपुनर्निवर्तन्तइतिइष्टादिकारिणामवरोहोक्तेरनिष्टादिकारिणामपिअवरोहस्यार्थसिद्धत्वात्पुनरुक्तिर्व्यर्थेत्यर्थः॥अथैतयोरितिमार्गेतरोप
क्रमबाधस्तृतीयशब्दबाध्यत्वेनतःस्थानशब्दोमार्गलक्षकइतिद्रष्टव्यं १७ एवमविशेषश्रुतेर्मार्गेतराभावात्त्वेतिपूर्वपक्षबीजद्वयंनिरस्यतृतीयबीजनि
रासार्थंसूत्रमादत्ते यत्पुनरित्यादिना विद्याकर्मशून्यानांक्रिमिकीटादिभावेनजायस्वेत्यादिश्रुत्यानिरंतरजन्ममरणोपलब्धेर्नाहुतिसंख्यादरइत्यर्थः॥पु

यत्पुनरुक्तंदेहलाभोपपत्तयेसर्वेचन्द्रमसंगन्तुमर्हन्तिपंचम्यामाहुताविन्याहुतिसंख्यानियमादितितत्प्रत्युच्यते॥नतृतीयेतथोप(
लब्धेः॥१८॥नतृतीयेस्थानेदेहलाभायपंचसंख्यानियमआहुतीनामादर्तव्यः कुतः तथोपलब्धेः॥तथाह्यन्तरेणैवाहुति
संख्यानियमंवर्णितेनप्रकारेणतृतीयस्थानप्राप्तिरुपलभ्यते॥जायस्वम्रियस्वेत्येतत्तृतीयंस्थानमिति॥अपिचपंचम्यामाहु
तावापःपुरुषवचसोभवन्तीतिमनुष्यशरीरहेतुत्वेनाहुतिसंख्यासंकीर्त्यतेनेनकीटपतंगादिशरीरहेतुत्वेनपुरुषशब्दस्यमनु(
ष्यजातिवचनत्वात्॥अपिचपंचम्यामाहुतावपांपुरुषवचस्त्वमुपदिश्यतेनापंचम्यामाहुतौपुरुषवचस्त्वंप्रतिषिध्यतेवाक्यस्य(
द्व्यर्थतादोषात्तत्रयेषामारोहावरोहौसंभवतस्तेषांपंचम्यामाहुतौदेहउद्भविष्यत्यन्येषांतुविनैवाहुतिसंख्ययाभूतान्तरोपसृष्टा
भिरद्भिर्देहआरप्स्यते॥१८॥स्मर्यतेपिचलोके॥१९॥अपिचस्मर्यतेलोकेद्रोणधृष्टद्युम्नप्रभृतीनांसीताद्रौपदीप्रभृतीनांचायो
निजत्वंतत्रद्रोणादीनांयोषिद्विषयैकाहुतिर्नास्तिधृष्टद्युम्नादीनांतुयोषित्पुरुषविषयेद्वेअप्याहुतीनस्तः॥यथाचतत्राहुतिसं
ख्यानादरोभवतिएवमन्यत्रापिभविष्यति॥बलाकाप्यन्तरेणैवरेतःसेकंगर्भंधत्तइतिलोकरूढिः॥१९॥दर्शनाच्च॥२०॥अपि २९८
चचतुर्विधेभूतग्रामेजरायुजांडजस्वेदजोद्भिज्जलक्षणेस्वेदजोद्भिज्जयोरन्तरेणैवग्राम्यधर्ममुत्पत्तिदर्शनादाहुतिसंख्यानादरोभ

रुषशब्दस्यैवमित्याह॥अपिचेति॥मनुष्यदेहस्यापिनाहुतिसंख्यानियमइत्याह॥अपिचेत्यादिना॥ (वति॥एवमन्यत्रापिभविष्यति॥
विधिनिषेधरूपार्थद्वयेवाक्यभेदःस्यादित्यर्थः॥१८॥अनियमेस्मृतिसंवादार्थंसूत्रं॥स्मर्यतेपीति॥लोक्यतेनेनेतिलोकोभारतादिरुक्तःसुखा
र्थमप्याह॥बलाकेति॥१९॥अंडजानिचजारुजानिचस्वेदजानिचोद्भिज्जानिचेतिश्रुत्यवष्टंभेनसूत्रंव्याचष्टेअपिचेति॥अन्यत्राप्यनिष्टादिकारि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अनयाश्रुत्या चातुर्विध्यं कथमुक्तं श्रुत्यन्तरे त्रीण्येवेत्यवधारणविरोधादिति शंकोत्तरत्वेन सूत्रमादत्ते ॥ नन्वित्यादिना ॥ जीवजं जरायुजं मनुष्यादि ॥ भूमिमुद्भिद्य जायत इत्युद्भिज्जं स्थावरादिकं उदकं भित्त्वा जायत इति यूकादिर्जंगममिति भेदः संशोकः स्वेदः ॥ २१ ॥ एवं यागादिकारिणां गमनागती विचार्य संप्रतीष्टादिकारिणामवरोहे विशेषमाह ॥ साभाव्यापत्तिरुपपत्तेः ॥ यथेतमनेवं चेत्युक्तं तत्प्रकारमाह यथागतं धूमाद्यध्वानं पुनर्निवर्तन्ते निरूढमार्गानुयायिनः कर्मिणः इत्युक्तं देहाः आकाशं गताः आकाशसदृशा भवन्ति आकाशसादृश्यानन्तरं पिंडीकृतानि सूक्ष्माणि अंगोपहितानि वायुनेतस्ततो नीयमानानि वायुसमानि भवन्ति सोऽनुशयिनां वायुः वायुसमो भूत्वा धूमं संगतस्तत्समो

ननु तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जमित्यत्र त्रिविध एव भूतग्रामः श्रूयते कथं चतुर्विधत्वं भूतग्रामस्य प्रतिज्ञातमित्यत्रोच्यते ॥ तृतीयशब्दावरोधः संशोकजस्य ॥ २१ ॥ आंडजं जीवजमुद्भिज्जमित्यत्र तृतीयेनोद्भिज्जशब्देनैव स्वेदजोपसंग्रहः कृतः प्रत्येतव्यः ॥ उभयोरपि स्वेदजोद्भिज्जयोर्भूम्युदकोद्भेदप्रभवत्वस्य तुल्यत्वात् स्थावरोद्भेदात्तु विलक्षणो जंगमोद्भेद इत्य   न्यत्र स्वेदजोद्भिज्जयोर्भेदवाद इत्यविरोधः ॥ ३ ॥ २१ ॥ साभाव्यापत्तिरुपपत्तेः ॥ २२ ॥ इष्टादिकारिणश्चन्द्रमसमारुह्य तस्मिन् यावत्संपातमुषित्वा ततः सानुशया अवरोहन्तीत्युक्तं ॥ अथावरोहप्रकारः परीक्ष्यते ॥ तत्रेयमवरोहश्रुतिर्भवति ॥ अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वा   ऽभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षतीति ॥ तत्र संशयः ॥ किमाकाशादिस्वरूपमेवावरोहन्तः प्रतिपद्यन्ते ॥ किं वाकाशादिसाम्यमिति ॥ तत्र प्राप्तं तावदाकाशादिस्वरूपमेव प्रतिपद्यन्त इति ॥ कुतः ॥ एवं हि श्रुतिर्भवति इतरथा लक्षणा स्यात् ॥ श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या न लक्षणा ॥ तथा च वायुर्भूत्वा धूमो भवतीत्येवमादीन्यक्षराणि तत्तत्स्वरूपोपपत्तावाञ्जस्येनावकल्पन्ते ॥ १

भवति धूमसमो भूत्वाऽभ्रसमो भवति अपो बिभर्तीत्यभ्रं मेहति सिंचतीति वृष्टिकर्ता मेघस्तत्समो भूत्वा वर्षधाराद्वारा पृथिवीं प्रविश्य व्रीहियवादिरूपो भवतीति सिद्धान्तगम्यः श्रुत्यर्थः ॥ पूर्वोत्तरयुक्तिद्वयं संशयबीजं मन्तव्यं ॥ पूर्वत्र मार्गद्वयं च तृतीयमतो गुरूक्तं स्थानशब्दस्य मार्गलक्षकत्वं इह तु इदं धूमो भवतीत्यादिप्रत्ययो भवति श्रुतेर्विकारस्वरूपापत्तौ मुख्यत्वात् लक्षणायां बीजाभावात् तन्मात्रमनुदाहरणसंगतिः श्रुतिमुख्यत्वफलमिति पूर्वपक्षः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भा॰ इमममध्वानं पुनर्निवर्तन्त इति इष्टादिकारिणामवरोहो केवलमनिष्टादिकारिणामपि अवरोहस्यार्थसिद्धत्वात्पुनरुक्तिर्व्यर्थेत्यर्थः ॥ अथैतयोरिति मार्गेणेतरोप
क्रमबाधस्तृतीयशब्दबाधश्चेत्यतः स्थानशब्दो मार्गलक्षक इति द्रष्टव्यं १७ एवमविशेषश्रुतेर्मार्गेतराभावाच्चेति पूर्वपक्षबीजद्वयं निरस्य तृतीयबीजनि अ० ३ पा० १
रासार्थं सूत्रमादत्ते यत्पुनरित्यादिना विद्याकर्मशून्यानां क्रिमिकीटादिभावेन जायस्वम्रियस्वेत्यादिश्रुत्या निरंतरजन्ममरणोपलब्धेर्नाहुतिसंख्यादर इत्यर्थः ॥ पु

यत्पुनरुक्तं देहलाभोपपत्तये सर्वेषां द्युसंगंतव्यं पंचम्यामाहुतावित्याहुतिसंख्यानियमादिति तत्प्रत्युच्यते ॥ न तृतीये तथोप
लब्धेः ॥ १८ ॥ न तृतीयस्थाने देहलाभाय पंचसंख्यानियम आहुतीनामादर्तव्यः कुतः तथोपलब्धेः ॥ तथाह्यंतरेणैवाहुति
संख्यानियमं वर्णितेन प्रकारेण तृतीयस्थानप्राप्तिरुपलभ्यते ॥ जायस्व म्रियस्वेत्येतत्तृतीयं स्थानमिति ॥ अपि च पंचम्यामाहु
तावापः पुरुषवचसो भवंतीति मनुष्यशरीरहेतुत्वेनाहुतिसंख्या संकीर्त्यते न कीटपतंगादिशरीरहेतुत्वेन पुरुषशब्दस्य मनु
ष्यजातिवचनत्वात् ॥ अपि च पंचम्यामाहुतावपां पुरुषवचस्त्वमुपदिश्यते नापंचम्यामाहुतौ पुरुषवचस्त्वं प्रतिषिध्यते वाक्य
स्य द्व्यर्थतादोषात् तत्र येषामारोहावरोहौ संभवतस्तेषां पंचम्यामाहुतौ देह उद्भविष्यत्यन्येषां तु विनैवाहुतिसंख्यया भूतांतरोपसृष्टा
भिरद्भिर्देह आरप्स्यते ॥ १८ ॥ स्मर्यतेऽपि च लोके ॥ १९ ॥ अपि च स्मर्यते लोके द्रोणधृष्टद्युम्नप्रभृतीनां सीताद्रौपदीप्रभृतीनां चायो
निजत्वं तत्र द्रोणादीनां योषिद्विषयैकाहुतिर्नास्ति धृष्टद्युम्नादीनां तु योषित्पुरुषविषये द्वे अप्याहुती न स्तः ॥ यथा च तत्राहुतिसं २५८
ख्यानादरो भवति एवमन्यत्रापि भविष्यति ॥ बलाकाप्यंतरेणैव रेतःसेकं गर्भं धत्त इति लोके रूढिः ॥ १९ ॥ दर्शनाच्च ॥ २० ॥ अपि
च चतुर्विधे भूतग्रामे जरायुजांडजस्वेदजोद्भिज्जलक्षणे स्वेदजोद्भिज्जयोरंतरेणैव ग्राम्यधर्ममुत्पत्तिदर्शनादाहुतिसंख्यानादरो भ

रुषशब्दाच्चैवमित्याह ॥ अपि चेति ॥ मनुष्यदेहस्यापि नाहुतिसंख्यानियम इत्याह ॥ अपि चेत्यादिना ॥ (वति ॥ एवमन्यत्रापि भविष्यति ॥
विधिनिषेधरूपार्थद्वये वाक्यभेदः स्यादित्यर्थः ॥ १८ ॥ अनियमे स्मृतिसंवादार्थं सूत्रं ॥ स्मर्यतेपीति ॥ लोकशब्देन नेति लोको भारतादिरुक्तः प्रत्या
र्थमप्याह ॥ बलाकेति ॥ १९ ॥ अंडजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि चेति श्रुत्यवष्टंभेन सूत्रं व्याचष्टे अपि चेति ॥ अन्यत्राप्यनिष्टादिकारि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अनयास्तु न्यायचातुर्विध्यं कथमुक्तं स्मृत्यन्तरे त्रीण्येवेत्यवधारणविरोधादिति शङ्कोत्तरत्वेन सूत्रमादत्ते॥ नन्वित्यादिना जीवजं जरायुजं मनुष्यादि॥ भूमिमुद्भिद्य जायते वृक्षादिकं उदकं भित्त्वा जायते यूकादिकं जंगममिति भेदः संशोकः स्वेदः॥२१॥ एवं चापि तावदागत्यागती विचार्य संप्रतीष्टादिकारिणामवरोहे विशेषमाह॥ साभाव्यापत्तिरुपपत्तेः॥ यथेतमनेवं चेत्युक्तत्वादयथागतं धूमाद्यध्वानं पुनर्निवर्तन्ते निरतमाश्वानुशायिनः कर्मोन्मुक्तदेहाः आकाशमागताः आकाशसदृशा भवन्त्याकाशसादृश्यानन्तरं पिण्डीकृतानि सूक्ष्माणि गोपद्रिताः वायुनेतस्ततस्त्रीयमाना वायुसमा भवन्ति सोऽनुशयिसंघो वायुसमो भूत्वा धूमं संगतस्तत्समो

ननु तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जमित्यत्र त्रिविध एव भूतग्रामः श्रूयते कथं चतुर्विधत्वं भूतग्रामस्य प्रतिज्ञातमित्यत्रोच्यते॥ तृतीयशब्दावरोधः संशोकजस्य॥२१॥ आण्डजं जीवजमुद्भिज्जमित्यत्र तृतीयेनोद्भिज्जशब्देनैव स्वेदजोपसंग्रहः कृतः प्रत्येतव्यः॥ उभयोरपि स्वेदजोद्भिज्जयोर्भूम्युदकोद्भेदप्रभवत्वस्य तुल्यत्वात् स्थावरोद्भेदात्तु विलक्षणो जंगमोद्भेद इत्य न्यत्र स्वेदजोद्भिज्जयोर्भेदवाद इत्यविरोधः॥३।२१॥ साभाव्यापत्तिरुपपत्तेः॥२२॥ इष्टादिकारिणश्चन्द्रमण्डलमारुह्य तस्मिन् यावत्संपातमुषित्वा ततः सानुशया अवरोहन्तीत्युक्तं॥ अथावरोहप्रकारः परीक्ष्यते॥ तत्रेयमवरोहश्रुतिर्भवति॥ अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वा अभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षतीति॥ तत्र संशयः॥ किमाकाशादिस्वरूपमेवावरोहन्तः प्रतिपद्यन्ते॥ किं वाकाशादिसाम्यमिति॥ तत्र प्राप्तं तावदाकाशादिस्वरूपमेव प्रतिपद्यन्त इति॥ कुतः॥ एवं हि श्रुतिर्भवतीतरथा लक्षणा स्यात्॥ श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या न लक्षणा॥ तथा च वायुर्भूत्वा धूमो भवतीत्येवमादीन्यक्षराणि तत्तत्स्वरूपोपपत्तावाञ्जस्येनावकल्पन्ते॥

भवति धूमसमो भूत्वाऽभ्रसमो भवति अपो बिभर्तीत्यभ्रं मेहति सिञ्चतीति वृष्टिकर्ता मेघस्तत्समो भूत्वा वर्षधाराद्वारा पृथिवीं प्रविश्य व्रीहियवादिरूपो भवतीति सिद्धान्तगत्या श्रुत्यर्थः॥ पूर्वोत्तरयुक्तिद्वयं संशयबीजं मन्तव्यं॥ पूर्वत्र मार्गद्वयं उक्त्वा तृतीयस्थानोक्तेर्युक्तं स्थानशब्दस्य मार्गलक्षकत्वं इह तु दुग्धं दधि भवतीत्यादिप्रयोगो भवतीति श्रुतेर्विकारस्वरूपापत्तौ मुख्यत्वात् सादृश्यापत्तिलक्षणाबीजं नास्तीति प्रत्युदाहरणसंगतिः श्रुतिमुख्यत्वफलमिति पूर्वपक्षः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इममध्वानं पुनर्निवर्तन्त इति इष्टादिकारिणामवरोहोक्तेरनिष्टादिकारिणामपि अवरोहस्यार्थसिद्धत्वात्पुनरुक्तिर्व्यर्थेत्यर्थः॥ अथैतयोरिति मार्गोतरोप
क्रमबाधस्तृतीयशब्दबाध्यश्चेत्यतः स्थानशब्दो मार्गलक्षक इति द्रष्टव्यं १७ एवमविशेषश्रुतेर्मार्गोत्तराभावाच्चेति पूर्वपक्षबीजद्वयं निरस्य तृतीयबीजनि
रासार्थं सूत्रमादत्ते यत्पुनरित्यादिना विद्याकर्मशून्यानां क्रिमिकीटादिभावेन जायस्वेत्यादिश्रुत्या निरंतरजन्ममरणोपलब्धेर्नाहुतिसंख्यादर इत्यर्थः पु

यत्पुनरुक्तं देहलाभोपपत्तये सर्वे चन्द्रमसं गन्तुमर्हन्ति पंचम्यामाहुतावित्याहुतिसंख्यानियमादिति तत्प्रत्युच्यते॥ न तृतीये तथोप(
लब्धेः॥१८॥ न तृतीये स्थाने देहलाभाय पंचसंख्यानियम आहुतीनामादर्तव्यः कुतः तथोपलब्धेः॥ तथा ह्यंतरेणैवाहुति
संख्यानियमं वर्णितेन प्रकारेण तृतीयस्थानप्राप्तिरुपलभ्यते॥ जायस्व म्रियस्वेत्येतत्तृतीयं स्थानमिति॥ अपि च पंचम्यामाहु
तावपः पुरुषवचसो भवंतीति मनुष्यशरीरहेतुत्वेनाहुतिसंख्या संकीर्त्यते न कीटपतंगादिशरीरहेतुत्वेन पुरुषशब्दस्य मनु(
ष्यजातिवचनत्वात्॥ अपि च पंचम्यामाहुतावपां पुरुषवचस्त्वमुपदिश्यते नापंचम्यामाहुतावपुरुषवचस्त्वं प्रतिषिध्यते वाक्य(
स्य द्व्यर्थतादोषात्। तत्र येषामारोहावरोहौ संभवतस्तेषां पंचम्यामाहुतौ देह उद्भविष्यत्यन्येषां तु विनैवाहुतिसंख्यया भूतांतरोपसृष्टा(
भिरद्भिर्देह आरप्स्यते॥१८॥ स्मर्यतेऽपि च लोके॥१९॥ अपि च स्मर्यते लोके द्रोणधृष्टद्युम्नप्रभृतीनां सीताद्रौपदीप्रभृतीनां चायो(
निजत्वं तत्र द्रोणादीनां योषिद्विषयैकाहुतिर्नास्ति धृष्टद्युम्नादीनां तु योषित्पुरुषविषये द्वे अप्याहुती न स्तः॥ यथा च तत्राहुतिसं(
ख्यानादरो भवत्येवमन्यत्रापि भविष्यति॥ बलाकाप्यंतरेणैव रेतः सेकं गर्भं धत्त इति लोके रूढिः॥१९॥ दर्शनाच्च॥२०॥ अपि
च चतुर्विधे भूतग्रामे जरायुजांडजस्वेदजोद्भिज्जलक्षणे स्वेदजोद्भिज्जयोरंतरेणैव ग्राम्यधर्ममुत्पत्तिदर्शनादाहुतिसंख्यानादरो भ(वति)॥ एवमन्यत्रापि भविष्यति॥

रुषशब्दश्चैवमित्याह॥ अपि चेति॥ मनुष्यदेहस्यापि नाहुतिसंख्यानियम इत्याह॥ अपि चेत्यादिना॥
विधिनिषेधरूपार्थद्वये वाक्यभेदः स्यादित्यर्थः॥१८॥ अनियमे स्मृतिसंवादार्थं सूत्रं॥ स्मर्यतेऽपीति॥ लोक्यतेऽनेनेति लोको भारतादिरूपः स्मृत्या
र्थमप्याह॥ बलाकेति॥१९॥ अंडजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि चेति श्रुत्यवष्टंभेन सूत्रं व्याचष्टे अपि चेति॥ अन्यत्राप्यनिष्टादिकारि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अनयाश्रुत्याचातुर्विध्यंकथमुक्तंश्रुत्यन्तरेत्रैविध्येवेत्यवधारणविरोधादितिशंकोत्तरत्वेनसूत्रमादत्ते॥नन्वित्यादिना॥जीवजंजरायुजंमनुष्यादि॥भूमिमुद्भिद्य
जायतेवृक्षादिकं उदकंभित्वाजायतेयूकादिजंगममितिभेदः संशोकः स्वेदः॥२१॥ एवंचापितांगत्यागतीविचार्यसंपातोष्टादिकारिणामवरोहेविशेषमाह॥सा
भाव्यापत्तिरुपपत्तेः॥ यथेतमनेवंचेत्युक्तेस्तत्पथ्यागतंधूमाद्यभ्रान्तंपुनर्निवर्तनेनिरूप्यसाश्यानुशयिनः कर्मनिह्नुतदेहाः आकाशगताः आकाशसदृशा
भवन्तिआकाशसादृश्यानंतरंपिंडीकृतानिसूक्ष्मलिंगोपहिताः वायुनेतस्ततश्चालनीयमानावायुसमाभवन्तिसोऽनुशयिसंघोवायुसमोभूत्वाधूमसंगतस्तत्समो

ननुतेषांखल्वेषांभूतानांत्रीण्येवबीजानिभवन्त्यांडजंजीवजमुद्भिज्जमित्यत्रत्रिविधएवभूतग्रामःश्रूयतेकथंचतुर्विधत्वंभूत
ग्रामस्यप्रतिज्ञातमित्यत्रोच्यते॥ तृतीयशब्दावरोधःसंशोकजस्य॥२१॥ आंडजंजीवजमुद्भिज्जमित्यत्रतृतीयेनोद्भिज्जशब्दे
नैवस्वेदजोपसंग्रहःकृतःप्रत्येतव्यः॥उभयोरपिस्वेदजोद्भिज्जयोर्भूम्युदकोद्भेदप्रभवत्वस्यतुल्यत्वात्स्थावरोद्भेदात्तुविल
क्षणोजंगमोद्भेदइत्य न्यत्रस्वेदजोद्भिज्जयोर्भेदवादइत्यविरोधः॥३।१।२१॥ साभाव्यापत्तिरुपपत्तेः॥२२॥ इष्टादिकारिणश्चंद्रम
समारुह्यतस्मिन्यावत्संपातमुषित्वाततःसानुशयाअवरोहन्तीत्युक्तं॥अथावरोहप्रकारःपरीक्ष्यते॥तत्रेयमवरोहश्रुतिर्भ
वति॥अथैतमेवाध्वानंपुनर्निवर्तन्तेयथेतमाकाशमाकाशाद्वायुंवायुर्भूत्वाधूमोभवतिधूमोभूत्वा ऽभ्रंभवत्यभ्रंभूत्वामे
घोभवतिमेघोभूत्वाप्रवर्षतीति॥तत्रसंशयः॥ किमाकाशादिस्वरूपमेवावरोहन्तःप्रतिपद्यन्ते॥किंवाकाशादिसाम्यमि
ति॥तत्रप्राप्तंतावदाकाशादिस्वरूपमेवप्रतिपद्यन्तइति॥कुतः॥ एवंहिश्रुतिर्भवतिइतरथालक्षणास्यात्॥श्रुतिलक्षणाविश
येचश्रुतिर्न्याय्यानलक्षणा॥तथाचवायुर्भूत्वाधूमोभवतीत्येवमादीन्यक्षराणितत्तत्स्वरूपोपपत्तावाञ्जस्येनावकल्पन्ते॥८

भवतिधूमसमोभूत्वाऽभ्रसमोभवति अपोबिभर्तीत्यभ्रंमेहतिसिंचतीति वृष्टिकर्तामेघस्तत्समोभूत्वावर्षधाराद्वारापृथिवींप्रविश्यव्रीहियवादिरू
पोभवतीतिसिद्धान्तगत्याश्रुत्यर्थः॥पूर्वोत्तरयुक्तिद्वयंसंशयबीजंमन्तव्यं॥पूर्वत्रमार्गद्वयंउक्त्वातृतीयपदेनोक्तंस्थानशब्दस्यमार्गलक्षकत्वंइहतुइदंह
धिभवतीत्यादिप्रयोगोभवतिश्रुतेर्विकारस्वरूपापत्तौमुख्यत्वात्सादृश्यापत्तिलक्षणाबीजंनास्तीतिप्रत्युदाहरणसंगतिः श्रुतिमुख्यत्वंफलमितिपूर्वपक्षः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इममध्वानं पुनर्निवर्तन्त इतीष्टादिकारिणामवरोहोक्तेरनिष्टादिकारिणामपि अवरोहस्यार्थसिद्धत्वात्पुनरुक्तिर्व्यर्थेत्यर्थः॥ अथैतयोरिति मार्गेणारोप-
क्रमवाचस्तृतीयशब्दबाधश्चेत्यतः स्थानशब्दो मार्गलक्षक इति द्रष्टव्यं १७ एवमविशेषश्रुतेर्मार्गेणाभावाच्चेति पूर्वपक्षबीजद्वयं निरस्य तृतीयबीजनि-
रासार्थं सूत्रमादत्ते यत्पुनरित्यादिना विद्याकर्मशून्यानां क्रिमिकीटादिभावेन जायस्वेत्यादिश्रुत्या निरंतरजन्ममरणोपलब्धेर्नाहुतिसंख्यादर इत्यर्थः ॥ पु-

यत्पुनरुक्तं देहलाभोपपत्तये सर्वे चन्द्रमसं गन्तुमर्हन्ति पंचम्यामाहुतावित्याहुतिसंख्यानियमादिति तत्प्रत्युच्यते ॥ न तृतीये तथोप-
लब्धेः ॥१८॥ न तृतीये स्थाने देहलाभाय पंचसंख्या नियम आहुतीनामादर्तव्यः कुतः तथोपलब्धेः ॥ तथाह्यंतरेणैवाहुति-
संख्यानियमं वर्णितेन प्रकारेण तृतीयस्थानप्राप्तिरुपलभ्यते ॥ जायस्व म्रियस्वेत्येतत्तृतीयं स्थानमिति ॥ अपि च पंचम्यामाहु-
तावापः पुरुषवचसो भवंतीति मनुष्यशरीरहेतुत्वेनाहुतिसंख्यासंकीर्त्यते न कीटपतंगादिशरीरहेतुत्वेन पुरुषशब्दस्य मनु-
ष्यजातिवचनत्वात् ॥ अपि च पंचम्यामाहुतावपां पुरुषवचस्त्वमुपदिश्यते नापंचम्यामाहुतौ पुरुषवचस्त्वं प्रतिषिध्यते वाक्य-
स्य द्व्यर्थतादोषात् तत्र येषामारोहावरोहौ संभवतस्तेषां पंचम्यामाहुतौ देह उद्भविष्यत्यन्येषां तु विनैवाहुतिसंख्यया भूतांतरोपसृष्टा-
भिरद्भिर्देह आरप्स्यते ॥१८॥ स्मर्यतेऽपि च लोके ॥१९॥ अपि च स्मर्यते लोके द्रोणधृष्टद्युम्नप्रभृतीनां सीताद्रौपदीप्रभृतीनां चायो-
निजत्वं तत्र द्रोणादीनां योषिद्विषयैकाहुतिर्नास्ति धृष्टद्युम्नादीनां तु योषित्पुरुषविषये द्वे अप्याहुती न स्तः ॥ यथा च तत्राहुतिसं-
ख्यानादरो भवति एवमन्यत्रापि भविष्यति ॥ बलाकाप्यंतरेणैव रेतः सेकं गर्भं धत्त इति लोकरूढिः ॥१९॥ दर्शनाच्च ॥२०॥ अपि
च चतुर्विधे भूतग्रामे जरायुजांडजस्वेदजोद्भिज्जलक्षणे स्वेदजोद्भिज्जयोरंतरेणैव ग्राम्यधर्ममुत्पत्तिदर्शनादाहुतिसंख्यानादरो भ-

रुषशब्दश्चैवमित्याह ॥ अपि चेति ॥ मनुष्यदेहस्यापि नाहुतिसंख्यानियम इत्याह ॥ अपि चेत्यादिना ॥ (१ वति ॥ एवमन्यत्रापि भविष्यति ॥
विधिनिषेधरूपार्थद्वये वाक्यभेदः स्यादित्यर्थः ॥१८॥ अनियमे स्मृतिसंवादार्थं सूत्रं ॥ स्मर्यतेऽपीति ॥ लोक्यतेनेनेति लोको भारतादिरुक्तः स्मृत्या-
र्थमप्याह ॥ बलाकेति ॥२१॥ अंडजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि चेति श्रुत्यवष्टंभेन सूत्रं व्याचष्टे अपि चेति ॥ अन्यत्राप्यनिष्टादिकारि-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अनयाऽत्र तावच्चातुर्विध्यं कथमुक्तं श्रुतं त्रीण्येवेत्यवधारणविरोधादिति शंकोत्तरत्वेन सूत्रमादत्ते॥ नचित्यादिना जीवजं जरायुजं मनुष्यादि॥ भूमिमुद्भिद्य जायतेहस्मादिकं उदकं भित्त्वा जायते यूकादि जंगममिति भेदः संशोकः स्वेदः॥२१॥ एवं यागिनां गमनागमनौ विचार्य संप्रतीष्टादिकारिणामवरोहे विशेषमाह॥ साभाव्यापत्तिरुपपत्तेः। यथेतमनेवं चेत्सुकरीत्याय यथागतं धूमाद्यध्वानं पुनर्निवर्तन्ते निरूप्याश्रावनुशयिनः कर्मानिष्ठुतदेहाः आकाशं यान्ति। आकाशसदृशा भवन्ति आकाशसादृश्यानन्तरं पिंडीकृतानि सूक्ष्माणि गोपहिताः वायुनेतस्ततश्चालीयमाना वायुसमा भवन्ति सोऽनुशयि तं यो वायुसमो भूत्वा धूमं संगतस्तत्समो

ननु तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जमित्यत्र त्रिविध एव भूतग्रामः श्रूयते कथं चतुर्विधत्वं भूतग्रामस्य प्रतिज्ञातमित्यत्रोच्यते॥ तृतीयशब्दावरोधः संशोकजस्य॥२१॥ आण्डजं जीवजमुद्भिज्जमित्यत्र तृतीयेनोद्भिज्जशब्देनैव स्वेदजोपसंग्रहः कृतः प्रत्येतव्यः॥ उभयोरपि स्वेदजोद्भिज्जयोर्भूम्युदकोद्भेदप्रभवत्वस्य तुल्यत्वात् स्थावरोद्भेदात्तु विलक्षणो जंगमोद्भेद इत्यन्यत्र स्वेदजोद्भिज्जयोर्भेदवाद इत्यविरोधः॥३।१।२१॥ साभाव्यापत्तिरुपपत्तेः॥२२॥ इष्टादिकारिणश्चन्द्रमसमारुह्य तस्मिन् यावत्संपातमुषित्वा ततः सानुशया अवरोहन्तीत्युक्तं॥ अथावरोहप्रकारः परीक्ष्यते॥ तत्रेयमवरोहश्रुतिर्भवति॥ अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षतीति॥ तत्र संशयः॥ किमाकाशादिस्वरूपमेवावरोहन्तः प्रतिपद्यन्ते॥ किं वाकाशादिसाम्यमिति॥ तत्र प्राप्तं तावदाकाशादिस्वरूपमेव प्रतिपद्यन्त इति॥ कुतः॥ एवं हि श्रुतिर्भवति इतरथा लक्षणा स्यात्॥ श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या न लक्षणा॥ तथा च वायुर्भूत्वा धूमो भवतीत्येवमादीन्यक्षराणि तत्तत्स्वरूपोपपत्तावाञ्जस्येनावकल्पन्ते॥९

भवति धूमसमो भूत्वाऽभ्रसमो भवति अपो बिभर्तीत्यभ्रं मेहति सिंचतीति वृष्टिकर्ता मेघस्तत्समो भूत्वा वर्षधाराद्वारा पृथिवीं प्रविश्य व्रीहियवादिरूपो भवतीति सिद्धान्तगत्याऽत्रार्थः॥ पूर्वोत्तरयुक्तिद्वयं संशयबीजं मन्तव्यं॥ पूर्वत्र मार्गे द्वयं स्थानतृतीयपक्ष इत्युक्तं स्थानशब्दस्य मार्गलक्षकत्वं इदं तु इदंत्व धिभवतीत्यादिप्रयोगे भवतिश्रुतेर्विकारस्वरूपापत्तौ मुख्यत्वात् सादृश्यापत्तिलक्षणा बीजं नास्तीति प्रत्युदाहरणसंगतिः श्रुतिमुख्यत्वफलमिति पूर्वपक्षः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अनुशयिनां पूर्वसिद्धाकाशादिस्वरूपापत्ययोगाल्लक्षणेति सिद्धान्तयति ॥ एवमित्यादिना ॥ समानो भावो धर्मो यस्य तद्भावः साभाव्यं साम्यमिति सूत्रपदार्थः
॥ एवं ह्येन दिति ॥ एतद्भवनमेवं सादृश्यरूपमेवोपपद्यत इत्यर्थः अनुशयिनामाकाशादिभ्यो निर्गमनान्यथानुपपत्यापि सादृश्यलक्षणेत्याह ॥ आकाश॰
स्वरूपेति ॥ संयोगलक्षणामाशंक्याह ॥ विभुत्वादिति ॥ भवतिश्रुत्या संयोगलक्षणाया मनुवादः स्यादित्यर्थः विविधभूतसाम्यमवरोहे भवतीत्यनुसं

तस्मादाकाशादिस्वरूपप्रतिपत्तिरित्येवं प्राप्ते ब्रूमः ॥ आकाशादिसाम्यं प्रतिपद्यन्त इति चंद्रमंडले यदम्मयं शरीरं उपभोगा
र्थमारब्धं तदुपभोगक्षये सति प्रविलीयमानं सूक्ष्ममाकाशसमं भवति ततो वायोर्वशमेति ततो धूमादिभिः संपृच्यत इति त
देतदुच्यते यथेतमाकाशमाकाशाद्वायुमित्येवमादिना ॥ कुत एतदुपपत्तेः एवं ह्येतदुपपद्यते न ह्यन्यस्यान्यभावो मु
ख्य उपपद्यते ॥ आकाशस्वरूपप्रतिपत्तौ च वाय्वादिक्रमेणावरोहो नोपपद्यते ॥ विभुत्वाच्चाकाशेन नित्यसंबंधत्वान्न त॰
त्सादृश्यापत्तेरन्यस्तत्संबंधो घटते ॥ श्रुत्यसंभवे च लक्षणाश्रयणं न्याय्यमेव ॥ अत आकाशादितुल्यतापत्तिरेवात्राकाशा
दिभाव इत्युपचर्यते ॥ ४ ॥ २२ ॥ नातिचिरेण विशेषात् ॥ २३ ॥ तत्राकाशादिप्रतिपत्तौ प्राग्व्रीह्यादिप्रतिपत्तेर्भवति विशयः ॥
किं दीर्घं दीर्घं कालं पूर्वसादृश्येनावस्थायोत्तरसादृश्यं गच्छत्युताल्पमल्पमिति ॥ तत्राऽनियमो नियमकारिणः शास्त्रस्या॰
भावात् ॥ इत्येवं प्राप्त इदमाह ॥ नातिचिरेणेति ॥ अल्पमल्पं कालमाकाशादिभावेनावस्थाय वर्षधाराभिः सहेमां भुवमापतति
॥ कुत एतत् विशेषदर्शनात् ॥ तथाहि व्रीह्यादिभावापत्तेरनन्तरं विशिनष्टि ॥ अतो वै खलु दुर्निष्प्रपततरमिति ॥ तकार एकः छान्दस
स्तां प्रक्रियायां तु श्रोमनयोर्दुर्निष्क्रमतरं दुःखतरमस्माद्व्रीह्यादिभावान्निःसरणं भवतीत्यर्थः ॥ तदत्र दुःखं निःप्रपतनं प्रदर्शय

न्नातिदैर्घ्यमुपसंहरति ॥ अत इति ॥ २२ ॥ नातिचिरेण ॥ उक्तं सादृश्यमुपजीव्य लोके गंतॄणां चिराचिरगतिर ॥ पूर्वेषु सुखं निष्प्रपतनं दर्श
नात्संशयं पक्षद्वयं च दर्शयति ॥ तत्रेत्यादिना ॥ अनियमात्कदाचिद्विलंबेन योन्यापत्तिरिति पूर्वपक्षफलं ॥ सिद्धान्ते तु व्रीह्यादिभावादनुशयिनां
विलंबेन निर्गमनमिति विशेषादाकाशादिभावात् शीघ्रं निर्गम इत्यविलंबेन योन्यापत्तिरित्यनुसंधानाद्वैराग्यदार्ढ्यमिति विवेकः ॥ ~ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्त्वाकाशादिष्वनुशयिनां सुखं व्रीहियवादिषु दुःखमिति दुःशब्दाद्भातीति चिराचिरनिर्गमनमित्यत आह ॥ सुखदुःखताविशेषश्चायमिति अवधिः का-
लः ॥ २४ ॥ अन्याभिलापात् ॥ इति क्रमात् अर्थक्रमाच्चाधिकरणानां क्रमो बोध्यः ॥ इह भूमौ वर्षधाराद्वारा पतितानां तेषामनुशयिनां व्रीह्यादिसाम्येन जायन्त(
इति सूत्रार्थः ॥ अत्र जायन्त इति श्रुतेः पूर्वत्राकाशादिवर्षान्तसादृश्योक्तेस्तद्वत्संशयमाह तत्रेति ॥ अस्मिन्नवरोहे वर्षसादृश्यानन्तरमित्यर्थः । दुर्निष्प्रपतरम् ।
इत्यनेन चिरनिर्गमनलक्षणोक्तानयुक्ता दुःखेन निर्गमनमिति मुख्यसंभवादित्याक्षेपसंगत्या पूर्वपक्षयति ॥ किं तावदित्यादिना ॥ अत्र पूर्वपक्षे स्थावर

सुखदुःखताविशेषश्चायं निःप्रपतनस्य कालात्मनो दीर्घत्वनिमित्तस्तस्मिन्नवरोहे शरीरानिष्पत्तेरुपभोगासंभवात् तस्मा-
द्व्रीह्यादिभावापत्तेः प्रागल्पेनैव कालेनावरोहः स्यादिति ॥ पू ॥ २४ ॥ अन्याधिष्ठितेषु पूर्ववदभिलापात् ॥ तस्मिन्नेवावरोहे प्र-
वर्षणानन्तरं पठ्यते ॥ त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्त इति ॥ तत्र संशयः ॥ किमस्मिन्नवरोहे
स्थावरजात्यापन्नाः स्थावरसुखदुःखभाजोऽनुशयिनो भवन्त्याहोस्वित् क्षेत्रज्ञान्तराधिष्ठितेषु स्थावरशरीरेषु संश्ले-
षमात्रं गच्छन्तीति ॥ किं तावत्प्राप्तं ॥ स्थावरजात्यापन्नास्ते सुखदुःखभाजोऽनुशयिनो भवन्तीति ॥ कुत एतज्जनेर्मु-
ख्यार्थत्वोपपत्तेः ॥ स्थावरभावस्य च श्रुतिस्मृत्योरुपभोगस्थानत्वप्रसिद्धेः ॥ पशुहिंसादियोगाच्चेष्टादेः कर्मजातस्या-
निष्टफलत्वोपपत्तेस्तस्मान्मुख्यमेवेदमनुशयिनां व्रीह्यादिजन्म श्वादिजन्मवत् ॥

(१) त्वनिवृत्तयेऽधिकारिणां यत्नगौरवं सिद्धा-
न्ते व्रीह्यादिसंश्लेषमात्रं परिहर्तुं यत्नलाघवं वैराग्यधीर्यं चेति विवेकः ॥ ननु देहोत्पत्त्या जीवानां जन्मस्मरणात्स्वतः व्रीह्यादेस्तु न देहत्वमित्यत आह
स्थावरत्वेति स्थाणुमन्येऽनुसंयन्तीत्याद्याः श्रुतिः शरीरजैः कर्मदोषैर्याति स्थावरतां नर इत्याद्याः स्मृतिः ननु स्वर्गिणां पापाभावात्कथं स्थावरत्वं तत्राह ।
पश्विति ॥ सोमाद्युच्छिष्टभक्षणसुराग्रहादिशब्दार्थः क्रत्वर्थहिंसादेरपि हिंसात्वादिसामान्येन प्रवृत्तेर्न हिंस्यादित्यादिशास्त्रनिषिद्धताकारे-
णदुरितापूर्वकारित्वमविरुद्धमिति सांख्या आहुः ॥ ६ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा·भा· स्तुतोऽत्रव्रीह्यादिभावोऽनुशयिनां न जन्मरूपः कर्मविशेषपरामर्शविनाऽभोक्तृत्वात् पूर्वोक्ताकाशादिभाववदिति सिद्धांतयति एवं प्राप्त इत्यादिना॥ अ·
टी· पूर्ववदिति पदं दृष्टांतत्वेन देहशांत्वेन च व्याख्यातं॥ यदत्र प्रकरणे कर्मविशेषपरामर्शपूर्वकं सुचनेन तज्जन्मेति व्यतिरेकदृष्टांतमप्याह यत्र त्विति॥ अ ३·
र·प्र· पि च यो यो ह्यन्नमत्ति यो रेतः स्त्रियां सिंचति तद्भूयो भवतीति वाक्यशेषे व्रीह्यादिषु प्रविष्टस्यानुशयिसंघस्यान्नद्वारा रेतःसिक्पुरुषयोगः श्रुतः तदन्य
३००

यथा श्वयोनिं वा सूकरयोनिं वा चंडालयोनिं वेति मुख्यमेवानुशयिनां श्वादिजन्म तत्सुखदुःखान्वितं भवत्येवं व्रीह्यादिजन्मापीत्येवं प्राप्ते ब्रूमः॥ अन्यैर्जीवैरधिष्ठितेषु व्रीह्यादिषु संसर्गमात्रमनुशयिनः प्रतिपद्यंते॥ न तत्सुखदुःखभाजो भवंति पूर्ववत् यथा वायुधूमादिभावोऽनुशयिनां तत्संश्लेषमात्रमेवं व्रीह्यादिभावोऽपि जातिस्थावरैः संश्लेषमात्रं॥ कुत एतत्॥ तद्वदिहाप्यभिलापात्॥ कोऽभिलापस्य तद्भावः कर्मव्यापारमंतरेण संकीर्तनं॥ यथाकाशादिषु प्रवर्षणांतेषु न कंचित्कर्मव्यापारं परामृशत्येवं व्रीह्यादिजन्मन्यपि॥ तस्मान्नास्त्यत्र सुखदुःखभाक्त्वमनुशयिनां॥ यत्र तु सुखदुःखभाक्त्वमभिप्रेतं परामृशति तत्र कर्मव्यापारं रमणीयचरणाः कपूयचरणा इति च॥ अपि च मुख्येऽनुशयिनां व्रीह्यादिजन्मनि व्रीह्यादिषु लूयमानेषु कंड्यमानेषु पच्यमानेषु भक्ष्यमाणेषु च तदभिमानिनोऽनुशयिनः प्रवसेयुः यो हि जीवो यच्छरीरमभिमन्यते स तस्मिन्पीड्यमाने प्रवसतीति प्रसिद्धं॥ तत्र व्रीह्यादिभावाद्रेतःसिग्भावोऽनुशयिनां नाभिलप्येतातः संसर्गमात्रमनुशयिनामन्याधिष्ठितेषु व्रीह्यादिषु भवति॥ एतेन जनेर्मुख्यार्थत्वं प्रतिब्रूयात्॥ उपभोगस्थानत्वं च स्थावरभावस्य न च वयमुपभोगस्थानत्वं स्थावरभावस्यावजानीमहे॥ भवत्वन्येषां जंतूनामपुण्यसामर्थ्येन स्थावरभावमुपगतानामेतदुपभोगस्थानं॥ चंद्रमसस्त्ववरोहंतोऽनुशयिनो न स्थावरभावमुपभुंजत इत्याचक्ष्महे॥२४॥ ((यानुपपत्त्यापि जन्मश्रुतिर्मुख्येत्याह॥

अपि चेत्यादिना व्रीह्यादिरूपदेहनाशे देहिनामुत्क्रांतेरवश्यंभावाद्रेतःसिग्योगो न स्यादित्यर्थः॥ एतेनेति॥ उक्तानुमानार्थापत्तिभ्यां जायत इति श्रुतेर्मुख्यार्थत्वमनुशयिभोगायतनत्वं च व्रीह्यादेः प्रतिब्रूयादित्यर्थः॥ ननु व्रीह्यादेर्भोगायतनत्वानंगीकारे पूर्वोक्तश्रुतिस्मृतिप्रसिद्धिबाध इत्यत आ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वैदिकं कर्माशुद्धं न भवति शास्त्रविहितत्वादिति सूत्रार्थं प्रपंचयति अयं धर्म इत्यादिना ॥ शुचौ देशे प्रातः सायं काले जीवनादिनिमित्ते कृतमग्निहोत्रं धर्मो भवति स एवाशुचिदेशे मध्याह्ने मरणादिनिमित्ते कृतः सन्नधर्मो भवतीति निर्णयः शास्त्रैकसाध्य इत्यर्थः ॥ ततः किं तत्राह ॥ शास्त्राच्चेति ॥ ननु या हिंसा सोऽधर्म इत्युत्सर्गस्य विशेषविधिना बाधोऽत्र न युक्तः नाभिचरेदिति निषिद्धश्येनस्य पुरुषार्थत्ववन्निषिद्धहिंसादेरपि क्रतूपकारकत्वाविरोधादिति तत्राह ॥ उत्सर्गापवादयोरिति ॥ अयमर्थः काम्यकर्मणि सर्वत्र करणांशे रागतः प्रवृत्तिरंगेषु विधित इति स्थितिः ॥ तथा च श्येनाख्ये

अशुद्धमिति चेन्न शब्दात् ॥२५॥ यत्पुनरुक्तं पशुहिंसादियोगादशुद्धमाध्वरिकं कर्म तस्यानिष्टमपि फलमवकल्प्यत इत्यतो मुख्यमेवानुशयिनां व्रीह्यादिजन्मास्तु तत्र गौणी कल्पनाऽनर्थिकेति ॥ तत्परिह्रियते ॥ न शास्त्रहेतुत्वाद्धर्माधर्मविज्ञानस्य ॥ अयं धर्मोऽयमधर्म इति शास्त्रमेव विज्ञाने कारणं अतींद्रियत्वात्तयोः अनियतदेशकालनिमित्तत्वाच्च ॥ यस्मिन्देशे काले निमित्ते च यो धर्मोऽनुष्ठीयते स एव देशकालनिमित्तांतरेष्वधर्मो भवति ॥ तेन शास्त्रादृते धर्माधर्मविषयं विज्ञानं न कस्यचिदस्ति ॥ शास्त्राच्च हिंसानुग्रहाद्यात्मको ज्योतिष्टोमो धर्म इत्यवधारितः ॥ स कथमशुद्ध इति शक्यते वक्तुं ॥ ननु न हिंस्यात्सर्वा भूतानीति शास्त्रमेव भूतविषयां हिंसामधर्म इत्यवगमयति ॥ बाढं ॥ उत्सर्गस्तु सः ॥ अपवादोऽग्नीषोमीयं पशुमालभेतेति ॥ उत्सर्गापवादयोश्च व्यवस्थितविषयत्वं ॥ तस्माद्विशुद्धं कर्म वैदिकं शिष्टैरनुष्ठीयमानत्वादनिंद्यमान

((त्वाच्च तेन न तस्य प्रतिरूपं फलं जातिस्थावरत्वं

कर्मणि निषेधेऽपि रागप्राबल्यात्प्रवृत्तिः स्यात् क्रत्वंगहिंसादौ तु विधित एव प्रवृत्तिर्वाच्या स च)) विधिर्यद्युत्सर्गप्राप्तं अनर्थहेतुत्वं न बाधेत तर्हि प्रवर्तको न स्यात् प्रवर्तकत्वे वा विधिरनर्थाय स्यात् अतो निरवकाशो विधिः सावकाशमुत्सर्गमविहितहिंसादिषु स्थापयतीति ॥ इदं च निषेधशास्त्रस्य हिंसात्वादिसामान्येन प्रवृत्तिमंगीकृत्योक्तं वस्तुतस्तु रागप्राप्तहिंसाविषयत्वादवैधहिंसायामप्रवृत्तेर्नोऽशुद्धत्वशंकावसर इति द्रष्टव्यं प्रतिरूपं दुःखरूपं तस्य फलं तेनेति योजना ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इह व्रीह्यादिभावे कश्चिदधिकारः कर्मपरामर्शो नास्तीत्युक्तं ॥ २५ ॥ अथ व्रीह्यादिभावानन्तरं रेतःसिग्भावः श्रुतस्तत्रान्नस्यानुशयिनो रेतःसेकक-र्तृणा योगाद्योगमात्रं वाच्यं नहि उपक्रमेऽपि योग एवास्थेयः अन्यथोपक्रमोपसंहारयोर्विरोधः स्यादिति मत्वोक्तमित्यविरोध इति ॥ २६ ॥ योनेः शरीरसूत्रेण नैव व्रीह्यादिशरीरत्वमनुशयिनामिति सूत्रार्थः ॥ एवं कर्मिणां गत्यागतिसंसारो दुर्वार इत्यनुसंधानात् कर्मफलाद्वैराग्यं ततस्तत्त्वज्ञानसाधनं सिद्धमिति पा-

न च श्वादिजन्मवदपि व्रीह्यादिजन्म भवितुमर्हति ॥ तद्धि कपूयचरणानधिकृत्योच्यते ॥ नैवमिह वैशेषिकः कश्चिदधिकारो स्यतश्चन्द्रमण्डलस्खलितानामनुशयिनां व्रीह्यादिसंश्लेषमात्रं तद्भाव इत्युपचर्यते ॥ २५ ॥ रेतःसिग्योगोऽथ ॥ २६ ॥ इतश्च व्रीह्यादिसंश्लेषमात्रं तद्भावो यत्कारणं व्रीह्यादिभावस्याऽनन्तरमनुशयिनां रेतःसिग्भाव आम्नायते ॥ यो यो ह्यन्नमत्ति यो रेतः सिञ्चति तद्भूय एव भवतीति ॥ न चात्र मुख्यो रेतःसिग्भावः संभवति ॥ चिरजातो हि प्राप्तयौवनो रेतःसिग्भवति ॥ कथमिवानुपचरितं तद्भावमद्यमानान्नानुगतोऽनुशयी प्रतिपद्यते ॥ तत्र तावदवश्यं रेतःसिग्योग एव रेतःसिग्भावोऽभ्युपगन्तव्यः ॥ तद्वद्व्रीह्यादिभावोऽपि व्रीह्यादियोग एवेत्यविरोधः ॥ २६ ॥ योनेः शरीरम् ॥ २७ ॥ अथ रेतःसिग्भावस्यानन्तरं योनौ निषिक्ते रेतसि योनेरधि शरीरमनुशयिनामनुशयफलोपभोगाय जायत इत्याह शास्त्रं ॥ तद्य इह रमणीयचरणा इत्यादि ॥ तस्मादप्यवगम्यते नावरोहे व्रीह्यादिभावावसरे तच्छरीरत्वमेव सुखदुःखान्वितं भवतीति ॥ तस्माद्व्रीह्यादिसंश्लेषमात्रमनुशयिनां तज्जन्मेति सिद्धं ॥ ६ ॥ २७ ॥ इति शारीरकमीमांसाभाष्ये शंकरभगवत्पादकृतौ तृतीयाध्यायस्य प्रथमः पादः समाप्तः

दार्थमुपसंहरति ॥ इति सिद्धमिति ॥ २७ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दानन्दभगवतः कृतौ शारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां तृतीयाध्यायस्य प्रथमः पादः समाप्तः ॥ १ ॥ भाष्य ॥ ३५० ॥ टीका ॥ २५० ॥ सर्वं ॥ ६०० ॥ अधिकरणे ॥ ९३ ॥ श्रीरामचन्द्राय नमः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथशारीरकसूत्रभाष्येरत्नप्रभायांतृतीयाध्यायस्यद्वितीयपादःप्रारंभः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीगणेशायनमः॥ संध्येसृष्टिराहहि॥ उक्तवैराग्यसाध्यस्तत्वंपदार्थविवेकोवाक्यार्थज्ञानसाधनमस्मिन्पादेनिरूप्यतइतिपादयोर्हेतुसाध्यभावसंगतिमाह॥ अतिक्रांतइति॥ साधनविचारत्वादेवास्यपादस्यास्मिन्नध्यायेसंगतिः॥ अस्मिन्पादेतस्यानंतोपीत्यतः प्रागुद्दिष्टत्वेनप्रथमंजिज्ञासितत्वंपदार्थःअवस्थाद्वाराविविच्यतेतदारभ्यापादसमाप्तेर्विधेयतत्पदार्थविवेकः॥ तत्रपूर्वंगत्यागतिचिंतयाजाग्रदवस्थानिरूपितातदनंतरभाविनींस्वप्नावस्थांश्रुत्युक्तांविषयीकृत्यतत्रस्वप्नेरथादिसृष्ट्युक्तेस्तदभावोक्तेश्चसंशयंवदन्पूर्वपक्षसूत्रंयोजयति॥ तत्रसंशयइत्यादिना॥ स्वप्नरथादयोजाग्रद्रथादिवत् व्यावहारिकसत्ताकाउतशुक्तिरजतवत् प्रातीतिकाइतिसंशयार्थः॥ आरंभणाधिकरणेप्रपंचस्यपारमार्थिकत्वनिषेधादितिमंतः

श्रीगणेशायनमः॥१॥ संध्येसृष्टिराहहि॥१॥ अतिक्रांतेपादेपंचाग्निविद्यामुदाहृत्यजीवस्यसंसारगतिप्रभेदःप्रपंचितः॥ इदानींतुतस्यैवावस्थाभेदःप्रपंच्यते॥ इदमामनंति॥ सयत्रप्रस्वपितीत्युपक्रम्यनतत्ररथानरथयोगानपंथानोभवंत्यथरथान्रथयोगान्पथःसृजतइत्यादि॥ तत्रसंशयः॥ किंप्रबोधइवस्वप्नेपिपारमार्थिकीसृष्टिराहोस्विन्मायामयीतितत्रतावत्प्रतिपद्यतेसंध्येतथ्यरूपासृष्टिरिति संध्यमितिस्वप्नस्थानमाचष्टेवेदेप्रयोगदर्शनात्॥ संध्यंतृतीयंस्वप्नस्थानमिति॥ द्वयोर्लोकस्थानयोःप्रबोधसंप्रसादस्थानयोर्वासंधौभवतीतिसंध्यंतस्मिन्संध्येस्थानेतथ्यरूपैवसृष्टिर्भवितुमर्हति॥ कुतः यतः प्रमाणभूताश्रुतिरेवमाह॥ अथरथान्रथयोगान्पथःसृजतइत्यादि॥ सहिकर्तेतिचोपसंहारादेवमेवावगम्यते॥१॥ १ ॥

अत्रपूर्वपक्षेजाग्रदस्वप्नाद्जीवस्यविवेकासिद्धिः सिद्धांतेप्रातीतिकदृश्यसाक्षितयाविवेकात्स्वयंज्योतिष्ट्वसिद्धिरितिफलंसुमूर्षोःसर्वेंद्रियोपसंहारादेतल्लोकाननुभवेसतिवासनामात्रेणइमंलोकंस्मरतःकर्मबलादुद्दयेमनसापरलोकस्फूर्तिरूपःस्वप्नोभवतिसोयंलोकद्वयसंधौभवतीतिसंध्यःस्वप्नः॥ तथाचश्रुतिः॥ तस्मिन्संध्येस्थानेतिष्ठन्नेतेउभेस्थानेपश्यतिइदंचपरलोकस्थानंचेति॥ अयस्वप्नःकादाचित्कइत्यरुच्यानित्यस्वप्नस्यप्रबोधसंप्रसादसंधिभवत्वमुक्तं॥ अन्येतुमर्त्यचक्षुराद्यजन्यरूपादिसाक्षात्कारवत्वंपरलोकलक्षणंदैवचक्षुराद्यजन्यतद्वत्वंमर्त्यलोकलक्षणंचस्वप्नेस्तीति लक्षणतोलोकद्वयस्पर्शित्वान्नित्यस्वप्नस्यैवलोकद्वयसंध्यत्वंग्रामद्वयस्पर्शिमार्गस्यतत्संध्यत्ववदित्याचक्षते॥ नकेवलंश्रुत्यास्वप्नार्थानांव्यावहा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किंच स्वप्नार्थाः सत्याः प्राज्ञनिर्मितत्वात् आकाशादिवदिति सूत्रार्थमाह ॥ अपि चेत्यादिना ॥ रूढिमाशंक्य प्रकरणान्निरस्यति ॥ नन्वित्यादिना यः ॥ सुप्तेषु निर्व्यापारेषु जागर्ति तदेव शुक्रं सप्रकाशं ब्रह्मेत्यर्थः ॥ स्वप्नस्य जाग्रदर्थैः समानदेशत्वश्रुतेरभेदश्रुतेश्च सत्यत्वे तात्पर्यमित्याह अथो खल्वाहुरि ति ॥ २ ॥ स्वप्नरथादयः प्रातीतिकाः जाग्रद्रथादौ क्लृप्तसामग्रीं विना दृष्टत्वाच्छुक्तिरूप्यादिवदिति सिद्धान्तयति ॥ तुशब्द इत्यादिना ॥ चिन्मात्रनिष्ठा ॥

निर्माणं चैके पुत्रादयश्च ॥ २ ॥ अपि चैके शाखिनोऽस्मिन्नेव संध्ये स्थाने कामानां निर्मातारमात्मानमामनन्ति ॥ य एष सुप्तेषु जा गर्ति कामं कामं पुरुषो निर्मिमाण इति ॥ पुत्रादयश्च तत्र कामा अभिप्रेयन्ते काम्यन्त इति ॥ ननु कामशब्देनेच्छाविशेषा एवोच्येरन् न शतायुषः पुत्रपौत्रान्वृणीष्वेति प्रकृत्यान्ते कामानां त्वा कामभाजं करोमीति प्रकृतेषु तत्र तत्र पुत्रादिषु कामशब्दस्य प्रयुक्तत्वात् ॥ प्राज्ञं चैनं निर्मातारं प्रकरणवाक्यशेषाभ्यां प्रतीमः ॥ प्राज्ञस्य हीदं प्रकरणं अन्यत्र धर्मादन्यत्राधर्मादित्यादि ॥ तद्विषय एव च वाक्यशेषोऽपि तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते ॥ तस्मिंल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चनेति ॥ प्राज्ञकर्तृका च सृ ष्टिस्तथ्यरूपा समधिगता जागरिताश्रया तथा स्वप्नाश्रयापि सृष्टिर्भवितुमर्हति ॥ तथा च श्रुतिः ॥ अथो खल्वाहुर्जागरितदेश एवा स्यैष इति यानि ह्येव जाग्रत्पश्यति तानि सुप्त इति स्वप्नजागरितयोः समानन्यायतां श्रावयति ॥ तस्मात्तथ्यरूपैव संध्ये सृष्टिरि त्येवं प्राप्ते प्रत्याह ॥ मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥ ३ ॥ तुशब्दः पक्षं व्यावर्तयति ॥ नैतदस्ति यदुक्तं संध्ये सृष्टिः पारमार्थिकीति ॥ मायैव संध्ये सृष्टिर्न परमार्थगन्धोऽप्यस्ति कुतः ॥ कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥ न हि कार्त्स्न्येन परमार्थव स्तुधर्मेणाभिव्यक्तस्वरूपः स्वप्नः ॥ किं पुनरत्र कार्त्स्न्यमभिप्रेतं देशकालनिमित्तसंपत्तिरबाधश्च ॥ न हि परमार्थवस्तुविषया णि देशकालनिमित्तान्यबाधश्च स्वप्ने संभाव्यन्ते ॥ न तावत्स्वप्ने रथादीनामुचितो देशः संभवति ॥

५ विद्याविनावच्छेदेन जीवेऽपि स्थि ता रथाद्याकारा मायेति सूत्रभाष्ययोरुक्ता माया विद्ययोरभेदज्ञानाय ॥ मात्रपदेन तु सति प्रमातर्यबाध्यत्वरूपस्य व्यावहारिकसत्यत्वस्य निरास उक्तः कार्त्स्न्यमत्र जाग्रति या क्लृप्तसामग्री तज्जन्यत्वं परमार्थवस्तुनो जाग्रदर्थस्य कार्यस्य धर्मः सत्यत्वव्यापकः तदभावं स्वप्ने विवृणोति ॥ न तावदित्या

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा·भा· संवृत्ते संकीर्णे पर्येतुं गन्तुं विपर्येतुमागन्तुं ॥ श्रावयति प्रबुद्धो जनः पार्श्वस्थान्प्रतीति शेषः ॥ एतत्स्वप्नया स्थानया यत्र काले स्वप्नया चर्त्या चरति तदा स्वे
टी· शरीरे यथेष्टं चरतीत्यर्थः ॥ बहिरिवेति ॥ कुलायाद्देहात् बहिरिवामृत आत्मा चरित्वा यत्र कामं यथेष्टमीयते विहरतीत्यर्थः ॥ गुणमाह ॥ योहीति ॥ देहाभि अ·पा·
र·प्र·
२०३ न हि संवृत्ते देहदेशे रथादयोऽवकाशं लभेरन् ॥ स्यादेतत् ॥ बहिर्देहात्स्वप्नं द्रक्ष्यति देशान्तरितद्रव्यग्रहणात् ॥ दर्शयति च श्रुतिः बहि ३।२
र्देहात्स्वप्नं बहिः कुलायादमृतश्चरित्वा स ईयतेऽमृतो यत्र काममिति ॥ स्थितिगतिप्रत्ययभेदश्च नानिष्क्रान्ते जन्तौ सामञ्जस्य
मश्नुवीतेति ॥ नेत्युच्यते न हि सुप्तस्य जन्तोः क्षणमात्रेण योजनशतान्तरितं देशं पर्येतुं विपर्येतुं चानन्तः सामर्थ्यं संभाव्यते ॥ क्वचिच्च
च प्रत्यागमनवर्जितं स्वप्नं श्रावयति ॥ कुरुष्वहमद्य शयनो निद्रयाभिप्लुतः स्वप्ने पञ्चालानभिगतश्चास्मिन्प्रतिबुद्धश्चेति दे-
हाच्चेदपेयात् पञ्चालेष्वेव प्रतिबुध्येत तानसावभिगत इति कुरुष्वेव तु प्रतिबुध्यते ॥ येन चायं देहेन देशान्तरमश्नुवानो मन्यते
तमन्ये पार्श्वस्थाः शयनदेश एव पश्यन्ति यथाभूतानि चायं देशान्तराणि स्वप्ने पश्यति न तानि तथाभूतान्येव भवन्ति परिधावंश्चे
त्पश्येज्जाग्रद्वद्वस्तुतत्त्वमर्थमाकलयेत् ॥ दर्शयति च श्रुतिः ॥ अन्तरेव देहे स्वप्नं स यत्रैतत्स्वप्नया चरतीत्युपक्रम्य स्वे शरीरे य
थाकामं परिवर्तत इति अतश्च श्रुत्युपपत्तिविरोधाद्बहिः कुलायश्रुतिर्गौणी व्याख्यातव्या बहिरिव कुलायादमृतश्चरित्वेति ॥
यो हि वसन्नपि शरीरे न तेन प्रयोजनं करोति स बहिरिव शरीराद्भवति ॥ स्थितिगतिप्रत्ययभेदोऽप्येवं सति विप्रलम्भ एवाभ्युप
गन्तव्यः ॥ कालविसंवादोऽपि च स्वप्ने भवति ॥ रजन्यां सुप्तो वासरं भारते वर्षं मन्यते ॥ तथा मुहूर्तमात्रवर्तिनि स्वप्ने कदाचिद्बहून् राम·
वर्षपूगानतिवाहयति ॥ निमित्तान्यपि च स्वप्ने न बुद्धये कर्मणे वोचितानि विद्यन्ते ॥ करणोपसंहाराद्धि नास्य रथादिग्रहणाय च २०३
क्षुरादीनि सन्ति ॥ रथादिनिर्वर्तनेऽपि कुतोऽस्य निमेषमात्रेण सामर्थ्यं दारूणि वा ॥

१ मानहीनत्वगुणेन बहिष्ट्वं देहस्योपि च बहिरित्युक्त इ
त्यर्थः ॥ एवं सति श्रुतियुक्तिभ्यां अन्तरेव स्वप्ने सतीत्यर्थः ॥ विप्रलम्भो विभ्रमः योग्यदेशाभावमुक्त्वा कालाभावमाह ॥ कालेति अत्र रात्रिसमये विकेतुमु
लादिवर्षान्तरे वासरो भवतीति भारत इत्युक्तं ॥ पूर्वपक्षानुमानानां जाग्रद्दृष्टदृष्टान्ते कृत्स्नसामग्रीजन्यत्वमबाधयोग्यत्वं चोपाधिरिति सूत्रतात्पर्यं ॥ ३ ॥
जाग्रद्वद्वस्तुतत्त्वमर्थमाकलयेदित्यपि पाठः ॥ मूलमध्ये ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वप्नस्य भ्रांतिमात्रत्वेन सूचितोऽयमर्थः सत्यो न स्यादिति शंकोत्तरत्वेन सूत्रांतरं व्याचष्टे ॥ मायेत्यादिना मंत्रेण देवतानुग्रहेणौषधिसेवया वा स्वप्नः
सत्यसूचकः स्यादित्यस्याः श्रुतिमत आह ॥ तत्रापि भवतु नामेति ॥ सत्यदर्शहेतोरपि भ्रान्तिरूपस्य सत्यत्वादर्शनादिति भावः ॥ यथा कश्चिद्धारालं-

बाध्यंते चैते रथादयः स्वप्नदृष्टाः प्रबोधे स्वप्न एव चैते सुलभबाधा भवंति आद्यंतयोर्व्यभिचारदर्शनात् रथोऽयमिति हि क-
दाचित्स्वप्ने निर्धारितः क्षणेन मनुष्यः संपद्यते मनुष्योऽयमिति च निर्धारितः क्षणेन वृक्षः स्पष्टं चाभावं रथादीनां स्वप्ने श्रा-
वयति शास्त्रं ॥ न तत्र रथा न रथयोगा न पंथानो भवंति इत्यादि तस्मान्मायामात्रं स्वप्नदर्शनं ॥ ३ ॥ सूचकश्च हि श्रुतेराचक्ष-
ते च तद्विदः ॥ ४ ॥ मायामात्रत्वात्तर्हि न कश्चित्स्वप्ने परमार्थगंधोऽस्तीति नेत्युच्यते सूचकश्च हि स्वप्नो भवति भविष्यतोः साध्व-
साध्वोस्तथा हि श्रूयते ॥ यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति ॥ समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शन इति ॥ तथा पु-
रुषं कृष्णं कृष्णदंतं पश्यति स एनं हंतीत्येवमादिभिः स्वप्नैरचिरजीवित्वमावेद्यत इति श्रावयति ॥ आचक्षते च स्वप्नाध्याय-
विदः ॥ कुंजरारोहणादीनि स्वप्ने धन्यानि ॥ खरयानादीन्यधन्यानीति ॥ मंत्रदेवताद्रव्यविशेषनिमित्ताश्च केचित्स्वप्नाः स-
त्यार्थगंधिनो भवंतीति मन्यंते ॥ तत्रापि भवतु नाम सूच्यमानस्य वस्तुनः सत्यत्वं ॥ सूचकस्य तु स्त्रीदर्शनादेर्भवत्येव वै-
तथ्यं बाध्यमानत्वादित्यभिप्रायः ॥ तस्मादुपपन्नं स्वप्नस्य मायामात्रत्वं ॥ यदुक्तमाहहीति तदेवं सति भाक्तं व्याख्यातव्यं ॥
यथा लांगलं गवादीनुद्वहतीति निमित्तमात्रत्वादेवमुच्यते न तु प्रत्यक्षमेव लांगलं गवादीनुद्वहति ॥ एवं निमित्तमात्रत्वा-
त्सुप्तो रथादीन्सृजते स हि कर्तेति चोच्यते न तु प्रत्यक्षमेव सुप्तो रथादीन्सृजति ॥ निमित्तत्वं त्वस्य रथाद्यप्रतिभाननिमि-
त्तमोदत्रासादिदर्शनात् ॥ तन्निमित्तभूतयोः सुकृतदुष्कृतयोः कर्तृत्वेनेति वक्तव्यं ॥

गलस्य गवादिजीवननिमित्तत्वं तथा स्वप्नभोक्तुरदृष्टद्वारा स्वप्नसृष्टिनिमित्तत्वं न तु कुंभं प्रति कुंभकारस्येव साक्षात्स्वप्नकर्तृत्वं सामग्र्यभावबा-
धयोरुक्तत्वादित्याह ॥ यदुक्तमित्यादिना तथा च स्वप्नस्य सकर्तृकत्वं मुख्यं नास्तीति हेत्वसिद्धिरिति भावः ॥ छ ॥
समन्विताद्इत्यत्र गंधिनः इति पाठोऽप्यस्ति ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रुतिनामन्यथ्यविरोधाच्चनस्वप्नसत्यत्वेत्याह अपिचेति ॥ व्यतिकरः संकरः अन्यानन्यरतयेत्यर्थः ॥ जागरितादविशेषादितिभावः फलितमाह ॥ तस्मादिति ॥ एतेनेतिभाक्तत्वेनेत्यर्थः द्वितीयसूत्रोक्तमात्रकर्तृकत्वहेतुरपिस्वप्नस्यकिंश्रुतिसिद्धः ॥ उतप्राज्ञस्यसर्वेश्वरत्वात्सिद्धः नाद्यइत्याह ॥ यदप्युक्तमिः त्यादिना ॥ स्वयंविहत्यजाग्रद्देहं निश्चेष्टं कृत्वा स्वयंवासनयादेहंनिर्मायस्वेनभासास्वीयबुद्धिवृत्त्यास्वेनज्योतिषास्वरूपचैतन्येनचस्वप्नमनुभ

अपिचजागरितेविषयेंद्रियसंयोगादादित्यादिज्योतिर्व्यतिकराच्चआत्मनः स्वयंज्योतिष्टुं दुर्विवेचनमितितद्विवेचनायस्व
प्नउपन्यस्तस्तत्रयदिरथादिसृष्टिवचनंश्रुत्यानिणायेततदास्वयंज्योतिष्टंननिर्णीतंस्यात्तस्माद्रथाद्यभाववचनंश्रुत्यार
थादिसृष्टिवचनंतुभक्तेतिव्याख्येयं ॥ एतेननिर्माणश्रवणंव्याख्यातं यदप्युक्तंप्राज्ञमेनंनिर्मातारमामनंतीति ॥ तदप्यः
सत ॥ श्रुत्यंतरेस्वयंविहत्यस्वयंनिर्मायस्वेनभासास्वेनज्योतिषाप्रस्वपितीतिजीवव्यापारश्रवणादिहापियएषसुप्तेषुजा
गर्तीतिप्रसिद्धानुवादात्त्जीवएषायंकामानांनिर्मातासंकीर्त्यते ॥ तस्यतुवाक्यशेषेणतदेवशुक्रंतद्ब्रह्मेतिजीवभावंव्याव
र्त्यब्रह्मभावउपदिश्यते ॥ तत्त्वमसीत्यादिवदितितब्रह्मप्रकरणं विरुध्यते ॥ नचास्माभिः स्वप्नेपिप्राज्ञव्यापारः प्रतिषिध्य
ते ॥ तस्यसर्वेश्वरत्वात्सर्वास्वप्यवस्थास्वधिष्ठातृत्वोपपत्तेः पारमार्थिकस्तुनायंसंध्याश्रयः सर्गोवियदादिसर्गवदित्येता
वत्प्रतिपाद्यते ॥ नचवियदादिसर्गस्याप्यात्यंतिकंसत्यत्वमस्ति ॥ प्रतिपादितंहितदनन्यत्वमारंभणशब्दादिभ्यइत्यत्र
समस्तस्यप्रपंचस्यमायामात्रत्वं ॥ प्राक्तुब्रह्मात्मत्वदर्शनाद्वियदादिप्रपंचोव्यवस्थितरूपोभवति ॥ संध्याश्रयस्तुप्रपं
चः प्रतिदिनंबाध्यतइति ॥ अतोवैशेषिकमिदंसंध्यस्यमायामात्रत्वमुदितं ॥ ४ ॥ पराभिध्यानात्तुतिरोहितंततोह्यस्यबंधवि

वतीत्यर्थः नकेवलंबृहदारण्यकेजीवस्यस्वप्नकर्तृत्वंश्रुतंकिंतुकाठकेपीत्याह ॥ इहापीतिजीवोक्तौब्रह्मप्रकरणनिरोधइत्यतआह ॥ तस्यत्विति एवंहेतोः
श्रुतिसिद्धत्वंनिरस्यद्वितीयमंगीकरोति ॥ नचास्माभिरिति ॥ नहिहेतुसिद्धेः स्वप्नस्यसत्यत्वमित्याशंक्यसत्यत्वंव्यावहारिकंपारमार्थिकंवेतिविकल्प्य
व्यवहारकालेबाधदर्शनान्नाद्यइत्याह ॥ पारमार्थिकस्त्विति ॥ द्वितीयेदृष्टांतस्यसाध्यवैकल्यमित्याह ॥ नचेति ॥ कस्तर्हिस्वप्नस्यजाग्रतोविशेषोत्रक

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पूर्वं क्लृप्तसामग्र्यभावात्स्वप्नो मायेत्युक्तमयुक्तं सत्यसंकल्पमात्रेणापि सत्यसृष्टिसंभवादिति शंकां कृत्वा परिहरन् सूत्रं आचष्टे ॥ अथापि स्यादित्यादिना ॥ सत्यसंकल्पस्य हि संकल्पात्सृष्टिः सत्या भवति ॥ जीवस्य तु सत्यसंकल्पत्वं प्रत्यस्तमितमिति परिहारार्थः ॥ तर्हि विरुद्धधर्मवत्त्वाज्जीवस्येश्वरत्वं नास्त्येवेति शंकते ॥ किमिति ॥ नास्तीति न किंत्वावृतमस्ति तत्तु नरीश्वरप्रसादात्कस्यचिद्व्यज्यत इत्याह ॥ न नास्तीति ॥ विधूतध्वांतस्य निष्पापस्य संसिद्धस्याणिमादिविशिष्टस्यैश्वर्यं श्रुतिश्चाहेति देवं ज्ञात्वा साक्षात्कृत्य सर्वपाशानामविद्यादिक्लेशानामपहानिरपक्षयस्तत्स्वरूपो भवति ॥ क्षीणैश्च क्लेशैस्तत्कार्यजन्म

अथापि स्यात्परस्यैव तावदात्मनोंऽशो जीवः ॥ अग्नेरिव विस्फुलिंगस्तत्रैवं सति यथाग्निविस्फुलिंगयोः समाने दहनप्रकाशनशक्ती भवतः एवं जीवेश्वरयोरपि ज्ञानैश्वर्यशक्तिः ततश्च जीवस्य ज्ञानैश्वर्यवशात्सांकल्पिकी स्वप्ने रथादिसृष्टिर्भविष्यतीति ॥ अत्रोच्यते ॥ सत्यपि जीवेश्वरयोरंशांशिभावे प्रत्यक्षमेव जीवस्येश्वरविपरीतधर्मत्वं ॥ किं पुनर्जीवस्येश्वरसमानधर्मत्वं नास्त्येव ॥ न नास्ति ॥ विद्यमानमपि तत्तिरोहितं ॥ अविद्यादिव्यवधानात्तत्पुनस्तिरोहितं सत्परमेश्वरमभिध्यायतो यतमानस्य जंतोर्विधूतध्वांतस्य तिमिरतिरस्कृतेव दृक्शक्तिरौषधवीर्यादीश्वरप्रसादात्संसिद्धस्य कस्यचिदेवाविर्भवति न स्वभावत एव सर्वेषां जंतूनां ॥ कुतः ॥ ततो हीश्वराद्धेतोरस्य जीवस्य बंधमोक्षौ भवतः ॥ ईश्वरस्वरूपापरिज्ञानाद्बंधस्तत्स्वरूपपरिज्ञानात्तु मोक्षः तथा च श्रुतिः ॥ ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः ॥ तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकाम इत्येवमाद्या ॥५॥ देहयोगाद्वा सोऽपि ॥ ६ ॥ कस्मात्पुनर्जीवः परमात्मांश एव सन्तिरस्कृतज्ञानैश्वर्यो भवति ॥ युक्तं तु ज्ञानैश्वर्ययोरतिरस्कृतत्वं विस्फुलिंगस्येव दहनप्रकाशनयोरिति ॥ उच्यते सत्यमेवैतत् ॥ सोऽपि तु जीवस्य ज्ञानैश्वर्यतिरोभावो देहयोगाद्देहेंद्रियमनोबुद्धिविषयवेदनादियोगाद्भवति ॥

मरणात्मकबंधध्वंस इति निर्गुणविद्याफलमुक्तं सगुणविद्याफलमाह ॥ तस्येति ॥ परस्याभिमुख्येनाहंग्रहेण ध्यानाद्बंधमोक्षापेक्षया मंत्रोक्तहानिद्वयापेक्षया वा तृतीयं विश्वैश्वर्यमणिमादिरूपं मर्त्यदेहपाते सति सिद्धे देहे भवति तद्भोगानंतरमात्मज्ञानात्केवलो द्वैतशून्य आप्तकामः प्राप्तसर्वज्योतिरानंदो भवतीति क्रममुक्तिरित्यर्थः ॥५॥ उक्तैश्वर्यतिरोभावे देहाभिमानो हेतुरिति कथनार्थं सूत्रं तत्तिरस्कारशंकामाह ॥ कस्मादिति ॥ सत्यावरणं ता सौम्यगीकृत्य कल्पितावरणं साधयति ॥ उच्यत इत्यादिना ॥

जीवस्येश्वरत्वमङ्गीकृत्यावरणकल्पनातो वरमन्यत्वकल्पनेत्याशङ्कामुद्भाव्य श्रुत्या निरस्यति ॥ नन्वित्यादिना ॥ स्वप्नेऽप्यालोकादेः सत्यत्वे जाग्रतीवात्मनः अ·पा·
स्वप्रकाशत्वमस्फुटं स्यात् ॥ प्रातिभासिकत्वे त्वालोकेन्द्रियाद्यसत्त्वेऽप्यर्थापरोक्ष्यमात्मज्योतिष एवेति स्फुटं सिध्यति तस्माद्देशादिसाम्यवचनं ३।२
स्वप्नस्य जाग्रत्तुल्यभानाभिप्रायमित्यर्थः ॥ ६ ॥ २ ॥ सर्वबाह्यकरणोपरमे सति मनो वासनोद्दीपिताऽविद्याविलासात्मकं स्वप्नमात्म

अस्ति चात्रोपमा यथाग्नेर्दहनप्रकाशनसंपन्नस्यापि अरणिगतस्य दहनप्रकाशने तिरोहिते भवतः ॥ यथा वा भस्मच्छन्नस्य एवम
विद्याप्रत्युपस्थापितनामरूपकृतदेहाद्युपाधियोगात् तदविवेकभ्रमकृतो जीवस्य ज्ञानैश्वर्यतिरोभावः ॥ वाशब्दो जीवेश्वरयोरन्य-
त्वाशंकाव्यावृत्त्यर्थः ॥ नन्वन्य एव जीव ईश्वरादस्तु तिरस्कृतज्ञानैश्वर्यत्वात् ॥ किं देहयोगकल्पनयेत्युच्यते ॥ न ह्यन्यत्वं जीवस्येश्व-
रादुपपद्यते ॥ सेयं देवतैक्षतेत्युपक्रम्यानेन जीवेनात्मनानुप्रविश्येत्यात्मशब्देन जीवस्य परामर्शात् ॥ तत्सत्यं स आत्मा तत्त्वमसि
श्वेतकेतो इति च जीवायोपदिशतीश्वरात्मताम् ॥ अतोऽनन्य एवेश्वराज्जीवः सन्देहयोगात्तिरोहितज्ञानैश्वर्यो भवति ॥ अतश्च न
सांकल्पिकी जीवस्य स्वप्ने रथादिसृष्टिर्घटते ॥ यदि च सांकल्पिकी स्वप्ने रथादिसृष्टिः स्यात् ॥ नैवानिष्टं कश्चित्स्वप्नं पश्येत् ॥ न हि
कश्चिदनिष्टं संकल्पयति ॥ यत्पुनरुक्तं जागरितदेशश्रुतिः स्वप्नस्य सत्यत्वं ख्यापयतीति न तत्साम्यवचनं सत्यत्वाभिप्रायं स्वयं-
ज्योतिष्ट्वविरोधात् ॥ श्रुत्यैव च स्वप्ने रथाद्यभावस्य दर्शितत्वात् ॥ जागरितप्रभववासनानिर्मितत्वात्तु स्वप्नस्य तत्तुल्यनिर्भासत्वा- राम·
भिप्रायं तत् ॥ तस्मादुपपन्नं स्वप्नस्य मायामात्रत्वं ॥ ६ ॥ १ ॥ तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥ स्वप्नावस्था परीक्षिता सुषुप्ताव- ३०५
स्थेदानीं परीक्ष्यते ॥ तत्रैताः सुषुप्तिविषयाः श्रुतयो भवन्ति ॥ क्वचिच्छ्रूयते तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्यासु तदा
नाडीषु सृप्तो भवतीति ॥ अन्यत्र तु नाडीरेवानुक्रम्य श्रूयते ॥ ताभिः प्रत्यवसृप्य पुरीतति शेते इति ॥ ७ ॥ ततः साक्षिणः स्वयंज्योतिष्ट्वार्थं विचार्ये

प्रतियोग्यनुयोगिभावसंगत्या स्वप्नावस्थ मनोलयात्मिकां सुषुप्तिं विचारयति ॥ तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ तदेतत्स्वपनं यस्यामवस्थायां यत्रका-
ले सुषुप्तः समस्तो निरस्तबाह्यकरणो मनोलयात्सम्यक्प्रसन्न इत्यर्थः ॥ क्वापि नाडीस्थानमुक्त्वा नाडीपुरीततो नाडीपरमात्मनोश्च समुच्चयश्रुतीराह ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इतिसमुच्चयान्निर्णय॥२॥

परमात्ममात्रश्रुतीराह तथान्यत्रेत्यादिना॥ नाडीपुरीतद्ब्रह्मसु सप्तमीश्रुतेः समुच्चयश्रुतेश्च संशयमाह॥ तत्रेति॥ पूर्वपक्षे स्थानविकल्पाज्जीवस्य तत्र ह्यैक्यानिर्णयः सिद्धान्ते नाडीभिः पुरीततं गत्वा तत्र हृदि ब्रह्मण्येव शेत इति विवेकः॥ एकपुरोडाशार्थत्वं व्रीहियवयोर्दृष्टं नाड्यादीनामेकस्मिन् स्वापस्पार्थे निरपेक्षस्थानत्वं तु कुत इत्यत आह॥ नाड्यादीनां चेति॥ सति ब्रह्मणि तृतीयाश्रुतेर्न सप्तमीति शंकार्थः॥ आयतनशब्दात्सप्तम्यर्थ आधारत्वं गम्यते

तथान्यत्र नाडीरेवानुक्रम्य तासु तदा भवति यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन्प्राण एवैकधा भवतीति॥ तथान्यत्र य एषोन्तर्हृदय आकाशस्तस्मिञ्शेत इति॥ तथान्यत्र सता सोम्य तदा संपन्नो भवति स्वमपीतो भवतीति॥ प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमिति च॥ तत्र संशयः॥ किमेतानि नाड्यादीनि परस्परनिरपेक्षाणि भिन्नानि सुषुप्तिस्थानानि॥ आहोस्वित्परस्परापेक्षयैकं सुषुप्तिस्थानमिति॥ किं तावत्प्राप्तं भिन्नानीति॥ कुतः॥ एकार्थत्वात्॥ नह्येकार्थानां क्वचित्परस्परापेक्षत्वं दृश्यते व्रीहियवादीनां॥ नाड्यादीनां चैकार्थता सुषुप्तौ दृश्यते॥ नाडीषु सृप्तो भवति॥ पुरीतति शेत इति च तत्र तत्र सप्तमीनिर्देशस्य तुल्यत्वात्॥ ननु नैवं सति सप्तमीनिर्देशो दृश्यते सता सोम्य तदा संपन्नो भवतीति॥ नैष दोषः॥ तत्रापि सप्तम्यर्थस्य गम्यमानत्वात्॥ वाक्यशेषो हि तत्रायतनैषी जीवः सदुपसर्पतीत्याह अन्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयत इति॥ प्राणशब्देन च तत्र प्रकृतस्य सत उपादानात्॥ आयतनं च सप्तम्यर्थः॥ सप्तमीनिर्देशोपि तत्र वाक्यशेषे दृश्यते॥ सति संपद्य न विदुः सति संपद्यामह इति॥ सर्वत्र च विशेषविज्ञानोपरमलक्षणं सुषुप्तं न विशिष्यते॥ तस्मादेकार्थत्वान्नाड्यादीनां विकल्पेन कदाचित्किंचित्स्थानं स्वापायोपसर्पतीत्येवं प्राप्ते प्रतिपाद्यते॥ तदभावो नाडीषु आत्मनि चेति॥ तदभाव इति तस्य प्रकृतस्य स्वप्नदर्शनस्याभावः सुषुप्तमित्यर्थः नाडीष्वात्मनि चेति समुच्चयेनैतानि नाड्यादीनि स्वापायोपैति न विकल्पेनेत्यर्थः॥ ७॥

इत्याह॥ नैष दोष इति॥ अन्यत्रावस्थाद्वये श्रान्तो जीवो विश्रान्तिस्थानं प्राणाख्यं सद्ब्रह्मोपसर्पति सुषुप्तावित्यर्थः॥ सप्तमीश्रुत्या निरपेक्षाधारत्वभानाद्विकल्प आस्थेयः कदाचित्समुच्चित्यापि नाड्यादीनां स्थानत्वमिति न समुच्चयश्रुतिविरोध इति पूर्वपक्षार्थः सिद्धान्तयति॥ [illegible]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रेचकारः पुरीतत्समुच्चयार्थः यदानाड्यः सुषुप्तिस्थानंतदापुरीतत्स्थानंनभवतीति त्वत्स्थानत्वस्यपक्षेबाधः स्यात्सत्युक्तइत्याह ॥ विकल्पेह्ये षामिति ॥ व्रीहियवयोस्त्वगत्याविकल्पइतिभावः यत्तुसप्तमीश्रुत्यानाड्यादीनामेकफलकत्वमितितन्नेत्याह ॥ नह्येकेति ॥ प्रासादस्यपर्यंकधारणमा र्थः पर्यंकस्यतुशयनमितिफलभेदेप्येकविभक्तिर्दृश्यते ॥ अवधानाऽप्यवधानाभ्यांशयनसाधनत्वात् समुच्चयश्च ॥ तथेहापिनाडीपुरीततोर्जीवस्यसं

कुतः ॥ तच्छ्रुतेः ॥ तथाहिसर्वेषामेवनाड्यादीनांतत्रतत्रसुषुप्तिस्थानत्वंश्रूयतेतच्चसमुच्चयेसंगृहीतंभवति ॥ विकल्पेह्येषां पक्षेबाधः स्यात् ॥ नन्वेकार्थत्वाद्विकल्पोनाड्यादीनांव्रीहियवादिवदित्युक्तं ॥ नेत्युच्यते ॥ नह्येकविभक्तिनिर्देशमात्रेणैकार्थ त्वंविकल्पश्चापतति ॥ नानार्थत्वसमुच्चययोरप्येकविभक्तिनिर्देशदर्शनात् प्रासादेशेतेपर्यंकेशेतइत्येवमादिषु ॥ तथेहा पिनाडीषुपुरीततिब्रह्मणिचस्वपितीत्युपपद्यतेसमुच्चयस्तथाचश्रुतिः ॥ तासुतदाभवतियदासुप्तःस्वप्नंनकंचनपश्यत्यथा स्मिन्प्राणएवैकधाभवतीतिसमुच्चयंनाडीनांप्राणस्यचसुषुप्तौश्रावयति ॥ एकवाक्योपादानात् प्राणस्यचब्रह्मत्वंसमधिग तंप्राणस्तथानुगमादित्यत्र ॥ यत्रापिनिरपेक्षाइवनाडीःसुप्तिस्थानत्वेनश्रावयति आसुतदानाडीषुसृप्तोभवतीति ॥ तत्रापि प्रदेशांतरप्रसिद्धस्यब्रह्मणोऽप्रतिषेधान्नाडीद्वारेणब्रह्मण्येवावतिष्ठतइतिप्रतीयते ॥ नचैवमपिनाडीषुसप्तमीविरुध्यते ॥ नाडीद्वारापिब्रह्मोपसर्पन्सृप्तएवनाडीषुभवति ॥ योहिगंगयासागरंगच्छतिगतएवसगंगायांभवति ॥ अपिचात्ररश्मिना डीद्वारात्मकस्यब्रह्मलोकमार्गस्यविवक्षितत्वान्नाडीस्तुत्यर्थंसृप्तिसंकीर्तनंनाडीषुसृप्तोभवतीत्युक्त्वातंनकश्चनपाप्मास्पृश तीतिब्रुवन् नाडीःप्रशंसति ॥ ब्रवीतिचपाप्मस्पर्शाभावेहेतुंतेजसाहितदासंपन्नोभवतीति तेजसानाडीगतेनपित्ताख्येनाभि

((व्याप्तकरणोनवाह्यान्विषयानी

वारद्वाराब्रह्मण्येवसुप्तिरितिसमुच्चयइत्यर्थः ॥ नाडीनांप्राणस्यचएकेनवाक्येनोपादानान्मिथःसमु च्चयइत्याह ॥ एकवाक्येति ॥ आधारत्वमात्रंसप्तम्यर्थोननिरपेक्षत्वंअतोनसमुच्चयस्यसप्तम्याबाधइत्याह ॥ नचैवमपीति ॥ समुच्चयेपीत्यर्थः ॥ अत्र नाडीश्रुतौनाडीषुभोक्तुःसुप्तिर्नविवक्षितारश्मिसंबद्धनाडीरूपमार्गस्तुत्यर्थेत्याह ॥ अपिचेति ॥ पित्तेनविषये क्षणाभावेसुखदुःखयोरभावात्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अपहतपाप्मब्रह्मसंपन्नत्वावापाप्मास्पर्शइत्याह ॥ अथवेतिअस्मिन्व्याख्यानेलाभमाह ॥ एवंचसतीति ॥ नासुनदाभवन्त्यथाःस्मिन्प्राणएवैकधाभव तीतिश्रुतः समुच्चयआश्रितोभवतीत्यर्थः ॥ नाडीब्रह्मणोर्गुणप्रधानभावेनसुप्तौसमुच्चयवत् पुरीतत्ब्रह्मणोरपीत्याह ॥ तथेत्यादिना आकाशे ब्रह्म णिशेतइत्युपक्रम्यताभिःप्रत्यवसृप्यपुरीततिशेतइत्युक्तं ॥ तथाचनाडीद्वारापुरीततंगत्वाब्रह्मणिशेतइतिसमुच्चयः सिद्धइत्याह ॥ तथानाडीनिसृता

अथवातेजसेतिब्रह्मणएवायंनिर्देशःश्रुत्यंतरेब्रह्मैवतेजएवेतितेजःशब्दस्यब्रह्मणिप्रयुक्तत्वात् ॥ ब्रह्मणाहितदासंपन्नोभव तिनाडीद्वारेणअतस्तत्नकश्चनपाप्मास्पृशतीत्यर्थः ॥ ब्रह्मसंपत्तिश्चपाप्मस्पर्शाभावेहेतुःसमधिगतः सर्वेपाप्मानोतोनिवर्तंते ऽपहतपाप्माह्येषब्रह्मलोकइत्यादिश्रुतिभ्यः ॥ एवंचसतिप्रदेशांतरप्रसिद्धेनब्रह्मणासुषुप्तिस्थानेनानुगतोनाडीनांमार्गः समाश्रितोभवति ॥ तथापुरीततोपिब्रह्मप्रक्रियायांसंकीर्तनात् तदनुगुणमेवसुषुप्तिस्थानत्वंविज्ञायते ॥ य एषोंतर्हृदयआका शस्तस्मिन्शेतइतिहृदयाकाशेसुषुप्तिस्थानेप्रकृतेइदमुच्यतेपुरीततिशेतइति ॥ पुरितदितिहृदयपरिवेष्टनमुच्यते ॥ तदंतर्वर्तिन्यपिहृदयाकाशेशयानः शक्यतेपुरीततिशेतइतिवक्तुं ॥ प्राकारपरिक्षिप्तेपिपुरेवर्तमानः प्राकारेवर्ततइत्युच्यते ॥ हृद याकाशस्यचब्रह्मत्वंसमधिगतंदहरउत्तरेभ्यइत्यत्र ॥ तथानाडीपुरीततसमुच्चयोपिताभिःप्रत्यवसृप्यपुरीततिशेतइत्येक वाक्योपादानादवगम्यते ॥ सत्याज्ञयोश्चप्रसिद्धमेवब्रह्मत्वं ॥ एवमेतासुश्रुतिषुत्रीण्येवसुषुप्तिस्थानानिसंकीर्तितानिनाड्यः पुरीतत् ब्रह्मचेति ॥ तत्रापिद्वारमात्रंनाड्यःपुरीतच्च ॥ ब्रह्मैवत्वेकंसुषुप्तिस्थानं ॥ अपिचनाड्यःपुरीतद्वाजीवस्योपाध्याधारए वभवति ॥ तत्रास्यकरणानिवर्तंतइति ॥ नह्युपाधिसंबंधमंतरेणस्वतएवजीवस्याधारःकश्चित्संभवति ॥ ब्रह्माव्यतिरेकेण ((स्वमहिमप्रतिष्ठितत्वात् ॥ ६ ॥

संपन्नोभवतिप्राज्ञेनसंपरिष्वक्तइतिसत्प्राज्ञयोःश्रुतेःपंचसुषुप्तिस्थानानीत्यतआह ॥ सत्प्राज्ञयोरिति ॥ किंचप्रकृतदर्शादिसाधनैकपुरोडाशनिष्पत्तौमिथोनपेक्षतयासमर्थयोर्नाड्योर्व्रीहियवयोर्विकल्पःनाड्यादीनांतुब्रह्मनिरपेक्षतयासुषुप्तजीवा धारत्वासामर्थ्यान्नविकल्पइत्याह ॥ अपिचनाड्यइति ॥ उपाधिलिंगाश्रयनाडीपुरीततोरुपहितजीवाश्रयत्वंपरंपरयाघाच्यतदपिसुषुप्तौनसंभ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा·भा· ननु ब्रह्मापि जीवस्य न मुख्यं स्थानं अभेदादित्यत आह ॥ ब्रह्माधारत्वमिति ॥ जीवस्य ब्रह्मण्यभेदेनावस्थानं नाडीपुरीततोस्तु लीनोपाधेर्जीवस्य।

टी· स्थितिरेव न संभवतीत्येकार्थसामर्थ्याभावान्न विकल्प इत्यर्थः सुषुप्तौ जीवस्य भेदकोपाधिलयाज्जौत्सर्गिकब्रह्माभेदस्य विकल्पो न युक्त इत्या अपा·

र·प्र· ह ॥ अपि चेति ॥ किंच नाड्यादीनामन्यतमस्थाने क्वचित्सुषुप्त्यादिनापि सुषुप्तं न विशिष्यत इति वक्तव्यं ॥ तच्च वक्तुं न शक्यत इत्याह ॥ अपि च स्या ३।२

३०७

द्ब्रह्माधारत्वमप्यस्य सुषुप्ते नैवाधाराधेयभेदाभिप्रायेणोच्यते ॥ कथं तर्हि तादात्म्याभिप्रायेण यत आह सता सोम्य त।
दा संपन्नो भवति स्वमपीतो भवतीति स्वशब्देनात्माभिलप्यते स्वरूपमापन्नः सुप्तो भवतीत्यर्थः ॥ अपि च न कदाचिज्जीव।
स्य ब्रह्मणा संपत्तिर्नास्ति स्वरूपस्यानपायित्वात् ॥ स्वप्नजागरितयोस्तु उपाधिसंपर्कवशात् पररूपापत्तिमिवापेक्ष्य तदु
पशमात् सुषुप्ते स्वरूपापत्तिर्विवक्ष्यते ॥ स्वमपीतो भवतीति ॥ अतश्च सुप्तावस्थायां कदाचित्सता संपद्यते कदाचिन्न
संपद्यत इत्ययुक्तं ॥ अपि च स्थानविकल्पाभ्युपगमेपि विशेषविज्ञानोपशमलक्षणं तावत्सुषुप्तं न क्वचिद्विशिष्यते ॥
तत्र सति संपन्नस्तावदेकत्वान्न विजानातीति युक्तं तत्केन कं विजानीयादिति श्रुतेः ॥ नाडीषु पुरीतति च शयानस्य न किंचि
द्विज्ञाने कारणं शक्यं विज्ञातुं भेदविषयत्वात् ॥ यत्र वान्यदिव स्यात्तत्रान्योन्यत्पश्येदिति श्रुतेः ॥ ननु भेदविषयस्या।
प्यतिदूरादिकारणं अविज्ञाने स्यात् ॥ बाढमेवं स्यात् ॥ यदि जीवः स्वतः परिच्छिन्नोऽभ्युपगम्येत यथा विष्णुमित्रः प्रवासी।
स्वगृहं न पश्यतीति ॥ न तु जीवस्योपाधिव्यतिरेकेण परिच्छेदो विद्यते ॥ उपाधिगतमेवातिदूरादिकारणमविज्ञान इति य राम·
द्युच्येत तथाप्युपाधेरुपशान्तत्वात् सत्येव संपन्नो न विजानातीति युक्तं ॥ ॡ नेति ॥ भेदाभावो हि भेदज्ञानाभावे हेतुः नाडीपुरीत। ३०७

ततस्य तु जीवस्य भेदावस्थत्वात् भेदाविज्ञाने कारणं नास्तीत्यर्थः ॥ द्वैतावस्थस्यापि द्वैताज्ञाने हेतुं शंकते ॥ ननु भेदेति ॥ द्रष्टुर्द्रष्टव्यात् दूरस्थत्वं स्वा
भाविकं औपाधिकं वा तत्राद्यं सदृष्टान्तमनूद्य मन्यादृशं बाढमित्यादिना ॥ द्वितीयमनूद्य दूषयति ॥ उपाधिगतमेवेति उपाधिभिन्नस्यैव नाड्यादौ स्वा
पेक्षतिपयसंनिकृष्टार्थज्ञानप्रसंगात् सुषुप्तिव्याघातः स्यात् उपाधिलये तु ब्रह्मजीवस्य स्थितियोगाद्ब्रह्मण्येव स्वाप आस्थेय इत्यर्थः ॥ ७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं विकल्पं निरस्य नाडीपुरीततोर्ब्रह्मणा सह तुल्यवत्समुच्चयमफलत्वेन दूषयन् गुणप्रधानत्वेन समुच्चयमुपसंहरति। न च वयमित्यादिना ॥ ७ ॥ किंच ब्रह्मणः सकाशाज्जीवस्योत्थानश्रुतेर्ब्रह्मैव सुषुप्तिस्थानमित्याह सूत्रकारः "अतः प्रबोध" इति नाडीपुरीततोः क्वाप्युत्थानापादानत्वाश्रवणान्न सुषुप्तिस्थानत्वमित्यर्थः। तस्मादुपाधिलये जीवस्य ब्रह्माभेदादौपाधिकस्य च भेद इति विवेकाद्ब्रह्मकार्यभेदसिद्धिरिति स्थितं ॥ ८ ॥

न च वयमिह तुल्यवन्नाड्यादिसमुच्चयं प्रतिपादयामः। न हि नाड्यः सुप्तिस्थानं ——— पुरीतच्चेत्यनेन विज्ञानेन किंचित्प्रयोजनमस्ति ॥ न ह्येतद्विज्ञानप्रतिबद्धं किंचित्फलं श्रूयते ॥ नाप्येतद्विज्ञानं फलवतः कस्यचिदङ्गमुपदिश्यते ॥ ब्रह्म त्वनपायि सुप्तिस्थानमित्येतत्प्रतिपादयामः ॥ तेन तु विज्ञानेन प्रयोजनमस्ति जीवस्य ब्रह्मात्मत्वावधारणं स्वप्नजागरितव्यवहारविमुक्तत्वावधारणं च ॥ तस्मादात्मैव सुप्तिस्थानं ॥ ७ ॥ अतः प्रबोधोऽस्मात् ॥ ८ ॥ यस्माच्चात्मैव सुप्तिस्थानं अत एव च कारणान्नित्यवदेवास्मादात्मनः प्रबोधः स्वापाधिकारे शिष्यते ॥ कुत एतदागादित्यस्य प्रश्नस्य प्रतिवचनावसरे यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवैतस्मादात्मनः सर्वे प्राणा इत्यादिना ॥ सत आगम्य न विदुः सत आगच्छामह इति च विकल्प्यमानेषु तु सुषुप्तिस्थानेषु कदाचिन्नाडीभ्यः प्रतिबुध्यते कदाचित्पुरीततः कदाचिदात्मन इति अशासिष्यत् ॥ तस्मादात्मैव सुप्तिस्थानमिति ॥ ८ ॥ २ ॥ स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ९ ॥ तस्याः पुनः सत्संपत्तेः प्रतिबुध्यमानः किं य एव सत्संपन्नः स एव प्रतिबुध्यते उत स वाऽन्यो वेति चिन्त्यते ॥ तत्र प्राप्तं तावत् ॥ अनियम इति ॥ कुतः यदा हि जलराशौ कश्चिज्जलबिन्दुः प्रक्षिप्यते जलराशिरेव स तदा भवति ॥ पुनरुद्धरणे च स एव जलबिन्दुर्भवतीति दुःसंपादं ॥ तद्वत्सुप्तः परेणैकत्वमापन्नः संप्रसीदति ॥ न स एव पुनरुत्थातुमर्हति ॥

स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ सुषुप्तौ उपाधिनाशात्कर्माऽनुस्मृत्यादेर्दर्शनाच्च संशये सत्यस्माद्ब्रह्मणो जीवस्योत्थानश्रुतेर्ब्रह्मैव सुषुप्तिस्थानमित्युक्तमयुक्तं ॥ सुप्तादन्यस्याप्युत्थानसंभवेन सुषुप्तस्य नाड्यादिस्थानत्वसंभवादित्याक्षेपसंगत्या नियामकाभावादनियम इति पूर्वपक्षमाह ॥ तस्याः पुनरित्यादिना पूर्वपक्षे ज्ञानवैयर्थ्यं सुषुप्तेर्वाऽपुनरावृत्तिरूपमुक्तिसिद्धेः ॥ ९ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सिद्धान्ते तु अज्ञानब्रह्मात्मना स्थितस्याज्ञानबलेन पुनस्तस्यैवोत्थानाद्वस्त्वभावादज्ञाननाशायज्ञानापेक्षेति फलं ॥ ईश्वरो वेत्यनियमदार्ढ्यायोक्तं स वान्यो वेत्येष पूर्वपक्षः ॥ ज्ञानं विना बुद्ध्याद्युपाधेरत्यन्तनाशाभावात्तया बुद्ध्योपहितो जीवः सुषुप्तौ कारणात्मना स्थितस्तस्यैव नानाकर्मानुभवसंस्कार वत्त्वोपहितस्योत्तिष्ठतीति सिद्धान्तयति ॥ स एव त्वित्यादिना ॥ सामिकृतस्यार्द्धकृतस्यैकस्यैव ज्योतिष्टोमादेरनेकयजमानकर्तृत्वापातादिति प्रसंगः स्मृतिसूक्ता

तस्मात्स एवेश्वरो वान्यो वा जीवः प्रतिबुध्यत इत्येवं प्राप्त इदमाह ॥ स एव तु जीवः सुप्तः स्वास्थ्यं गतः पुनरुत्तिष्ठति ॥ नान्यः क स्मात्कर्मानुस्मृतिशब्दविधिभ्यः विभज्य हेतुं दर्शयिष्यामि ॥ कर्मशेषानुष्ठानदर्शनात्तावत् स एवोत्थातुमर्हति ॥ नान्यस्तथा हि ॥ पूर्वेद्युरनुष्ठितस्य कर्मणोऽपरेद्युः शेषमनुतिष्ठन्दृश्यते ॥ न चान्येन सामिकृतस्य कर्मणोऽन्यः शेषक्रियायां प्रवर्तितुमर्हति ॥ अ अतिप्रसंगात् ॥ तस्मादेक एव पूर्वेद्युरपरेद्युश्चैकस्य कर्मणः कर्तेति गम्यते ॥ इतश्च स एवोत्तिष्ठति यत्कारणमतीतेऽहन्यहमदो ऽद्राक्षमिति पूर्वानुभूतस्य पश्चात्स्मरणं अन्यस्योत्थाने नोपपद्यते ॥ नह्यन्यदृष्टमन्योऽनुस्मर्तुं अर्हति ॥ सोऽहमस्मीति चात्मानु स्मरणमात्मान्तरोत्थाने नावकल्पते ॥ शब्देभ्यश्च तस्यैवोत्थानमवगम्यते ॥ तथा हि पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्ता यैव ॥ सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति तइह व्याघ्रो वा सिंहो वा यद्यद्भवन्ति तदाभवन्तीत्येवमादयः शब्दाः स्वापप्रबोधाधिकारे पठिताः नात्मान्तरोत्थाने सामञ्जस्यमीयुः ॥ कर्मविद्याविधिभ्यश्चैवमेवावगम्यते ॥ अन्यथा हि कर्मविद्या विधयोऽनर्थकाः स्युरन्योत्थानपक्षे हि सुप्तमात्रो मुच्यत इत्यापद्येत ॥ एवं चेत्स्यात् वद किं कालान्तरफलेन कर्मणा विद्यया वाकृतं स्यात् ॥ अपि चान्योत्थानपक्षे यदि तावच्छरीरान्तरे व्यवहरमाणो जीव उत्तिष्ठेत् ॥ तत्रत्यव्यवहारलोपप्रसंगः स्यात् ॥ अथ तत्र सुप्त उत्तिष्ठेत् कल्पनानर्थकं स्यात् ॥ ९ ॥

ऽनुशब्दसूचितां प्रत्यभिज्ञामाह ॥ सोऽहमिति अयनं गमनं आयः योनिः तत्त दिन्द्रियस्थानं प्रति नियतं गमनं यथा भवति तथा प्रतियोन्यागच्छति जागरणायेति श्रुत्यर्थः न विन्दन्तीत्यज्ञानसत्त्वात् सुप्तस्योत्थाननियम उक्तः इह पूर्वं प्रबोधे ये भवन्ति त एव तदा तत्प्रबोधे भवन्तीत्यर्थः ॥ विधिं व्याचष्टे ॥ कर्मेति ॥ स एवोत्तिष्ठतीति निश्चीयत इत्यर्थः ॥ अत्रैवोक्तं युक्त्यन्तरमा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अन्योन्यानिसुखादेर्न पूर्वकर्मकार्यत्वेत्यकृताभ्यागमः पूर्वसुप्तजीवकृतकर्मनाशश्चेत्यर्थः ॥ पूर्वपक्षमुक्तं दृष्टांतं वैषम्येण दूषयति ॥ यस्तु नरि
त्यादिना ॥ अस्मदाद्यशक्यमपि विवेचनं प्राण्यदृष्टापेक्ष ईश्वरः करोतीति मत्वा दृष्टांतमाह ॥ दृश्यते चेति ॥ ब्रह्माभेदाच्च जीवस्य जलबिंदुवैषम्यमित्याह
अपि चेति ॥ अभेदे सत्यन्यो वोत्तिष्ठतीति विज्ञानवकाश इत्याशंक्य बुद्धिभेदेन जीवभेदाच्चिंतेत्याह ॥ एवं सतीति ॥ सुषुप्तौ बुद्धिनाशेन ब्रह्मन्यहं त्वसुप्ता

यो हि यस्मिन् शरीरे सुप्तः स तस्मिन्नोत्तिष्ठति ॥ अन्यस्मिन् शरीरे सुप्तोऽन्यस्मिन्नुत्तिष्ठतीति कोऽस्यां कल्पनायां लाभः स्यात् ॥ अ
थमुक्त उत्तिष्ठेत् अंतवान्मोक्ष आपद्येत निवृत्ताविद्यस्य पुनरुत्थानमनुपपन्नं ॥ एतेनेश्वरस्योत्थानं प्रत्युक्तं नित्यनिवृत्ता
विद्यत्वात् ॥ अकृताभ्यागमकृतविप्रणाशौ च दुर्निवारावन्योत्थानपक्षे स्यातां ॥ तस्मात्स एवोत्तिष्ठति नान्य इति ॥ यत्पुनरुक्तं
॥ यथा जलराशौ प्रक्षिप्तो जलबिंदुर्नोद्धर्तुं शक्यते एवं सति संपन्नो जीवो नोत्पतितुमर्हतीति ॥ तत्परिह्रियते ॥ युक्तं तत्र वि
वेककारणाभावाज्जलबिंदोरनुद्धरणं ॥ इह तु विद्यते विवेककारणं कर्म चाविद्या चेति वैषम्यं ॥ दृश्यते च दुर्विवेचयोरप्य
स्मज्जातीयैः क्षीरोदकयोः संसृष्टयोर्हंसेन विवेचनं ॥ अपि च न जीवो नाम कश्चित्परस्मादन्यो विद्यते यो जलबिंदुरिव ज
लराशेः सतो विविच्येत सदेव तूपाधिसंपर्काज्जीव इत्युपचर्यत इत्यसकृत्प्रपंचितं ॥ एवं सति यावदेकोपाधिगता बंधानुवृत्ति
स्तावदेकजीवव्यवहारः उपाध्यंतरगता तु बंधानुवृत्तिर्जीवांतरव्यवहारः स एवायमुपाधिः स्वापप्रबोधयोर्बीजांकुरन्या
येनेत्यतः स एव जीवः प्रतिबुध्यत इति युक्तं ॥ ९ ॥ मुग्धेऽर्द्धसंपत्तिः परिशेषात् ॥ १० ॥ अस्ति मुग्धो नाम यं मूर्छित इति लौकिकाः
कथयंति ॥ स तु किमवस्थ इति परीक्षायामुच्यते ॥ तिस्रस्तावदवस्थाः शरीरस्थस्य जीवस्य प्रसिद्धाः ॥ जागरितं स्वप्नः सुषुप्तं

धिभेदादेकजीवव्यवहारो न स्यादित्यत आह ॥ स एवायमिति स्थूलसूक्ष्मात्मना तिष्ठन्नेकोपाधिरित्यर्थः ॥ अवस्थात्रयादात्मानं विविच्य मू
र्छांतो विवेचयति ॥ मुग्धेऽर्द्धसंपत्तिः परिशेषात् ॥ मूर्छा प्रसिद्धावस्थांतर्गता वा पंचमावस्था वेति अवस्थाचतुष्टयप्रसिद्धेर्मुग्धस्य तद्वैलक्षण्या
च संशये सोऽहमिति प्रत्यभिज्ञयोत्थितस्य सुप्ताभेदवद्विशेषज्ञानाभावाविशेषेण लिंगेन सुषुप्तिरेव मूर्छेति प्रत्यभिज्ञानात्सुषुप्त्यंतर्गता मूर्छेति दृष्टांतं

मिति ॥

संगत्या पूर्वपक्षमाह ॥ तिस्रस्तावदिति ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रा.भा. पूर्वपक्षेऽप्रसिद्धावस्थानः पृथगात्मनो मूर्छाया विवेकार्थयत्नासिद्धिः फलं सिद्धान्ते पृथक्कृत्यत्वध्रौव्यमिति भेदः परिशेषं दर्शयन् सिद्धान्तयति ॥ ननु त्व-

टी. दित्यादिना जाग्रदपि जागरावस्थोपीत्यर्थः ऐन्द्रियकमर्थज्ञानं देहधारणं च नस्त्यास्ति न मुग्धस्येति चैव मत्योत्यारूपयति ॥ नेत्यादिना ॥ मूर्छा या जागरा अ.पा.

न्या.म. चतुर्थी शरीरादपसृप्तिर्नेतु पंचमी काचिदवस्था जीवस्य प्रतीता स्मृतौ वा प्रसिद्धास्ति ॥ तस्माच्चतसृणामेवावस्थानामन्य- ३.२

१०९ तमावस्था मूर्छेत्येवं मात्रेणभ्रमः ॥ ननु तावन्मुग्धो जागरावस्थो भवितुमर्हति ॥ नहि अयमिन्द्रियैर्विषयानीक्षते ॥ स्यादेत-

त् ॥ इषुकारन्यायेन मुग्धो भविष्यति ॥ यथेषुकारो जाग्रदपीष्वासक्तमनस्तया नान्यान्विषयानीक्षते एवं मुग्धो मुसल-

संपातादिजनितदुःखानुभवव्यग्रमनस्तया जाग्रदपि नान्यान्विषयानीक्षत इति ॥ न अचेतयमानत्वात् ॥ इषुकारो हि व्यापृतमना

ब्रवीति इषुमेवाहमेतावन्तं कालमुपलभमानोऽभूवमिति ॥ मुग्धस्तु लब्धसंज्ञो ब्रवीति अंधे तमसि अहमेतावन्तं कालं प्रक्षिप्तोऽभू-

वं ॥ न किंचिन्मया चेतितमिति ॥ जाग्रतश्चैकविषयविषक्तचेतसोपि देहो विध्रियते ॥ मुग्धस्य तु देहो धरण्यां पतति ॥ त-

स्मान्न जागर्ति नापि स्वप्नान्पश्यति निःसंज्ञत्वात् ॥ नापि मृतः प्राणोष्मणोर्भावात् ॥ मुग्धे हि जंतौ मृतो यं स्यान्नवा मृत इति संश-

यानाऊष्मास्ति नास्तीति हृदयदेशमालभंते निश्चयार्थं प्राणोस्ति नास्तीति च नासिकादेशं ॥ यदि प्राणोष्मणोरस्तित्वं नाव-

गच्छन्ति ततो मृतो यमित्यध्यवसाय दहनायारण्यं नयन्ति ॥ अथतु प्राणमूष्माणं वा प्रतिपद्यन्ते ततो नायं मृत इत्यध्यवसाय

संज्ञालाभाय भिषज्यन्ति ॥ पुनरुत्थानाच्च न दिष्टं गतः ॥ नहि यमराष्ट्रात्प्रत्यागच्छति ॥ अस्तु तर्हि सुषुप्तो निःसंज्ञत्वात् ॥ अ-

मृतत्वाच्च ॥ न वैलक्षण्यात् ॥ मुग्धः कदाचिच्चिरमपि नोच्छ्वसिति सवेपथुरस्य देहो भवति भयानकं च वदनं विस्फारिते नेत्रे ॥ सु- राम.

षुप्तस्तु प्रसन्नवदनः तुल्यकालं पुनः पुनरुच्छ्वसिति निमीलिते अस्य नेत्रे भवतः ॥ न चास्य देहो वेपते पाणिपेषणमात्रेण च २०९

[illegible]देदमुक्त्वा स्वप्नमृतिभ्यां भेदमाह ॥ नापीत्यादिना ॥ आलभंते स्पृशंति ॥ दिष्टं मरणं ॥ सुषुप्ति ॥ सुप्तमुत्थापयंति ॥ ननु मुग्धसुप्तयोर्घातेना

मूर्छयोः किंचित्सारूप्येपि बहुवैलक्षण्यान्नैक्यमित्याह ॥ नेति ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लक्षणभेदमुक्त्वा निमित्तभेदमाह निमित्तेति प्रत्यभिज्ञाप्रसिद्धेरित्याह ॥ न चेति ॥ उक्तसारूप्यवैरूप्याभ्यामर्धसंपत्तिः सर्वैः सुषुप्तिधर्मैः संपन्नो मुग्धः सुषुप्तो न भवति सर्वैर्मरणावस्थाधर्मैः संपन्नो मृतोऽपि न किंतु अवस्थान्तरं गत इति सूत्रार्थः ॥ अत्र सूत्रे जीवस्य ब्रह्मणार्धसंपत्तिरुक्तेति भ्रान्तः शङ्कते ॥ कथमिति यत्सुषुप्तं प्रति सता संपन्नत्वं श्रुतं तदुपाध्यभावाभिप्रायं उपाध्यभावश्च मुग्धस्यापि समः इति यतस्तस्मात्कृत्स्नसंपत्तिरेवेत्यर्थः सुषुप्तकाले कर्मासंबंधे पुनरुत्था-

निमित्तभेदश्च भवति मोहस्वापयोः मुसलसंपातादिनिमित्तत्वान्मोहस्य । श्रमादिनिमित्तत्वाच्च स्वापस्य । न च लोकेऽस्ति प्रसिद्धिः मुग्धः सुप्त इति । परिशेषादर्धसंपत्तिर्मुग्धतेत्यवगच्छामः निःसंज्ञत्वात्संपन्नः इतरस्माच्च वैलक्षण्यादसंपन्न इति । कथं पुनरर्धसंपत्तिर्मुग्धतेति शक्यते वक्तुं । यावता सुप्तं प्रति तावदुक्तं श्रुत्या सता सोम्य तदा संपन्नो भवति । अत्र स्तेनोऽस्तेनो भवति नैतं सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुःकृतमित्यादिना । जीवे हि सुकृतदुःकृतयोः प्राप्तिः सुखित्वदुःखित्वप्रत्ययोत्पादनेन भवति । न च सुखित्वप्रत्ययो दुःखित्वप्रत्ययो वा सुषुप्ते विद्यते मुग्धेऽपि तौ प्रत्ययौ नैव विद्येते । तस्मादुपाध्युपशमात् सुषुप्तवन्मुग्धेऽपि कृत्स्नसंपत्तिरेव भवितुमर्हति नार्धसंपत्तिरिति । अत्रोच्यते । न ब्रूमो मुग्धेऽर्धसंपत्तिर्जीवस्य ब्रह्मणा भवतीति । किं तर्हि अर्धेन सुषुप्तपक्षस्य भवति मुग्धत्वं अर्धेनावस्थान्तरपक्षस्येति ब्रूमः दर्शिते च मोहस्य स्वापेन साम्यवैषम्ये । द्वारं चैतन्मरणस्य यदास्य सावशेषं कर्म भवति । तदा वाङ्मनसे प्रत्यागच्छतः । यदा तु निरवशेषं कर्म भवति तदा प्राणोष्माणावपगच्छतः तस्मादर्धसंपत्तिं ब्रह्मविद इच्छंति । यत्तूक्तं न पंचमी काचिदवस्था प्रसिद्धास्तीति नैष दोषः कदाचित्कीयमवस्थेति न प्रसिद्धा स्यात् । प्रसिद्धा चैषा लोकायुर्वेदयोः अर्धसंपत्त्यभ्युपगमाच्च न पंचमी गण्यत इत्यनवद्यं ॥ ४ ॥ १० ॥

९. नं कथमित्याशंक्य तत्कार्यभावात्तत्संबंधोऽस्तीत्याह ॥ जीवे हीति ॥ ब्रह्मणा कृत्स्नसंपत्तिमंगीकृत्य परिहरति ॥ न ब्रूम इति ॥ मुग्धत्वं हि सुषुप्तस्यार्धेन निःसंज्ञत्वादिधर्मेण साम्येन संपन्नं भवति मरणस्यार्धेन कंपादिना संपन्नमित्यर्धसंपत्तिरित्यर्थः ॥ इतोऽपि सुषुप्तिवैषम्यमित्याह द्वारं चेति अप्रसिद्धिमंगीकृत्योक्तं प्रसिद्धिरप्यस्तीत्याह ॥ प्रसिद्धा चेति आयुर्वेदो वैद्यशास्त्रं ॥ प्रसिद्धौ कथं विवाद इत्याशंक्य पंचमत्वेनाप्रसिद्धेरित्याह ॥ अर्धेति ॥ सुषुप्तिमृतिधर्मार्धसंपत्त्या न तदन्तर्भाववत्तु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा·भा· सर्वाभिरवस्थाभिरलिप्तस्त्वमर्थ इति विचारोपरसमाप्तेस्तत्पदार्थं निरूपयितुंकामः प्रथमंतस्यनिर्विशेषत्वमाह नस्थानतःसर्वत्रहि॥ उद्देश्यत्वंपरा नोऽपिपरस्योभयलिंगं ११॥ अ·पा·

टी· र्थजिज्ञासोपरमानंतरंतत्स्वरूपब्रह्मविचारस्यावसरसंगतिमाह॥ येनेति॥ सविशेषत्वंनिर्विशेषत्वंचेत्युभयंलिंग्यतेज्ञाप्यतेनेनेत्यभिलाउभयलिं ३·२

र·प्र· गाःश्रुतयःसंशयबीजत्वेनसंगीतार्थः॥ यथाविरुद्धसुषुप्तिमरणोभयरूपत्वंमुग्धत्वंनतथाश्रुतिप्रामाण्यादुभयरूपंब्रह्मध्येयमितिदृष्टांतेन

३१० पूर्वपक्षःनिर्विशेषमेकरूपमेवज्ञेयमितिसिद्धांतयति॥ एवमितिकिमुभयरूपत्वंस्वतः॥ उतस्वतोनिर्गुणस्यसर्वगंधत्वादिविशेषःउपाधितःसत्य

नस्थानतोऽपिपरस्योभयलिंगंसर्वत्रहि॥११॥ येनब्रह्मणासुषुप्तादिषुजीवउपाध्युपशमात्संपद्यते॥ तस्येदानींस्वरूपंश्रुतिव शेननिर्धार्यते॥ संत्युभयलिंगाःश्रुतयःब्रह्मविषयाःसर्वकर्मासर्वकामःसर्वगंधःसर्वरसइत्येवमाद्याःसविशेषलिंगाः॥ अस्थूलमनण्वह्रस्वमदीर्घमित्येवमाद्याश्चनिर्विशेषलिंगाः॥ किमासुश्रुतिषूभयलिंगंब्रह्मप्रतिपत्तव्यमुतान्यतरलिंगं॥ यदाप्यन्यतरलिंगंतदापिकिंसविशेषमुतनिर्विशेषमितिमीमांस्यते॥ तत्रोभयलिंगश्रुत्यनुग्रहादुभयलिंगमेवब्रह्मेत्येवंप्राप्तेइदमुच्यते॥ नतावत्स्वतएवपरस्यब्रह्मणउभयलिंगत्वमुपपद्यते॥ नह्येकंवस्तुस्वतएवरूपादिविशेषोपेतंतद्विपरीतंचेत्यवधारयितुंशक्यंविरोधात्॥ अस्तुतर्हिस्थानतःपृथिव्याद्युपाधियोगादिति॥ तदपिनोपपद्यते॥ नह्युपाधियोगादप्यन्यादृशस्यवस्तुनोऽन्यादृशःस्वभावःसंभवति॥ नहिस्वच्छःसन्स्फटिकोऽलक्तकाद्युपाधियोगादस्वच्छोभवति॥ भ्रममात्रत्वादस्वच्छताभिनिवेशस्य॥ उपाधीनांचाविद्याप्रत्युपस्थापितत्वात्॥ अतश्चान्यतरलिंगपरिग्रहेऽपिसमस्तविशेषरहितंनिर्विकल्पमेवब्रह्मप्रतिपत्तव्यं॥ नतद्विपरीतं॥ सर्वत्रहिब्रह्मस्वरूपप्रतिपादनपरेषुवाक्येष्वशब्दमस्पर्शमरूपमव्ययमित्येवमादिष्वपास्तसम

आहोस्वित्स्वतःसविशेषमेवब्रह्मेति॥ तत्राद्यंनिरस्यद्वितीयमनूद्यदूषयति॥ अस्तुतर्हीति॥ स्थानमुपाधिः॥ सविशेषमेवब्रह्मोपदिश्यते ब्रह्मणिविशेषःकल्पितःऔपाधिकत्वात्स्फटिकलौहित्यवदित्यर्थः उपाधेःसत्यत्वेऽपितत्कृतंमिथ्येतिदृष्टंब्रह्मणितूपाधीनांमिथ्यात्वात् तत्कृतोविशेषो मिथ्येतिकिमुवाच्यमित्याह॥ उपाधीनामितितृतीयंनिरस्यति॥ अतश्चेति॥ सर्वस्यविशेषस्यकल्पितत्वादेवेत्यर्थः निषेधश्रुतेश्चेत्याह॥ सर्वत्रे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भिन्नत इति भेदो विशेषः ॥ निर्विशेषत्वश्रुतावपि विशेषस्यापि श्रुतेरुभयरूपत्वं स्यादिति शङ्कां व्याचष्टे ॥ अथापि स्यादिति ॥ पूर्वोक्तविरोधं स्मारयति ॥ ननूक्तमिति ॥ भेदश्रुतिप्रामाण्यार्थं सोपाधिकरूपभेदस्वीकारादविरोध इति समाधत्ते ॥ किमुपाधिगतस्य वस्तुभेदो ब्रह्मण्युपचर्यते ध्यानार्थमुतो पाधियोगात्सत्यविरुद्धरूपवत्तया ब्रह्मणो भेदो भवतीति ॥ आद्ये ऽस्मदिष्टसिद्धिः द्वितीयस्तु भेदश्रुत्या दूष्यति ॥ नेति ब्रूमः इति ॥ द्वैतनिन्दापूर्वकमद्वैतो

न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥ अथापि स्यात् यदुक्तं निर्विकल्पमेकलिङ्गमेव ब्रह्म नास्य स्वतः परतो वोभयलिङ्गत्वमस्तीति तन्नोपपद्यते ॥ कस्माद्भेदात् ॥ भिन्ना हि प्रतिविद्यं ब्रह्मण आकारा उपदिश्यन्ते चतुष्पाद्ब्रह्म षोडशकलं ब्रह्म वामनीत्वादिलक्षणं ब्रह्म त्रैलोक्यशरीरवैश्वानरशब्दोदितं ब्रह्मेत्येवंजातीयकास्तस्मात्सविशेषत्वमपि ब्रह्मणोऽभ्युपगन्तव्यं ॥ ननूक्तं नोभयलिङ्गत्वं ब्रह्मणः संभवतीति ॥ अयमप्यविरोधः उपाधिकृतत्वादाकारभेदस्य अन्यथा हि निर्विषयमेव भेदशास्त्रं प्रसज्येतेति चेत् ॥ नेति ब्रूमः कस्मात् प्रत्येकमतद्वचनात् प्रत्युपाधिभेदं ह्यभेदमेव ब्रह्मणः श्रावयति शास्त्रं यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेत्यादि ॥ अतश्च न भिन्नाकारयोगो ब्रह्मणः शास्त्रीय इति शक्यते वक्तुं ॥ १२ ॥ अपि चैवमेके ॥ १३ ॥ अपि चैवं भेददर्शननिन्दापूर्वकमभेददर्शनमेवैके शाखिनः समामनन्ति ॥ मनसैवेदमाप्तव्यं नेह नानास्ति किंचन ॥ मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति ॥ तथान्येऽपि ॥ भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतदिति समस्तस्य भोग्यभोक्तृनियन्तृलक्षणस्य प्रपञ्चस्य ब्रह्मैकस्वभावतामधीयते ॥ १३ ॥ कथं पुनराकारवदुपदेशिनीष्वनाकारोपदेशिनीषु च ब्रह्मविषयासु श्रुतिषु सतीष्वनाकारमेव ब्रह्मावधार्यते न पुनर्विपरीतमित्यत उत्तरं पठति ॥ अरूपवदेव हि तत्प्रधानत्वात् ॥ १४ ॥ रूपाद्याकाररहितमेव ब्रह्मावधारयितव्यं ॥ ॥१२॥ केश्च निर्विशेषं

तत्त्वमिति सूत्रार्थमाह ॥ अपि चेति ॥ भोक्ता जीवो भोज्यं शब्दादि तयोः प्रेरितारमीश्वरं च मत्वा विचार्य मे मम प्रोक्तं तत्सर्वं त्रिविधं ब्रह्मैवेति जानीयादित्यर्थः ॥ १३ ॥ द्विविधश्रुतिषु सतीषु निर्विशेषत्वे किं नियामकमिति शङ्कते ॥ कथं पुनरिति ॥ तत्पराः तत्परातत्परविरोधे तत्परं बलवदिति न्यायो नियामक इत्याह ॥ अ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उपासनापरवाक्येषु आकारे तात्पर्याभावेपि देवताविग्रहादिवदाकारसिद्धिमाशंक्य निष्प्रपंचपरश्रुतिविरोधान्मैवमित्याह तेष्वसतीति ॥१४॥ कस्मि-
न्नद्वैते सावकाशत्वात्तु सप्रपंचनिष्प्रपंचश्रुत्योरुभयोरित्याह प्रकाशवच्चेति ॥ नन्वाकारवाक्यानामुपाधिकल्पितसर्वगंधत्वादिनार्थवत्वं किमितिवर्ण्यते

नरूपादिमत् ॥ कस्मात्तत्प्रधानत्वात् ॥ अस्थूलमनण्वह्रस्वमदीर्घमशब्दमस्पर्शमरूपमव्ययं ॥ आकाशो वै नाम नामरूपयोर्नि-
र्वहिता ते यदंतरा तद्ब्रह्म दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यंतरो ह्यजः तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यम् अयमात्मा ब्रह्म सर्वा-
नुभूरित्येवमादीनि हि वाक्यानि निःप्रपंचब्रह्मात्मतत्वप्रधानानि नार्थांतरप्रधानानीत्येतत्प्रतिष्ठापितं तत्तु समन्वयादित्यत्र ॥
तस्मादेवंजातीयकेषु वाक्येषु यथाश्रुतं निराकारमेव ब्रह्मावधारयितव्यं ॥ इतराणि त्वाकारवद्ब्रह्मविषयाणि वाक्यानि न त-
त्प्रधानानि उपासनविधिप्रधानानि हि तानि ॥ तेष्वसति विरोधे यथाश्रुतमाश्रयितव्यं सति तु विरोधे तत्प्रधानान्यतत्प्रधानेभ्यो
बलीयांसि भवंति ॥ एष विनिगमनायां हेतुः ॥ येनोभयीष्वपि श्रुतिषु सतीष्वनाकारमेव ब्रह्मावधार्यते न पुनर्विपरीतमिति ॥१४
॥ का तर्हि आकारवद्विषयाणां श्रुतीनां गतिरित्यत आह ॥ प्रकाशवच्चावैयर्थ्यात् ॥१५॥ यथा प्रकाशः सौरश्चांद्रमसो वा वि-
यद्व्या प्यावतिष्ठमानोंगुल्याद्युपाधिसंबंधात्तेषु ऋजुवक्रादिभावं प्रतिपद्यमानेषु तद्भावमिव प्रतिपद्यते ॥ एवं ब्रह्मा-
पि पृथिव्याद्युपाधिसंबंधात्तदाकारतामिव प्रतिपद्यते ॥ तदालंबनो ब्रह्मण आकारविशेषोपदेश उपासनार्थो न विरुध्यते ॥
एवमवैयर्थ्यमाकारवद्ब्रह्मविषयाणामपि वाक्यानां भविष्यति ॥ न हि वेदवाक्यानां कस्यचिदर्थवत्वं कस्यचिदनर्थवत्वमि-
ति युक्तं प्रतिपत्तुं प्रमाणत्वाविशेषात् ॥ नन्वेवमपि यत्पुरस्तात्प्रतिज्ञातं नोपाधियोगादप्युभयलिंगत्वं ब्रह्मणोस्तीति तद्विरुध्य-
ते ॥ नेति ब्रूमः उपाधिनिमित्तस्य वस्तुधर्मत्वानुपपत्तेः ॥ उपाधीनां चाविद्याप्रत्युपस्थापितत्वात् ॥ १५ वैयर्थ्यमेवोच्यतां तत्राह न
हि वेदवाक्यानामिति ॥ नन्वेवमपीति ॥ उक्तरीत्योभयरूपत्वांगीकारेण श्रुतीनां व्यवस्थितत्वेपीत्यर्थः ॥ उपाधीनां कल्पितत्वादौपाधिकस्य स-
त्यत्वानुपपत्तेर्न सत्यमुभयरूपत्वमिति पूर्वमुक्तं संप्रति सत्यं निर्विशेषत्वं मिथ्या सविशेषत्वमित्युच्यत इत्युभयरूपत्वांगीकारेपि न पूर्वापरविरोध इ-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्वैतस्य मिथ्यात्वे ज्ञानेन वा धाद्युपासनादिव्यवहारो न स्यादित्याशंक्य बाधात्प्रागेव स इत्याह ॥ सत्यामिति ॥ १५ ॥ यतः श्रुतिश्चिन्मात्रमाह ॥
अतश्च विशेषो मिथ्येति सूत्रार्थमाह आह चेति ॥ सैंधवघनो लवणपिंडः ॥ १६ ॥ किंच श्रुतिस्मृत्योः परप्रतिषेधेन ब्रह्मोपदेशान्निष्प्रपंचं ब्रह्मे-
त्याह ॥ दर्शयति चेति ॥ अथ द्वैतोक्त्यनंतरं ज्ञाहेतुत्वान्नेति नेतीत्युपदेशः क्रियत इत्यर्थः ॥ अधि अभ्यस्तु नः पुनरधीहि भो इति निर्बंधकारिणं तं द्वि-

सत्यामेव च नैसर्गिकायामविद्यायां लोकवेदव्यवहारावतार इति तत्त्वावोचाम ॥ १५ ॥ आह च तन्मात्रं ॥ १६ ॥ आह च श्रु-
तिश्चैतन्यमात्रं विलक्षणरूपांतररहितं निर्विशेषं ब्रह्म ॥ स यथा सैंधवघनोऽनंतरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेय-
मात्माऽनंतरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेति ॥ एतदुक्तं भवति ॥ नास्यात्मनोंतर्बहिर्वा चैतन्यादन्यद्रूपमस्ति ॥ चैत-
न्यमेव तु निरंतरमस्य स्वरूपं यथा सैंधवघनस्यांतर्बहिश्च लवणरस एव निरंतरो भवति न रसांतरं तथैवेति ॥ १६
॥ दर्शयति चाथो अपि स्मर्यते ॥ १७ ॥ दर्शयति च श्रुतिः परप्रतिषेधेनैव ब्रह्म निर्विशेषत्वं ॥ अथात आदेशो नेति
नेतीति ॥ अन्यदेव तद्विदितादथो अविदितादधि ॥ यतो वाचो निवर्तंते अप्राप्य मनसा सहेत्येवमाद्या ॥ बाष्कलिना च
बाध्वः पृष्टः सन्नवचनेनैव ब्रह्म प्रोवाचेति श्रूयते ॥ स होवाचाधीहि भो इति स तूष्णीं बभूव तं ह द्वितीये वा तृतीये वा व-
चन उवाच ब्रूमः खलु त्वं तु न विजानासि उपशांतोयमात्मेति ॥ तथा स्मृतिष्वपि परप्रतिषेधेनैवोपदिश्यते ॥ ज्ञेयं यत्तत्प्र-
वक्ष्यामि यज्ज्ञात्वामृतमश्नुते ॥ अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते इत्येवमाद्यासु ॥ तथा विश्वरूपधरो नारायणो ना-
रदमुवाचेति स्मर्यते ॥ माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद ॥ सर्वभूतगुणैर्युक्तं नैवं मां ज्ञातुमर्हसीति ॥ १७ ॥ ६ ॥

तीये तृतीये च प्रश्ने तूष्णीभावं त्यक्त्वा उवाच ॥ उपशांतो निरस्तद्वैतः अतस्तस्य तूष्णीभाव एवोत्तरमिति ॥ सौत्र अथोशब्दस्तथार्थकः ॥ आ-
दिमत्कार्यं तन्न भवतीत्यनादिमत् मत् इंद्रियवेद्यं ॥ असत्परोक्षं च न स्वप्रकाशत्वादित्यर्थः ॥ सर्वभूतगुणैर्दिव्यगंधादिभिर्युक्तं मां मूर्तिमंतं
पश्यसीति यत्सा माया अत एवं सद्वैतो भगवानिति मां ज्ञातुं नार्हसि वस्तुतो द्वैतातीतत्वादित्यर्थः ॥ १७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किंचयथाजलाद्युपाधिकल्पितःसूर्यचंद्रादेर्भेदचलनादिधर्मएवमात्मनइतिदृष्टांतंनञ्कृतेस्यनिर्विशेषत्वमित्याह अतएवचोपमेति ॥ जलस्थ
प्रतिबिंबत्वाकारेणसूर्यस्याभासत्वद्योतनायसूर्यकेतिकप्रत्ययः ॥ यथायंज्योतिर्मयोविवस्वान्स्वतएकोपिघटभेदेनभिन्नाःअपोनुगच्छन्बहुधा
क्रियतएवमजोयमात्मादेवःस्वप्रकाशएकोप्युपाधिनामाययास्वेत्रेष्वनुगच्छन्भेदरूपःक्रियतइतियोजना ॥१७॥ इदानीमस्मदुक्तदृष्टांतवैषम्यशंका

अतएवचोपमासूर्यकादिवत् ॥१८॥ यतएवचायमात्माचैतन्यरूपोनिर्विशेषोवाङ्मनसातीतःपरप्रतिषेधोपदेश्योतए
वचास्योपाधिनिमित्तामपारमार्थिकींविशेषवत्तामभिप्रेत्यजलसूर्यकादिवदित्युपमोपादीयतेमोक्षशास्त्रेषु ॥ यथाह्ययं
ज्योतिरात्माविवस्वानपोभिन्नाबहुधैकोनुगच्छन् ॥ उपाधिनाक्रियतेभेदरूपोदेवःक्षेत्रेष्वेवमजोयमात्मेति ॥ एकएवतुभूता
त्माभूतेभूतेव्यवस्थितः ॥ एकधाबहुधाचैवदृश्यतेजलचंद्रवदित्येवमादिषु ॥१८॥ अत्रप्रत्यवस्थीयते ॥ अंबुवदग्रहणात्तु
नतथात्वं ॥१९॥ नजलसूर्यकादितुल्यत्वमिहोपपद्यतेतद्वदग्रहणात् ॥ सूर्यादिभ्योहिमूर्तेभ्यःपृथग्भूतंविप्रकृष्टदेशंमूर्तंच
जलंगृह्यते ॥ तत्रयुक्तःसूर्यादिप्रतिबिंबोदयः ॥ नत्वात्मामूर्तोनचास्मात्पृथग्भूताविप्रकृष्टदेशाश्चोपाधयःसर्वगतत्वात् ॥ सर्वा
नन्यत्वाच्च ॥ तस्मादयुक्तोयंदृष्टांतइति ॥१९॥ अत्रप्रतिविधीयते ॥ वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवं ॥२०॥ युक्तएवत्व
यंदृष्टांतोविवक्षितांशसंभवात् ॥ नहिदृष्टांतदार्ष्टांतिकयोःक्वचित्कंचिद्विवक्षितांशंमुक्त्वासर्वसारूप्यंकेनचिद्दर्शयितुंशक्यते ॥ स

र्वसारूप्येहिदृष्टांतदार्ष्टांतिकभावोच्छेदएवस्यात् ॥ नचेदंस्वमनीषयाजलसूर्यकादिदृष्टांतप्रणयनं ॥ शास्त्रप्रणीतस्यतस्यप्रयो
जनमात्रमुपन्यस्यते ॥ किंपुनरत्रविवक्षितंसारूप्यमिति ॥ तदुच्यते ॥ वृद्धिह्रासभाक्त्वमिति ॥ जलगतंहिसूर्यप्रतिबिंबंजलवृद्धौ
((वर्द्धतेजलह्रासेह्रसति ॥ जलचलनेचलति ॥ जलभेदेभिद्य

सूत्रमंबुवदिति ॥ आत्मनोनीरूपत्वात्दूरस्थोपाध्यभावाच्चमाययाबुद्ध्यादिषु ((
प्रतिबिंबभेदोनयुक्तइत्यर्थः ॥१९॥ उपाध्यंतर्भावेनतत्कल्पितधर्मवत्त्वमत्रविवक्षितांशस्तेनसाम्येनसमाधानसूत्रंवृद्धिह्रासेति ॥ दृष्टांतसाम्येपिनीरू
पात्मनःप्रतिबिंबःस्वबुद्ध्याकथंकल्प्यतइत्यतआह ॥ नचेदमिति ॥ श्रूयतेनकल्प्यतइत्यर्थः ॥ श्रुतदृष्टांतस्यसूर्यकादिवदित्युपन्यासेनकिंफलमित्यतआ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आत्मनोनिर्विशेषत्वंफलमित्यर्थः॥ अविरोधइतिनवैषम्यमित्यर्थः॥ आत्माप्रतिबिंबशून्यः नीरूपद्रव्यत्वात् वायुवदित्यनुमाने आकाशे व्यभिचारः॥ अल्पजलेः बिंदुराकाशप्रतिबिंबदर्शनादुपाधिदूरस्थत्वमपिनक्वचिदनपेक्षितमितिभावः॥२०॥ एवंशास्त्रेणैवोक्तानुमानबाधइत्याह सूत्रकारः॥ दर्शनाच्चेति द्विपदः पुरोमनुष्यादिदेहांश्चक्रे चतुष्पदः पुरः पशून्कृत्वा पुरस्तत्सुराद्यभिव्यक्तेः पुरस्तात्सईश्वरः पक्षीलिंगशरीरी भूत्वापुरउक्तानिशरीराण्याविशत् सचप्रविष्टोऽपिपुरुषः पूर्णएवेत्यर्थः तैत्तिरीयकेलिंगस्यपक्षत्वोक्तेः पक्षित्वंमतन्यमेवंप्रतिबिंबभावेनमेहादेः कल्पितत्वात् निर्विशेषंब्रह्मेतिस्वमतमुपसंहरति॥ तस्मादिति॥ एकदेशिव्याख्यामुत्थापयति॥ अत्रेति॥ तस्यानतोऽपीत्याद्येकमधिकर

ननुपरमार्थतः सूर्यस्यतथात्वमस्ति॥ एवंपरमार्थतोऽविकृतमेकरूपमपिसत्ब्रह्मदेहाद्युपाध्यंतर्भावाद्भजतइवोपाधिधर्मान्वृद्धिह्रासादीन्॥ एवमुभयोर्दृष्टांतदार्ष्टांतिकयोः सामंजस्यादविरोधः॥२०॥ दर्शनाच्च॥२१॥ दर्शयतिचश्रुतिः परस्यैवब्रह्मणोदेहादिषूपाधिष्वंतरनुप्रवेशं॥ पुरश्चक्रे द्विपदः पुरश्चक्रेचतुष्पदः॥ पुरः सपक्षीभूत्वापुरः पुरुषआविशदिति॥ अनेनजीवेनात्मनानुप्रविश्येतिच॥ तस्माद्युक्तमेतत् अतएवचोपमासूर्यकादिवदिति॥ तस्मान्निर्विकल्पैकलिंगमेवब्रह्मनोभयलिंगंविपरीतलिंगंचेतिसिद्धं॥ अत्रकेचित्द्वेअधिकरणेकल्पयंति॥ प्रथमंतावत् किंप्रत्यस्तमिताशेषप्रपंचमेकाकारंब्रह्मउतप्रपंचवदनेकाकारोपेतमिति॥ द्वितीयंतुस्थितेप्रत्यस्तमितप्रपंचत्वेकिं सल्लक्षणंब्रह्मउतबोधलक्षणंउतोभयलक्षणमितिअत्रवयंवदामः॥ सर्वथाप्यानर्थक्यमधिकरणांतरारंभस्येति॥

णंतत्रब्रह्मणोनिष्प्रपंचत्वेस्थितेकिंलक्षणंब्रह्मेतिसंदेहेप्रकाशवच्चेत्यादिद्वितीयमधिकरणंप्रवृत्तंनसद्रूपमेवब्रह्म किंतुप्रकाशवच्चिद्रूपंचकुतः॥ अवैयर्थ्यात् सत्यंज्ञानंसदेवसोम्येत्युभयश्रुतेर्द्विरूपेब्रह्मण्यर्थवत्वादितिपूर्वपक्षेसिद्धांतः आहचतन्मात्रंसन्मात्रंब्रह्मश्रुतिराह ज्ञानस्यसत्तातिरेकादिति॥ इदंद्वितीयाधिकरणंदूषयति॥ अत्रवयमिति॥ द्वितीयाधिकरणस्यकिंब्रह्मणोनेकरूपत्वनिरासः फलंउतबोधनिरासः अहोस्वित्सत्तानिरासइति विकल्प्यसर्वथाप्यानर्थक्यंप्रपंचयत् आद्येगतार्थतामाह॥ यदितावदितितद्द्वितीयदूषमाह॥ नचेति॥ ब्रह्मणोबोधरूपत्वनिरासे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ब्र·भा· कथंवेति॥ नतृतीयइत्याह॥ नापीति॥ सत्तानिरासेबोधस्यतुच्छत्वंचस्यादित्याह॥ कथमिति॥ नचबोधस्यसत्तानतिरेकात्तुच्छतेतिवाच्यं॥ सद्बोधप
टी· दयोर्वाच्यानतिरेकेपर्यायत्वप्रसंगात्॥ एवंसिद्धांतंफलाभावेनदूषयित्वापूर्वपक्षंदूषयति॥ नापीति॥ प्रसंगमेवाहसत्तेति॥ व्यावृत्तत्वंभिन्नत्वंतिष्ठ अ·पा
३·प्र· पंचैकरूपत्वसिद्धांतविरोधात् भिन्नोभयरूपत्वपूर्वपक्षानुत्थानमित्यर्थः उभयश्रुतिबलादुत्थानमितिशंकते श्रुतत्वादिति॥ मेरुविंध्यवत्परस्परं ३·२
९३ यदितावदनेकलिंगत्वंपरस्यब्रह्मणोनिराकर्तव्यमित्ययंप्रयासस्तत्पूर्वेणैवतस्यानतोपीत्यनेनाधिकरणेननिराकृतमि
त्युत्तरमधिकरणंप्रकाशवच्चेत्येतदव्यर्थंस्यात्नसत्त्वलक्षणमेवब्रह्मनबोधलक्षणमितिशक्यंवक्तुंविज्ञानघनएवेत्यादिश्रुति
वैयर्थ्यप्रसंगात्॥ कथंवानिरस्तचैतन्यंब्रह्मचेतनस्यजीवस्यात्मत्वेनोपदिश्येत॥ नापिबोधलक्षणमेवब्रह्मनसत्त्वलक्षणमि
तिशक्यंवक्तुं॥ अस्तीत्येवोपलब्धव्यइत्यादिश्रुतिवैयर्थ्यप्रसंगात्॥ कथंवानिरस्तसत्ताकोबोधोभ्युपगम्येत॥ नाप्यु
भयलक्षणमेवब्रह्मेतिशक्यंवक्तुं॥ पूर्वाभ्युपगमविरोधप्रसंगात्॥ सत्ताव्यावृत्तेनचबोधेनबोधव्यावृत्तयाचसत्तयोपे
तंब्रह्मप्रतिजानानस्यतदेवपूर्वाधिकरणप्रतिषिद्धंसप्रपंचत्वंब्रह्मणःप्रसज्येत॥ श्रुतत्वाददोषइतिचेत्॥ नएकस्यानेकस्वभाव
त्वानुपपत्तेः॥ अथसत्तैवबोधोबोधएवचसत्तानानयोःपरस्परंव्यावृत्तिरस्तीतियद्युच्येत॥ तथापिकिंसत्त्वलक्षणंब्रह्मउ
तबोधलक्षणंउतोभयलक्षणमिति॥ अयंविकल्पोनिरालंबनएवस्यात्॥ सूत्राणित्विकाधिकरणत्वेनैवास्माभिर्नीतानि
॥ अपिचब्रह्मविषयासुश्रुतिष्वाकारवदनाकारप्रतिपादनेनविप्रतिपन्नासुनाकारंब्रह्मणिपरिगृहीतेअवश्यंवक्तव्ये राम
तरासांश्रुतीनांगतिरित्यादर्थ्यतप्रकाशवच्चेत्यादीनिसूत्राणिअर्थवत्तराणिसंपद्यंते॥ १ भिन्नसत्ताबोधयोरेकब्रह्माभेदशंकाश्रु ३१३
तिश्रुतेनापितयुक्तेत्याह॥ नेति॥ सद्बोधयोभेदोस्तितथाअद्येश्रुतेरपिविरुद्धार्थत्वानुपपत्तेर्नपूर्वपक्षोत्थानमित्युक्तंसंप्रतिद्वितीयंशंकते॥ अथस
त्तैवेति॥ सद्बोधपदयोर्वाच्यभेदेपिलक्ष्यैक्यापपत्तिरखंडार्थस्वीकारादित्यर्थः॥ अखंडार्थस्यपूर्वपक्षत्वंनस्यात्सिद्धांतत्वात्॥ किंचात्रसंशयोप्य
युक्तइत्याह॥ तथापीति एकाधिकरणपक्षेसूत्राणिकथंनेयानीत्यतआह॥ सूत्राणीति॥ स्वपक्षेसूत्रसामंजस्यंचेत्याह॥ अपिचेति॥ ९ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अवस्थापेक्षितगत्यर्थत्वेनोत्तरसूत्राणां पूर्वैकवाक्यत्वात्ताधिकरणभेद इति भावः॥ आकारश्रुतीनां कल्पितमाकारो गतिरिति स्वमतमुक्तं॥ प्रपंचवि लयवादिनस्तु मनोमयः प्राणशरीरः सत्यकाम इति श्रुतीनां तदितराकारप्रविलयो गतिरित्याहुः मनोमय इति कोऽर्थः मनोतिरिक्तोपाधिशून्य इत्यर्थः॥ ए वं प्राणशरीरपदेन प्राणातिरिक्तोपाधिनिषेधात्मनसोप्यभावसिद्धिः एवं सर्वशब्दा अनाकारब्रह्मपरा एवेति तन्मतमनूद्य दूषयति॥ यदपीत्यादिना ॥ किंचेयत्रस्य प्रकरणस्थानामाकारशब्दानां निषेधपरत्वं तु नोपासनाप्रकरणस्थानामपि तत्राद्यमंगीकरोति॥ येहीति॥ अस्मज्जीवभावं प्राप्तस्येश्व

यदप्याहुः आकारवादिन्यापिश्रुतयः प्रपंचप्रविलयमुखेनानाकारप्रतिपत्त्यर्था एव न पृथगर्था इति तदपि न समीचीनमिव लक्ष्यते॥ कथं ये हि परविद्याधिकारे केचित्प्रपंचा उच्यन्ते॥ यथायुक्ता ह्यस्य हरयः शता दशेत्ययं वै हरयोयं दश च सहस्राणि बहूनि चानंतानि चेत्येवमादयः ते भवंति प्रविलयार्थाः॥ तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमित्युपसंहारात्॥ ये पुनरुपास नाविधानाधिकारे प्रपंचा उच्यन्ते॥ यथा मनोमयः प्राणशरीरो भारूप इत्येवमादयो न तेषां प्रविलयार्थत्वं न्याय्यं॥ स क्रतुं कुर्वीत इत्येवंजातीयकेन प्रकृतेनैवोपासनविधिना तेषां संबंधात्॥ श्रुत्या चैवंजातीयकानां गुणानामुपासनार्थत्वे अवकल्प्यमानेन लक्षणया प्रविलयार्थत्वमवकल्पते॥ सर्वेषां च साधारणे प्रविलयार्थत्वे सति अरूपमेवेति हितत्प्रधानत्वादिति विनिगमना कारणवचनमनवकाशं स्यात्॥ फलमप्येषां यथोपदेशं क्वचिद्दुरितक्षयः क्वचिदैश्वर्यप्राप्तिः क्वचित्क्रममुक्तिरित्यवगम्य त एव चेति॥ अतः पार्थगर्थ्यमेवोपासनावाक्यानां ब्रह्मवाक्यानां च न्याय्यं नैकवाक्यत्वं॥ ९९ यस्य दश हरयो विषयाद्धरणाद्दशेंद्रियाणि

प्राणिभेदापेक्षया शतानि सहस्राणि च तेषामीश्वरात् भेदमाशंक्याह॥ अयमिति॥ ईश्वर एव हरय इत्यर्थः॥ द्वितीयं दूषयति॥ ये पुनरिति॥ मनोम यादिशब्दानां मुख्यवृत्त्या गुणपरत्वसंभवे निषेधलक्षणापि न युक्तेत्याह॥ श्रुत्या चेति॥ किंचाकारानाकारश्रुतिद्वैविध्ये सति ब्रह्मानाकारमेवेत्यत्र किं वि निगमकमिति शंकान्यानादरस्थूलादिश्रुतीनां निराकारतात्पर्ये नियामकमिति कथनार्थमिदं सूत्रमर्थवत्तु भवति॥ सर्वश्रुतीनां निषेधार्थत्वे तु शं कानुत्थानान्नियामकसूत्रं व्यर्थं स्यादित्याह॥ सर्वेषां चेति॥ ननूपासनार्थकवाक्यानां स्वार्थे फलाभावान्निष्फलनिषेधवाक्यशेषत्वमित्याशंक्य फलस्यत्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा·भा· अर्थैक्याभावाच्च नैकवाक्यतेत्याह॥ कथं चेति॥ अर्थैक्यं शंकते॥ एकेति॥ यथा फलवत्परमापूर्वाख्यनियोगैक्यादंगप्रधानवाक्यानामेकवाक्यता तथा अध्या·
टी· तत्त्वावबोधकामस्य प्रपंचप्रविलयविषयक एको नियोगरूपोऽर्थोऽस्तीत्याकारानाकारवाक्यानां सर्वेषामेकवाक्यतेत्यर्थः नियोगासिद्ध्या दूषयति॥ नेति ३।२
र·प्र· विषयं शंकते॥ ननु द्वैतेति॥ प्रत्यनीकं प्रतिबंधकं॥ ननु प्रपंचविलये ब्रह्मलयः स्याद्भेदादित्यत आह॥ ब्रह्मस्वभावो हि प्रपंच इति कारणं हि कार्यस्य
३१५

कथं चैषामेकवाक्यतोऽवसीयत इति वक्तव्यं॥ एकनियोगप्रतीतेः प्रयाजदर्शपूर्णमासवाक्यवदिति चेत्॥ न ब्रह्मवाक्येषु नियोगाभावात्॥ वस्तुमात्रपर्यवसायीनि हि ब्रह्मवाक्यानि न नियोगोपदेशीनि॥ एतद्धि विस्तरेण प्रतिष्ठापितं तत्तु समन्वयादित्यत्र॥ किंविषयश्चात्र नियोगोऽभिप्रेयत इति वक्तव्यं॥ पुरुषो हि नियुज्यमानः कुर्विति स्वव्यापारे कस्मिंश्चिन्नियुज्येत॥ ननु द्वैतप्रपंचप्रविलयो नियोगविषयो भविष्यति॥ अप्रविलापिते हि द्वैतप्रपंचे ब्रह्मतत्त्वावबोधो न भवति॥ अतो ब्रह्मतत्त्वावबोधप्रत्यनीकभूतो द्वैतप्रपंचः प्रविलाप्यो यथा स्वर्गकामस्य यागोऽनुष्ठातव्य इत्युपदिश्यते॥ एवमपवर्गकामस्य प्रपंचप्रविलयः॥ यथा च तमसि व्यवस्थितं घटादितत्त्वमवबुभुत्समानेन तत्प्रत्यनीकभूतं तमः प्रविलाप्यते॥ एवं ब्रह्मतत्त्वमवबुभुत्समानेन तत्प्रत्यनीकभूतः प्रपंचः प्रविलापयितव्यः॥ ब्रह्मस्वभावो हि प्रपंचो न प्रपंचस्वभावं ब्रह्म तेन नामरूपप्रपंचप्रविलापनेन ब्रह्मतत्त्वावबोधो भवतीति॥ अत्र वयं पृच्छामः। कोऽयं प्रपंचप्रविलापो नाम॥ किमग्निप्रतापसंपर्कात् घृतकाठिन्यप्रविलय इव प्रपंचप्रविलयः कर्तव्यः॥ आहोस्विदेकस्मिंश्चंद्रे तिमिरकृतानेकचंद्रप्रपंचवदविद्याकृतो ब्रह्मणि नामरूपप्रपंचो विद्यया प्रविलापयितव्य इति॥ तत्र यदि तावद्विद्यमानोऽयं प्रपंचो देहादिलक्षण आध्यात्मिको बाह्यश्च पृथिव्यादिलक्षणः प्रविलापयितव्य इत्युच्येत॥ स पुरुषमात्रेणाशक्यः प्रविलापयितुमिति तत्प्रविलयोपदेशोऽशक्यविषय एव स्यात्॥ एकेन चादिमुक्तेन पृथिव्यादिप्रविलयः कृत इतीदानीं पृथिव्यादिशून्यं जगत्

स्वरूपं अतः कार्यनाशेऽपि कारणस्य न लयः। घटनाशेऽपि मृद्दर्शनादित्यर्थः प्रपंचस्य सत्यस्य कल्पितस्य वा लये विधिरिति विकल्प्याद्यं दूषयति॥ यदि तत्र ताव पाम·
दिति॥ सत्यस्य ज्ञानाद्ध्वस्तेर्मुसलादिना च कृत्स्नद्वैतध्वंसायोगात्तद्ध्वंसनविधिर्वदशक्यविषयोऽयं विधिः किंचाद्यमुक्त्या सर्वमुक्तिः स्यादित्यर्थः॥ ३१४

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्वितीयमनूद्य दूषयति अथेत्यादिना। उपदेशजन्यज्ञानादेवाविद्यानिवृत्त्या प्रपञ्चलयसिद्धेर्नियोगो वृथेत्यर्थः। किं च ब्रह्मज्ञानादौ विधिः किं ब्रह्मण्यज्ञाते ज्ञाते वा नाद्यः अशक्यत्वादित्याह। अनावेदिते त्विति। द्वितीयं शङ्कते। नन्विति। उपदेशादेव ज्ञाते ब्रह्मणि साक्षात्कारद्वैतबाधयोः सिद्धेर्विधिवैयर्थ्यं सिद्धस्य विधिना कर्त्तुमयोगादित्याह। नेति। एवं विषयाभावान्नियोगाभावमुक्त्वा नियोज्याभावात्तदभावमाह। नियोज्योऽपि चेति प्रपञ्चान्तर्भूतो ब्रह्म वेत्यर्थः। आ

अथाविद्याध्यस्ते ब्रह्मण्येकस्मिन्नयं प्रपञ्चो विद्यया प्रविलाप्यत इति ब्रूयात्। ततो ब्रह्मैवाविद्याध्यस्तप्रपञ्चप्रत्याख्यानेनावेदयितव्यम्। एकमेवाद्वितीयं ब्रह्म तत्सत्यं स आत्मा तत्त्वमसीति एवमावेदिते तस्मिन्विद्या स्वयमेवोत्पद्यते। तया चाविद्या बाध्यते ततश्चाविद्याध्यस्तः सकलोऽयं नामरूपप्रपञ्चः स्वप्नप्रपञ्चवत्प्रविलीयते। अनावेदिते तु ब्रह्मणि ब्रह्मविज्ञानं कुरु प्रपञ्चप्रविलयं चेति शतकृत्वोऽप्युक्ते न ब्रह्मविज्ञानं प्रपञ्चविलयो वा जायते। नन्वावेदिते ब्रह्मणि तद्विज्ञानविषयः प्रपञ्चविलयविषयो वा नियोगः स्यात्। न निष्प्रपञ्चब्रह्मात्मत्वावेदनेनैवोभयसिद्धेः। रज्जुस्वरूपप्रकाशनेनैव हि तत्स्वरूपविज्ञानमविद्याध्यस्तसर्पादिप्रपञ्चविलयश्च भवति। न च कृतमेव पुनः क्रियते। नियोज्योऽपि च प्रपञ्चावस्थायां योऽवगम्यते जीवो नाम स प्रपञ्चपक्षस्यैव वा स्यात् ब्रह्मपक्षस्यैव वा। प्रथमे विकल्पे निष्प्रपञ्चब्रह्मतत्त्वप्रतिपादनेन पृथिव्यादिवज्जीवस्यापि प्रविलापितत्वात्। कस्य प्रपञ्चप्रविलये नियोग उच्येत। कस्य वा नियोगनिष्ठतया मोक्षोऽवाप्तव्य उच्येत। द्वितीयेऽपि ब्रह्मैवानियोज्यस्वभावं जीवस्य स्वरूपं जीवत्वं त्वविद्याकृतमेवेति प्रतिपादिते ब्रह्मणि नियोज्याभावान्नियोगाभाव एव। द्रष्टव्यादिशब्दा अपि परविद्याधिकारपठिता तत्त्वाभिमुखीकरणप्रधाना न तत्त्वावबोधविधिप्रधानाः। लोकेऽपीदं पश्येदमाकर्णयेति चैवंजातीयकेषु निर्देशेषु प्रणिधानमात्रं कुर्वित्युच्यते न साक्षात् ज्ञानमेव कुर्विति। ज्ञेयाभिमुखस्यापि ज्ञानं कदाचिज्जायते कदाचिन्न जायते॥ ४॥

द्ये जीवनाशाद्विध्ययोगः। द्वितीये नियोज्यासिद्धिः। तर्हि ज्ञाने विधिप्रत्ययानां का गतिरित्यत आह। द्रष्टव्यादिशब्दा इति। ननु श्रवणं ज्ञानं तत्कारणं तत्साधनव्यापारविधिः किमिति कल्प्यते इत्याशंक्य ज्ञानस्य पुरुषकृत्यसाध्यत्वादित्याह। ज्ञेयाभिमुखस्यापीति॥ ४ ॥ ॥ ४ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा.भा. किंचज्ञानविधिवादिनाज्ञेयंब्रह्मावश्यंवेदान्तैर्ज्ञापनीयंविषयानवबोधेविधिवैधुर्यायोगात्तथाचवेदान्तैरेवज्ञानोत्पत्तेर्विध्यानर्थक्यमित्याहतस्मादिति॥तं — अ.पा.
टी. ज्ञानार्थिनंप्रतीत्यर्थः॥ननूत्पन्नंज्ञानमन्यथाकर्तुंविधिरर्थवानितिनेत्याह॥नचेति॥नन्वनग्निर्योषिदितिप्रत्यक्षप्रामाण्यादुत्पन्नमपिज्ञानंतामग्निंध्यायेदिति ३।२
र.प्र. विधिनान्यथाक्रियतेदृश्यतइत्यतआह॥यदीति॥अन्यथाधीःकृतिसाध्याचेत्क्रियैवकृतिंविनैवचेद्भ्रांतिरेवातोमानंविनाविधिनोज्ञानासिद्धेर्मानवस्तुतंत्रेज्ञाने
३१५ विधिर्मुधेत्यर्थः॥वेदांतेषुविधिवादिनोन्यच्चदूषणमस्तीत्याह॥किंचान्यदिति॥ब्रह्मात्मैक्येनियोगेचवेदांतवाक्यस्याप्रामाण्यमाशंक्यार्थभेदाद्वाक्यभेदोवि

तस्मात्तंप्रतिज्ञानविषयएवदर्शयितव्योज्ञापयितुकामेनतस्मिन्दर्शितेस्वयमेवयथाविषयंयथाप्रमाणंचज्ञानमुत्पद्यते॥नचप्र
माणांतरेणान्यथाप्रसिद्धेर्थेन्यथाज्ञानंनियुक्तस्याप्युपपद्यते॥यदिपुनर्नियुक्तोहमित्यन्यथाज्ञानंकुर्यात्॥नतुतत्ज्ञानंकिंतर्हिमान-
सीसाक्रियास्वयमेवचेदन्यथोत्पद्येतभ्रांतिरेवस्यात्॥ज्ञानंतुप्रमाणजन्यंयथाभूतविषयंचनतन्नियोगशतेनापिकारयितुंशक्यतेन
चप्रतिषेधशतेनापिवारयितुंशक्यते॥नहितत्पुरुषतंत्रंवस्तुतंत्रमेवहितत्॥अतोपिनियोगाभावः॥किंचान्यत्नियोगनिष्ठतयैव
पर्यवसन्नाम्नायेयदभ्युपगतमनियोज्यब्रह्मात्मत्वंजीवस्यतदप्रमाणकमेवस्यात्॥अथशास्त्रमेवानियोज्यब्रह्मात्मत्वमप्याचक्षी
ततदवबोधेचपुरुषंनियुंजीततततोब्रह्मशास्त्रस्यैकस्यद्व्यर्थपरताविरुद्धार्थपरताचप्रसज्येयातां॥नियोगपरतायांचश्रुतहानिर-
श्रुतकल्पनाकर्मफलवन्मोक्षस्यादृष्टफलत्वमनित्यत्वंचेत्येवमादयोदोषानकेनचित्परिहर्तुंशक्यास्तस्माद्ब्रह्मावगतिनिष्ठान्येववेदां
तवाक्यानिननियोगनिष्ठान्यतश्चैकनियोगप्रतीतेरेकवाक्यतेत्ययुक्तं॥अभ्युपगम्यमानेपिचब्रह्मवाक्येषुनियोगसद्भावेतदेक
त्वंनिष्प्रपंचोपदेशेषुसप्रपंचोपदेशेषुचासिद्धं॥नहिशब्दांतरादिभिःप्रमाणैर्नियोगभेदेऽवगम्यमानेसर्वत्रैकोनियोगइतिशक्यमा

रुद्धार्थत्वादप्रामाण्यंचेतिदूषयति॥अथेत्यादिना॥किंचश्रुतंब्रह्मनश्रुतोविधिर्वेदांतेषुतत्कल्पने चकर्मजन्यत्वान्मोक्षस्यानित्यत्वसातिशयत्वादिप्रसंग
इत्याह॥नियोगपरतायांचेतिफलितमाह॥अतश्चेति॥इदानींप्रौढवादेननियोगमंगीकृत्यतदेकत्वंखंडयति॥अभ्युपगम्यमानेपीति॥भिन्नक्रियावाचीप
दःशब्दांतरंयथायजतिददातीतितथेहापिवेदोपासीतेतिशब्दभेदः॥निर्गुणसगुणरूपभेदःप्रकरणभेदःमुमुक्ष्वभ्युदयफलभेदइत्येतैःप्रमाणैर्निर्गुणज्ञान

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कथं तर्ह्यंगांगिवाक्येषु नियोगैक्यं तत्राह प्रयाजेति ॥ एकस्यैव स्वर्गकामस्य सांगप्रधानाधिकारात्तत्साध्यफलापूर्वैक्यादेकवाक्यत्वेत्यर्थः ॥ इहापि निर्गु-
णसगुणविद्ययोरेकाधिकारान्नियोगैक्यमस्त्वित्याह ॥ नत्विहेति ॥ मुक्त्यभ्युदयार्थिभेदान्मिथो विरुद्धार्थविद्ययोरंगांगित्वायोगाच्च न नियोगैक्यं न च निर्गुण
विद्या नियोग एक एव सगुणविद्यानंगीकारादिति वाच्यं ॥ अहो विपरीतं पाण्डित्यमायुष्मतः विध्ययोग्यविद्यायां विधिर्विधियोग्यायामविधिरिति तस्मात्साकार
वाक्यानामाकारलयद्वारा निर्गुणवाक्यैकवाक्यतागतिः ———— रसदृग्निरेव किंतु तेषां कस्मिंश्चिदाकारे गतिस्तदुपासनयाभ्युदयसिद्धेः ॥ निर्गुणवाक्यानां तु पर
मार्थालंबनत्वमित्यस्मदुक्त एव विभागः साधीयानित्युपसंहरति ॥ तस्मादिति ॥ २१ ॥ ब्रह्मणो निर्विशेषचिन्मात्रत्वमुक्त्वा सर्वनिषेधावधित्वेन सद्रूपत्वमाह ॥

प्रयाजदर्शपौर्णमासवाक्येषु तु अधिकारांशेनाभेदाद्युक्तमेकत्वं ॥ न त्विह सगुणनिर्गुणचोदनासु कश्चिदेकत्वाधिकारांशोऽस्ति ॥
न हि भारूपत्वादयो गुणाः प्रपंचप्रविलयोपकारिणो नापि प्रपंचप्रविलयो भारूपत्वादिगुणोपकारी परस्परविरोधित्वात् ॥ न हि कृ-
त्स्नप्रपंचप्रविलापनं प्रपंचैकदेशापेक्षणं च एकस्मिन् धर्मिणि युक्तं समावेशयितुं ॥ तस्मादस्मदुक्त एव विभाग आकारवदना-
कारोपदेशानां युक्त इति ॥ २१ ॥ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ २२ ॥ द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं
चेत्युपक्रम्य पंचमहाभूतानि द्वैराश्येन प्रविभज्यामूर्तरसस्य च पुरुषशब्दोदितस्य माहारजनादीनि रूपाणि दर्शयित्वा पुनः
पठ्यते ॥ अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्तीति ॥ ९ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ पृथिव्यप्ते-
जोभूतत्रयं मूर्तं वाय्वाकाशद्वयममूर्तमिति राशिद्वयमुक्त्वा भूतद्वयस्यामूर्तस्य सारः करणात्मा हिरण्यगर्भो य एष एतस्मिन् सूर्यमंडले पुरुषो यश्चायं द-
क्षिणेऽक्षणि पुरुष इत्युक्तस्तस्य वासनामयानि स्वप्नरूपाणि तद्यथा माहारजनं वासो यथा पाण्ड्वाविकं यथेन्द्रगोप इत्युपमाभिरुक्तानि विचित्राणि तत्र महारजनं
हरिद्रा तया लिप्तं वस्त्रं माहारजनं पाण्ड्वाविकमिति धवलं कंबलादिकं विद्युत्श्रुतिमुपलक्षणं कृत्वा सूक्ष्मपंचभूतान्यमूर्तानि पंचीकृतानि मूर्तानि ततश्चामूर्तर-
सतो मया करणानां पांचभौतिकत्वसिद्धिरिति व्याचष्टे अथ सत्यद्वयात्मकप्रपंचोक्त्यनंतरं अत उक्तारोपस्य निषेधार्थत्वान्नेति नेतीति निषेधेनोपदेशः क्रि-
यत इत्यर्थः ॥ नेति शब्दार्थमाह ॥ न हीति एतस्मादात्मनोऽन्यन्नास्तीति नेतीत्युच्यत इत्यर्थः ॥ शून्यतानिरासार्थं परं ब्रह्मास्तीत्युक्तमिति सिद्धांतरीत्यास्तु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा.भा. अत्र निषेधविशेषानुपलंभात्संशयमाह ॥ तत्र कोऽस्येत्यादिना । नञ्प्रयोगस्य नकारस्येतिशब्दोपस्थापितवस्तुनिषेधकत्वादित्यर्थः ॥ इतिशब्दान्निषेध्य
टी. सामान्यसमर्पणे विशेषाकांक्षायां प्रकरणाद्रूपद्वयस्य रूपिब्रह्मणश्च निषेध्यत्वभानात्संशयमुक्त्वा पूर्वोक्तं निर्विशेषब्रह्म नास्तीत्याक्षेपसंगत्या पूर्वपक्ष अ.पा
र.प्र. यति तत्र प्रकृतत्वेति ॥ पूर्वपक्षे तत्पदार्थाभेदासिद्धिः सिद्धांते तत्सिद्धिरिति फलं निरधिष्ठाननिषेधादर्शनात्सर्वनिषेधो न युक्त इत्यारुच्या प्रपंचेब्र ३।२
३१६

तत्र कोऽस्य प्रतिषेधस्य विषय इति जिज्ञासामहे नह्यत्रेदं तदिति विशेषितं किंचित्प्रतिषेध्यमुपलभ्यते ॥ इतिशब्देन त्वत्र प्रतिषेध्यं किमपि समर्प्यते नेति नेतीति परत्वान्नञ्प्रयोगस्य ॥ इतिशब्दश्चायं सन्निहितालंबन एवं शब्दसमानवृत्तिः प्रयुज्यमानो दृश्यते ॥ इति ह स्मोपाध्यायः कथयतीत्येवमादिषु सन्निहितं चात्र प्रकरणसामर्थ्याद्रूपद्वयं सप्रपंचं ब्रह्मणः ॥ तत्त्वब्रह्मस्य यस्मै तद्रूपे ॥ तत्र नः संशय उपजायते किमयं प्रतिषेधो रूपे रूपवच्चोभयमपि प्रतिषेधत्याहोस्विदेकतरं यदाप्येकतरं तदापि किं ब्रह्म प्रतिषेधति रूपे परिशिनष्टि आहोस्वित् रूपे प्रतिषेधति ब्रह्म परिशिनष्टीति ॥ तत्र प्रकृतत्वाविशेषादुभयमपि प्रतिषेधतीत्याशंकामहे ॥ द्वौ चैतौ प्रतिषेधौ द्विर्नेतिशब्दप्रयोगात् ॥ तयोरेकेन सप्रपंचं ब्रह्मणो रूपं प्रतिषिध्यते अपरेण रूपवद्ब्रह्मेति भवति मतिः ॥ अथवा ब्रह्मैव रूपवत्प्रतिषिध्यते तद्धि वाङ्मनसातीतत्वाद्संभाव्यमानसद्भावं प्रतिषेधार्हं न तु रूपप्रपंचः प्रत्यक्षादिगोचरत्वात्प्रतिषेधार्हः ॥ अभ्यासस्त्वादरार्थ इति ॥ एवं प्राप्ते ब्रूमः ॥ न तावदुभयप्रतिषेध उपपद्यते शून्यवादप्रसंगात् ॥ किंचिद्धि परमार्थमालंब्यापरमार्थः प्रतिषिध्यते यथा रज्ज्वादिषु सर्पादयस्तच्च
परिशिष्यमाणे कस्मिंश्चिद्भावे ऽवकल्पते उभयप्रतिषेधे तु कोऽन्यो भावः परिशिष्येत ॥ राम.
२१६

ष्ठनिषेध इत्याह ॥ अथ वेति एकब्रह्मण एव निषेधे नकारद्वयस्य पौनरुक्त्यमित्यत आह अभ्यासस्त्विति ॥ उक्तं सूत्रमेव तावत्सिद्धांतमुपक्रमते ॥
एवमिति ॥ शून्यप्रसंग इष्ट इति वदंतं प्रत्याह ॥ किंचिद्धीति ॥ तच्चेति ॥ प्रतिषेधनमित्यर्थः अधिष्ठानाऽनवशेषे तन्त्रमारूपहेत्वभावान्निषेधधा
स्वार्थप्रमातस्यात् ॥ इदमत्र नास्तीति लोके निषेधस्य साधिष्ठानस्यैव प्रमितिदर्शनादित्यर्थः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किंचयद्भ्रांतिमत्त्वादित्युत्सर्गस्य भानार्थाभावाधिष्ठानप्रमितिरपवादः तयापूर्वभानस्य भ्रमत्वनिश्चयेनार्थसत्त्वापलापात् अपवादानंगीकारे तूत्सर्गेण प्रपंचस्य सत्यत्वापत्तेः निषेधानुपपत्तिरित्याह ॥ अपरिशिष्यमाणे चेति ॥ अधिष्ठानसत्त्वं विना भ्रांतिनिषेधयोरयोगाच्छून्यवादो न युक्त इत्युक्त्वा पूर्ववादिनः पक्षांतरं दूषयति ॥ नापीति ॥ देहात्माभिमानवल्लौकिकमानप्राप्तद्वैतस्य निषेधोऽस्तु को न वेदांतप्रमितब्रह्मण इति भावः यदुक्तं वाङ्मनसातीत-

अपरिशिष्यमाणे चान्यस्मिन् य इतरः प्रतिषेद्धुमारभ्यते तस्य प्रतिषेद्धुमशक्यत्वात् तस्यैव परमार्थत्वापत्तेः प्रतिषेधानुपपत्तिः ॥ नापि ब्रह्मप्रतिषेध उपपद्यते ॥ ब्रह्म ते ब्रवाणीत्याद्युपक्रमविरोधात् ॥ असन्नेव स भवति असद्ब्रह्मेति वेद चेत् इत्यादिनिंदाविरोधात् ॥ अस्तीत्येवोपलब्धव्य इत्यवधारणविरोधात् ॥ सर्ववेदांतव्याकोपप्रसंगात् ॥ वाङ्मनसातीतत्वमपि ब्रह्मणो नाभावाभिप्रायेणाभिधीयते ॥ न हि महता परिकरबंधेन ब्रह्मविदाप्नोति परं सत्यं ज्ञानमनंतं ब्रह्मेत्येवमादिना वेदांतेषु ब्रह्म प्रतिपाद्य तस्यैव पुनरभावोऽभिलप्येत ॥ प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरमिति हि न्यायः ॥ प्रतिपादनप्रक्रिया त्वेषा यतो वाचो निवर्तंते अप्राप्य मनसा सहेति ॥ एतदुक्तं भवति ॥ वाङ्मनसातीतमविषयांतःपाति प्रत्यगात्मभूतं नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मेति ॥ तस्माद्ब्रह्मणो रूपं प्रपंचं प्रतिषेधति परिशिनष्टि ब्रह्मेत्यभ्युपगंतव्यं ॥ तदेतदुच्यते प्रकृतैतावत्त्वं हि प्रतिषेधतीति प्रकृतं यदेतावत् इयत्तापरिच्छिन्नं मूर्तामूर्तलक्षणं ब्रह्मणो रूपं तदेष शब्दः प्रतिषेधति ॥ तद्धि प्रकृतं प्रपंचितं च पूर्वस्मिन्ग्रंथे अधिदैवतमध्यात्मं च ॥ तज्जनितमेव च वासनात्मकमपरं रूपममूर्तरसभूतं पुरुषशब्दोदितं लिंगात्मव्यपाश्रयं महारजनाद्युपमाभिर्दर्शितममूर्तरसस्य पुरुषस्य चक्षुर्ग्राह्यरूपयोगित्वानुपपत्तेः ॥२२

त्वान्निषेधार्हं ब्रह्मेति तत्राह ॥ वाङ्मनसेति ॥ ब्रह्मणो वागाद्यतीतत्वं निषेधार्थं न चेत्किमर्थं तदुक्तिरित्यत आह प्रतिपादनेति ॥ उक्तार्थे सूत्रं योजयति ॥ तदेतदित्यादिना द्वे वाव ब्रह्मणो रूपे इति रूपद्वयस्यैव प्राधान्येन प्रकृतत्वान्नेतीति निषेध इत्यर्थः ॥ नन्वादित्यमंडले पुरुष इति ब्रह्माप्यत्र प्राधान्येनोक्तमित्याशंक्य पुरुषो लिंगात्मा अमूर्तरसत्वश्रुत्या। भूतजनितत्वभानात् स्वप्नरूप त्वश्रुतेश्चेत्याह ॥ तज्जनितमेवेति ॥ रूपरूपिणोरभेद उक्तः ॥ ननु वासनामयं रूपमेव किमित्युपमीयते प्रसिद्धरूपमेव किं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा.भा. रूपद्वयस्यैव प्राधान्येन प्रकृतत्वं फलितमाह ॥ तद्धीति प्रतियोगित्वेन समर्पयतीत्यर्थः ॥ न चार्थतः प्राधान्याद्ब्रह्मणो निषेधः राज्ञो भृत्यो नास्तीत्यत्र राजनि अ.पा.
टी. षेधप्रसंगादिति भावः ॥ किंचात्र वस्तुनः प्रतिपाद्यत्वान्न निषेध इत्याह प्रपंचितेनेचेति ॥ ननु ब्रह्मणि निषिद्धस्याप्यन्यत्र स्थितिसंभवात्कथं कल्पितत्व ३।२
र.प्र. मित्यत आह ॥ तत्र्यसदमिति ॥ उपादाने निषिद्धस्यान्यत्र न स्थितिरित्यर्थः ॥ यत्तु द्वैतनिषेधे प्रत्यक्षादिविरोध इति तत्राह युक्तं चेति ॥ स्थापिते हि आरं
२१७ भणाधिकरणे प्रत्यक्षादेर्व्यावहारिकप्रामाण्यं न तत्त्वावेदकमिति ॥ अतस्तत्त्वतो निषेधान्न —— विरोध इति भावः ॥ ननु वस्तुत्वाद्द्वैतवत्ब्रह्म

नद्वैतस्य प्रपंचं ब्रह्मणो रूपं संनिहितात्वं च नेनेतिकरणेन प्रतिषेधकं तत्त्वं प्रत्युपनीयत इति गम्यते ॥ ब्रह्म तु रूपविशेषणत्वेन
षष्ठ्या निर्दिष्टं पूर्वस्मिन्ग्रंथे न स्वप्रधानत्वेन प्रपंचितेन च तदीयरूपद्वये रूपवतः स्वरूपजिज्ञासायामिदं प्रपक्रांतं ॥ अथात आदे
शो नेति नेतीति ॥ तत्र कल्पितरूपप्रत्याख्यानेन ब्रह्मणः स्वरूपावेदनमिदमिति निर्णीयते ॥ तदास्पदं हीदं समस्तं कार्यं नेति नेतीति
प्रतिषिद्धं ॥ युक्तं च कार्यस्य वाचारंभणशब्दादिभ्योऽसत्त्वमिति नेति नेतीति प्रतिषेधनं ॥ ननु ब्रह्मणः सर्वकल्पनामूलत्वात् न चात्रे
यमाशंका कर्तव्या कथं हि शास्त्रं स्वयमेव ब्रह्मणो रूपद्वयं दर्शयित्वा स्वयमेव पुनः प्रतिषेधति ॥ प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं
वरमिति ॥ यतो नेदं शास्त्रं प्रतिपाद्यत्वेन ब्रह्मणो रूपद्वयं निर्दिशति ॥ लोकप्रसिद्धं त्विदं रूपद्वयं ब्रह्मणि कल्पितं परामृशति प्रतिषेध्य
त्वाय शुद्धब्रह्मस्वरूपप्रतिपादनाय चेति निरवद्यं ॥ द्वौ चैतौ प्रतिषेधौ यथासंख्यन्यायेन द्वे अपि मूर्तामूर्ते प्रतिषेधतः ॥ यद्वा पूर्वः प्रति
षेधो भूतराशिं प्रतिषेधति ॥ उत्तरो वासनाराशिं प्रतिषेधति ॥ अथवा नेति नेतीति वीप्सा यत्किंचिदुत्प्रेक्ष्यते तत्सर्वं न भव
तीत्यर्थः ॥ परिगणितप्रतिषेधे हि क्रियमाणे यदि नैतद्ब्रह्म किमन्यद्ब्रह्म भवेदिति जिज्ञासा स्यात् ॥ वीप्सायां तु समस्तस्य विष राम.
यजातस्य प्रतिषेधादविषयः प्रत्यगात्मा ब्रह्मेति जिज्ञासा निवर्तते ॥ तस्मात्प्रपंचमेव ब्रह्मणि कल्पितं प्रतिषेधति परिशिनष्टि ब्रह्मेति २१७

योपि निषेधो स्त्विनेत्याह ॥ नन्विति ॥ द्वैतभावाभावसाक्षित्वादशक्यो निषेध इत्यर्थः न चेत्यादिस्पष्टार्थं ॥ यच्चोक्तं निषेधाभ्यां रूपं रूपि च ब्रह्म च निषिध्यत इति ।
तत्राह द्वौ चैताविति उद्देश्यविधेयार्थानां संख्यासाम्ये यथाक्रमं संबंध इति न्यायो यथासंख्यमनुदेशः समानामिति पाणिनिसूत्रसिद्धस्तेनात्र रूपद्वयोद्दे
शेन निषेधद्वयविधिरित्यर्थः ॥ वीप्सापक्षे सर्वदृश्यनिषेधाज्जिज्ञासाशांतिरिति विशेषमाह ॥ परिगणितेति मूर्तामूर्ते नेत्येवं विशिष्य निषेधे जिज्ञासाशान्तौ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रशेषं व्याचष्टे ॥ इतश्चेतिप्रतिषेधानुपपत्त्या ब्रह्मास्तीत्यवगतं भूयः पुनः परमस्तीति श्रुतिः साक्षादपि ब्रवीतीत्यर्थः नञ्त्रेति ॥ अवशिष्टं ग्रस्तेत्यर्थः ॥
सत्यमन्यत् ॥ २२ ॥ ननु ग्राह्यत्वाद्ब्रह्म नास्तीति शंकानिरासार्थं सूत्रं व्याचष्टे ॥ यत्प्रतिषिद्धादिति ॥ रूपाद्यभावादव्यक्तमिंद्रियाग्राह्यं न त्वसत्त्वादित्यर्थः ॥

इतश्चैष एव निर्णयो यतस्ततः प्रपंचप्रतिषेधाद्भूयो ब्रवीति अन्यत्परमस्तीति अभावावसाने हि प्रतिषेधे क्रियमाणे किमन्यत्परमस्तीति ब्रूयात्
तस्मादेषा सद्योजना नेति नेतीति प्रस्तादिदस्यन्नमेवादेशं पुनर्निर्देशनेति नेति नेतीत्यस्य कोर्थः न ह्येतस्माद्ब्रह्मणो व्यतिरिक्तमस्तीत्यतो नेति
नेतीत्युच्यते न पुनः स्वयं नास्तीत्यर्थः तच्च दर्शयत्यन्यत्परमप्रतिषिद्धं ब्रह्मास्तीति ॥ यदा पुनरेवमक्षराणि योज्यंते । न ह्येतस्मा-
दिति न हि नेति नेतीति प्रपंचप्रतिषेधरूपादादेशनादन्यत्परमादेशनं ब्रह्मणोऽस्तीति तदा ततो ब्रवीति च भूय इत्येतन्नामधेयविषयं यो-
जयितव्यं ॥ अथ नामधेयं सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यमिति हि ब्रवीति ॥ तच्च ब्रह्मावसाने प्रतिषेधे समंजसं
भवति ॥ अभावावसाने तु प्रतिषेधे किंसत्यस्य सत्यमित्युच्येत ॥ तस्माद्ब्रह्मावसानोऽयं प्रतिषेधो नाभावावसान इत्यध्यवसामः
॥ २२ ॥ तदव्यक्तमाह हि ॥ २३ ॥ यत्प्रतिषिद्धात्प्रपंचजातादन्यत्परं ब्रह्म तदस्ति चेत्कस्मान्न गृह्यत इत्युच्यते ॥ तदव्यक्तमनि-
द्रियग्राह्यं ॥ सर्वदृश्यसाक्षित्वात् ॥ आह ह्येवं श्रुतिः ॥ न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा स एष नेति नेत्यात्मा
ऽगृह्यो न हि गृह्यते ॥ यत्तदद्रेश्यमग्राह्यं ॥ यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने इत्याद्या ॥ स्मृतिरपि अव्यक्तो
ऽयमचिंत्योऽयमविकार्योऽयमुच्यत इत्याद्या ॥ २३ ॥ अपि च संराधने प्रत्यक्षानुमानाभ्यां ॥ २४ ॥ अपि चैनमात्मानं निरस्तस-
मस्तप्रपंचमव्यक्तं संराधनकाले पश्यंति योगिनः ॥ संराधनं च भक्तिध्यानप्रणिधानाद्यनुष्ठानं ॥ कथं पुनरवगम्यते संराध-
(नकाले पश्यंतीति

अन्यैर्देवैरिंद्रियांतरैर्न गृह्यत इत्यन्वयः ॥ २३ ॥ तर्हि कदाग्राह्यमिति शंकोत्तरं सूत्रं व्याख्याति ॥ अपि चैनमिति च स्वर्थः इंद्रि-
यैर्न गृह्यते अपि तु संराधने शास्त्रसंस्कृतमनसेत्यर्थः भक्तिध्यानाभ्यां प्रत्यगात्मनश्चित्ते प्रकर्षेण निधानं स्थापनं प्रणिधानं जपनमस्काराद्यादिशब्दा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा.भा. स्वयंभूरीश्वरः॥ खानीन्द्रियाणि परांच्यनात्मग्राहकाणि हिंसित्वा व्यतृणत् आशितवान् सद्धिंसितेषां नाशो यदसदर्थग्राहितया सर्जनं तस्मात्तेषां तथा सृष्टत्वात्स
टी. र्वो लोकः पराक् अर्थमेव पश्यति नान्तरात्मानं कश्चित्तु धीरो धीमानावृत्तचक्षुर्निरुद्धेन्द्रियः शुद्धेन चेतसा प्रत्यगात्मानं शास्त्रेण पश्यति मोक्षार्थीत्यर्थः ततः कर्म अ.पा.
र.प्र. णा विशुद्धचित्तो ज्ञानाख्यसत्त्वोत्कर्षेण संध्यायंस्तं निष्कलं पश्यतीत्यर्थः॥ विनिद्राः विगततमस्कास्तत्र हेतुर्जितश्वासत्वं प्राणायामनिष्ठत्वं युञ्जाना ध्यायिनः॥ यो ३।२
३१८ गलभ्यः आत्मा योगात्मा॥ २४॥ यथा प्रकाशादयः उपाधिषु भिद्यन्ते न स्वतः॥ एवं प्रकाशश्चिदात्मापि ध्यानादिकर्मण्युपाधौ भिद्यते न स्वतस्तस्यावैशेष्य

प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्यामित्यर्थः॥ तथा हि श्रुतिः॥ पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन्॥ कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्निति॥ ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमान इति चैवमाद्या॥ स्मृतिरपि यं विनिद्रा जितश्वासाः संतुष्टाः संयतेन्द्रियाः॥ ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः॥ योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनमिति चैवमाद्या॥ २४॥ ननु संराध्यसंराधकभावाभ्युपगमात्परेतरात्मनोरन्यत्वं स्यादिति नेत्युच्यते॥ प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात्॥ २५॥ यथा प्रकाशाकाशसवितृप्रभृतयोऽङ्गुलिकरकोदकप्रभृतिषु कर्मसूपाधिभूतेषु सविशेषा इवावभासन्ते॥ न च स्वाभाविकीमविशेषात्मतां जहति॥ एवमुपाधिनिमित्त एवायमात्मभेदः स्वतस्त्वैकात्म्यमेव॥ तथा हि वेदान्तेष्वभ्यासेनासकृज्जीवप्राज्ञयोरभेदः प्रतिपाद्यते॥ २५॥ अतोऽनन्तेन तथा हि लिङ्गम्॥ २६॥ अतश्च स्वाभाविकत्वादभेदस्याविद्याकृतत्वाच्च भेदस्य विद्यया अविद्यां विधूय जीवः परेणानन्तेन प्राज्ञेनात्मनैकतां गच्छति॥ तथा हि लिङ्गम्॥ स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति ब्रह्मैव सन्ब्रह्माप्येतीत्यादि॥ २६॥ उभयव्यपदेशात्त्वहिकुण्डलवत्॥ २७॥ तस्मिन्नेव संराध्यसंराधकभावे मतान्तरमुपन्यस्यति स्वमतविशुद्धये॥ क्वचिज्जीवप्राज्ञयोर्भेदो व्यपदिश्यते॥ ७ ॥

मेकरसत्वमेव तत्त्वमसीत्यभ्यासादिति सूत्रयोजना॥ २५॥ जीवस्य ब्रह्मात्मत्वं फलश्रुतिरूपलिङ्गादपि भेद औपाधिक एवेत्याह सूत्रकारः॥ अतोऽनन्तेनेति॥ २६॥ भेदाभेदपूर्वपक्षसूत्रद्वयस्य संगतिमाह॥ तस्मिन्नेवेति यथाहित्वेनाभेदः॥ कुण्डलाख्यस्य सर्पावस्थाविशेषस्य कुण्डलत्वेन भेदस्तथा जीवस्य ब्रह्मत्वेनाभेदो जीवत्वेन भेदः यद्वा सूर्यप्रकाशयोरेकतेजस्त्वधर्मावच्छेदेन भेदाभेदवज्जीवपरयोरपि एकचेतनात्मत्वधर्मेण भेदाभेदौ श्रुतिबलात्स्वीका राम

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कुंडलत्वं वलयाकारत्वं आभोगत्वं वक्राकारत्वं प्रांशुत्वं दीर्घदंडाकारत्वं उन्नतमुखत्वं आदिपदार्थः ॥२८॥ सिद्धांतसूत्रं पूर्ववदेति धर्मभेदेनैकधर्मेण चाभेदाभेदस्वीकारे भेदस्य सत्यत्वाद्भेदव्यपदेशनिवृत्तिः स्यात् एकत्रैव भेदाभेदस्वीकारे लोके विरोधकथा केद्दृश्यपि दृष्टत्वं न स्यात् निष्प्रपंचं चिदेकरसं ब्रह्मेति न मदलस्य

ततस्तु तं पश्यति निष्कलं ध्यायमान इति ध्यातृध्यातव्यत्वेन द्रष्टृद्रष्टव्यत्वेन च परात्परं पुरुषमुपैति दिव्यमिति गंतृगंतव्यत्वेन । यः सर्वाणि भूतान्यंतरो यमयतीति नियंतृनियंतव्यत्वेन ॥ क्वचित्तु तयोरेवाभेदो व्यपदिश्यते ॥ तत्त्वमसि अहं ब्रह्मास्मि एष आत्मा सर्वांतरः एष त आत्मांतर्याम्यमृत इति ॥ तत्रैवमुभयव्यपदेशे सति यद्यभेद एवैकांततो गृह्येत भेदव्यपदेशो निरालंबन एव स्यात् ॥ अत उभयव्यपदेशदर्शनादहिकुंडलवदत्र तत्त्वं भवितुमर्हति ॥ यथाहिरित्यभेदः कुंडलाभोगप्रांशुत्वादीनीति तु भेदः ॥ एवमिहापीति ॥२७॥ प्रकाशाश्रयवद्वा तेजस्त्वात् ॥२८॥ अथवा प्रकाशाश्रयवदेतत्प्रतिपत्तव्यं ॥ यथा प्रकाशः सावित्रस्तदाश्रयश्च सविता नात्यंतभिन्नावुभयोरपि तेजस्त्वाविशेषात् ॥ अथ च भेदव्यपदेशभाजौ भवतः एवमिहापीति ॥२८॥ पूर्ववद्वा ॥२९॥ यथा वा पूर्वमुपन्यस्तं प्रकाशादिवच्चावैशेष्यमिति तथैव तद्भवितुमर्हति ॥ तथा ह्यविद्याकृतत्वाद्बंधस्य विद्यया मोक्ष उपपद्यते ॥ यदि पुनः परमार्थत एव बद्धः कश्चिदात्माऽहिकुंडलन्यायेन परस्यात्मनः संस्थानभूतः प्रकाशाश्रयन्यायेन चैकदेशभूतोऽभ्युपगम्येत ॥ ततः पारमार्थिकस्य बंधस्य तिरस्कर्तुमशक्यत्वान्मोक्षशास्त्रवैयर्थ्यं प्रसज्येत ॥ न चात्रोभावपि भेदाभेदौ श्रुतिस्तुल्यवद्व्यपदिशति ॥ अभेदमेव हि — प्रतिपाद्यत्वेन निर्दिशति भेदं तु पूर्वप्रसिद्धमेवानुवदति अर्थांतरविवक्षया ॥ तस्मात्प्रकाशादिवच्चावैशेष्यमित्येष एव सिद्धांतः ॥२९॥ प्रतिषेधाच्च ॥३०॥ इतश्चैष एव सिद्धांतः ॥ यत्कारणं परस्मादात्मनोऽन्यं चेतनं प्रतिषेधति शास्त्रं ॥ नान्योऽतोऽस्ति द्रष्टेत्येवमादि ॥ अथात आदेशो नेति नेति ॥ तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमिति च ब्रह्मव्यतिरिक्तप्रपंचनिराकरणात् ब्रह्ममात्रपरिशेषाच्चैष एव सिद्धांत इति गम्यते ॥ ३० ॥ ६ ॥ ६ ॥

मस्तीति सिद्धं ॥३०॥६॥ यदुक्तं नेति नेतीत्यादिश्रुतिभिर्ब्रह्मातिरिक्तं वस्तु निषिध्यत इति तदयुक्तं सेत्वादिश्रुतिभिर्वस्त्वंतराणि विद्यमानानीत्याक्षिपति ॥ ६ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

परमत इति यद्यपि द्युभ्वाद्यधिकरणे सेतुशब्दो विधारकत्वेन गौणो व्याख्यातस्तथाप्युन्मानादिश्रुतीनां गतिमजानतोयं पूर्वपक्षस्तत्रोन्मानादिश्रुतीनां मुख्यत्वात् सद्वयं ब्रह्मेति फलं॥ सिद्धांते तूक्ताद्वितीयतत्त्वदलस्य सिद्धिरिति विवेकः॥ ब्रह्म सद्वयं सेतुत्वात् लौकिकसेतुवत् तीर्णत्वश्रुतेश्चेत्याह॥ सेतुं तीर्त्वेति जांगलत्वात् भूयिष्ठमिति वैद्योक्तेर्वातप्रचुरो देशो जांगलं॥ इह तु देशमात्रं ग्राह्यं दिशश्चतस्रः कलाः प्रकाशवान्नामपादः पृथिव्यंतरिक्षं

परमतः सेतून्मानसंबंधभेदव्यपदेशेभ्यः॥३१॥ यदेतन्निरस्तसमस्तप्रपंचं ब्रह्म निर्धारितं॥ अस्मात्परमन्यत्तत्त्वमस्ति नास्तीति श्रुतिविप्रतिपत्तेः संशयः॥ कानिचिद्धि वाक्यान्यापातेनैव प्रतिभासमानानि ब्रह्मणोपि परमन्यत्तत्त्वं प्रतिपादयंतीव तेषां हि परिहारमभिधातुमयमुपक्रमः क्रियते॥ परमतो ब्रह्मणोन्यत्तत्त्वं भवितुमर्हति॥ कुतः सेतुव्यपदेशात्॥ उन्मानव्यपदेशात्॥ संबंधव्यपदेशात् भेदव्यपदेशाच्च॥ सेतुव्यपदेशस्तावत् अथ य आत्मा स सेतुर्विधृतिरित्यात्मशब्दाभिहितस्य ब्रह्मणः सेतुत्वं संकीर्तयति॥ सेतुशब्दश्च लोके जलसंतानविच्छेदकरे मृद्दार्वादिप्रचये प्रसिद्धः॥ इह तु सेतुशब्द आत्मनि प्रयुक्त इति लौकिकसेतोरिवात्मसेतोरन्यस्य वस्तुनोस्तित्वं गमयति॥ सेतुं तीर्त्वेति च तरतिशब्दप्रयोगात्॥ यथा लौकिकं सेतुं तीर्त्वा जांगलमसेतुं प्राप्नोति॥ एवमात्मानं सेतुं तीर्त्वा अनात्मानमसेतुं प्राप्नोतीति गम्यते॥ उन्मानव्यपदेशश्च भवति॥ तदेतत् ब्रह्म चतुष्पादष्टाशफं षोडशकलमिति॥ यच्च लोके उन्मितं एतावदिदमिति परिच्छिन्नं कार्षापणादि ततोन्यद्वस्त्वस्तीति प्रसिद्धं॥ तथा ब्रह्मणोप्युन्मानात्ततोन्येन वस्तुना भवितव्यमिति गम्यते॥ तथा संबंधव्यपदेशोपि भवति॥ सता सोम्य तदा संपन्नो भवतीति॥ शारीर आत्मा प्राज्ञेनात्मना संपरिष्वक्त इति च॥ भिन्नानां च मितेन संबंधो दृष्टः॥ यथा नराणां नगरेण॥ राम॰

द्यौः समुद्र इत्यनंतवान्नामपादः अग्निः सूर्यश्चंद्रो विद्युदिति ज्योतिष्मान्नामपादः चक्षुः श्रोत्रं वाङ्मन इत्यायतनवान्नामपाद इति चतुष्पाद् ब्रह्मेति पादानां महत्त्वं स्पष्टं शफा अस्येत्यष्टाशफं पादेषु चतुर्षु प्रत्येकं चतस्रः कला इति षोडशकलमित्यर्थः॥ षोडशपणपरिमितं ताम्रं कार्षापणसंज्ञं भवति॥ तद्वत्सद्वयं ब्रह्म परिमितत्वादित्यर्थः॥ संबंधित्वाच्च नगरवदित्याह॥ तथा संबंधेति॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अन्यदमितं मितम् असंख्यातमित्यर्थः॥ अन्यस्य सर्वस्य अल्पत्वेन मितत्वनियमादिति मंतव्यं भेदेनोक्तत्वाच्च घटवदित्याह॥ भेदव्यपदेशाच्चेति अस्याक्षिस्थस्यामु
नादित्यस्थेन सहेति यावत्॥ आधारतो निर्देशतश्च भेदमुक्त्वाऽवधितोपि तमाह॥ सावधिकं चेति॥ ३१॥ सिद्धांतसूत्रं व्याचष्टे तुशब्देनेत्यादिना॥ यदन्यत्तत्किं

जीवानां च ब्रह्मणा संबंधं व्यपदिशति सुषुप्तौ अतस्ततः परमन्यदमितमस्तीति गम्यते॥ भेदव्यपदेशश्चैतमेवार्थं गमयति॥ तथा हि॥ अथ य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यत इत्यादित्याधारमीश्वरं व्यपदिश्य ततो भेदेनाक्ष्याधारमीश्वरं व्यपदिशति॥ अथ य एषोंतरक्षिणि पुरुषो दृश्यत इति अतिदेशं चास्यामुना रूपादिषु करोति॥ तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नामेति॥ सावधिकं चैश्वर्यमुभयोर्व्यपदिशति॥ ये चामुष्मात्परांचो लोकास्तेषां चेष्टे देवकामानां चेत्येकस्य॥ ये चैतस्मादर्वांचो लोकास्तेषां चेष्टे मनुष्यकामानां चेत्येकस्य॥ यथेदं मागधस्य राज्यमिदं वैदेहस्येति॥ ३१॥ एवमेतेभ्यः सेत्वादिव्यपदेशेभ्यो ब्रह्मणः परमस्तीत्येवं प्राप्ते प्रतिपाद्यते सामान्यात्तु॥ ३२॥ तुशब्देन प्रदर्शितां प्राप्तिं निरुणद्धि न ब्रह्मणोन्यत्किंचिद्भवितुमर्हति॥ प्रमाणाभावात्॥ न ह्यन्यस्यास्तित्वे किंचित्प्रमाणमुपलभामहे सर्वस्य हि जनिमतो वस्तुजातस्य जन्मादि ब्रह्मणो भवतीति निर्धारितं॥ अनन्यत्वं च कारणात्कार्यस्य॥ न च ब्रह्मव्यतिरिक्तं किंचिदजं संभवति॥ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यवधारणात् एकविज्ञानेन च सर्वविज्ञानप्रतिज्ञानान्न ब्रह्मव्यतिरिक्तवस्त्वस्तित्वमवकल्पते॥ ननु सेत्वादिव्यपदेशा ब्रह्मव्यतिरिक्तं तत्त्वं सूचयंतीत्युक्तं॥ नेत्युच्यते॥ सेतुव्यपदेशस्तावन्न ब्रह्मणा वास्तवसद्भावं प्रतिपादयितुं शक्यते सेतुरात्मेति ह्याह न ततः परमस्तीति॥ तत्र परस्मिन्नसति सेतुत्वं नाऽवकल्पत इति परं किमपि कल्प्येत॥ न चैतन्न्याय्यं॥ दृष्टहान्यप्रसिद्धकल्पना॥

१ साधनादिवाक्यानां मानाभावात्कार्यस्य ब्रह्मानन्यत्वनिर्णयाच्चेत्युक्त्वा न द्वितीयः प्रागुत्पत्तेरद्वय
त्वावधारणादित्याह॥ न च ब्रह्मव्यतिरिक्तमिति उक्तानुमानानामागमबाध इति भावः उक्तं स्मारयित्वा हेतूनामसिद्धिमाह॥ ननु सेत्वित्यादिना॥ किं सेतु
श्रुत्या परसिद्धिरर्थापत्त्या वाद्य इत्युक्त्वाद्वितीयं शंकते॥ तत्र परस्मिन्निति सेतुत्वलिंगेनाद्वितीयत्वश्रुतिबाधनमन्याय्यमित्याह॥ न चेति॥ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा.भा. लिंगं चासिद्धमित्याह अपि चेति॥ विधारकत्वं तु कल्पितद्वितीयापेक्षयापि युज्यत इति भावः तीर्णत्वहेतुरप्यसिद्ध इत्याह॥ सेतुं तीर्त्वेति॥३२॥ परिमितत्वमप्यसिद्धमि अ.पा.
टी. त्याह बुद्ध्यर्थ इति वाक्प्राणचक्षुःश्रोत्राणि मनसः पादाः अग्निवाय्वादित्यदिश आकाशस्य पादाः ध्यानार्थं कल्पिता तद्वद्ब्रह्मण उन्मानमित्यर्थः लौकिकं दृष्टान्तमाह॥ ३।२
र.प्र. अथवेति पादकल्पनां विना तत्त्वव्यवहारः किं न स्यादित्यत आह नहीति॥ कार्षापणस्य व्यवहाराय पादकल्पनावत् मन्दधियां ध्यानव्यवहाराय ब्रह्मण उन्मान
१२०

अपि च सेतुव्यपदेशादात्मनो लौकिकसेतुनिदर्शनेन सेतुबाह्यवस्तुनां प्रसंजयतां मृद्दारुमयतापि आत्मनः प्रसज्येत न चैतन्न्याय्यं अज-
त्वादिश्रुतिविरोधात्॥ सेतुसामान्यात्तु सेतुशब्द आत्मनि प्रयुक्त इति श्लिष्यते जगतस्तन्मर्यादानां च विधारकत्वं सेतुसामान्यमा-
त्मनः॥ अतः सेतुरिव सेतुरिति प्रकृत आत्मा स्तूयते॥ सेतुं तीर्त्वेत्यपि तरतेरतिक्रमासंभवात् प्राप्नोत्यर्थ एव वर्तते॥ यथा व्या-
करणं तीर्ण इति प्राप्त इत्युच्यते नातिक्रान्तस्तद्वत्॥३२॥ बुद्ध्यर्थः पादवत्॥३३॥ यदप्युक्तमुन्मानव्यपदेशादस्ति परमिति॥
तत्राभिधीयते उन्मानव्यपदेशोऽपि न ब्रह्मव्यतिरिक्तवस्त्वस्तित्वप्रतिपत्त्यर्थः॥ किमर्थस्तर्हि बुद्ध्यर्थः उपासनार्थ इति यावत्॥ च-
तुष्पादष्टाशफं षोडशकलमित्येवंरूपा बुद्धिः कथं नु नाम ब्रह्मणि स्थिरा स्यादिति विकारद्वारेण ब्रह्मण उन्मानकल्पनैव क्रियते॥
न ह्यविकारेऽनन्ते ब्रह्मणि सर्वैः पुंभिः शक्या बुद्धिः स्थापयितुं मन्दमध्योत्तमबुद्धित्वात्पुंसामिति॥ पादवत्॥ यथा मनआकाशयोर-
ध्यात्ममधिदैवतं च ब्रह्मप्रतीकयोराम्नातयोश्चत्वारो वागादयो मनःसंबंधिनः पादाः कल्प्यंते॥ चत्वारश्चाग्न्यादय आकाश-
संबंधिन आध्यानाय तद्वत्॥ अथवा पादवदिति यथा कार्षापणे पादविभागो व्यवहारप्राचुर्याय प्रकल्प्यते॥ न हि सकलेनैव
कार्षापणेन सर्वदा सर्वे जना व्यवहर्तुमीशते॥ क्रयविक्रयपरिमाणानियमात् तद्वदित्यर्थः॥३३॥ स्थानविशेषात्प्रकाशादि-
वत्॥३४॥ इह सूत्रद्वयेनापि संबंधभेदव्यपदेशयोः परिहारोऽभिधीयते॥ यदप्युक्तं संबंधव्यपदेशाद्भेदव्यपदेशाच्च परमतः स्या-

कल्पनेत्यर्थः॥३३॥ संबंधभेदौ कल्पितौ न सत्यद्वितीयसाधकावित्याह॥ स्थानेति॥ स्थानमुपाधिर्बुद्ध्यादिः एकस्यैवोपाधिना भिन्नस्योपाधिशांतौ सत्यां
संबंध उपचर्यते यथा सौरालोकादेरंगुल्याद्युपाधिना भिन्नस्योपाधिवियोगे महालोकात्मना संबंधोपचारस्तद्वत् तथादित्यचक्षुषोः स्थानतो भेदादि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मुख्यावेवसंबंधभेदौकिंनस्यातामित्यत्रसूत्रं॥उपपत्तेश्चेति॥स्वरूपेणब्रह्मणाजीवस्यसंबंधोभेदनिवृत्तिरूपोयुज्यतेनमुख्यःसंयोगादिःवस्तुद्वया
सत्वात्तथाभेदोपिनस्वतएकत्वश्रुतेरित्यर्थः॥३३॥ननुद्वितीयाभावेसर्वगतत्वश्रुतिविरोधइत्यतआह॥अनेनसर्वगतत्वमिति॥द्वितीयसत्वेसेत्वादिव
संबंधभेद
यतएकस्यापिस्थानविशेषापेक्षयाएतौव्यपदेशावुपपद्येते॥संबंधव्यपदेशोनावरणमर्थःबुद्ध्याद्युपाधिस्थानविशेषयोगा
दुद्भूतस्यविशेषविज्ञानस्योपाध्युपशमेयउपशमःसपरमात्मनःसंबंधइत्युपाध्यपेक्षयोपचर्यते॥नपरिमितत्वापेक्षयातथा
भेदव्यपदेशोपिब्रह्मणउपाधिभेदापेक्षयैवोपचर्यतेनस्वरूपभेदापेक्षया॥प्रकाशादिवदित्युपमोपादानं॥यथैकस्यप्रकाश
स्यसौर्यस्यचांद्रमसस्यचोपाधियोगादुपजातविशेषस्योपाध्युपशमात्संबंधव्यपदेशोभवत्युपाधिभेदाच्चभेदव्यपदेशोयथावा
सूचीपाशाकाशादिषूपाध्यपेक्षयैवैतौव्यपदेशौभवतस्तद्वत्॥३४॥उपपत्तेश्च॥३५॥उपपद्यतेचात्रेदृशएवसंबंधोनान्यादृशः
समपीतोभवतीतिहिस्वरूपसंबंधमेतमामनंति॥स्वरूपस्यचानपायित्वात् ननरत्नगारत्वायेनसंबंधोघटतेउपाधिकृतस्वरू
पतिरोभावात्तुसमपीतोभवतीत्युपपद्यते॥तथाभेदोपिनान्यादृशःसंभवति॥बहुत्वस्मृतिप्रसिद्धैकत्वविरोधात्॥तथा
चश्रुतिःएकस्याप्याकाशस्यस्थानकृतंभेदव्यपदेशमुपपादयति॥योयंबहिर्धापुरुषादाकाशोयोयमंतःपुरुषआकाशो
योयमंतर्हृदयआकाशइति॥३५॥तथान्यप्रतिषेधात्॥३६॥एवंसेत्वादिव्यपदेशान्परपक्षहेतूनुन्मथ्यसंप्रतिस्वपक्षंहेत्वं
तरेणोपसंहरति॥तथान्यप्रतिषेधादपिनब्रह्मणःपरंवस्त्वंतरमस्तीतिगम्यते॥तथाहिसएवाधस्तादहमेवाधस्तादात्मैवा
धस्तात्सर्वंतंपरादाद्योन्यत्रात्मनःसर्ववेदब्रह्मेदंसर्वमात्मैवेदंसर्वंनेहनानास्तिकिंचनयस्मात्परंनापरमस्तिकिंचित्तदे
तत्ब्रह्मापूर्वमनपरमनंतरमबाह्यमित्येवमादिवाक्यानिस्वप्रकरणस्थान्यन्यार्थत्वेनपरिणेतुमशक्या। निब्रह्मव्यतिरि
क्तंवस्त्वंतरंवारयंति॥सर्वांतरश्रुतेश्चनपरमात्मनोन्योंतरात्मास्तीत्यवधार्यते॥अनेनसर्वगतत्वमायामशब्दादिभ्यः॥३७॥

न्ब्रह्मणोल्पत्वंस्यात्॥यत्रान्यत्पश्यतितदल्पमितिश्रुतेः॥किंचनिरवयवासंगब्रह्मणःसत्यप्रपंचसंबंधायोगात् नवैवसर्वगतत्वश्रुतिविरोधइतिभावः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अधिष्ठानेनाध्यस्तं जगद्ग्राह्यं अध्यस्तत्वात् रज्ज्वाध्यस्तसर्पवदिति न्यायः ॥३७॥ एवं तत्पदलक्ष्यं संशोध्य वाच्यार्थमाह फलमत उपपत्तेः निर्विशेषत्वादन्यः स्वभावः फलहेतुत्वास्य ॥ इष्टं सुखं देवादीनां अनिष्टं दुःखं नारकिणां व्यामिश्रं मनुष्याणां संसारो जन्ममृतिप्रवाहः गोचरः आश्रयो यस्य तत्संसारगोचरं ॥ अत्र कर्मेश्वरयोः फलहेतुत्वश्रुतेः संशयमाह ॥ किमिति ॥ अत्र पूर्वपक्षे फलदातुरीश्वरस्य तत्पदवाच्यस्यासिद्धेर्लक्ष्यासिद्धिः सिद्धान्तेन तत्सिद्धिरिति फलभेदः पूर्वो-

अनेन सेनादिव्यपदेशनिराकरणेन अन्यप्रतिषेधसमाश्रयणेन च सर्वगतत्वमप्यात्मनः सिद्धं भवति ॥ अन्यथा हि तत्त्वसिद्धे न सेनादिव्यपदेशेषु मुख्येष्वङ्गीक्रियमाणेषु परिच्छेद आत्मनः प्रसज्येत ॥ सेनादीनामेव मात्मकत्वात् ॥ तथान्यप्रतिषेधेऽप्यसतिवस्तुवस्त्वन्तराद्व्यावर्तत इति परिच्छेद एवात्मनः प्रसज्येत ॥ सर्वगतत्वं चास्यायामशब्दादिभ्यो विज्ञायते ॥ आयामशब्दो व्याप्तिवचनः शब्दः यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः ॥ आकाशवत्सर्वगतश्च नित्यो ज्यायान्दिवो ज्यायानाकाशान्नित्यः सर्वगतः स्थाणुरचलोऽयमित्येवमादयो हि श्रुतिस्मृतिन्यायाः सर्वगतत्वमात्मनोऽवबोधयन्ति ॥३७॥ फलमत उपपत्तेः ॥३८॥ तस्यैव ब्रह्मणो व्यावहारिक्यामीशित्रीशितव्यविभागावस्थायामयमन्यः स्वभावो वर्ण्यते यदेतदिष्टानिष्टव्यामिश्रलक्षणं कर्मफलं संसारगोचरं त्रिविधं प्रसिद्धं जन्तूनां ॥ किमेतत्कर्मणो भवति आहोस्विदीश्वरादिति भवति विचारणा ॥ तत्र तावत्प्रतिपाद्यते ॥ फलमत ईश्वराद्भवितुमर्हति ॥ कुतः उपपत्तेः स हि सर्वाध्यक्षः सृष्टिस्थितिसंहारान्विचित्रान्विदधद्देशकालविशेषाभिज्ञत्वात्कर्मिणां कर्मानुरूपं फलं संपादयतीत्युपपद्यते ॥ कर्मणस्त्वनुक्षणविनाशिनः कालान्तरभावि फलं भवतीत्यनुपपन्नं ॥ अभावाद्भावानुत्पत्तेः ॥ स्यादेतत् कर्म विनश्यत् स्वकालमेव स्वानुरूपं फलं जनयित्वा विनश्यति ॥६॥

क निर्विशेषत्वमुपजीव्य फलदातृत्वमपीश्वरस्य नास्तीति पूर्वपक्षोत्थानात्संगतिः यद्यपि सर्वगतत्ववत्फलदातृत्वं व्यवहारदशायां सिध्यति तथापि कर्मण एव फलदातृत्वमिति शंकानिरासेनोक्तलक्ष्यार्थनिर्वाहक वाच्यार्थनिर्णयार्थमस्याधिकरणस्यारंभ इति मत्वा सिद्धान्तं तावदाह ॥ तत्र तावदिति ॥ स्वर्गादिकं विशिष्टदेशकालकर्माभिज्ञदातृकं फलत्वात्सेवाफलवदित्युपपत्तिः यागादिक्रियारूपं कर्म तावत्क्षणिकं तत्किं स्वनाशात्फलं जनयति उत फलमुत्पाद्य न-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कर्मनाशक्षणमारभ्याऽनभिव्यक्तस्वर्गसुखादिसत्त्वे मानं नास्तीति दूषयति॥ तदपीत्यादिना॥ तृतीयं शंकते अथेति अपूर्वं किं स्वतन्त्रमेव फलदानाय प्रवर्तते चेतनाधिष्ठितं वा नाद्य इत्याह॥ तदपीति॥ द्वितीये त्वदृष्टानभिज्ञजीवस्याधिष्ठातृत्वायोगात् ईश्वरस्याधिष्ठातृत्वसिद्धिरिति भावः प्रौढवादेनापूर्वं नास्तीत्याह तदस्तित्व इति॥ क्षणिकयागादेः श्रुतस्वर्गादिहेतुत्वानुपपत्त्या स्याद्यपूर्वसिद्धिरिति चेन्न कर्मभिराराधितादीश्वरादेव स्थायिनः फलसिद्धेरित्यर्थः॥ न केवलं तर्केणापूर्वं सिध्यतीति भावः॥ कृतात्ययेऽनुशयवानित्यत्रोदाहृताभिर्यदिह रमणीयचरणा इत्यादिश्रुतिस्मृतिभिरपूर्वसिद्धि

तत्फलं कालान्तरितं कर्त्रा भोक्ष्यत इति॥ तदपि न परिशुध्यति॥ प्राक् भोक्तृसंबन्धात् फलत्वानुपपत्तेः॥ यत्कालं हि यत्सुखं दुःखं वात्मना भुज्यते॥ तस्यैव लोके फलत्वं प्रसिद्धम्॥ न ह्यसंबद्धस्यात्मना सुखस्य दुःखस्य वा फलत्वं प्रतियन्ति लौकिकाः॥ अथोच्येत॥ मा भूत्कर्मानन्तरं फलोत्पादः॥ कर्मकार्यादपूर्वात्फलमुत्पत्स्यत इति॥ तदपि नोपपद्यते॥ अपूर्वस्याचेतनस्य काष्ठलोष्ठसमस्याचेतनेनाप्रवर्तितस्य प्रवृत्त्यनुपपत्तेः॥ तदस्तित्वे च प्रमाणाभावात्॥ अर्थापत्तिः प्रमाणमिति चेन्न॥ ईश्वरसिद्धेरर्थापत्तिक्षयात्॥ ३८॥ श्रुतत्वाच्च॥ ३९॥ न केवलमुपपत्तेरेवेश्वरं फलहेतुं कल्पयामः॥ किं तर्हि श्रुतत्वादपीश्वरमेव फलहेतुं मन्यामहे॥ तथा च श्रुतिर्भवति॥ स वा एष महानज आत्मान्नादो वसुदान इत्येवंजातीयका॥ ३९॥ धर्मं जैमिनिरत एव॥ ४०॥ जैमिनिस्त्वाचार्यो धर्मं फलस्य दातारं मन्यते॥ अत एव हेतोः श्रुतेरुपपत्तेश्च॥ श्रूयते तावदयमर्थः स्वर्गकामो यजेतेत्येवमादिषु वाक्येषु तत्र च विधिश्रुतेर्विषयभावोपगमाद्यागः स्वर्गस्योत्पादक इति गम्यते॥ अन्यथा ह्यननुष्ठातृको याग आपद्येत तत्रास्योपदेशवैयर्थ्यं स्यात्॥ ननु क्षणविनाशिनः कर्मणः फलं नोपपद्यत इति परित्यक्तोऽयं पक्षः

श्चेत्तत्राभि———रीश्वरस्यापि फलदातृत्वं स्वीकार्यमित्याह॥ श्रुतत्वाच्चेति॥ सूत्रकारः अन्नमात्मना प्राणिभ्यो ददातीत्यन्नादः॥ वसुदानो धनदाता॥ कर्मणोऽपूर्वस्य वा जडत्वेनोपकरणमात्रत्वात् स्वतन्त्र ईश्वर एव फलदातेति सिद्धान्तो दर्शितः॥ ३९॥ इदानीं पूर्वपक्षयति धर्ममिति विधिश्रुतेरित्यर्थः॥ तस्य लिङर्थस्य प्रेरणात्मनो यागो विषयस्तद्भावावगमाद्यागः स्वर्गसाधनमिति गम्यते यागस्येष्टसाधनत्वाभावे प्रेरणानुपपत्तेरित्यर्थः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अपूर्वद्वाराकर्मणःफलमुपपद्यतइत्युक्तासिद्धांतं दूषयतिईश्वरस्त्विति॥ईश्वरःकिंकर्मानपेक्षःफलंददातिनसापेक्षोवाआद्यआह॥अविचित्रस्येत्यादिना॥
द्वितीयेसंवेष्टनसंस्कारमात्रात्करादौवेष्टनवत्कर्मापूर्वादेवफलसिद्धेःकिमीश्वरेणेतिभाव:॥४०॥अत्रवयंवदामः॥चंदनकंटकादिदृष्टसंपत्त्येवमु
ख्यादिसंभवेक्लृप्तंधर्माधर्माभ्यामितिश्रुतिस्मृतिबलात्तदपेक्षायामीश्वरेणकिमपराद्धंअतःईश्वरानपेक्षात्केवलात्कर्मणःफलमित्ययुक्तमितिसिद्धांत

नैषदोषःश्रुतिप्रामाण्यात्॥श्रुतिश्चेत्प्रमाणंयथार्थंकर्मफलसंबंधःश्रुतस्तथाउपपद्यतेतथाकल्पयितव्यः॥नचानुत्पाद्यकिमप्यपूर्वं कर्मविनश्यत्कालांतरितंफलंदातुंशक्नोति॥अतःकर्मणोवासूक्ष्माकाचिदुत्तरावस्थाफलस्यवापूर्वावस्थाऽपूर्वंनामास्तीतित कर्यते॥उपपद्यतेचायमर्थःउक्तेनप्रकारेण॥ईश्वरस्तुफलंददातीत्यनुपपन्नं॥अविचित्रस्यकारणस्यविचित्रकार्यानुपपत्तेर्वैष म्यनैर्घृण्यप्रसंगादनुष्ठानवैयर्थ्यापत्तेश्चतस्माद्धर्मादेवफलमिति॥४०॥पूर्वंतुबादरायणोहेतुव्यपदेशात्॥४१॥ बादरायणस्त्वा चार्यःपूर्वोक्तमेवेश्वरंफलहेतुंमन्यतेकेवलात्कर्मणोऽपूर्वाद्वाकेवलात्फलमित्ययंपक्षस्तुशब्देनव्यावर्त्यते॥कर्मापेक्षादपूर्वा पेक्षाद्वायथातथास्तुईश्वरात्फलमितिसिद्धांतः॥कुतःहेतुव्यपदेशात्॥धर्माधर्मयोरपिकारयितृत्वेनेश्वरोहेतुर्व्यपदिश्यतेफ लस्यचदातृत्वेन॥एषह्येवसाधुकर्मकारयतितंयमेभ्योलोकेभ्यउन्निनीषतएषउएवासाधुकर्मकारयतितंयमधोनिनीषत इति॥स्मर्यतेचायमर्थोभगवद्गीतासुयोयोयांयांतनुंभक्तःश्रद्धयार्चितुमिच्छति॥तस्यतस्याचलांश्रद्धांतामेवविदधाम्यहं॥सत याश्रद्धयायुक्तस्तस्याराधनमीहते॥लभतेचततःकामान्मयैवविहितान्हितानिति॥सर्ववेदांतेषुचेश्वरहेतुकाएवसृष्टयोव्यपदि श्यंते॥तदेवचेश्वरस्यफलहेतुत्वंयत्स्वकर्मानुरूपाःप्रजाःसृजतीति॥विचित्रकार्यानुपपत्त्यादयोपिदोषाःकृतप्रयत्नापेक्षत्वादी श्वरस्यनप्रसज्यंते॥८॥इतिश्रीमत्शारीरकमीमांसाभाष्येभगवत्पादकृतौतृतीयस्याध्यायस्यद्वितीयःपादः४१॥समाप्तः॥

यति॥पूर्वंत्विति॥अचेतनस्यकर्मणःस्वतःप्रवृत्त्ययोगात्सेवादिदृष्टांतानुसारिश्रुतेर्बलीयस्त्वात्सर्ववेदांतेष्वीश्वरस्यजगद्धेतुत्वश्रुतेश्चेश्वराधिष्ठितात्कर्म णोजगदंतःपातिफलसिद्धिरितिसमुदायार्थः॥४१॥इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदानंदभगवत्कृतौशारीरकव्याख्यायांभाष्यरत्नप्रभायां तृ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥ अथ शारीरकसूत्रभाष्ये रत्नप्रभायां तृतीयाध्यायस्य तृतीयपादः प्रारम्भः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीगणेशायनमः॥ओं॥ मार्त्तंडंध्वांतनाशायतिलकस्वामिनंमुदे॥ विघ्नेशंविघ्नविध्वस्त्यैप्रणमामिमुहुर्मुहुः॥१॥ ब्रह्मस्वरूपंनिर्द्धार्यतज्ज्ञानसाधनोपास नास्वरूपमाह॥ सर्ववेदांतप्रत्ययंचोदनाद्यविशेषात्॥ पादसंगतिमाहव्याख्यातमिति॥ पूर्वपादेतत्त्वंपदार्थविवेकःकृतः द्द्हन्फलंवाक्यार्थज्ञानमानंदाद यःप्रधानस्येतिसूत्रेणापुनरुक्तापेक्षितततत्पदतद्वाच्यार्थोपसंहारेणनिर्द्धार्यतइतिफलफलिभावःसंगतिः॥ सगुणवाक्यार्थविद्याचिंतातुनद्विद्यानांचित्तै· काग्र्यद्वारानिर्गुणज्ञानसाधनत्वात्क्रियतइतिमंतव्यं॥ संप्रतिनिर्गुणज्ञानंभेदाभेदविचारविषयत्वेनोक्तमितिमत्वानआक्षिपतिनन्विति॥ वेद्यभेदेविद्या

ओं॥ सर्ववेदांतप्रत्ययंचोदनाद्यविशेषात्॥१॥ व्याख्यातंविज्ञेयस्यब्रह्मणस्तत्वं॥ इदानींतुप्रतिवेदांतंविज्ञानानिभिद्यंतेनवेति विचार्यते॥ ननुविज्ञेयंब्रह्मपूर्वापरादिभेदरहितंएकरसंसैंधवघनवदवधारितंतत्रकुतोविज्ञानभेदाभेदचिंतावतारः॥ नहिक र्मबहुत्ववत्ब्रह्मबहुत्वमपिवेदांतेषुप्रतिपिपादयिषितमितिशक्यंवक्तुं॥ ब्रह्मणएकत्वात्॥ एकरूपत्वाच्चनचैकरूपेब्रह्मण्यनेक रूपाणिविज्ञानानिसंभवंति॥ नह्यन्यथार्थोन्यथाज्ञानमित्यभ्रांतंभवति॥ यदिपुनरेकस्मिन्ब्रह्मणिबहूनिविज्ञानानिवेदांतेषुप्र तिपिपादयिषितानितेषामेकमभ्रांतंभ्रांतानीतराणीत्यनाश्वासप्रसंगोवेदांतेषु॥ नस्मात्तावन्प्रतिवेदांतंब्रह्मविज्ञानभेदआशंकितुंश क्यते॥ नाप्यस्यचोदनाद्यविशेषादभेदउच्यते॥ ब्रह्मविज्ञानस्याचोदनालक्षणत्वात्॥ अविधिप्रधानैर्हिवस्तुपर्यवसायिभिर्ब्रह्मवाक्यैर्ब्रह्म विज्ञानंजन्यतइत्यवोचदाचार्यस्तत्तुसमन्वयादित्यत्रतत्कथमिमांभेदाभेदचिंतामारभतइति॥ तदुच्यते॥ सगुणब्रह्मविषया प्राणादिविषयाचेयंविज्ञानभेदाभेदचिंतेत्यदोषः॥ अत्रहिकर्मवदुपासनानांभेदाभेदौसंभवतः॥ (भेदचिंतास्यात्ब्रह्मणस्तुवेद्यस्यै·

क्यान्नचिंतावसरइत्यर्थः॥ ब्रह्मैक्येपिधर्मभेदाच्चिंतेत्यतआह॥ एकरूपत्वाच्चेति॥ निर्धर्मत्वादित्यर्थः॥ एकरूपेपिब्रह्मण्यनेकप्रकारसंभवाद्भेदशंकेत्य तआह॥ नचेत्यादिना॥ पूर्वपक्षेज्ञानभेदशंकानुपपत्तिमुक्त्वाचोदनाद्यभेदाज्ज्ञानाभेदइतिसिद्धांतोप्ययुक्तइत्याह॥ नाप्यस्येति॥ एवंपादारंभमाक्षिप्यस माधत्ते॥ तदुच्यतइतिसगुणविद्यास्वेवभेदाभेदचिंताक्रियतेनिर्गुणविद्यायांत्वैक्यंसिद्धमितिवाच्यार्थरूपगुणोपसंहारमात्रंक्रियतेवाक्यार्थनिर्णयायेतिभा वः॥ पंचाग्निप्राणदहरशांडिल्यवैश्वानरादिविद्यामिथोभिन्नाइतिनानाशब्दादिभेदादित्यत्रवक्ष्यते॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्रनुमिथोभिन्नास्ताः किंप्रतिशाखंभिद्यंतेनवेतिनामादिभेदाच्चोदनाद्यविशेषाच्चसंशयः॥ पूर्वपक्षेविद्याभेदाद्गुणानुपसंहारः सिद्धांतेत्वभेदादुपसं॥ हारइतिफलभेदः॥ पूर्वतंत्रेशाखांतराधिकरणपूर्वपक्षसूत्रं॥ नामरूपधर्मविशेषपुनरुक्तिनिंदाशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनाच्छाखांतरे कर्मभेदःस्यादिति॥ तत्रोक्ताहेतवोनामादयोविद्याभेदार्थमिहोच्यंते॥ अथैषज्योतिरथैषसर्वज्योतिरेतेनसहस्रदक्षिणेनयजेतेत्यत्रप्रकृतज्योतिष्टोमा नुवादेनसहस्रदक्षिणाख्यगुणविधिमाशंक्यज्योतिरितिपदस्यकर्मांतरनामत्वसंभवेज्योतिष्टोमलक्षकत्वायोगादथेतिप्रकरणविच्छेदाच्चज्योतिष्टोमात्कर्मां॥ तरंविशिष्टदक्षिणाकंविधीयतइतिनाम्नःकर्मभेदकत्वमुक्तं॥ ज्योतिरादिष्वित्यादिपदेनाध्वर्यवंहौत्रमितिसंज्ञाभेदात्कर्मभेदोग्राह्यः॥ तप्तेक्षीरेदध्याकठिनमामि क्षानत्रद्रवंजलरूपंवाजिनमितिभेदःतप्तेपयसिदध्यानयतिसावैश्वदेव्यामिक्षावाजिभ्योवाजिनमित्यत्रवैश्वदेव्यामिक्षायागेवाजिनाख्यगुणविधिःवाजिभ्य

कर्मवदेवचोपासनानिदृष्टफलान्यदृष्टफलानिचोच्यंते क्रममुक्तिफलानिचकानिचित्तेष्वयगुणानोत्पत्तिद्वारेणतेष्वेषाचिंतासंभवति॥
किंप्रतिवेदांतंविज्ञानभेदआहोस्विन्नेति॥ तत्रपूर्वपक्षेहेतवस्तावदुपन्यस्यंते॥ नाम्नस्तावद्भेदप्रतिपत्तिहेतुत्वंप्रसिद्धंज्योतिरादिषु॥ अस्तिचा त्रवेदांतांतरविहितेषुविज्ञानेषुअन्यत्वेनाम तैत्तिरीयकंवाजसनेयकंकौथुमकंशाट्यायनकमित्येवमादि ॥ दृश्य

इतिविश्वेदेवानुवादादित्याशंक्यामि क्षांप्रत्युपसर्जनत्वेनोक्तविश्वेदेवानांवाजिभ्यइत्यनुवादायोगादुत्पत्तिशिष्टामिक्षावरुद्धेकर्मणिवाजिनद्रव्यस्यानाकांक्षितस्यविध्ययोगाद्वाजिदेवताकोवाजि॥ नयागःकर्मांतरमितिद्रव्यदेवतात्मकरूपभेदात्कर्मभेदःसिद्धांतितः॥ आदिपदादैंद्रंदध्यैंद्रंपयइतिद्रव्यभेदाद्यागभेदोग्राह्यः॥ एवमिहापिपंचाग्निषडग्निरूप॥ भेदाद्विद्याभेदोवाजिछंदोगयोः॥ तथारेतोन्नूनावागादयःछांदोग्येनतुसहितावाजिनामितिप्राणविद्याभेदः॥ कारीरिवाक्याध्ययनेतैत्तिरीयकाणांभूमौभोज॥ नंधर्मविशेषोनान्येषामग्न्यध्ययनेकेषांचिदुपाध्यायार्थमुदकुंभाहरणंधर्मोनान्येषामश्वमेधाध्ययनेऽश्वघासानयनंकेषांचिदेवनान्येषांनचतान्येवका॥ रीर्यादीनिकर्माणिधर्मविशेषमपेक्षंतेनापेक्षंतेचेतियुक्तं॥ अतोधर्मविशेषाच्छाखांतरेकर्मभेदःशंकितस्तथात्रापिमुंडकाध्ययनेकेषांचिदेवशिरस्यंगार॥ पात्रधारणरूपंव्रतंनान्येषामितिविद्याभेदःस्यात्॥ पुनरुक्तिरभ्यासःयथासमिधोयजतितनूनपातंयजतीति॥ यजत्यभ्यासात्प्रयाजानांभेदउक्तस्तथाशाखांत

आदिपदान्निंदादिग्रहः॥ प्रातः प्रातरनृतं ते वदंति पुरोदयाज्जुह्वति येऽग्निहोत्रमित्यनुदितहोमस्य यदुदिते सूर्ये प्रातर्जुहुयात् यथातिथये प्रद्रुताय शून्याया वसथायाहार्यं हरंति तादृगेव तदित्युदितहोमस्य च निंदाश्रुतेर्भेदः॥ एकस्यैवोदितेनुदिते चानुष्ठानायोगात्॥ तयोदितानुदितहोमातिक्रमकृतप्रायश्चित्ताद्प्यग्निहोत्रभेदः शंकितः॥ एतेन निंदाप्रायश्चित्ते वेदांतविद्यासु न विद्येते इति नोदाह्रियेते॥ यथा सर्वशाखाविहितस्य कर्मणो ज्ञातुं कर्त्तुं चाऽशक्तेर्भेदस्तथा सर्ववेदांताध्ययनज्ञानाद्यशक्तेस्तत्तद्वेदांतविद्याभेदः स्यात्॥ तथा शाखानां सर्वासामेकरूपा समाप्तिर्नोच्यते किंतु कस्याश्चित्क्वचित्कर्मणि समाप्तिरतः समाप्तिवचनभेदात्प्रतिशाखं कर्मभेदः शंकितस्तथा कस्यचिद्वेदांतस्योंकारसार्वात्म्ये समाप्तिः कस्यचिदन्यत्रेति विद्याभेदः॥ अन्यार्थदर्शनमर्थवादस्तद्भेदात्कर्मभेद

तथा रूपभेदोपि कर्मभेदस्य प्रतिपादकः प्रसिद्धः वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्येवमादिषु अस्ति चात्र रूपभेदः॥ तद्यथा केचिच्छाखिनः पंचाग्निविद्यायां षष्ठमपरमग्निमामनंति॥ अपरे पुनः पंचैव पठंति॥ तथा प्राणसंवादादिषु केचिदूनानधिकानाम- नंति केचिदधिकान्॥ तथा धर्मविशेषोपि कर्मभेदस्य प्रतिपादकः आशंकितः कारीर्यादिषु॥ अस्ति चात्र धर्मविशेषः॥ यथाथर्वणि- कानां शिरोव्रतमिति॥ एवं पुनरुक्त्यादयोपि भेदहेतवो यथासंभवं वेदांतांतरेषु योजयितव्याः॥ तस्मात्प्रतिवेदांतं विज्ञानभेद इति॥ एवं प्राप्ते ब्रूमः॥ सर्ववेदांतप्रत्ययानि विज्ञानानि तस्मिन् तस्मिन् वेदांते तानि तान्येव भवितुमर्हंति॥ कुतः चोदनाद्यविशे- षात्॥ आदिग्रहणेन शाखांतराधिकरणसिद्धांतसूत्रोदिता अभेदहेतव इहाकृष्यंते॥ संयोगरूपचोदनाख्याऽविशेषादित्यर्थः॥

वद्विद्याभेद इति पूर्वपक्षसूत्रोक्ताहेतवो दर्शितास्ते केचित्सिद्धांते पूर्वपक्षे चात्रोपयुंज्यंत इति॥ तथाशब्दांतराभ्याससंख्यागुणप्रक्रियानामधेयानि कर्मभेदकानि॥ तत्र नामधेयं गुणो रूपमभ्यासश्चेति त्रयं व्याख्यातं॥ यजेद्ध्याज्जुहुयादिति प्रकृतिशब्दभेदेन धात्वर्थभेदात्तदवच्छिन्नभावनाख्यकर्मभेद उक्तस्तथात्र वेदोपास्तइत्यादिशब्दभेदाद्विद्याभेदः॥ तिस्र आहुतीर्जुहोतीति संख्यया कर्मभेदवद्वायुप्राणौ द्वौ संवर्गाविति द्वित्वसंख्यया संवर्गविद्याभेदः स्यात्॥ नित्याग्निहोत्रप्रकरणात् प्रकरणांतरे कुंडपायिनामयने मासमग्निहोत्रं जुह्वतीति श्रुतमग्निहोत्रं प्रकरणांतरस्थत्वात्कर्मांतरमिति सिद्धांतितं तथात्र वेदांतभेदे प्रकरणभेदादुपास्तिभेद इति पूर्वपक्षः॥ सिद्धांतयति॥ एवमिति॥ सर्वैर्वेदांतैः प्रतीयंत इति सर्ववेदांतप्रत्ययानि तैर्विहि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उक्तनामादिभिरग्निहोत्रादिकर्मणां प्रतिशाखं भेदे प्राप्ते शाखांतराधिकरणसिद्धांतसूत्रं॥ एकं वा संयोगरूपचोदनाख्याविशेषादिति॥ तत्र चोदनाविध-
यकः शब्दश्चोदितः प्रयत्नो वा तस्याऽविशेषमाह॥ यथैकस्मिन्निति॥ एकधात्वर्थहोमावच्छिन्नप्रयत्नैक्यवदुपास्तियत्नैक्यमित्यर्थः यथा ज्येष्ठत्वादिगुणकप्रा-
णविद्या सर्वशाखास्वेका तथा पंचाग्निविद्याप्येका फलसंयोगाद्यविशेषात् तथान्यापि विद्याऽभिन्नेत्याह॥ एवं पंचाग्नीति॥ पूर्वपक्षहेतून्निराचष्टे॥ येनेि-
ति॥ काठकमित्यादिनाम्नां कर्मभेदो न युक्तः कुतः॥ अचोदनाभिधानत्वात्॥ काठकादिशब्दानां ग्रंथनामतया कर्मवाचित्वाभावात् तेभिवनामकशाखा-
ग्रंथभेदेपि न हि हितं कर्मैकमेव अल्परूपभेदोपि न कर्मैक्यविरोधी धर्मविशेषस्त्वध्ययनांगं न कर्मांगमतो न कर्मभेदकं शाखाभेदे पुनरुक्तिरसिद्धानि-

यथैकस्मिन्नग्निहोत्रे शाखाभेदेऽपि पुरुषप्रयत्नस्तादृश एव चोद्यते जुहुयादिति एवं यो ह वै ज्येष्ठं च श्रेष्ठं च वेदेति वाजसनेयि-
नां छंदोगानां च तादृश्येव चोदना॥ प्रयोजनसंयोगोऽप्यविशिष्ट एव ज्येष्ठश्च श्रेष्ठश्च स्वानां भवतीति॥ रूपमप्युभयत्र तदेव विज्ञा-
नस्य यदुत ज्येष्ठश्रेष्ठत्वादिगुणविशेषणान्वितं प्राणतत्त्वं॥ यथा च द्रव्यदेवते यागस्य रूपं॥ एवं विज्ञेयं रूपं विज्ञानस्य तेन हि
तद्रूप्यते॥ समाख्यापि सैव प्राणविद्येति॥ तस्मात्सर्ववेदांतप्रत्ययत्वं विज्ञानानां॥ एवं पंचाग्निविद्या वैश्वानरविद्या शांडिल्य-
विद्येत्येवमादिष्वपि योजयितव्यं॥ ये तु नामरूपादयो भेदहेत्वाभासास्ते प्रथम एव कांडे नाम्ना स्यादचोदनाभिधानत्वादि-
त्यारभ्य परिहृताः॥१॥ इहापि कंचिद्विशेषमाशंक्य परिहरति॥ भेदान्नेति चेन्नैकस्यामपि॥२॥ स्यादेतत्सर्ववेदांतप्रत्ययत्वं विज्ञा-
नानां गुणभेदान्नोपपद्यते॥ तथा हि॥ वाजसनेयिनः पंचाग्निविद्यां प्रस्तुत्य षष्ठमपरमग्निमामनंति तस्याग्निरेवाग्निर्भवतीत्यादि

दान्यार्थदर्शनयोरपि न भेदकत्वं तत्तद्विधिस्तुतिमात्रत्वात् बहुशाखाध्ययनाशक्तावपि स्वशाखानुक्तविशेषस्यापेक्षितस्यान्यतो ग्रहसंभवाद्गुणोक्तिरभे-
दिका एकस्मिन्नपि कर्मण्यंगलोपादिना प्रायश्चित्तं संभवति एवं समाप्तिवचनभेदोऽप्यप्रयोजक इत्येवं कर्मभेदप्रमाणाभावस्ये भेदहेतवः परिहृता
इत्यर्थः॥१॥ तर्हि शाखांतरन्यायेनैव कर्मैक्यवद्विद्यैक्यसिद्धेः पुनरुक्तिरित्यत आह॥ इहापीति रूपस्यान्यतिशिष्टत्वं विशेषः॥ पंचाग्नीन्वेदेत्याद्युपास-
नोत्पत्तिविधिस्थपंचाग्न्यादिरूपभेदादुपासनाभेदः स्यादामिक्षावाजिनरूपभेदात्कर्मभेदवदित्यधिकाशंकानिरासार्थत्वान्न पौनरुक्त्यमस्याधिकरणस्ये-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा॰भा॰ ए॰प्र॰टी॰ ३२५ अस्य पृथक्शास्त्रत्वात्कर्मन्यायानां मानसविद्यासु विनास्त्रत्वं दुर्योजनत्वाच्च पुनरुक्तिगंधोपि नास्तीति मंतव्यं॥ ननु तस्य मृतस्य दाहार्थमग्निरंत्येष्टि- अ॰प॰ ३ ३
गतः षष्ठोयः प्रसिद्धवद्वाजिभिरुक्तः सः छांदोग्यैरुपसंहार्य इति न रूपभेदस्तत्राह न चात्रेति अस्तु प्रजननगुणवतो रेतसो वाजिनामावापः छं-
दोगानां च तस्योद्वापस्ततः किमित्यत आह॥ आवापेति छांदोग्येषु षष्ठाग्न्यभावमंगीकृत्याल्परूपभेदो न विद्यैक्यविरोधीति परिहरति॥ नैष इत्यादिना॥
अंगीकारं त्यजति॥ पठ्यतेपीति॥ इतोस्माल्लोकाद्धि स्वं लोकांतरं प्रेतं गतं ज्ञानयोग्यं ये हरंतीत्यर्थः ननु छांदोग्येप्यग्निमात्रं श्रुतं वाजिभिस्तु समिदादिविशेषः प-

छंदोगास्तु तं नामनंति पंचसंख्यैव च न उपसंहरंति॥ अथ ह य एतानेवं पंचाग्नीन्वेदेति॥ येषां च स गुणोस्ति येषां च नास्ति
कथमुभयेषामेका विद्योपपद्येत॥ न चात्र गुणोपसंहारः शक्यते प्रत्येतुं पंचसंख्याविरोधात्॥ तथा प्राणसंवादे श्रेष्ठाद्न्यांश्च-
तुरः प्राणान्वाक्चक्षुःश्रोत्रमनांसि छंदोगा आमनंति॥ वाजसनेयिनस्तु पंचममप्यामनंति रेतो वै प्रजापतिः प्रजायते ह प्रजया
पशुभिर्य एवं वेदेति॥ आवापोद्वापभेदाच्च वेद्यभेदो भवति॥ वेद्यभेदाच्च विद्याभेदो द्रव्यदेवताभेदादिव यागस्येति चेत्॥ नैष दोषः॥
यत एकस्यामपि विद्यायामेवंजातीयको गुणभेद उपपद्यते॥ यद्यपि षष्ठस्याग्नेरुपसंहारो न संभवति॥ तथापि द्युप्रभृतीनां
पंचानामग्नीनामुभयत्र प्रत्यभिज्ञायमानत्वान्न विद्याभेदो भवितुमर्हति नहि षोडशिग्रहणाग्रहणयो रतिरात्रो भिद्यते॥ प-
ठ्यते पि च षष्ठोग्निश्छंदोगैः॥ तं प्रेतं दिष्टमितोग्नय एव हरंतीति॥ वाजसनेयिनस्तु सांपादिकेषु पंचस्वग्निष्वनुवृत्तायाः स-
मिद्धूमादिकल्पनाया निवृत्तये तस्याग्निरेवाग्निर्भवति समित्समिदित्यादि समामनंति स नित्यानुवादः॥ अथाप्युपासनार्थ एव
वादस्तथापि स गुणः शक्यते छंदोगैरप्युपसंहर्तुं न चात्र पंचसंख्याविरोध आशंक्यः सांपादिकाग्न्यभिप्राया ह्येषा पंचसंख्या नित्या- रा॰म॰ ३२५
नुवादभूता न विधिसमवायिनीत्यदोषः॥६॥

ठ्यत इति रूपभेदस्तद्वस्यस्तत्राह॥ वाजसनेयिनस्त्विति॥ षष्ठाग्नेस्तद्विशेषस्य
चानुवादमात्रत्वेनानुपास्यत्वात्पंचाग्नय एवोपास्या उभयत्रेति न रूपभेद इत्यर्थः॥ सविशेषस्य षष्ठाग्नेरुपास्यत्वेपि न रूपभेद इत्याह॥
अथापीति॥ द्युलोकादीनां पंचानामनग्नीनामग्नित्वसंपत्तिविधिनैवार्थात्पंचत्वसंपत्तिकल्पिताग्नीनां सिद्धमनूद्यतेन ध्येयत्वेन विधीयत इ-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

छंदोगैर्वाजिशाखास्थैरेवउपसंहर्तव्यमित्युक्ताऽनुपसंहारेपिनविद्याभेदइत्याहनचावापेति।१एवंरूपभेदोनविद्याभेदकइत्युक्ताधर्मविशेषोपिनभेदक
इत्याह॥स्वाध्यायस्येतिगोदानवदध्ययनांगत्वेनशिरोव्रतमाथर्वणिकानां सूत्रेविहितंनविद्यांगमित्यर्थः॥अधिकाराच्चेतिव्याचष्टेनैतदितिएतत्प्रकृतं
मुंडकमननुष्ठितशिरोव्रतोनरोनाधीतइतिश्रुतेर्मुंडकाध्ययनांगमेवशिरोव्रतमित्यर्थः॥ ननुविद्यांगत्वेनापीदंव्रतंश्रुतमितिशंकते॥नन्विति॥स

एवंप्राणसंवादेष्वप्यधिकस्यगुणस्येतरत्रोपसंहारोनविरुध्यते॥नचावापोद्वापभेदाद्वेद्यभेदोविद्याभेदस्याशंकाःकस्यचिद्वि
द्यांशस्यावापोद्वापयोरपिभूयसोवेद्यराशेरभेदावगमात्॥तस्मादेकविद्यमेव॥२॥स्वाध्यायस्यतथात्वेनहिसमाचारेधिकाराच्चसववच्च
तन्नियमः॥३॥यदप्युक्तमाथर्वणिकानांविद्यांप्रतिशिरोव्रताद्यपेक्षणादन्येषांचतदनपेक्षणाद्विद्याभेदइति॥तत्प्रत्युच्यतेस्वा
ध्यायस्यैषधर्मोनविद्यायाः॥कथमिदमवगम्यते॥यतस्तथात्वेनस्वाध्यायधर्मत्वेनसमाचारेवेदव्रतोपदेशपरेग्रंथेआथर्वणिकाइ
दमपिवेदव्रतत्वेनव्याख्यातमितिसमामनंतिनैतदचीर्णव्रतोधीतइतिचाधिकृतविषयादेतच्छब्दादध्ययनशब्दाच्चस्वोपनिषद
ध्ययनधर्मएवैषइतिनिर्धार्यते॥ननुचतेषामेवैतांब्रह्मविद्यांवदेतशिरोव्रतंविधिवद्यैस्तुचीर्णमितिब्रह्मविद्यासंयोगश्रवणादेके
वसर्वत्रब्रह्मविद्येतिसंकीर्येतैषधर्मः॥नतत्राप्येतामितिप्रकृतप्रत्यवमर्शात्प्रकृतत्वंचब्रह्मविद्यायाग्रंथविशेषापेक्षमितिग्रंथवि
शेषसंयोग्येवैषधर्मः॥सववच्चतन्नियमइतिनिदर्शननिर्देशः॥यथाचसवाः॥सप्तसौर्यादयः॥शतौदनपर्यंतावेदांतरोदितत्रेताग्न्यनभिसं
बंधादाथर्वणोदितैकाग्न्यभिसंबंधाच्चाथर्वणिकानामेवनियम्यंते॥तथैवायमपिधर्मःस्वाध्यायविशेषसंबंधात्तत्रैवनियम्यते॥तस्मादप्य
नवद्यंविद्यैकत्वं॥३॥दर्शयतिच॥४॥दर्शयतिचवेदोपिविद्यैकत्वंसर्ववेदांतेषुवेद्यैकत्वोपदेशात्॥ र्वशाखासुब्रह्मविद्यैकैवचेद्विद्यासंयुक्तंव्र

तमपिसर्वत्रसंबध्येतनचसंबध्यतइतिविद्याभेदइत्यर्थः॥प्रकृतग्रंथवाच्येतच्छब्दबलाद्ब्रह्मप्रकाशकग्रंथपरोब्रह्मविद्याशब्दइतिपरिहर
तीतेति॥तस्यशिरोव्रतस्यमुंडकाध्ययनेनियमइत्यत्रसववदितिनिदर्शननिर्देशः॥सवाःहोमाः॥आथर्वणैःस्वसूत्रेउ दितएकोग्निरेकर्षिसंज्ञ्यामसि
द्धस्मिन्नग्नौकार्याइतियथानियम्यंतेतथेत्यर्थः॥३॥किंचवेदेनैकेननिर्गुणब्रह्मविद्यैकतावगतिर्दर्शयति॥तत्सन्निधिपाठात्सगुणविद्यानामपिसर्वशाखा

सैकासिद्धिरित्याहसूत्रकारः॥दर्शयतिचेति॥

सगुणमप्येकं वेदत्रयेवेद्यं दर्शयतीत्याह॥ तथेति॥ किंच शाखांतरोक्तपदार्थस्य शाखांतरे सिद्धवत्परामर्शो विद्यैक्यं दर्शयतीत्याह॥ तथा महद्भयमित्यादिना एष
नरएतस्मिन्नुदरमंतरं कुरुतेऽथ तस्य भयं भवतीत्युदरमल्पमप्यंतरं भेदं यदा पश्यत्यथ तदा तस्य संसारभयं भवत्येव यस्माद्विदुषोनस्य भेददर्शिनस्तदेव ब्रह्म भयंकरं भवति ब्रह्मैवाहमित्यमन्वा
नस्येत्यर्थः प्रादेशमात्रमुपास्त इति सिद्धवदुपादानं वैश्वानरविद्यैक्यं दर्शयतीत्याह तथेति॥ किंच सर्वेषु वेदांतेषूक्थादीनां प्रतीयमानत्वेन हेतुनैतदवगम्यते॥
अन्यत्रोक्तानां तेषामन्यत्रोपास्त्यर्थमुपादानमिति॥ ततस्तदुपासीनामपि सर्ववेदांतप्रमाणकत्वेनैक्यं बाहुल्येन सिध्यतीत्याह॥ तथेति॥ ब्रह्मविद्यैक्यवद्

सर्वे वेदा यत्पदमामनंतीति॥ तथैतं ह्येव बह्वृचा महत्युक्थे मीमांसंत एतमग्नावध्वर्यव एतं महाव्रते छंदोगा इति च॥ तथा महद्भयं व
ज्रमुद्यतमिति काठके उक्तस्येश्वरगुणस्य भयहेतुत्वस्य तैत्तिरीयके भेददर्शननिंदायै परामर्शो दृश्यते॥ यदा ह्येवैष एतस्मिन्नुदरमंतरं
कुरुते॥ अथ तस्य भयं भवति तत्त्वेव भयं विदुषो मन्वानस्येति॥ तथा वाजसनेयके प्रादेशमात्रसंपादितस्य वैश्वानरस्य छांदोग्ये सिद्धवदुपा
दानं यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्त इति॥ तथा सर्ववेदांतप्रत्ययत्वेनान्यत्र विहितानामुक्थादीनामन्य
त्रोपासनविधानायोपादानात्प्रायदर्शनन्यायेनोपासनानामपि सर्ववेदांतप्रत्ययत्वसिद्धिः॥४॥१॥ उपसंहारोऽर्थाभेदाद्विधिशेषवत्स
माने च॥५॥ इदं प्रयोजनसूत्रं॥ स्थिते चैवं सर्ववेदांतप्रत्ययत्वे सर्वविज्ञानानामन्यत्रोदितानां विज्ञानगुणानामन्यत्रापि समाने विज्ञाने
उपसंहारो भवति अर्थाभेदात्॥ य एव हि तेषां गुणानामेकत्रार्थो विशिष्टविज्ञानोपकारः स एवान्यत्राप्युभयत्रापि हि तदेवैकं विज्ञानं तस्मा
दुपसंहारो विधिशेषवत् यथा हि विधिशेषाणामग्निहोत्रादिधर्माणां तदेवैकमग्निहोत्रादिकर्म सर्वत्रेत्यर्थाभेदादुपसंहरणं॥ एवमिहापि॥

क्थादिविद्यैक्यमित्यर्थः॥४॥१॥ सर्वशाखासु विद्यैक्यचिंतायाः फलमाह॥ उपसंहार इति॥ शाखाभेदे समानविद्यायां श्रुता गुणा यथाश्रुति व्यवस्थिताः उत एक
त्राश्रुता इतरशाखा तउपसंहर्तव्या इति संदेहे विद्यैक्येपि तत्र तत्रोक्तैरेव गुणैर्विद्योपकारसिद्धेः शाखाभेदेन गुणा व्यवस्थिता इति पूर्वपक्षः॥ तत्र प्रकृत
विद्यैक्यचिंता नैष्फल्यमिति फलं॥ सिद्धांतत्वेन सूत्रं व्याचष्टे॥ स्थिते चेत्यादिना॥ गुणानां गुण्यविनाभावादेतच्छाखास्थविद्या शाखांतरोक्तनद्विद्यागुणवती॥
तदभिन्नत्वात् तद्विद्यावदित्यनुमानाद्विद्यैक्ये गुणोपसंहारसिद्धिरित्यर्थः प्रधानैक्ये तत्तदुपकारकाणामंगानामुपसंहारे दृष्टांतमाह॥ विधिशेषवदिति॥ ५॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उक्तमेव व्यतिरेकमुखेनाह यदि हीति नन्वाग्नेयया गावरुद्धानां गुणानां ततो भिन्ने सौर्ये प्राप्तिवद्विद्यान्तरस्थगुणानां विद्यान्तरे प्राप्तिः किं न स्यादित्यत आह। प्रकृतीति। प्र-
कृतिगुणानां विकारे प्राप्तिर्युक्ता विद्यानां तु प्रकृतिविकृतिभावासिद्धेर्न तत्प्राप्तिरित्यर्थः नैवमिति। गुणानुपसंहारो नेत्यर्थः। उत्तरसूत्राणामनेन सूत्रेण पौनरुक्त्यं
वारयति। अस्यैवेति। ६। पूर्वं चोदनाद्यविशेषादुत्सर्गतो विद्यैक्यमुक्तं तस्यापवादं वक्तुमाह। अन्यथात्वमिति। अत्र वाजिनामुद्गीथब्राह्मणं छंदोगानां उद्गीथाध्या-
यं च विषयमाह। वाजेत्यादिना। तेह देवाः सात्विकवृत्तयः प्राणा अन्योन्यमूचुर्हंतेदानीमस्मिन्यज्ञे उद्गीथेनोद्गात्रेण कर्मणा रजस्तमोवृत्तिरूपानसुरानत्यरेवनं

यदि हि विज्ञानभेदो भवेत्ततो विज्ञानान्तरनिबद्धत्वाद्गुणानां प्रकृतिविकृतिभावाभावाच्च न स्यादुपसंहारः। विज्ञानैकत्वे तु नैवमिति।
अस्यैव तु प्रयोजनसूत्रस्य प्रपंचः सर्वभेदादित्यारभ्य भविष्यति। २। ५। अन्यथात्वं शब्दादिति चेन्नाविशेषात्। ६। वाजसनेयके तेह देवा ऊ-
चुर्हन्तासुरान्यज्ञ उद्गीथेनात्ययामेति ते ह वाचमूचुस्त्वं न उद्गायेति प्रक्रम्य वागादीन्प्राणानासुरपाप्मविद्धत्वेन निंदित्वा तथैव मुख्यप्राणप-
रिग्रहः पठ्यते। अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायदिति। तथा छांदोग्येऽपि तद्ध देवा उद्गी-
थमाजह्रुरनेनैनानभिभविष्याम इति प्रक्रम्य इतरान्प्राणानसुरपाप्मविद्धत्वेन निंदित्वा तथैव मुख्यप्राणपरिग्रहः पठ्यते।
अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिर इति। उभयत्रापि च प्राणप्रशंसया प्राणविद्याविधिरध्यवसीयते। तत्र संशयः किं-
मत्र विद्याभेदः स्यात् आहोस्विद्विद्यैकत्वमिति। किं तावत्प्राप्तं। पूर्वेण न्यायेन विद्यैकत्वमिति। ननु न युक्तं विद्यैकत्वं प्रक्रमभेदात्। अ-
न्यथा हि प्रक्रमंते वाजसनेयिनः। अन्यथा छंदोगाः। त्वं न उद्गायेति वाजसनेयिन उद्गीथस्य कर्तृत्वेन प्राणमामनंति। ((

गच्छामेति ते चैवं निर्द्धी-
षमुद्गीथकर्तारमुपास्यं निर्धारयितुं कृतसंवादः प्रथमं वाचं परीक्षितवंतस्त्वमेवोद्गात्रं नोऽस्माकं कुर्विति तया त्वनृतं कृतं तथा घ्राणचक्षुःश्रोत्रमनांस्यपि का-
मेनासुरपाप्मनाग्रस्तानीति निंदित्वा आसन्यमास्ये भवं मुखमध्यस्थं प्राणमुपास्यं निर्धारितवंत इत्यर्थः। तत्र तत्रान्योन्याभिभवात्मकयुद्धे प्रवृत्ते देवाः पूर्ववदु-
द्गीथमाहृतवंतः अनेनोद्गीथेनैनानसुराञ्जयेमेत्यर्थः। भेदाभेदमानाभ्यां संशयमाह। तत्रेति। अत्र पूर्वाधिकरणसिद्धांतन्यायेनोद्गीथविद्येति संज्ञैक्येन विद्यैक्य-
मिति पूर्वपक्षे मिथो गुणोपसंहारः फलं सिद्धांते संज्ञैक्येऽपि विद्यैक्यापवादादनुपसंहार इति। एवं यत्र पूर्वन्यायेन पूर्वपक्षः तत्रापवादिकी संगतिरिति मंतव्यं। सूत्रस्थ

सिद्धांतिशंकाभागं व्याचष्टे। ननु न युक्तमिति।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संपूर्णोद्गीथकर्मकर्ता प्राणो वाजिनामुपास्यः उद्गायेति कर्तृशब्दात् छंदोगानां तूद्गीथावयव ॐकारः प्राण इत्योपास्य ॐ मित्येतदक्षरमुद्गीथमित्युपक्रम्य प्राणमुद्गीथमिति कर्मरूपत्वशब्दात् तथा च कर्तृकर्मणो रूपास्ययोर्भेदाद्विद्ययोरन्यथात्वं भेद इति शंकार्थः॥ उद्गीथत्वेनेति॥ ओंकारत्वेनेत्यर्थः अल्परूपभेदो न विद्यैकत्वविरोधीत्युक्तन्यायेन पूर्वपक्षी परिहरति नैष इति॥ असुरान्यथाभिप्रायः असुरजयार्थसंवादः॥ यथाश्मानं प्राप्य लोष्ठो विध्वंसते तथा प्राणं हंतुमागता असुरास्तस्य वीर्येण स्वयमेव ध्वस्ता इति श्रुतमुभयत्रेत्यर्थः॥ अल्परूपभेदमंगीकृत्यापि विद्यैकत्वमुक्तं सोपि नास्तीत्याह॥ वाजेति॥ उद्गीथकर्तृरूपत्वेन प्राणस्योभयत्र श्रुतत्वादेक

छंदोगास्तूद्गीथत्वेन तमुद्गीथमुपासांचक्रिर इति॥ तत्कथं विद्यैकत्वं स्यादिति चेत् नैष दोषः॥ न ह्येतावता विशेषेण विद्यैकत्वमपगच्छति अविशेषस्यापि बहुतरस्य प्रतीयमानत्वात्॥ तथा हि देवासुरसंग्रामोपक्रमत्वं असुरान्यथाभिप्राय उद्गीथोपन्यासो वागादिसंकीर्तनं तन्निंदया मुख्यप्राणव्यपाश्रयस्तद्वीर्याच्चासुरविध्वंसनमश्मलोष्टनिदर्शनेनेत्येवं बहवोर्था उभयत्राप्यविशिष्टाः प्रतीयंते॥ वाजसनेयकेपि चोद्गीथसामानाधिकरण्यं प्राणस्य श्रुतं एष उ वा उद्गीथ इति॥ तस्माच्छांदोग्येपि कर्तृत्वं लक्षयितव्यं॥ तस्माच्च विद्यैकत्वमिति॥ ६॥ न वा प्रकरणभेदात् परोवरीयस्त्वादिवत्॥ ७॥ न वा विद्यैकत्वमत्र न्याय्यं विद्याभेद एवात्र न्याय्यः कस्मात् प्रकरणभेदात् इत्युपक्रमभेदादित्यर्थः॥ तथा हीह प्रक्रमभेदो दृश्यते॥ छांदोग्ये तावत् ओमित्येतदक्षरमुद्गीथमुपासीतेत्येवमुद्गीथावयवस्योंकारस्योपास्यत्वं प्रस्तुत्य रसतमादिगुणोपव्याख्यानं तत्र कृत्वाथ खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवतीति पुनरपि तमेवोद्गीथावयवमोंकारमनुवर्त्य देवासुराख्यायिकाद्वारेण तं प्राणमुद्गीथमुपासांचक्रिर इत्याह॥ तत्र यद्युद्गीथशब्देन समस्ता भक्तिरभिप्रेयेत तस्याश्च कर्तोद्गातर्त्विक्॥ तत उपक्रमश्चोपरुध्येत लक्षणा च प्रसज्येत॥ ११

त्रश्रुतं कर्तृत्वमप्युभयत्र द्रष्टव्यमित्यर्थः॥ ६॥ बहु विरुद्धरूपभेदाच्च विद्यैक्यमिति सिद्धांतयति न वेति अक्षरं विशिनष्ट्युद्गीथमिति तदवयवमित्यर्थः॥ पृथिव्यादिरसानां रसतम ओंकारः आप्तिः समृद्धिरिति गुणानुक्त्वा गुणवत्योंकारे प्राणदृष्टिविधानायाख्यायिका प्रस्तुतेत्याह॥ रसतमेति॥ ननु वाजिवाक्यैकवाक्यत्वार्थं छांदोग्योपक्रमस्थमुद्गीथपदं संपूर्णसाम भक्तिपरमस्तु प्राणमुद्गीथमित्यत्राप्युद्गीथकर्ता प्राण उपास्य इति व्याख्यायतामित्यत आह तत्र यद्युद्गीथेति ओंकारोपास्त्युपक्रमभंगादुद्गीथपदे कर्तृल

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥ ननु सिद्धान्तेऽपि तत्पदेऽवयवलक्षणा स्वीकार्या ततो वरं कर्तृलक्षणाश्रयणं तत्रानुग्रहात्तथा चोपसंहारे कर्तृप्राणोपास्तिनिश्चयादुपक्रमेऽपि तन्नि-
श्चय इत्यत आह ॥ उपक्रमेति ॥ संदिग्धोपक्रमो हि वाक्यशेषान्निश्चीयते यथाक्ताः शर्करा इत्यत्राञ्जनद्रव्यसंदेहे तेजो घृतमिति शेषान्निश्चयः
॥ इह तूपक्रमेऽक्षरस्योपास्यत्वं निश्चितं तत्समानाधिकरणोद्गीथपदस्यावयवलक्षणा च विनिश्चितेति प्राणमुद्गीथमित्युपसंहारस्तदेकार्थ-
तया नेय इत्यर्थः ॥ एवं छान्दोग्य ओंकार उपास्य उक्तः इतरत्र तु प्राण इत्युपास्यभेदाद्विद्याभेद इत्याह वाजेति ॥ यदुक्तं वाजिश्रुतावपि प्राण-

उपक्रमानुरोधेन चैकस्मिन्वाक्ये उपसंहारेण भवितव्यं ॥ तस्मादत्र तावदुद्गीथावयव ओंकारे प्राणदृष्टिरुपदिश्य-
ते ॥ वाजसनेयके तु उद्गीथशब्देनावयवग्रहणे कारणाभावात्सकलैव भक्तिरावेद्यते त्वं न उद्गायेत्यपि तस्याः कर्तो-
द्गातृत्विक्प्राणत्वेन निरूप्यत इति प्रस्थानान्तरं ॥ यदपि तत्रोद्गीथसामानाधिकरण्यं प्राणस्य तदप्युद्गातृत्वेनै-
व दिदर्शयिषितस्य प्राणस्य सर्वात्मत्वप्रतिपादनार्थमिति न विद्यैकत्वमावहति ॥ सकलभक्तिविषय एव च तत्राप्युद्गी-
थशब्द इति वैषम्यं ॥ न च प्राणस्योद्गातृत्वमसंभवेन हेतुना परित्यज्यते उद्गीथभाववदुद्गातृभावस्याप्युपासनार्थ-
त्वेनोपदिश्यमानत्वात् ॥ प्राणवीर्येणैव चोद्गाता कर्म करोतीति नास्त्यसंभवः तथा च तत्रैवाम्नातं वाचा च ह्येव स प्राणे-
न चोदगायदिति ॥ न च विवक्षितार्थभेदेऽवगम्यमाने वाक्यच्छायानुकारमात्रेण समानार्थत्वमध्यवसातुं युक्तं ॥

तौ०ज्ञा०२

स्योद्गीथरूपत्वश्रुतेरुपास्यैक्यमिति तत्र दूषयति यदपीत्यादिना तत्रोद्गीथ उपास्यतया नोक्तः किंतु प्राणस्योपास्यस्य गुणतयेत्यर्थः ॥ किं चो-
द्गीथ ओंकारः छान्दोग्ये अत्र तु भक्तिरित्युपास्यभेद इत्याह ॥ सकलेति ॥ प्राणस्य जडत्वान्नोद्गातृत्वं किंतु उद्गीथत्वमेव वाजिभिरपि ग्राह्यमित्ये-
कमाशंक्याह ॥ न चेति ॥ स उद्गाता वाग्विशिष्टप्राणेनोद्गात्रं कृतवानिति श्रुतेरसंभवोऽपीत्यर्थः ॥ यदुक्तं बहुतरार्थाविशेषाद्विद्यैकमिति तत्रा-
ह ॥ न चेति ॥ एकत्रोद्गाता प्राण उपास्योऽन्यत्रोंकार इत्यन्तरंगोपास्यरूपभेदे स्पष्टे सति बहिरंगार्थवादसाम्यमात्रेण नोपासनैक्यं युक्तमित्यर्थः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

छा·भा·
अ·टी·
२८

वाक्यसाम्यमात्रेणार्थैक्यं नास्तीत्यत्र दृष्टांतमाह॥ तथाहीति॥ विचाल्यतं प्रजया पशुभिरर्धयति वर्द्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चंद्रमा अभ्यु- अ·पा· ३ १
देति त्रेधा तंडुलान्विभजेद्ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिंद्राय प्रदात्रे दधंश्चरुं येऽणिष्ठास्तान्विष्णवे शिपिविष्टा-
य शृते चरुमित्यभ्युदयवाक्यं॥ अस्यार्थः॥ यस्य यजमानस्य चतुर्दश्याममावास्याभ्रांत्या दर्शकर्मार्थं प्रवृत्तस्य पुरस्तात्पूर्वं हविस्तंडुलदधिपयोरूपं निरु-
प्तं दर्शदेवताभ्योऽग्न्यादिभ्यः संकल्पितं चंद्रमाश्च पश्चादभ्युदेति तमेनं यजमानं कालव्यत्ययापराधात्तद्देवनिरुप्तं हविः प्रजादिना र्धयति वियोजयति श-
त्रुं चास्य वर्धयति यस्मात्कालभ्रांतिमान्यजमानो ये मध्यमादिभावेन त्रेधाभूतास्तंडुलादध्यादिसहितान्निरुप्तास्तान्विभजेदग्न्यादिभ्यो वियोजयेद्धियोऽन्यच
दातृत्वादिगुणकाम्यादिभ्यो दर्शदेवभिन्नेभ्यो निर्वपेदिति दधन्दधनि स्थविष्ठतंडुलचरुं शृते दुग्धेऽणिष्ठचरुमित्यर्थः॥ अत्र कालापराधे देवतान्तरयुक्तं

तथाह्यभ्युदयवाक्ये पशुकामवाक्ये च त्रेधा तंडुलान्विभजेत्ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यादित्या-
दिनिर्देशसाम्येऽप्युपक्रमभेदादभ्युदयवाक्ये देवतापनयो ध्यवसितः॥ पशुकामवाक्ये तु यागविधिः तथेहाप्युपक्रमभेदा-
द्विद्याभेदः॥ परोवरीयस्त्वादिवत्॥ यथा परमात्मदृष्ट्यध्यासस्साम्येऽपि आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणं स एष परोव-
रीयानुद्गीथः स एषोऽनंत इति परोवरीयस्त्वगुणविशिष्टमुद्गीथोपासनमस्यादित्यगतहिरण्यश्मश्रुत्वादिगुणविशिष्टोद्गीथोपासनाद्भि-

प्रायश्चित्तरूपं दर्शाद्भिन्नं कर्म विधीयत इति प्राप्ते तंडुलत्रेधात्वाद्यनुवादेन विभजेदिति हविषः प्रकृतदेववियोगेन तस्मिन्नेव दर्शकर्मणि देवतान्तरसंबंधमा-
त्रविधानं न कर्मान्तरमिति सिद्धांतितं एवमभ्युदयवाक्ये कालापराधेनोपक्रमाद्दर्शकर्मण्येव हविषः पूर्वदेवताभ्योपनयो वियोगोऽध्यवसितः पशुकामवाक्ये तु
यद्यपि ये स्थविष्ठास्तानग्नये सन्निमतेऽष्टाकपालं निर्वपेद्ये मध्यमास्तान्विष्णवे शिपिविष्टाय शृते चरुं येऽणिष्ठास्तानिंद्राय प्रदात्रे दधंश्चरुमिति निर्देशोऽभ्युद- राम· ३२८
यवाक्यसमोऽस्ति तथापि यः पशुकामः स्यात्सोऽमावास्यामिष्ट्वा वत्सानपाकुर्यादिति नित्यं दर्शकर्म समाप्य पुनर्दोहार्थं वत्सापकरणविध्युपक्रमात्पशु-
कामस्य यागान्तरविधिरेव नाभ्युदयवाक्येनार्थैक्यमिति॥ तथा प्रकृतेऽपि निर्देशसाम्यं न विद्यैक्यप्रयोजकमित्यर्थः वत्सानपाकुर्यान्मातृदेशाद्देशांतरं नये-
दित्यर्थः सूत्रोक्तं दृष्टांतं व्याचष्टे॥ परोवरीयस्त्वादिवदिति॥ परइति सकारांतं परस्मात्परश्चासौ वराच्च वरतर इति परोवरीयान्नित्यकं पदं अनंतश्च आकाशा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

परमात्मानं दृष्ट्यालंबनत्वादुद्गीथस्तयोक्त इत्यर्थः॥ आकाशात्मना हिरण्यश्मश्रुपुरुषात्मना चोद्गीथोपास्तिसाम्येपि विद्याभेदवदिहापि भेद इत्यर्थः॥ ६
॥७॥ संज्ञैक्यं पूर्वपक्षबीजमुद्भाव्य दूषयति संज्ञात इति उपास्यरूपभेदाद्विद्यानानात्वं यदुक्तं तच्छ्रुत्यक्षरानुगतबलवत्संज्ञा तु पौरुषेयी दुर्बलेत्यर्थः सं-
ज्ञैक्यं कर्मैक्यव्यभिचारि चेत्याह॥ अस्ति चेति किं संज्ञैक्यं सर्वत्राप्रमाणमेवेत्याह॥ यत्र त्विति॥ असति बाधके संज्ञैक्यमपि मानं यथा संवर्गविद्येति सं-

न चेतरेतरगुणोपसंहार एकस्यामपि शाखायां तद्वच्छाखांतरस्थेष्वप्येवंजातीयकेषूपासनेष्विति॥७॥ संज्ञातश्चेत्तदुक्तमस्ति तु तदपि॥८॥ अथोच्येत संज्ञैकत्वाद्विद्यैकत्वमत्र न्याय्यं उद्गीथविद्येति ह्युभयत्राप्येका संज्ञेति तदपि नोपपद्यते। उक्तं ह्येतत् नवाप्रकरणभेदात्परोवरीयस्त्वादिवदिति तदेव चात्र न्याय्यतरं॥ श्रुत्यक्षरानुगतं हि तत्॥ संज्ञैकत्वं तु श्रुत्यक्षरबाह्यमुद्गीथशब्दमात्रप्रयोगात् लौकिकैर्व्यवहर्तृभिरुपचर्यते॥ अस्ति चैतत्संज्ञैकत्वं प्रसिद्धभेदेष्वपि परोवरीयस्त्वाद्युपासनेषु उद्गीथविद्येति॥ तथा प्रसिद्धभेदानामपि अग्निहोत्रदर्शपौर्णमासादीनां काठकैकग्रंथपरिपठितानां काठकसंज्ञैकत्वं दृश्यते तथेहापि भविष्यति॥ यत्र तु नास्ति कश्चिदेवंजातीयको भेदहेतुः॥ भवतु तत्र संज्ञैकत्वाद्विद्यैकत्वं॥ यथा संवर्गविद्यादिषु॥८॥ व्याप्तेश्च समंजसं॥९॥ ओमित्येतदक्षरमुद्गीथमुपासीतेत्यत्राक्षरोद्गीथशब्दयोः सामानाधिकरण्ये श्रूयमाणेऽध्यासापवादैकत्वविशेषणपक्षाणां प्रतिभानात्कतमोऽत्र पक्षो न्याय्यः स्यादिति विचारः॥ तत्राध्यासो नाम द्वयोर्वस्तुनोरनिवर्तितायामेवान्यतरबुद्धावन्यतरबुद्धिरध्यस्यते। यस्मिन्नितरबुद्धिरध्यस्यते अनुवर्तत एव तस्मिंस्तद्बुद्धिरध्यस्तेतरबुद्धावपि॥ यथा नाम्नि ब्रह्मबुद्धावध्यस्यमानायामप्यनुवर्तत एव नामबुद्धिर्न ब्रह्मबुद्ध्या निवर्तते॥ यथा वा प्रतिमादिषु विष्ण्वादिबुद्ध्यध्यास एवमिहाप्यक्षर उद्गीथबुद्धिरध्यस्यते उद्गीथे वाक्षरबुद्धिरिति॥ अपवादो नाम यत्र कस्मिंश्चिद्वस्तुनि पूर्वनिविष्टायां मिथ्याबुद्धौ निश्चितायां पश्चादुपजायमाना यथार्थबुद्धिः पूर्वनिविष्टाया मिथ्याबुद्धेर्निवर्तिका भवति॥

ज्ञैक्यात्सर्वशाखासु तद्विद्यैक्यं तथा पंचाग्न्यादिविद्यैक्यमित्याद्य सूत्रे दर्शितमित्यर्थः॥ ८॥ व्याप्तेश्च समंजसं॥ ९॥ सामानाधिकरण्यं विषयीकृत्य
संशयमाह॥ ओमित्येतदिति ॥ अध्यासादिपदार्थान्व्याचष्टे तत्राध्यास इत्यादिना बुद्धिपूर्वकाभेदारोपोऽध्यासः बाधोऽपवादः॥ १०७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शां·भा· एकत्वंवास्तवाभेदः विशेषणंव्यावर्त्तकमितिविवेकः पूर्वमुद्गातृकर्मात्मकोद्गीथावयवत्वमोंकारस्यध्येयस्यविशेषणंसिद्धवत्कृत्यध्येयभेदाद्विद्याभे अ·पा·
र·प्र·टी· दः सिद्धांतितः॥ सनयुक्तइत्याक्षेपसंगत्यापूर्वपक्षयति॥तत्रेति॥अत्रपूर्वपक्षेपूर्वोक्तसिद्धांतासिद्धिः फलंसिद्धांतेनतत्सिद्धिरितिमत्वासिद्धांतसूत्रंव्याचष्टेचश ३ ३
३२९ ब्दइत्यादिनापक्षत्रयस्यदुष्टत्वंप्रतिज्ञायाध्यासपक्षेदोषमाह॥ तत्राध्यासइति॥ यत्रोद्गीथस्यबुद्धिरोंकारेध्यस्यतेतत्रचकोद्गीथशब्दस्योंकारेलक्षणास्या

यथादेहेंद्रियसंघातेआत्मबुद्धिः॥आत्मन्येवात्मबुद्ध्यापश्चात्प्रविन्यातत्वमसीत्यनयायथार्थबुद्ध्यानिवर्त्यते॥यथावादि
ग्भ्रांतिबुद्धिर्दिग्याथात्म्यबुद्ध्यानिवर्त्तते॥एवमिहाप्यक्षरबुद्ध्योद्गीथबुद्धिर्निवर्त्यतेउद्गीथबुद्ध्यावाक्षरबुद्धिरिति॥एक
त्वंत्वक्षरोद्गीथशब्दयोरनतिरिक्तार्थवृत्तित्वं॥यथाद्विजोत्तमोब्राह्मणोभूमिदेवइति॥विशेषणंपुनः सर्ववेदव्यापिनओ
मित्येतस्याक्षरस्यग्रहणप्रसंगेऔद्गात्रविशेषस्यसमर्पणंयथानीलंयदुत्पलंतदानयेति॥एवमिहाप्युद्गीथायओंकार
मुपासीतेति॥एवमेतस्मिन्सामानाधिकरण्यवाक्येविमृश्यमानेएतेपक्षाःप्रतिभांति॥तत्रान्यतमनिर्धारणकारणा
भावादनिर्द्धारणप्राप्ताविदमुच्यते॥ व्याप्तेश्चसमंजसमिति॥ चशब्दोयंतुशब्दस्थाननिवेशीपक्षत्रयव्यावर्त्तनप्रयोजनः
॥ तदिहत्रयःपक्षाःसावद्याइतिपर्युदस्यंते॥ विशेषणपक्षएवैकोनिरवद्यइत्युपादीयते॥तत्राध्यासेतावद्याबुद्धिरितर
त्राध्यस्यतेतच्छब्दस्यलक्षणावृत्तित्वंप्रसज्येततत्फलंचकल्प्येत॥ श्रूयतएवफलंआपयिताहवैकामानांभवतीत्यादिरि
तिचेन्न॥ तस्यान्यफलत्वात्॥आप्त्यादिदृष्टिफलंहितत्नोद्गीथाध्यासफलं॥ अपवादेपिसमानःफलाभावः मिथ्या रत्न·
ज्ञाननिवृत्तिःफलमितिचेन्न॥ पुरुषार्थोपयोगानवगमात्॥नचकदाचिदप्योंकारादोंकारबुद्धिर्निवर्त्तमानेनउद्गीथाद्वोद्गीथबुद्धिः॥ ३२९

तद्बुद्धिविषयत्वगुणपरत्वात्तयासंबंधोप्यसिद्धः कल्पनीयः प्रतीकोपास्तेःफलंचकल्प्यमितिगौरवंस्यादित्यर्थःफलंनकल्प्यमितिशंकतेश्रूयतइ
ति॥आप्त्यादीति॥ओंकारः आप्तिःसमृद्धिरितियउपास्तेसकामानामाप्नोतीतिश्रुतंफलंनाध्यासस्येत्यर्थः॥उद्गीथोंकारयोरन्यतरबुद्ध्यान्यतरबुद्ध्यपवादमंगी
कृत्यान्यतरमिथ्याबुद्धिनिवृत्तिर्वैफल्यमुक्तंसंप्रत्यन्यतरबुद्धेर्भ्रांतित्वात्तदपवादइत्याह नचकदाचिदपीति॥भ्रांतिश्चेन्निवर्त्तेततत्तुनिवर्त्ततइत्यभ्रांतिरित्यर्थः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किंचतत्त्वबोधकाद्वाक्याद्भान्त्यपवादोभवतिनेदंवाक्यंतत्त्वपरमित्याह॥ नचेति॥ घटकुंभशब्दयोरिवोंकारोद्गीथशब्दयोः पर्यायत्वपक्षंदूषयति॥ना
पीति॥ पर्यायत्वमपिनास्तीत्याह॥ नचेति॥ परिशिष्टविशेषणपक्षे सूत्रंयोजयति॥ व्याप्तेरिति॥ ओमित्येतदक्षरमुपासीतेत्युक्ते सर्ववेदव्याप्योंकारदृष्ट्योपास्ति
प्रसक्त्येतन्निरासार्थमुद्गीथावयवत्वंविशेषणंसमंजसमित्यर्थः॥ अध्यासपक्षेतद्बुद्धिविषयत्वगुणयोगरूपः संबंधः कल्प्य इतिविप्रकृष्टालक्षणा

नचेदंवाक्यंवस्तुतत्त्वप्रतिपादनपरं उपासनाविधिपरत्वात् नाप्येकत्वपक्षः संगच्छतेनिःप्रयोजनंहितदाशब्दद्वयोच्चारणंस्या
त्॥ एकेनैवविवक्षितार्थसमर्पणात्॥ नचहौत्रविषयआध्वर्यवविषयेवाक्षरे ओंकारशब्दवाच्यउद्गीथशब्दप्रसिद्धिरस्ति
॥ नापिसकलायांसाम्नोद्वितीयायांभक्तावुद्गीथशब्दवाच्यायामोंकारशब्दप्रसिद्धिर्येनाऽनतिरिक्तार्थतास्यात्॥ परिशेषाद्विशेषणप
क्षपरिग्रह्यतेव्याप्तेः सर्ववेदसाधारण्यात्सर्वव्याप्यक्षरमिहमाप्रसंजीत्यतउद्गीथशब्देनाक्षरंविशेष्यते॥ कथंनामोद्गीथावयवभूत
ओंकारोगृह्येतेति॥ नन्वस्मिन्नपिपक्षे समानालक्षणा उद्गीथशब्दस्यावयवलक्षणार्थत्वात्॥ सत्यमेवमेतत्॥ लक्षणायाम
पितुसंनिकर्षविप्रकर्षौभवतएव॥ अध्यासपक्षे ह्यर्थांतरबुद्धिरर्थांतरेनिक्षिप्यतइतिविप्रकृष्टालक्षणा॥ विशेषणपक्षेत्ववा
यविवचनेनशब्देनावयवः समर्प्यतइतिसन्निकृष्टा॥ समुदायेषुहिप्रवृत्ताःशब्दाः अवयवेष्वपिप्रवर्तमानादृष्टाः पटग्रामादिषु
॥ अतश्चव्याप्तेर्हेतोरोमित्येतदक्षरमिति॥ एतस्योद्गीथमित्येतद्विशेषणंइतिसमंजसमेतन्निरवद्यमित्यर्थः॥ ९॥ सर्वाभेदादन्यत्रे
मे॥ १०॥ वाजिनांछंदोगानांचप्राणसंवादेश्रेष्ठगुणान्वितस्यप्राणस्योपास्यत्वमुक्तं॥ वागादयोपिहितत्त्ववसिष्ठत्वादिगुणान्वि
ताउक्तास्तेचगुणाः प्राणेपुनःप्रत्यर्पिताःयद्वाअहंवसिष्ठास्मित्वंतद्वसिष्ठोसीत्यादिना॥

११ अवयवलक्षणातुसन्निकृष्टा अवयवाव
यविसंबंधस्यक्लृप्तत्वात्यदावयवेदग्धेपटोदग्धइतिलोकेप्रयोगाच्चनामादौब्रह्मशब्दस्यत्वगत्याब्रह्मबुद्धिग्राह्यत्वगुणलक्षणाश्रितातत्रप्रती
कोपास्तेर्विवक्षितत्वात्इहतुप्रतीकोपास्तिविधिकल्पनेआप्त्यादिगुणकोंकारेप्राणदृष्टिविधानेचवाक्यभेदः स्यात्॥ अतः सर्ववेदव्याप्योंकारनिरासे
नोंकारेप्राणदृष्टिविधानार्थंविशेषणमेवसमंजसंकल्प्यतालाघवादितिसिद्धं॥ ९॥ सर्वाभेदादन्यत्रेमे॥ विषयंवक्तुंसंगतमर्थमाह॥ वाजिनामिति॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा·भा· वाचोवसिष्ठत्वंगुणः वाग्मिनः सुखवासदर्शनात् चक्षुषः प्रतिष्ठागुणः चक्षुष्मतःपादप्रतिष्ठादर्शनात्॥ श्रोत्रंसंपद्गुणकंश्रवणात्सर्वार्थसंपत्तेः।

र·प्र·टी· मनआयतनत्वंगुणंतस्यवृत्तिद्वारासर्वभोग्याश्रयत्वात् तेचगुणाःप्राणश्रैष्ठ्यंनिश्चित्यवागादिभिस्तस्मिन्नर्पिता इतिशाखाद्वयसंमतोर्थः॥ वि· अ·पा·

३३० षयमाह॥ अन्येषामित्यादिना॥ निःश्रेयसस्यश्रैष्ठ्यस्यादानंनिर्धारणंप्रसूयत इत्यर्थः देवतावागादयोहंश्रेयसेस्वश्रैष्ठ्यायेत्यर्थः॥ एवंशब्दाच्छ्रैष्ठ्य ३ ३

गुणकप्राणप्रत्यभिज्ञानाच्चसंशयमाह॥ तत्रेतिगुणानामनुपसंहारोपसंहारावेवपूर्वोत्तरपक्षयोः फलंउद्गीथत्वविशेषणादोंकारस्यसर्ववेद।

अन्येषामपितुशाखिनांकौषीतकिप्रभृतीनांप्राणसंवादेष्वथातोनिःश्रेयसादानं॥ एताहवैदेवताअहंश्रेयसेविवदमानाइ त्येवंजातीयकेषुप्राणस्यश्रैष्ठ्यमुक्तं॥ नत्विमेवसिष्ठत्वादयोपिगुणाउक्ताः॥ तत्रसंशयः॥ किमिमेवसिष्ठत्वादयोगुणाःक्वचिदुक्ता अन्यत्राप्यस्येरन् उततनास्येरन्निति॥ तत्रप्राप्तंतावन्नास्येरन्निति॥ कुतः॥ एवंशब्दसंयोगात्॥ अथोयएवंविद्वान्प्राणेनिःश्रे यसंविदित्वेतितत्रतत्रैवंशब्देनवेद्यंवस्तुनिवेद्यते॥ एवंशब्दश्चसन्निहितालंबनोनशाखांतरपरिपठितमेवंजातीयकंगुणजातं शक्नोतिनिवेदयितुं॥ तस्मात्स्वप्रकरणस्थैरेवगुणैर्निराकांक्षत्वमित्येवंप्राप्ते प्रत्याह॥ अस्येरन्निमेगुणाःक्वचिदुक्तावसिष्ठत्वादयो न्यत्रापिकुतः सर्वाभेदात्॥ सर्वत्रैवहितदेवैकंप्राणविज्ञानमभि न्नंप्रत्यभिज्ञायतेप्राणसंवादादिसारूप्यात्॥ अभेदेचवि ज्ञानस्यकथमिमेगुणाःक्वचिदुक्ताःअन्यत्रनास्येरन्॥ नन्वेवंशब्दस्तत्रतत्रभेदेनैवंजातीयकंगुणजातंवेद्यत्वायसमर्पयतीत्यु क्तं॥ अत्रोच्यते॥ यद्यपिकौषीतकिब्राह्मणगतेनैवंशब्देनवाजसनेयिब्राह्मणगतंगुणजातमसंशब्दितमसन्निहितत्वात्॥

व्याप्तिव्यावृत्तिवत्प्रकृतगुणमात्रग्राहकैवंशब्दाच्छाखांतरगुणव्यावृत्तिरितिदृष्टांतेनपूर्वपक्षयति॥ तत्रप्राप्तमिति॥ यथावागादिभ्यःप्राणश्रैष्ठ्यंसि द्धमथोतथायएवंश्रैष्ठ्यगुणंविद्वानुपास्तेसप्राणोश्रैष्ठ्यंविदित्वाध्यातास्वश्रेष्ठोभवतीतिश्रुत्यर्थः॥ एवंजातीयकविद्यैक्यात्प्राप्तमार्थिकंवसिष्ठत्वादिगुण सम·

जातमेवंशब्दोनगृह्णातिश्रुतावलंबित्वादितिप्राप्तेसिद्धांतयति॥ अस्येरन्निति वाजसनेयिब्राह्मणेतावदेवंशब्देनवसिष्ठत्वादिगुणजातस्य ३३०

प्राणविद्यासंबंधःसि द्धःसैवविद्याकौषीतकिश्रुतौप्रत्यभिज्ञायते तथा चगुणानांगुण्यविनाभावेनार्थतः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्राप्तानामपिश्रुतगुणैरविरोधात्सहैवश्रुतमार्थंचगुणजातंश्रुत्यर्थाभ्यांसन्निहितत्वाविशेषात्कौषीतकिगतेनैवंशब्देनपरामृश्यतइत्याह॥तथा-
पीति॥ कौषीतकिश्रुतिस्थः प्राणोवसिष्ठत्वादिगुणकः श्रेष्ठप्राणत्वाद्वाजिश्रुतिस्थप्राणवदित्यश्रुतगुणानुमानेसतिश्रुतहानिर्नास्तिअविरोधा-
दित्युक्तंस्मारयतिनचैवंसतीति॥ अपरिगणितानामपिगुणाःश्रुताएवेत्यत्रदृष्टांतमाह॥ नहीति॥ फलितमाह॥ तस्मादिति॥ १०॥ आनंदादयःप्रधान-
स्य॥ ब्रह्मणोज्ञेयस्यैक्यान्निर्विशेषत्वाच्चसंशयमाह॥ तेषुसंशयइतिपूर्वपक्षेसत्यादिपदानुपसंहाराद्वाक्यार्थानवधारणंसिद्धांतेतदवधारणमिति॥

तथापितस्मिंस्तस्मिन्नेवविज्ञानेवाजसनेयिब्राह्मणगतेनैवंशब्देनतत्संशब्दितमितिनपरशाखागतमप्यभिन्नविज्ञानावबद्धंगु-
णजातंस्वशाखागताद्धिशिष्यते॥ नचैवंसतिश्रुतहानिरश्रुतकल्पनावाभवति॥ एकस्यामपिहिशाखायांश्रुतागुणाःश्रुताए-
वसर्वत्रभवंतिगुणवतोभेदाभावात् नहिदेवदत्तः शौर्यादिगुणत्वेनस्वदेशेप्रसिद्धोदेशांतरगतस्तद्देशैरविभावितशौर्यादिगुणोऽप्य-
तद्गुणोभवति॥ यथाचतत्रपरिचयविशेषाद्देशांतरेऽपिदेवदत्तगुणाविभाव्यंते॥ एवमभियोगविशेषाच्छाखांतरेऽप्युपास्यागुणाः
शाखांतरेष्यस्येरन्॥ तस्मादेकप्रधानसंबद्धाधर्माएकत्राप्युच्यमानाः सर्वत्रैवोपसंहर्तव्याइति॥ ५॥ १०॥ आनंदादयःप्रधा-
नस्य॥ ११॥ ब्रह्मस्वरूपप्रतिपादनपरासुश्रुतिषुआनंदरूपत्वंविज्ञानघनत्वंसर्वगतत्वंसर्वात्मत्वमित्येवंजातीयकाब्रह्मणोध-
र्माःक्वचित्केचिच्छ्रूयंते॥ तेषुसंशयः॥ किमानंदादयोब्रह्मधर्मायत्रयावंतःश्रूयंते तावंतएवतत्रप्रतिपत्तव्याःकिंवासर्वेसर्वत्रेति॥
तत्रयथाश्रुतिविभागंधर्मप्रतिपत्तौप्राप्तायां इदमुच्यते आनंदादयःप्रधानस्यब्रह्मणोधर्माःसर्वेसर्वत्रप्रतिपत्तव्याः॥ ६ ॥

फलंप्राणस्यसविशेषत्वाद्युक्तः शाखांतरीयवसिष्ठत्वाद्युपसंहारः ब्रह्मणस्तुनिर्विशेषत्वात्स्वशाखागतपदैरेवप्रमितिसिद्धेर्व्यर्थःपदांतरोपसंहार
इतिप्रत्युदाहरणेनपूर्वपक्षः॥ सिद्धांतमाह॥ इदमिति॥ आनंदत्वसत्यत्वज्ञानत्वादिसामान्यानिपदानिब्रह्मणिकल्पिताधर्मास्तेषांसर्वशाखासूपसं-
हारोनामतद्वाचकानंदादिपदानामेकवाक्यतयोच्चारणमानंदः सत्यंज्ञानमनंतंब्रह्मसद्भूतमद्वयमात्मेति तानिचसामानाधिकरणानिपदानिविरु-
द्धधर्मत्यागेनसर्वाधिष्ठानभूतामेकामखंडव्यक्तिंलक्षयंति॥ नचैकेनैवपदेनलक्ष्यसिद्धेःपदांतरंव्यर्थमितिवाच्यंएकस्मिन्पदेविरोधाभावेनलक्ष-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यद्यपि पदद्वयेपि लक्षणावतरति तथाप्यानंदो ब्रह्मेत्युक्ते दुःखवाल्पत्वभ्रांतिनिरासेप्यसत्त्वजडत्वादिभ्रमो भवेत्॥ अतस्तन्निरासार्थं सत्यज्ञानादिप
दानि प्रयोक्तव्यानि न च भ्रमस्याऽनवधित्वाद्वाक्यमपर्यवसितं स्यादिति वाच्यं सच्चिदानंदात्मकं सर्वधर्मशून्यमद्वयमविकल्पं ब्रह्माहमिति विशेषदर्श
ने सर्वभ्रमनिरासात्॥ तच्च विशेषदर्शनं यावद्भिः सद्भिर्भवति तावंति पदान्युपसंहर्तव्यानीति भावः॥११॥ ब्रह्मैक्याच्चेदानंदत्वादिधर्माणां सर्वत्र प्राप्ति
स्तर्हि सगुणब्रह्मविद्यागतधर्मप्राप्तिरपि स्यादिति शंकानिरासार्थं सूत्रं व्याचष्टे॥ प्रियेति॥ पुत्रदर्शनसुखं प्रियं तद्वार्तादिना मोदस्तस्य विद्याद्यतिश।

कस्मात्सर्वाभेदादेव सर्वत्रैव हि तदेवैकं प्रधानं विशेष्यं ब्रह्म न भिद्यते। तस्मात्सार्वत्रिकत्वं ब्रह्मधर्माणां तेनैव पूर्वाधिकरणोदितेन।
देवदत्तशौर्यादिनिदर्शनेन॥११॥ नन्वेवं सति प्रियशिरस्त्वादयोपि धर्माः सर्वे सर्वत्र संकीर्येरन्॥ तथाहि॥ तैत्तिरीयके आनंदमयमा
त्मानं प्रक्रम्याम्नायते॥ तस्य प्रियमेव शिरः मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्षः आनंद आत्मा ब्रह्म पुच्छं प्रतिष्ठेति॥ अत्रोत्तरं पठति
प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे॥१२॥ प्रियशिरस्त्वादीनां धर्माणां तैत्तरीयके आम्नातानां नास्त्यन्यत्र प्राप्तिः॥ यत्कार
णं प्रियं मोदः प्रमोद आनंद इत्येते परस्परापेक्षया भोक्त्रंतरापेक्षया चोपचितापचितरूपा उपलभ्यंते॥ उपचयापचयौ च सति भेदे
संभवतः॥ निर्भेदं तु ब्रह्म एकमेवाद्वितीयमित्यादिश्रुतिभ्यः॥ न चैते प्रियशिरस्त्वादयो ब्रह्मधर्माः॥ कोशधर्मास्त्वेत इत्युपदिष्ट
मस्माभिरानंदमयोऽभ्यासादित्यत्र॥ अपि च परस्मिन्ब्रह्मणि चिंतावतारोपायमात्रत्वेनैते परिकल्प्यंते न द्रष्टव्यत्वेन॥ एवम
पि सुतरामन्यत्राप्राप्तिः प्रियशिरस्त्वादीनां॥ ब्रह्मधर्मांस्त्वेतान्कृत्वा न्यायमात्रमिदमाचार्येण प्रदर्शितं प्रियशिरस्त्वाद्यप्राप्ति
रिति॥ स च न्यायोऽन्येषु निश्चितेषु ब्रह्मधर्मेषूपासनायोपदिश्यमानेषु नेतव्यः संयद्वामत्वादिषु सत्यकामादिषु वा॥ ॥

ये प्रमोद इत्येवं तारतम्यवंतो धर्मास्तद्वयेऽज्ञेये न प्राप्नुवंति तेषामब्रह्मस्वरूपाणां ब्रह्मज्ञानानुपयोगादिति भावः॥ तेषां ब्रह्मधर्मत्वं चासिद्धमित्या
ह॥ न चैत इति॥ ब्रह्मणि चिंतावतारोपायत्वेपि तेषां प्राप्तिः स्यादित्याशंक्याह॥ एवमपीति॥ अज्ञेयत्वादेषां तज्ज्ञेये ब्रह्मणि प्राप्तिरित्यर्थः॥ किमर्थं त
र्हि सूत्रमित्यत आह॥ ब्रह्मधर्मानिति कृत्वा चिंताफलमाह॥ सचेति॥ ज्ञेयबाह्यधर्माणामनुपयोगादप्राप्तिरिति न्यायात्संयद्वामत्वादीनामप्राप्तिरिति स

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ज्ञानानुपयोगेपिध्यानेनेषांधर्मणामुपयोगादुपास्यब्रह्मैक्यान्नाप्तिरन्योन्यविद्यासुस्यादित्याशंक्याह नेषुहीति॥ ध्याननिधिपरतंत्राणांधर्माणांयथावि
धिव्यवस्थेत्यर्थः॥ १२॥ संयद्वामत्वादिधर्मेभ्यआनंदादीनांवैषम्यंज्ञानोपयोगित्वादित्याह॥ इतरेत्विति॥ सत्यज्ञानानंदात्मब्रह्मशब्दाःपंचसर्वत्रोप
संहर्तव्याइतिसिद्धं॥ १३॥आध्यानाय॥ वाक्यभेदाभेदानवधारणात्संशयमाह॥ तत्रेति॥ पूर्वपक्षेवाक्यभेदाद्विद्याभेदः॥ सिद्धांतेवाक्यैक्या

तेषुहिसत्यप्युपास्यस्यब्रह्मणएकत्वेप्रक्रमभेदादुपासनाभेदेसतिनान्योऽन्यधर्माणामन्योन्यत्रप्राप्तिः॥ यथाचद्वेनार्यावेकं
नृपतिमुपासातेछत्रेणैकाचामरेणाऽन्यानत्रोपास्यैकत्वेप्युपासनभेदोधर्मव्यवस्थाचभवति॥ एवमिहापीतिउपचितापचित
गुणत्वंहिसतिभेदव्यवहारेसगुणेब्रह्मण्युपपद्यते॥ ननिर्गुणेपरस्मिन्ब्रह्मणि॥ अतोनसत्यकामत्वादीनांधर्माणांक्वचिच्छ्रुता
नांसर्वत्रप्राप्तिरित्यर्थः॥ १४॥ इतरेत्वर्थसामान्यात्॥ १३॥ इतरेत्वानंदादयोधर्माः ब्रह्मस्वरूपप्रतिपादनायैवोच्यमानाअर्थसामान्या
त्प्रतिपाद्यस्यब्रह्मणोधर्मिणएकत्वात्सर्वेसर्वत्रप्रतीयेरन्निति वैषम्यंप्रतिपत्तिमात्रप्रयोजनाहिनइति॥ ६॥ आध्यानायप्र
योजनाभावात्॥ १५॥ काठकेहिपठ्यते॥ इंद्रियेभ्यःपराह्यर्थाअर्थेभ्यश्चपरंमनः॥ मनसस्तुपराबुद्धिरित्यारभ्यपुरुषान्नपरंकिं
चित्साकाष्ठासापरागतिरिति॥ तत्रसंशयः॥ किमिमेसर्वएवार्थादयस्तत्तत्तः परत्वेनप्रतिपाद्यंतउतपुरुषएवैभ्यःसर्वे
भ्यःपरःप्रतिपाद्यतइति॥ तत्रतावत्सर्वेषामेवैषांपरत्वेनप्रतिपादनमितिभवतिमतिः यथाहिश्रूयतेइदमस्मात्परमिदमस्मात्पर
मिति॥ ननुबहुष्वर्थेषुपरत्वेनप्रतिपिपादयिषितेषुवाक्यभेदःस्यात् नैषदोषः॥ वाक्यबहुत्वोपपत्तेः बहून्येवह्येतानिवा
क्यानिप्रभवंतिबहुविषयान्यरत्वोपेतान्प्रतिपादयितुं॥ तस्मात्प्रत्येकमेषांपरत्वप्रतिपादनमित्येवंप्राप्तेब्रूमः॥ पुरुषएवह्ये
भ्यःसर्वेभ्यःपरःप्रतिपाद्यतइतियुक्तंनप्रत्येकमेषांपरत्वप्रतिपादनंकस्मात्प्रयोजनाभावात्॥ द्विद्वैक्यमितिफलं॥ पूर्वत्रब्रह्मस्व
भावानामानंदादीनामुपसंहार्याणांब्रह्मज्ञानफलोपायत्वमुक्तंअत्रत्वब्रह्मस्वभावस्यार्थादिपरत्वस्यानुपसंहार्यस्यतदुपायत्वमुच्यतइत्येकफलक
त्वसंगतिः॥ तत्रपरत्वविशिष्टत्वेनार्थादीनामपूर्वत्वयाप्रतिपाद्यानांभेदाद्वाक्यभेदोनदोषइतिपूर्वपक्षः॥ उत्सूत्रंसिद्धांतंप्रतिज्ञायसौत्रंहेतुंव्याचष्टे॥ पुरु

शां·भा· फलवत्वे सत्यपूर्वत्वात्पुरुषस्यैव प्राधान्येन प्रतिपाद्यत्वं अफलार्थादीनां परत्वं तु न च्छेषत्वेनोच्यत इत्यर्थः॥ किंच पुरुषान्न परं किंचिन्सा काष्ठेति वेदः अ·पा·
र·म·टी· परनिषेधेन लिंगेन सर्वबाधावधित्वलिंगेन च पुरुषेनाप्यर्थं दर्शयन् पूर्वस्मात्पूर्वस्मात्परस्यापरस्य परत्वोक्तिस्तदर्थेति दर्शयतीत्याह॥ अपि चेति॥ अ ३ ३
३३२ र्थादीनामत्रोक्तिराध्यानाय तत्तत्परत्वध्यानपूर्वकं पुरुषदर्शनायैव स्वतः प्रयोजनाभावादिति सूत्रं योजयति॥ आध्यानायेति॥१४॥ आत्मत्वादिति।

नहीतरेषु परत्वेन प्रतिपन्नेषु किंचित्प्रयोजनं दृश्यते श्रूयते वा॥ पुरुषे त्विंद्रियादिभ्यः परस्मिन्सर्वानर्थव्राताती ते प्रतिपन्ने दृश्य
ते प्रयोजनं मोक्षसिद्धिः॥ तथा च श्रुतिः॥ निचाय्य तं मृत्युमुखात्प्रमुच्यत इति॥ अपि च परप्रतिषेधेन काष्ठाशब्देन च पुरुषविष
यमादरं दर्शयन् पुरुषप्रतिपत्त्यर्थैव पूर्वापरप्रवाहोक्तिरिति दर्शयति॥ आध्यानायेत्याध्यानपूर्वकाय सम्यग्दर्शनायेत्यर्थः॥ स
म्यग्दर्शनार्थमेव हीह ध्यानमुपदिश्यते न त्वाध्यानमेव स्वप्रधानं॥१४॥ आत्मशब्दाच्च॥१५॥ इतश्च पुरुषप्रतिपत्त्यर्थैवेयमिं
द्रियादिप्रवाहोक्तिः॥ यत्कारणं एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते॥ दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति प्र
कृतं पुरुषमात्मेत्याह॥ अतश्चानात्मत्वमितरेषां विवक्षितमिति गम्यते॥ तस्यैव च दुर्विज्ञानतां संस्कृतमतिगम्यतां च दर्शयति
॥ तद्विज्ञानायैव च यच्छेद्वाङ्मनसी प्राज्ञ इत्याध्यानं विदधाति॥ तद्व्याख्यातं आनुमानिकमप्येकेषामित्यत्र॥ एवमनेकप्रकार
आशयातिशयः श्रुतेः पुरुषे लक्ष्यते नेतरेषु॥ अपि च सोध्वनः पारमाप्नोति तद्विष्णोः परमं पदमित्युक्ते किं तदध्वनः पारं विष्णोः
परमं पदमित्यस्यामाकांक्षायामिंद्रियाद्यनुक्रमणात्परमपदप्रतिपत्त्यर्थ एवायमायास इत्यवसीयते॥७॥ आत्मगृहीतिरितर
वदुत्तरात्॥१६॥ ऐतरेयके श्रूयते॥ आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्स ईक्षत लोकान्नु सृजा इति स इमांल्लोकानसृ
((जतांऽभो मरीचीर्मरमाप इत्यादि))

राम· ३३२
गैश्च पुरुष एव प्रतिपाद्य इत्याह॥ आत्मशब्दाच्चेति॥ किंच तद्विष्णोः परमं पदं पुरुषान्न परं किंचिदित्युपक्र
मोपसंहारयोरैकरूप्यात् कृत्स्नफलवदेकपुरुषपरत्वेनैकवाक्यत्वनिश्चये सति वाक्यभेदफलभेदकल्पनानयुक्तागौरवादित्याह॥ अपि चेति॥ ५
॥१५॥ आत्मगृहीतिः मिषत् चलत् लोकानाह अंभ इति॥ अंभः स्वर्गः मरीचयोंतरिक्षलोकः मरो मर्त्यलोकः॥ आपः पाताललोक इत्यर्थः॥ ५

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आत्मशब्दस्य ब्रह्मणि सूत्रात्मनि च प्रयोगात्संशयमाह॥ तत्रेति॥ अत्र पूर्वपक्षे वाक्यस्य सूत्रोपास्तिपरत्वात्परब्रह्मधर्माणामानंदादीनामैतरेय-
केऽनुपसंहारः सिद्धान्ते ब्रह्मपरत्वादुपसंहार इति फलं॥ पुरुषवाक्याद्भेदप्रसंगादर्थादिवाक्यानां नानार्थादिप्रतिपादकत्वमित्युक्तं तद्वदिहापि प्रजा-
पतेरेतो देवा इति पूर्वस्मात्प्रजापतिवाक्याद्भेदप्रसंगादात्मा वा इत्यादिवाक्यस्य न ब्रह्मपरत्वमिति दृष्टान्तेन पूर्वपक्षयति॥ न परमात्मेत्यादिना॥
वाक्यस्य प्रजापतौ तात्पर्यदर्शनादित्यर्थः॥ पूर्वपक्षमाक्षिप्य लोकस्रष्टृत्वलिंगात्प्रजापतौ वाक्यान्वय इत्याह नन्वित्यादिना॥ लोका एव महाभूता-

तत्र संशयः किं पर एवात्मा इहात्मशब्देनाभिलप्यते॥ उतान्यः कश्चिदिति॥ किं तावत्प्राप्तं॥ न परमात्मेहात्मशब्दाभिलप्यो भवि-
तुमर्हति॥ कस्मात् वाक्यान्वयदर्शनात्॥ ननु वाक्यान्वयः सुतरां परमात्मविषयो दृश्यते प्रागुत्पत्तेरात्मैकत्वावधारणात् ईक्षणपू-
र्वकस्रष्टृत्ववचनाच्च॥ नेत्युच्यते॥ लोकसृष्टिवचनात्परमात्मनि हि स्रष्टरि गृह्यमाणे महाभूतसृष्टिरादौ वक्तव्या लोकसृष्टिस्त्वि-
हादावुच्यते लोकाश्च महाभूतसंनिवेशविशेषाः॥ तथा चांभःप्रभृतीन् लोकत्वेनैव निर्ब्रवीति॥ अदोंऽभः परेण दिवमित्यादिना॥
लोकसृष्टिश्च परमेश्वराधिष्ठितेनापरेण केनचिदीश्वरेण क्रियत इति श्रुतिस्मृत्योरुपलभ्यते॥ तथा हि श्रुतिर्भवति आत्मैवेदमग्र आ-
सीत्पुरुषविध इत्याद्या॥ स्मृतिरपि स वै शरीरी प्रथमः स वै पुरुष उच्यते॥ आदिकर्ता स भूतानां ब्रह्माग्रे समवर्ततेति॥ ऐतरेयि-
णोपि अथातो रेतसः सृष्टिः प्रजापते रेतो देवा इत्यत्र पूर्वस्मिन्प्रकरणे प्रजापतिकर्तृकां विचित्रां सृष्टिमामनंति॥ आत्मशब्दो-
पि तस्मिन्प्रयुज्यमानो दृश्यते॥ आत्मैवेदमग्र आसीत्पुरुषविध इत्यत्रैकत्वावधारणमपि प्रागुत्पत्तेः स्वविकारापेक्षमुपपद्यते॥

न्ता२

नीत्यत आह॥ लोकाश्चेति॥ लोकशब्दस्य महाभूतेष्वरूढत्वाल्लौकिका एव लोकाः निर्वचनाच्चेत्याह॥ तथा चेति॥ अंभो मरीचीर्मरमाप इति॥
सूत्रयित्वा स्वयमेव श्रुतिर्व्याचष्टे परेण दिवं दिवः परस्ताद्दिवि प्रतिष्ठितश्चांभसा व्याप्तो यो लोकस्तदंभोऽन्तरिक्षं मरीचयः पृथिवी मरो या अधस्तात्ता आप इति
ननु लोकसृष्टिरपीश्वरादेवास्त्वित्याह॥ लोकेति॥ पुरुषविधो नराकार आत्मा हिरण्यगर्भः॥ आपिपीलिकाभ्यः सर्वमसृजतेत्यर्थः भूतानां लोकानामि-
त्यर्थः॥ प्रकरणादपि लोकस्रष्टा प्रजापतिरित्याह॥ ऐतरेयिणोपीति॥ रेतः कार्यमिति यावत्॥ ब्रह्मलिंगानि प्रजापतौ योजयति॥ आत्मशब्दोपीत्या-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा॰भा॰ किंचप्रजाः सृष्ट्वा ताः प्रतिभोगार्थं गामानयल्लोकस्रष्टा तथाश्वमानयत्ताभ्यस्तु गवाश्वप्रत्याख्यानेऽतुष्टास्ततः पुरुषशरीरे आनीते ता अब्रुवन्तुष्टाः। अ॰पा॰ ३ ३
प्र॰टी॰ सइतिअयंचव्यवहारोलोकस्रष्टुः प्रजापतिनेलिंगमित्याह॥ अपिचेति॥ आत्मशब्दस्य चिदात्मनि मुख्यत्वान्मुख्यग्रहे बाधकाभावादुत्तरस्येक्षणा
३३

ईक्षणमपि तस्य चेतनत्वाभ्युपगमादुपपन्नं॥ अपि च ताभ्यो गामानयत्ताभ्योऽश्वमानयत्ताभ्यः पुरुषमानयत्ता अब्रुवन्नित्येवंजातीयको भूयान्व्यापारविशेषो लौकिकेषु विशेषवत्त्वात्मसु प्रसिद्ध इहानुगम्यते॥ तस्माद्विशेषवानेव कश्चिदिहात्मा स्यादिति॥ एवंप्राप्ते ब्रूमः पर एवात्मेहात्मशब्देन गृह्यते इतरवत्॥ यथेतरेषु सृष्टिश्रवणेषु तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्येवमादिषु परस्यात्मनो ग्रहणं॥ यथा चेतरस्मिन्लौकिकात्मशब्दप्रयोगे प्रत्यगात्मैव मुख्य आत्मशब्देन गृह्यते। तथेहापि भवितुमर्हति॥ यत्र त्वात्मैवेदमग्र आसीदित्येवमादौ पुरुषविध इत्येवमादि विशेषणांतरं श्रूयते भवेत्तत्र विशेषवत आत्मनो ग्रहणं॥ अत्र पुनः परमात्मग्रहणानुगुणमेव विशेषणमप्युत्तरमुपलभ्यते॥ सईक्षत लोकान्नु सृजा इति स इमांल्लोकानसृजतेत्येवमादि॥ तस्मात्तस्यैव ग्रहणमिति न्याय्यं॥१६॥ अन्वयादिति चेत्स्यादवधारणात्॥१७॥ वाक्यान्वयदर्शनान्न परमात्मग्रहणमिति पुनर्यदुक्तं तत्परिहर्तव्यमत्रोच्यते॥ स्यादवधारणादिति॥ भवेदुपपन्नं परमात्मनो ग्रहणं कस्मादवधारणात्॥ परमात्मग्रहणे हि प्रागुत्पत्तेरात्मैकत्वावधारणमांजसमवकल्पते॥ अन्यथा ह्यनांजसं तत्परिकल्प्येत॥ लोकसृष्टिवचनं तु श्रुत्यंतरप्रसिद्धमहाभूतसृष्ट्यनंतरमिति योजयिष्यामि॥ यथा तत्तेजोऽसृजतेत्येतच्छ्रुत्यंतरप्रसिद्धवियद्वायुसृष्ट्यनंतरमित्ययूयुजं॥ एवमिहापि श्रुत्यंतरप्रसिद्धो हि समानविषयो विशेषः श्रुत्यंतरेषूपसंहर्तव्यो भवति॥ योऽप्ययं व्यापारविशेषानुगमस्ताभ्यो गामानयदित्येवमादिः सोऽपि विवक्षितार्थावधारणानुगुण्येनैव गृहीतव्यः॥ न ह्ययं सकलः कथाप्रबंधो विवक्षित इति शक्यते वक्तुं॥ राम॰ ३३

(देरनुकूलत्वात्परमात्मग्रहणमिति सिद्धांतयति॥ एवंप्राप्त इति॥ महाभूतसृष्टिपूर्वकं लोकान्सृजतेति श्रुतिर्व्याख्येयेति भावः॥१६॥ पूर्वपक्षबीजमनूद्य दूषयति॥ अन्वयादिति॥ आत्मा वा इदमेक एवाग्र आसीत्प्रज्ञानं ब्रह्मेति चोपक्रमोपसंहारस्थात्मब्रह्मश्रुतिभ्यामेकत्वावधारणप्रवेशादिलिंगैश्च लोकस्रष्टृत्वादिलिंगबा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सपरमेश्वरएतमेवसीमानंमूर्ध्नःकेशविभागावसानंविदार्यछिद्रंकृत्वातयाब्रह्मरंध्राख्ययाद्वारालिंगविशिष्टःप्रविष्टवानित्यर्थः॥मांविनायदिवागादिभिःस्वस्वव्यापारःकृतःअथतदाहंकइतित्वंपदार्थंविचार्यस्वयमेतमेवशोधितमात्मानंब्रह्मततमंव्याप्ततममपश्यत्तकारलोपःछांदसः॥प्रज्ञाचिदात्मानेत्रंनीयतेऽनेनेतिनियामकंयस्यतत्प्रज्ञानेत्रंचिदात्मनियम्यमित्यर्थः॥उक्तव्याख्यानेगुणोपसंहारस्यास्फुटत्वात्पादसं

तत्प्रतिपत्तौपुरुषार्थाभावात्॥ब्रह्मात्मत्वंत्विहविवक्षितं॥तथाह्यंभःप्रभृतीनांलोकानांलोकपालानांचाग्न्यादीनांसृष्टिंशिष्ट्वाकरणानिकरणायतनंचशरीरंउपदिश्यसएवस्रष्टाकथंन्विदंमदृतेस्यादितिवीक्ष्येदंशरीरंप्रविवेशेतिदर्शयति॥सएतमेवसीमानंविदार्यैतयाद्वाराप्रापद्यतेति॥पुनश्चयदिवाचाभिव्याहृतंयदिप्राणेनाभिप्राणितमित्येवमादिनाकरणव्यापारविवेचनपूर्वकंअथकोहमितिवीक्ष्यसएतमेवपुरुषंब्रह्मततममपश्यदितिब्रह्मात्मत्वदर्शनमवधारयति॥तथोपरिष्टादेषब्रह्मैषइंद्रइत्यादिनासमस्तभेदजातंसहमहाभूतैरनुक्रम्यसर्वंतत्प्रज्ञानेत्रंप्रज्ञानेप्रतिष्ठितंप्रज्ञानेत्रोलोकःप्रज्ञाप्रतिष्ठाप्रज्ञानंब्रह्मेतिब्रह्मात्मत्वदर्शनमेवावधारयति॥तस्मादिहात्मगृहीतिरित्यनपवादं॥अपरायोजना॥आत्मगृहीतिरितरवदुत्तरात्॥वाजसनेयकेकतमआत्मेतियोयंविज्ञानमयःप्राणेषुहृद्यंतर्ज्योतिःपुरुषइत्यात्मशब्देनोपक्रम्यतस्यैवसर्वसंगविनिर्मुक्तत्वप्रतिपादनेनब्रह्मात्मतामवधारयति॥तथाह्युपसंहरतिसवाएषमहानजआत्माजरोऽमरोऽमृतोऽभयोब्रह्मेति॥छांदोग्येतुसदेवसोम्येदमग्रआसीदेकमेवाद्वितीयमित्यंतरेणैवाऽऽत्मशब्दमुपक्रम्योदर्केसआत्मातत्त्वमसीतितादात्म्यमुपदिशति॥तत्रसंशयः॥तुल्यार्थत्वंकिमनयोराम्नानयोःस्यात्॥अतुल्यार्थत्वंवेति॥अतुल्यार्थत्वमितितावत्प्राप्तं अतुल्यत्वादाम्नानयोः॥ १६॥

गतिरितिमत्वैवव्याख्यांतरमाह॥अपरेति॥उदर्कः॥उपसंहारः॥सच्छब्दस्यात्मानात्मसाधारण्यात्संशयमाह॥तत्रेति॥पूर्वपक्षेसतःसामान्येनब्रह्मात्मत्वसंपदुपास्तिःछांदोग्ये॥वाजिश्रुतौनिर्गुणविद्येतिभेदान्मिथोगुणानुपसंहारःसिद्धांतेतूभयत्रनिर्गुणविद्यैक्यादुपसंहारइतिफलभेदः॥पदार्थानांजातौशक्तिग्रहात्सच्छब्दोपिसत्ताजातिवाचीत्युपक्रमस्यानिश्चितार्थत्वात्संजातविरोध्युपक्रमबलेनतादात्म्योपदेशःसंपत्तिपरतयानेयइतिपूर्वप

पूर्वत्रवाक्यैक्यादर्थादिपरत्वंन्यक्ता विद्यैक्यमुक्तंइह तुसदात्मशब्दाभ्यांजात्यात्मवाचिभ्यामुपक्रमभेदाद्वाक्यभेदेसतिविद्याभेदइतिप्रत्युदाहरणसं
गतिः नचात्मशब्दोजातिवाचकः॥ आत्मव्यक्त्यैक्याज्जात्यभावात्किंतुसर्वांतरवस्तुवाचकः कल्पितजातिवाचित्वेप्युपक्रमभेदःस्फुटएवस
त्तात्मत्वयोर्भेदादितिमंतव्यं॥ सिद्धांतयति॥ नत्थेत्यादिना॥ उपक्रमान्वयादिति॥ उपक्रमाधीनत्वादुपसंहारस्येत्यर्थः॥ नच्चावधारणंसत्य

नह्याम्नानवैषम्येसत्यर्थसाम्यंयुक्तंप्रतिपत्तुं॥ आम्नानतंत्रत्वादर्थपरिग्रहस्य॥ वाजसनेयकेचात्मशब्दोपक्रमादात्मत्वो
पदेशइतिगम्यते॥ छांदोग्येतूपक्रमविपर्ययादुपदेशविपर्ययः॥ ननुछंदोगानामप्यस्तिउत्तरकेतादात्म्योपदेशइत्युक्तं॥ सत्यमुक्तमुप-
क्रमतंत्रत्वादुपसंहारस्यतादात्म्यसंपत्तिःसेतिमन्यते॥ तथाप्राप्तेऽभिधीयते॥ आत्मगृहीतिः सदेवसोम्येदमग्रआसीदित्यत्र
छंदोगानामपिभवितुमर्हतिइतरवत्॥ यथाकतमआत्मेत्यत्रवाजसनेयिनामात्मगृहीतिस्तथैवकस्मात्॥ उत्तरात्तादात्म्योप
देशात्॥ अन्वयादितिचेत्स्यादवधारणात्॥ यदुक्तं॥ उपक्रमान्वयात् उपक्रमे चात्मशब्दश्रवणाभावान्नात्मगृहीतिरितितस्य
कः परिहारइतिचेत्सोभिधीयते॥ स्यादवधारणादितिभवेदुपपन्नेहात्मगृहीतिः॥ अवधारणात् तथाहियेनाश्रुतंश्रुतं
भवत्यमतंमतमविज्ञातंविज्ञातमितिएकविज्ञानेनसर्वविज्ञानमवधार्यतत्संपिपादयिषयासदेवेत्याह॥ तच्चात्मगृहीतौ
सत्यांसंपद्यते॥ अन्यथाहियोयंमुख्यआत्मासनविज्ञातइतिनैवसर्वविज्ञानंसंपद्येत॥ तथाप्रागुत्पत्तेरेकत्वावधारणंजीवस्य
चात्मशब्देनपरामर्शः स्वापावस्थायांचतत्स्वभावसंपत्तिकथनंपरिचोदनापूर्वकंचपुनः पुनस्तत्त्वमसीत्यवधारणमितिच सम·
सर्वमेतत्तादात्म्यप्रतिपादनायामेवावकल्प्यते॥ नतादात्म्यसंपदायां॥ नचात्रोपक्रमतंत्रत्वोपन्यासोन्याय्यः॥ ॥ ३३४

देनात्मगृहीतौसत्यांयुज्यतइत्याह॥ नच्चेतिसदेकमेवेत्यवधारणंअनेनजीवेनात्मनेतिसद्देवताकर्तृकोजीवस्यात्मशब्देनपरामर्शः॥ सुप्तोजीवःसता
संपन्नोभवतीतिकथंनंभूयएवमाभगवान्विज्ञापयत्विति परिचोदना॥ सदितिपदेनसत्ताश्रयउच्यते॥ नजातिमात्रंकर्तृवाचित्वान्मन्ययांनत्वात्॥ न
यथाचोपक्रमेसत्ताश्रयसामान्योक्तौकआश्रयइत्याकांक्षायांवाक्यशेषादात्मेतिनिश्चीयतइत्याह॥ नचेति॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सच्छब्दस्यात्मानात्मसाधारण्यं उपेत्योक्तं तदपि नास्ति आकाशपदवत् सत्यदस्य व्यक्तिवाचित्वात्॥ व्यक्तिश्च बाधायोग्या विद्वानैवेति नवाजिछं
दोगयोरुपक्रमवैषम्यमित्याह॥ सच्छब्देति॥ वैषम्यमुपेत्याप्याह॥ आम्नानेति वाजिवाकेत्व मर्थस्य तदर्थपर्यन्तस्यात्रस्यस्य प्रतिपादनं छांदो
ग्यवाक्ये तु तदर्थस्यत्व मर्थपर्यन्तस्य प्रतिपादनमिति प्रकारभेदेपि वाक्यार्थैक्या हि दैक्यमिति॥ फलितमाह॥ तस्मादिति॥ २७॥ कार्याख्यानादपूर्वं
॥ मे किमन्नं किंवास इति प्राणेन पृष्ट्वा वागादय ऊचुः॥ यदिदं किंचाश्वभ्य आ कृमिभ्यस्तत्तेन्नमापोवास इति सर्व प्राणिभिर्भुज्यमानं यदिदं प्रसिद्धं॥

नन्वपक्रमे आत्मत्वसंकीर्त्तनमनात्मत्वसंकीर्त्तनं चास्ति सामान्योपक्रमश्चत्वाकयशेषगतेन विशेषेण निरुध्यते विशेषाकां
क्षित्वात्सामान्यस्य॥ सच्छब्दार्थोपि च पर्यालोच्यमानोनमुख्यादात्मनोन्यः संभवति॥ अतोन्यस्य वस्तुजातस्यारंभणशब्दा
दिभ्योऽनृतत्वोपपत्तेः॥ आम्नानवैषम्यमपि नावश्यमर्थवैषम्यमावहति॥ आहरपात्रं पात्रमाह रेत्येवमादिष्वर्थसाम्येपितद
दर्शनात्॥ तस्मादेवं जातीयकेषु वाक्येषु प्रतिपादनप्रकारभेदेपि प्रतिपाद्यार्थाभेद इति सिद्धं॥ ८॥ २७॥ कार्याख्यानादपूर्वं॥ छं
दोगा वाजसनेयिनश्च प्राणसंवादेश्वादिमर्यादं प्राणस्यान्नमाम्नायत स्यैवापोवास आमनंति॥ अनंतरं च छंदोगा आमनंतितं
स्माद्वाएतदशिष्यंतः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधतीति॥ वाजसनेयिनस्त्वामनंति तद्विद्वांसः श्रोत्रिया अशिष्यंत आचामंत्य
शित्वाऽऽचामंत्येतमेव तदनमनग्नं कुर्वंतोमन्यंते तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाऽऽचामेदेतमेव तदनमनग्नं कुरु।
त इति॥ तत्र त्वाचमनमनग्नता चिंतनं च प्राणस्य प्रतीयते॥ तत्किमुभयमपि विधीयत उताऽऽचमनमेवोतानग्नताचिंतनमेवेति

श्वादिपर्यंतमन्नं तत्प्राणस्यत्वान्नं आप आच्छादनमित्युपासकेन चिंतनीयमित्यर्थः॥ शाखाद्वयेप्यविशेषश्रुतिमुक्त्वा विशेषश्रुतिभेदमाह॥ अनं
तरं चेति॥ तस्मादपां प्राणवस्त्रत्वादशिष्यंतोशनं कुर्वंतः श्रोत्रियाएतत्कुर्वंति किं तद्भोजनात्पूर्वं ऊर्ध्वं चाचामंतीति यत् तदद्भिः प्राणं परिदधत्या
च्छादयंतीत्यर्थः॥ पूर्वोत्तराचमनसंबंधिनीष्वप्सु प्राणवासस्त्वचिंतनरूपमनग्नताध्यानं कार्यमिति भावः॥ तत्तस्मादिस्युक्तार्थयतः पूर्वं विद्वांसोशना
त्पाक् ऊर्ध्वं चाचामंत एतमेवानं प्राणं तत्तेनाचमनेनानग्नमाच्छादितं कुर्वंतो मन्यंते चिंतयंति तस्मादेवंविदिदानीं तत्त्वोप्युपासकएवं कुर्यादिति वाजिश्रुत्य

शा.भा. संदिग्धस्योपक्रमस्य वाक्यशेषान्निर्णयवदाचामन्तीतिपदस्य विधित्वसंदेहे आचामेदिति वाक्यशेषाद्विधित्वनिर्णय इति दृष्टान्तसंगत्या पूर्वपक्षमाह॥ किं॥ अ.पा.
प्र.टी. तावदिति॥ ज्ञानसाधनोपासनांगविधिविचारात्पादसंगतिर्बोध्या॥ पूर्वपक्षे प्राणविद्यांगत्वेनापूर्वाचमनं विहितमन्यत्रोपसंहर्तव्यमिति फलं॥ सिद्धान्ते तस्याविधे- ३ ३
३३५ धेयत्वान्नांगत्वेनोपसंहार इति विवेकः॥ उभयविधाने वाक्यभेदः स्यादित्यरुच्या पक्षान्तरमाह॥ अथवेति॥ प्रशस्तं हीदमाचमनं यस्मादनेन प्राणमनग्नं मन्यन्त
इति स्तुतिः॥ प्रसिद्धानुवादेनाप्रसिद्धं विधेयमिति न्यायात्सिद्धान्तयति॥ एवमिति॥ प्रयतस्य प्रयतवतो भावः प्रायत्यं शुद्धिस्तदर्थमित्यर्थः॥ स्मृत्या शुद्ध्यर्थं कार्यं॥

किं तावत्प्राप्तमुभयमपि विधीयत इति कुतः॥ उभयस्याप्यवगम्यमानत्वात् उभयमपि चैतदपूर्वत्वाद्विध्यर्हं॥ अथवाऽऽचमनमेव विधीयते॥ विस्पष्टा हि तस्मिन्विधिविभक्तिः॥ तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाचामेदिति॥ तस्यैव तु स्तुत्यर्थमनग्नतासंकीर्तनमित्येवं प्राप्ते ब्रूमः॥ नाचमनस्य विधेयत्वमुपपद्यते कार्याख्यानात्॥ प्राप्तमेव हीदं कार्यत्वेनाचमनं प्रायत्यार्थं स्मृतिप्रसिद्धमन्वाख्यायते॥ नन्वियं श्रुतिरस्याः स्मृतेर्मूलं स्यात्॥ नेत्युच्यते विषयनानात्वात्॥ सामान्यविषया हि स्मृतिः पुरुषमात्रसंबद्धं प्रायत्यार्थमाचमनं प्रापयति॥ श्रुतिस्तु प्राणविद्याप्रकरणपठिता तद्विषयमेवाचमनं विदधती विदध्यात्॥ न च भिन्नविषययोः श्रुतिस्मृत्योर्मूलमूलिभावोऽवकल्पते॥ न चेयं श्रुतिः प्राणविद्यासंयोग्यपूर्वमाचमनं विधास्यतीति शक्यमाश्रयितुं पूर्वस्यैव पुरुषमात्रसंयोगिन आचमनस्येह प्रत्यभिज्ञायमानत्वात्॥ अत एव चोभयविधानं उभयविधाने च वाक्यं भिद्येत॥ तस्मात्प्राप्तमेवाशिशिषतामशितवतां च उभयत्राचमनमनूद्य एतमेव तदनमनग्नं कुर्वन्तो मन्यन्त इति प्राणस्यानग्नताकरणसंकल्पोऽनेन वाक्येनाचमनीयास्वप्सु प्रा- णविद्यासंबन्धित्वेनापूर्व उपदि- राम. ३३५

त्वेन विहितं सकलकर्मांगतया प्राप्ताचमनानुवादेनापूर्वमनग्नताध्यानमेव विधीयत इति सूत्रार्थः॥ स्मार्तमाचमनं श्रुत्यानूद्यते किं त्वनया श्रुत्या विहितं स्मृत्यानूद्यत इति शंकते॥ नन्विति॥ श्रुतिस्मृत्योरनयोर्न मूलमूलीभावः भिन्नविषयत्वादिति परिहरति॥ नेति॥ द्विजो नित्यमुपस्पृशेदित्याद्या स्मृतिः॥ आचमनान्तरविधिमुपेत्य मूलमूलित्वं निरस्तं संप्रति विधिरसिद्ध इत्याह न चेयं श्रुतिरिति॥ अत एवेति॥ आचमनविध्यभावादेवेत्यर्थः॥ अप्सु प्राणवासस्त्वध्यानाख्यः संकल्पः प्राणविद्यांगत्वेन विधीयत इत्याह तस्मादिति॥ ०००००॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वयं चेति॥ अपूर्वत्वादित्यर्थः॥ शुध्यर्थं विनियुक्तस्याचमनस्य प्राणाच्छादनार्थत्वं विरुद्धमित्याशंक्याह॥ नचैवं सतीति॥ आचमनस्याच्छादनार्थत्वमसिद्धमित्य र्थः॥ किंच यथा पूर्ववाक्ये प्राणस्यान्नध्यानमंगं विहितं तथात्राप्युवासो ध्यानं विधीयते अन्यथाचमनविधौ पूर्वत्र ध्यानविधिरुत्तरत्र क्रियाविधिरित्यर्द्धवैशसं स्यादित्याह॥ अपि चेति॥ भक्षयेदिति शब्दाभावात् श्वाद्यन्नस्य सर्वस्य मनुष्येणोपासकेन भोक्तुमशक्यत्वाच्च न पूर्ववाक्ये क्रियाविधिरित्यर्थः॥ इतश्चाचमन।

नचायमनग्नतावाद आचमनस्तुत्यर्थ इति न्याय्यं आचमनस्याविधेयत्वात्॥ स्वयं चानग्नतासंकल्पस्य विधेयत्वप्रतीतेः॥ नचैवं सत्येक स्याचमनस्योभयार्थताभ्युपगता भवति प्रायत्यार्थता परिधानार्थता चेति क्रियांतरत्वाभ्युपगमात्क्रियांतरमेव ह्याचमनं नाम प्रायत्यार्थं पु रुषस्याभ्युपगम्यते॥ तदीयास्तुत्वपुवासःसंकल्पनं नाम क्रियांतरमेव परिधानार्थं प्राणस्याभ्युपगम्यत इत्यनवद्यं॥ अपि च यदिदं किं चाश्वभ्य आकृमिभ्य आकीटपतंगेभ्यस्तत्तेन्नमित्यत्र नावत्सर्वान्नाभ्यवहारश्चोद्यत इति शक्यं वक्तुं॥ अशब्दत्वादशक्यत्वाच्च सर्वं तु प्राणस्यान्नमितीयमन्नदृष्टिश्चोद्यते॥ तत्साहचर्याच्चापोवास इत्यत्रापि नापामाचमनं चोद्यते॥ प्रसिद्धा ह्येवत्वाचमनीयास्वप्सु परि धानदृष्टिश्चोद्यत इति युक्तं नह्यर्धवैशसं संभवति॥ अपि चाचामंतीति वर्तमानापदेशित्वान्नायं शब्दो विधिक्षमः॥ ननु मन्यंत इत्य पि समानं वर्तमानापदेशित्वं॥ सत्यमेवमेतत्॥ अवश्यविधेयत्वेत्वन्यतरस्मिन्वासःकार्यख्यानात् अपां वासःसंकल्पनमेवापूर्वं विधी यते नाचमनं॥ पूर्ववद्धि तदित्युपपादितं॥ यदप्युक्तं विस्पष्टाचमने विधिविभक्तिरिति तदपि पूर्ववत्त्वेनैवाचमनस्य प्रत्युक्तं॥ अत एवाच मनस्याविधित्सितत्वादेतमेव तदनमनग्नं कुर्वंतो मन्यंत इत्यत्रैव काण्वाः पर्यवस्यंति नाचमंतीति तस्मादेवंविदित्यादि॥ तस्मात्माध्यंदिनाना मपि पाठे आचमनानुवादेनैवं विदित्वमेव प्रकृतप्राणवासोवित्त्वं विधीयत इति प्रतिपत्तव्यं॥ २ मत्रन विधेयमित्याह॥ अपि चेति॥ अनग्नमन्यंत

इत्यत्र वासस्त्वध्यानमपि न विधेयं दोषसाम्यादिति शंकते॥ नन्विति॥ उभयोरप्यनुवादत्वे वैफल्यादवश्यमेकानुवादेनैकं विधेयं तच्च विधेयं वासोध्यानमे व वासःकार्यस्यानग्नतस्याख्यानादपूर्वत्वाच्चेति समाधानार्थः॥ पूर्ववदिति स्मृत्याप्राप्तमित्यर्थः॥ आचामेदिति न विधिः किं तु विष्णुरुपांशुयष्टव्य इतिव दनुवाद इत्यत्र लिंगमाह॥ अत एवेति॥ तस्मादेवंविदशिष्यन्नाचामेदशित्वाचाचामेदिति वाक्यस्य विधित्वे काण्वैरपठनं लिंगमित्यर्थः ॥ १॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा·भा·
र·प्र·टी·
३३६

तर्हि पाठवशान्माध्यंदिने आचमनविधिः काण्वे ध्यानविधिरिति कस्यचिन्मतं निराकरोति ॥ योपीति ॥ १८ ॥ समान एवं चाभेदात् ॥ शांडि ल्येन दृष्टत्वात्तन्नाम्नांकिता अंतर्हृदये व्रीह्यादिवत् सूक्ष्मस्तिष्ठतीत्यर्थः ॥ अभ्यासप्रत्यभिज्ञानाभ्यां संशयमाह ॥ तत्रेति ॥ गुणानुसंहारोपसं हारौ पूर्वोत्तरपक्षयोः फलं ॥ पूर्वत्र प्राप्ताचमनानुवादेनानग्नताध्यानविधिरुक्तः ॥ इह त्वेकशाखायां विप्रकृष्टदेशस्थवाक्ययोरेकस्य विधि

अ·पा·
३ ३

योऽप्ययमभ्युपगमः क्वचिदाचमनं विधीयते क्वचिद्वासोविज्ञानमिति सोऽपि न साधुः ॥ आपो वासः इत्यादिकाया वाक्यप्रवृत्तेः सर्वत्रैकरूप्यात् ॥ तस्माद्वासोविज्ञानमेवेह विधीयते नाचमनमिति न्याय्यं ॥ ३ । १८ ॥ समान एवं चाभेदात् ॥ १९ ॥ वाजसनेयिशाखायामग्निरहस्ये शांडिल्यनामांकिता विद्या विज्ञाता ॥ तत्र च गुणाः श्रूयंते स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपमित्येवमादयः ॥ तस्यामेव शाखायां बृहदारण्यके पुनः पठ्यते मनोमयोऽयं पुरुषो भाः सत्यस्तस्मिन्नंतर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किंचेति ॥ तत्र संशयः ॥ किमियमेका विद्याग्निरहस्यबृहदारण्यकयोर्गुणोपसंहारश्च उत द्वे इमे विद्ये गुणानुपसंहारश्चेति ॥ किं तावत्प्राप्तं विद्याभेदो गुणव्यवस्था चेति ॥ कुतः पौनरुक्त्यप्रसंगात् ॥ भिन्नासु हि शाखास्वध्येतृवेदितृभेदात्पौनरुक्त्यपरिहारमालोच्य विद्यैकत्वमध्यवसायैकत्रातिरिक्ता गुणा इतरत्रोपसंह्रियंते प्राणसंवादादिषु युक्तं एकस्यां पुनः शाखायामध्येतृवेदितृभेदाभावादशक्यपरिहारं पौनरुक्त्यं न विप्रकृष्टदेशस्थैका विद्या भवितुमर्हति ॥ न चात्रैकमाम्नानं विद्याविधानार्थं अपरं गुणविधानार्थमिति विभागः संभवति ॥ तदा ह्यतिरिक्ता एव गुणा इतरत्रेतरत्र चाम्नायेरन् न समानाः ॥ समाना अपि तूभयत्राम्नायंते मनोमयत्वादयस्तस्मान्नान्योन्यं गुणोपसंहार इत्येवं प्राप्ते ब्रूमहे ॥

३३६

त्वमन्यस्यानुवादत्वमित्यनिश्चयान्न द्वयोरपि विद्याविधित्वमिति प्रत्युदाहरणेन पूर्वपक्षयति ॥ किं तावदिति ॥ यत्तु पुनरुक्तं तद्विद्यांतरमिति तन्न व्याप्तिः प्राणपंचाग्न्यादिविद्यासु व्यभिचारादित्याशंक्य शाखाभेदे पुनरुक्तिरसिद्धेत्युक्तमित्याह ॥ भिन्नास्विति ॥ यथाग्निहोत्रवाक्ये कर्मविधिः दध्ना जुहोतीति वाक्ये गुणविधिस्तथात्राप्यस्तु न विद्याभेद इत्याशंक्याह ॥ न चात्रैकमिति ॥ उक्तगुणानां पुनरुक्तिर्व्यर्था स्यात् अतोऽभ्यासाद्विद्याभेदः प्रयाजभेदवदिति भा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उक्तगुणोक्तिर्नवृथाकतिपयगुणविशिष्टायाएवाभेदप्रत्यभिज्ञानार्थत्वादतउपास्यरूपाभेदाद्भिन्नशाखास्विवसमानशाखायामपिविद्यैक्यमितिसिद्धांत
सूत्रंयोजयति॥ यथेति॥ सौत्रश्चकारोऽप्यर्थोव्याख्यातः यत्रबहवोगुणाःश्रुतास्तत्रप्रधानविधिरन्यत्रतदनुवादेनगुणविधिरितिनियमादग्निरहस्ये
प्रधानविधिरुत्तरत्रगुणविधिरितिभावः॥१९॥ संबंधादेवमन्यत्रापि॥ सद्भूतत्रयंत्यद्वाय्वाकाशात्मकंसत्यंपरोक्षमुनाम्नकंहिरण्यगर्भाख्यंब्रह्म

यथाभिन्नासुशाखासुविद्यैकत्वंगुणोपसंहारश्चभवतिएवमेकस्यामपिशाखायांभवितुमर्हति॥ उपास्याभेदात्॥ नदेवहिब्र-
ह्ममनोमयत्वादिगुणकमुभयत्राप्युपास्यंअभिन्नंप्रत्यभिजानीमः॥ उपास्यंचरूपंविद्यायाः॥ नचविद्यमानेरूपाभेदेविद्याभेदमध्यव-
सातुंशक्नुमः॥ नापिविद्याऽभेदेगुणव्यवस्थानं॥ ननुपौनरुक्त्यप्रसंगाद्विद्याभेदोऽध्यवसितोनेत्युच्यते॥ अर्थविभागोपपत्तेःएकंह्याम्ना-
नंविद्याविधानार्थंअपरंगुणविधानार्थमितिनकिंचिन्नोपपद्यते॥ नन्वेवंसतियदपठितमग्निरहस्येतदेवबृहदारण्यकेपठितव्यंस
एषसर्वस्येशानइत्यादियत्तुपठितमेवमनोमयइत्यादितन्नपठितव्यं॥ नैषदोषः॥ तद्बलेनैवप्रदेशांतरपठितविद्याप्रत्यभिज्ञानात्॥
समानगुणाम्नानेनहिविप्रकृष्टदेशांशांडिल्यविद्यांप्रत्यभिज्ञाप्यतस्यामीशानत्वाद्युपदिश्यते॥ अन्यथाहिकथंतस्यामयंगुणविधि-
रभिधीयेत॥ अपिचाम्नायशाखोपदेशेनार्थवतिवाक्येसंजातेप्राप्तांशपरामर्शस्यनित्यानुवादतयाप्युपपद्यमानत्वान्नतद्बलेनप्रत्य-
भिज्ञापोदितुंशक्यते॥ तस्मादत्रसमानायामपिशाखायांविद्यैकत्वंगुणोपसंहारश्चेत्युपपन्नं॥१९॥१०॥ संबंधादेवमन्यत्रापि॥२०॥
बृहदारण्यकेसत्यंब्रह्मेत्युपक्रम्यतद्यत्तत्सत्यमसौसआदित्योयएषएतस्मिन्मंडलेपुरुषोयश्चायंदक्षिणेऽक्षन्पुरुषइतितस्यै-
वसत्यस्यब्रह्मणोऽधिदैवतमध्यात्मंचायतनविशेषमुपदिश्यव्याहृतिशरीरत्वंचसंपाद्यद्वेउपनिषदावुपदिश्येतेतस्योपनिषदहरित्य-
धिदैवतंतस्योपनिषदहमित्य-

पक्रम्यतदुक्तंयत्सत्यंतत्सयोऽसावादित्यःकिंमंडलंनतत्रस्थानेपुरुषःकरणात्मकःसएवाध्यात्ममक्षिस्थान-
स्थइत्युपदिश्यतस्यभूरितिशिरोभुवइतिबाहूस्वरितिपादावितिव्याहृतिरूपंशरीरमुक्त्वाद्वेउपनिषदौरहस्यदेवनानामनीउपदिश्येतेतस्यादित्य-
मंडलस्थस्याहरितिनामप्रकाशकत्वात्तस्याक्षिस्थस्याहमितिनामप्रत्यक्त्वादितिइदंनामद्वयंविषयस्तत्रनामिनःसत्याख्यस्यब्रह्मणएकत्वा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्थानभेदोक्तेश्च संशयमाह ॥ तत्रेति ॥ पूर्वपक्षे प्रतिस्थानं नामद्वयानुष्ठानं सिद्धान्ते यथाश्रुत्यैकैकनामानुष्ठानमिति फलं द्रष्टव्यं तत्संगत्या पूर्वपक्षसूत्रं व्याचष्टे ॥ यथेति ॥ यथा विद्यैक्याद् उपसंहार उक्तः एवमन्यत्राप्येकविद्यायामुपसंहारो भवितुमर्हतीत्यर्थः ॥ सत्यं ब्रह्मेत्युपक्रमाभेदस्तावेतावस्यादित्यपुरुषावन्योन्यस्मिन्प्रतिष्ठितौ आदित्यरश्मीनां चक्षुषि चक्षुषश्चादित्ये प्रतिष्ठानादिति व्यतिषक्तपाठो मिथः संश्लेषपाठस्ताभ्यां विद्यैक्यसिद्धिः ॥ विद्यैक्ये

तत्र संशयः ॥ किमविभागेनैवोभे अप्युपनिषदावुभयत्रानुसंधातव्ये उत विभागेनैकाधिदैवमेकाध्यात्ममिति ॥ तत्र सूत्रेणैवोपक्रमते ॥ यथा शांडिल्यविद्यायां विभागेनाप्यधीतानां गुणोपसंहार उक्तः ॥ एवमन्यत्राप्येवंजातीयके विषये भवितुमर्हति ॥ एकविद्याभिसंबंधात् ॥ एका हीयं सत्यविद्याधिदैवमध्यात्मं चाधीता उपक्रमाभेदात् व्यतिषक्तपाठाच्च ॥ कथं तस्यामुदितो धर्मस्तस्यामेव न स्यात् ॥ यो ह्याचार्ये कश्चिदनुगमनादिराचारश्चोदितः स ग्रामगते ऽरण्यगते च तुल्यवदेव भवति ॥ तस्मादुभयोरप्युपनिषदोरुभयत्र प्राप्तिरिति ॥ २० ॥ एवं प्राप्ते प्रतिविधत्ते ॥ न वा विशेषात् ॥ २१ ॥ न वोभयोरुभयत्र प्राप्तिः ॥ कस्माद्विशेषात् ॥ उपासनस्थानविशेषोपनिबंधादित्यर्थः ॥ कथं स्थानविशेषोपनिबंध इति ॥ उच्यते ॥ य एष एतस्मिन्मंडले पुरुष इति ह्याधिदैविकं पुरुषं प्रकृत्य तस्योपनिषदहरिति श्रावयति ॥ योऽयं दक्षिणेक्षन्पुरुष इति ह्याध्यात्मिकं पुरुषं प्रकृत्य तस्योपनिषदहमिति ॥ तस्येति चैतत्सन्निहितालंबनं सर्वनाम ॥ तस्मादायतनविशेषव्यपाश्रयेणैवैते उपनिषदावुपदिश्येते कुत उभयोरुभयत्र प्राप्तिः ॥ नन्वेक एवायमधिदैवतमध्यात्मं च पुरुषः एकस्यैव सत्यस्य ब्रह्मण आयतनद्वयप्रतिपादनात् ॥ सत्यमेवमेतत् ॥ एकस्यापि त्ववस्थाविशेषोपादानेनैवोपनिषद्विशेषोपदेशात्तदवस्थस्यैव सा भवितुमर्हतीति ॥

एवमपि किं स्यात्तत्राह ॥ कथमिति ॥ विद्यैक्येपि स्थानभेदादुपनिषदोरसंकरः स्यादित्याशंकां दृष्टान्तेन परिहरति योहीति ॥ २० ॥ नाम्नैक्यान्नाम संकरो युक्तः तथा चाक्षिस्थो हरिरिति नामवान्सत्यब्रह्मत्वादादित्यस्थवदिति प्राप्ते सिद्धान्तसूत्रं योजयति ॥ न वेति ॥ नाम्नोरुपासनस्थानविशिष्टसंबंधित्वादित्यर्थः ॥ तस्योपनिषदहरहमिति च वाक्यद्वयेनतच्छब्दपरामृष्टयोः सन्निहितस्थानविशिष्टयोः पुरुषयोर्नामसंबंधपरेणोपसंहारानुमानं बाध्यमिति भावः ॥ विशेष्यैक्यान्नामसंकर इत्याशंक्य स्थानभेदेन विशिष्टपुरुषभेदान्नामव्यवस्था मा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विशिष्टसंबंधे दृष्टांतमाह॥ अस्तीति प्रतिदृष्टांतस्य स्वरूपसंबंधित्वाद्विशिष्टे ध्येये प्रकृते दृष्टांतत्वं नास्तीत्याह॥ ग्रामेति॥ २१॥ उक्तनामव्यवस्थायामतिदेशो-
लिंगमित्याह॥ दर्शयति चेति॥ विद्यैक्यादेवोपसंहारसिद्धावतिदेशो वृथा स्यात्तस्मादेकविद्यायामपि स्थानभेदेनोक्तगुणानां विनातिदेशमनुपसंहार इति सि-
द्धं॥ २२॥ संभृतिद्युव्याप्त्यपि चातः॥ ब्रह्मैव ज्येष्ठं कारणं येषां तानि ब्रह्मज्येष्ठानि तिलोपः छांदसः वीर्याणि पराक्रमविशेषा आकाशोत्पादनादयः॥ तानि च वी-
र्याणि संभृतानि निर्विघ्नं समृद्धानि सर्वनियंतुः कार्ये विघ्नकर्तुरसत्वात्॥ तत्तु ज्येष्ठं ब्रह्माग्रे देवाद्युत्पत्तेः प्रागेव दिवं स्वर्गमाततान व्याप्तवत् तस्मात्सर्वव्यापक

अस्ति चायं दृष्टांतः सत्यप्याचार्यस्वरूपानपाये यदाचार्यस्यासीनस्यानुवर्तनमुक्तं न तत्तिष्ठतो भवति॥ यच्च तिष्ठत उक्तं न तदासीन-
स्येति॥ ग्रामारण्ययोस्त्वाचार्यस्वरूपानपायात्तत्स्वरूपानुबद्धस्य च धर्मस्य ग्रामारण्यकृतविशेषाभावादुभयत्र तुल्यवद्भाव-
इत्यदृष्टांतः सः॥ तस्माद्व्यवस्थाऽनयोरुपनिषदोः॥ २१॥ दर्शयति च॥ २२॥ अपि चैवंजातीयकानां धर्माणां व्यवस्थेति लिंगदर्श-
नं भवति॥ तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नामेति॥ कथमस्य लिंगत्वमिति तदुच्यते॥ अक्ष्यादि-
त्यस्थानभेदभिन्नान् धर्मानन्योन्यस्मिन्ननुपसंहार्यान्पश्यन्निहातिदेशेनादित्यपुरुषगतान् रूपादीनक्षिपुरुष उपसंहर-
ति तस्यैतस्य तदेव रूपमित्यादिना॥ तस्माद्व्यवस्थिते एवैते उपनिषदाविति निर्णयः॥ २२॥ ११॥ संभृतिद्युव्याप्त्यपि चातः॥
॥ २३॥ ब्रह्मज्येष्ठा वीर्या संभृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततानेत्येवं राणायनीयानां खिलेषु वीर्यसंभृतिद्युनिवेशप्रभृतयो ब्रह्म-
णो विभूतयः पठ्यंते॥ तेषामेव चोपनिषदि शांडिल्यविद्याप्रभृतयो ब्रह्मविद्याः पठ्यंते॥ तासु ब्रह्मविद्यासु ता ब्रह्मविभूतय उपसं-
ह्रियेरन्न वेति विचारणायां ब्रह्मसंबंधादुपसंहारप्राप्तौ पठति॥ संभृतिद्युव्याप्तिप्रभृतयो विभूतयः शांडिल्यविद्याप्रभृतिषु नोपसं-

मित्यर्थः॥ सर्वप्राप्त्यसंस्पर्शानर्हत्वमिति वाक्यशेषस्था गुणाः प्रभृतिपदग्राह्याः॥ खिलेष्विति॥ विधिनिषेधशून्यवाक्येष्वित्यर्थः॥ ब्रह्मसंबंधा-
द्विद्याभेदभानाच्च संशयमाह॥ नास्तीति अनारभ्याधीतब्रह्मविभूतीनां ब्रह्मसंबंधेन सर्वब्रह्मविद्यासु प्रत्यभिज्ञानादुपसंहार इति पूर्वपक्षः॥ सिद्धांतमा-
ह॥ संभृतीति॥ संभृतिश्च द्युव्याप्तिश्च संभृतिद्युव्याप्ति तदपि सर्वत्र नोपसंहर्तव्यमुपनिषदोरिव व्यवस्थापकविशेषयोगादिति सूत्रयोजना आध्यात्मिका

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा·भा· दैविकविभूतीनांप्रत्यभिज्ञानेहेत्वभावान्नप्राप्तिरित्युक्तेहेतुंशंकते॥नन्वेतास्विति॥आधिदैविकत्वसाम्यादाध्यात्मिकायतनहीनत्वसाम्याद्वा तत्तद्विद्या अ·पा
रु·प्र·टी· सुसंभृत्यादीनांप्राप्तिरितिशंकार्थः॥उक्तहेतुद्वयंनगुणप्रापकमाधिदैविकविद्यानांशांडिल्यदहरादीनामायतनहीनविद्यानांचमिथोगुणसांकार्यप्रसंगा ३ ३
३३८ त्तस्मात्कतिपयसमानगुणविशिष्टोपास्यरूपैक्यंविद्यैक्यमावहद्गुणप्राप्तिहेतुस्तदभावान्नप्राप्तिरितिपरिहरति॥सत्यमित्यादिनास्थानविशिष्टभेदात्त

षउएववामनीए ४

अतएवचायतनविशेषयोगात्तथाहिशांडिल्यविद्यायांहृदयायतनत्वंब्रह्मणउक्तंएषते आत्मांतर्हृदयइति॥तद्वदेवदहरविद्यायाम
पिदहरंपुंडरीकंवेश्मदहरोस्मिन्नंतराकाशइति॥उपकोसलविद्यायांतुअस्यायतनत्वंयएषोक्षिणिपुरुषोदृश्यतइति॥एवंतत्रतत्रत
त्तदाध्यात्मिकमायतनमेतासुविद्यासुप्रतीयते॥आधिदैविकास्त्वेताविभूतयःसंभृतिद्युव्याप्तिप्रभृतयःतासांकुतएतासुप्राप्तिः॥नन्वे
तास्वप्याधिदैविकोविभूतयःश्रूयंतेज्यायान्दिवोज्यायानेभ्योलोकेभ्यएषउएवभामनीरेषहिसर्वेषुलोकेषुभातियावान्वाअयमा
काशस्तावानेषोंतर्हृदयआकाशउभेअस्मिन्द्यावापृथिवीअंतरेवसमाहितेइत्येवमाद्याः॥संतिचान्याआयतनविशेषहीनाअपिइह
ब्रह्मविद्याःषोडशकलाद्याः॥सत्यमेवमेतत्॥तथाप्यत्रविद्यतेविशेषःसंभृत्याद्यनुपसंहारहेतुः॥समानगुणाम्नानेनहिप्रत्युपस्था
पितासुविप्रकृष्टदेशास्वपिविद्यासुविप्रकृष्टदेशागुणाउपसंह्रियेरन्नितियुक्तं॥संभृत्यादयस्तुशांडिल्यादिवाक्यगोचराश्चगुणाःप
रस्परव्यावृत्तस्वरूपत्वात्प्रदेशांतरवर्तिविद्याप्रत्युपस्थापनक्षमाः॥नचब्रह्मसंबंधमात्रेणप्रदेशांतरवर्तिविद्याप्रत्युपस्थापनं
मित्युच्यते॥विद्याभेदेपितदुपपत्तेःएकमपिहिब्रह्मविभूतिभेदैरनेकधोपास्यतइतिस्थितिः॥परोवरीयस्त्वादिवच्चेद्दर्शनात्॥
तस्माद्वीर्यसंभृत्यादीनांशांडिल्यविद्यादिष्वनुपसंहारइति॥२३॥१२॥पुरुषविद्यायामिवचेतरेषामनाम्नानात्॥२४॥ मनोमयत्वादयो३
१ वीर्यव्यवस्थावत्सं राम·
भृत्यादिगुणविशिष्टस्यब्रह्मणःशांडिल्यादिविद्योक्तगुणविशिष्टब्रह्मणश्चमिथोभेदेनरूपभेदात्संभृत्यादीनांनोपसंहारइत्युक्तन्यायातिदेशा ३३८
त्वादस्यनसंगत्याद्यपेक्षा॥यथैकस्मिन्नुद्गीथेपरोवरीयस्त्वादिगुणोपास्तेर्हिरण्यश्मश्रुत्वाद्युपास्तिर्भिद्यतेतथैकस्मिन्नपिब्रह्मणिविद्याभेदोपपत्ते
र्ब्रह्मप्रत्यभिज्ञानगुणप्रापिकेत्याह॥परोवरीयस्त्वादिवदिति॥तस्मात्संभृत्यादिगुणविशिष्टविद्यांतरविधिरितिसिद्धं॥२३॥१२॥पुरुषविद्यायां॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

छांदोग्यस्थां विद्यामाह॥ अस्तीति॥ पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशति वर्षाणि तत्प्रातःसवनमथ यानि चतुश्चत्वारिंशद्वर्षाणि तन्माध्यंदिनं सवनमथ यान्यष्टाचत्वारिंशद्वर्षाणि तत्तृतीयं सवनमिति प्रसिद्धयज्ञसाम्यार्थं सवनत्रयं कल्पितं॥ स यदशिशिषति यत्पिपासति यन्न रमते ता दीक्षाः॥ अथ यदश्नाति यत्पिबति यद्रमते तदुपसदः अथ यद्धसति यज्जक्षति यन्मैथुनं चरति तानि स्तुतशस्त्राणि अथ यत्तपो दानादि सा दक्षिणा मरणमेवावभृथः॥ वस्वादिरूपा मे प्राणाः इदं सवनत्रयं यावदायुरनुसंतनुतेत्याशीः॥ अक्षितमस्यच्युतमसि प्राणसंशितमसीति मंत्रत्रयप्रयोगः॥ षोडशाधिकशतवर्षजीवित्वं फलमिति दर्शितं॥ संशयार्थं शाखांतरीयपुरुषविद्यामाह॥ तैत्तिरीयकादिति॥ अत्र विदुषो यज्ञस्येति षष्ठ्योः सामानाधिकरण्यं वैयधिकरण्यं वा नि

अस्ति तांडिनां पैंगिनां च रहस्यब्राह्मणे पुरुषविद्या॥ तत्र पुरुषो यज्ञः कल्पितः तदीयमायुस्त्रेधा विभज्य सवनत्रयं कल्पितमशिशिषादीनि च दीक्षादिभावेन कल्पितानि अन्ये च धर्मास्तत्र समधिगता आशीर्मंत्रप्रयोगादयः॥ तैत्तिरीयका अपि कंचित्पुरुषयज्ञं कल्पयंति॥ तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नीत्येतेनानुवाकेन॥ तत्र संशयः किमितरत्रोक्ताः पुरुषयज्ञस्य धर्मास्तैत्तिरीयकेऽप्युपसंहर्तव्याः किंवा नोपसंहर्तव्या इति॥ पुरुषयज्ञत्वाविशेषादुपसंहारप्राप्तावाचक्ष्महे॥ नोपसंहर्तव्या इति॥ कस्मात् तद्रूपप्रत्यभिज्ञानाभावात्॥ तदाहाचार्यः पुरुषविद्यायामिवेतरेषामनाम्नानात्॥ यैषा शाखिनां तांडिनां पैंगिनां च पुरुषविद्यायामाम्नानं नैवमितरेषां तैत्तिरीयाणामाम्नानमस्ति॥ तेषां ह्येतरविलक्षणमेव यज्ञसंपादनं दृश्यते॥ पत्नीयजमानवेदवेदिबर्हिर्यूपाज्यपशुऋत्विगाद्यनुक्रमणात्॥ यदपि सवनसंपादनं तदपीतरविलक्षणमेव यत्प्रातर्मध्यंदिनं च तानि सवनानीति॥

श्यासंशयमाह॥ तत्रेति॥ उपसंहारानुपसंहारावेव फलं॥ पूर्वोत्रासाधारणप्रत्यभिज्ञानाभावात्संभृत्यादौ विद्याभेद उक्तः॥ इह त्वसाधारणमरणावभृथगुणविशिष्टपुरुषयज्ञरूपैकप्रत्यभिज्ञानाद्विद्यैक्यमिति प्रत्युदाहरणेन प्राप्ते सिद्धांतयति॥ नोपसंहर्तव्या इति॥ तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्निर्दमः शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मेति बहुतरधर्मवैलक्षण्यान्न रूपैकप्रत्यभिज्ञेत्यर्थः॥ वेदः कुशमुष्टिः शमयिता दमो दक्षिणेत्यन्वयः॥ किंच छांदोग्ये त्रिधा विभक्तायुषि सवनत्वक

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रा॰भा॰ प्र॰टी॰ ३३९ अ॰पा॰ ३ ३

यन्मरणंतदवभृथोयदश्नमनेनतदुपसदइतितित्तिरिश्रुतौसारूप्यमपिभातीत्यतआह॥यदपिकिंचिदिति॥गजोक्षयोश्चतुल्यत्वात्सारूप्यवदिदंसारूप्यंनैक
प्रयोजकमित्यर्थः॥किंचछांदोग्येपुरुषयज्ञयोरैक्यंश्रुतंअत्रतुभेदइतिवैरूप्यांतरमाह॥नचेति॥यद्यपिनिषादस्थपतिन्यायेनसामानाधिकरण्यंषष्ठ्यो
र्युक्तंतथाप्यप्रसिद्धेकल्पनागौरवाद्यज्ञस्यात्मेतिभेदोक्तेरेकस्यैवयज्ञत्व — यजमानत्वविरोधादात्मविदोयोयज्ञःप्रसिद्धस्तस्येतिवैय्यधिकरण्यमेवयु
क्तं॥किंचविद्वत्संबंधियज्ञरूपविशेष्यानुवादेनविद्वदंगैरंगसंपद्विधावेकवाक्यताप्रतीयतेनतस्यांसत्यांविशेष्यस्यांगानांचपृथग्विधिवादिनस्तववाक्यभे

यदपिकिंचिन्मरणावभृथत्वादिसामान्यंतदस्तीयत्वाद्भूयसावैलक्षण्येनाभिभूयमानंनप्रत्यभिज्ञापनक्षमं॥नचैतैत्तिरीयकेपुरु
षस्ययज्ञत्वंश्रूयतेविदुषोयज्ञस्येति॥नचैतेसमानाधिकरणेषष्ठ्यौविद्वानेवयोयज्ञस्तस्येति॥नहिपुरुषस्यमुख्यंयज्ञत्वमस्तिव्य
धिकरणेत्वेतेषष्ठ्यौविदुषोयोयज्ञस्तस्येति॥भवतिहिपुरुषस्यमुख्योयज्ञसंबंधःसत्यांचगतौमुख्यएवार्थआश्रयितव्योनभाक्तः
॥आत्मायजमानइतिचयजमानत्वंपुरुषस्यनिर्ब्रुवन्वैयधिकरण्येनैवास्ययज्ञसंबंधंदर्शयति॥अपिचतस्यैवंविदुषइतिसिद्ध
वदनुवादश्रुतौसत्यांपुरुषस्ययज्ञभावंआत्मादीनांचयजमानादिभावंप्रतिपित्समानस्यवाक्यभेदःस्यात्॥अपिचससंन्यासामा
त्मविद्यांपुरस्तादुपदिश्यानंतरंतस्यैवंविदुषइत्याद्यनुक्रमणंपश्यंतःपूर्वशेषएवैषआम्नायोनस्वतंत्रइतिप्रतीमः॥तथाचै
कमेवफलंउभयोरप्यनुवाकयोरुपलभामहेब्रह्मणोमहिमानमाप्नोतीति॥इतरेषांत्वनन्यशेषःपुरुषविद्याम्नायः॥आयुरभि
वृद्धिफलोह्यसौएषहषोडशवर्षशतंजीवतीतियएवंवेदेतिसमभिव्याहारात्॥तस्माच्छाखांतराधीनानांपुरुषविद्याधर्माणा
माशीर्मंत्रादीनामप्राप्तिस्तैत्तिरीयके॥२४॥२३॥वेधाद्यर्थभेदात्॥२५॥अस्त्याथर्वणिकानामुपनिषदारंभेमंत्रसमाम्नायः॥ ९ रम॰ ३३९

दद्दोषःस्यादित्यर्थः॥किंचसन्यादिभ्योन्यासएवात्यरेचयदितिसंन्यासमुक्त्वासवैसर्वमिदंजगदित्येवंतमात्मानंज्ञात्वाभूयोनमृत्युमुपयातिविद्वा
नितिसन्याससाध्यामात्मविद्यांपुरस्तात्प्राजापत्यानुवाकेउपदिश्यानंतरानुवाकेतस्यैवंविदुषइत्युक्तात्मविद्यानुवादेनप्रशंसार्थत्वेनतच्छेषत्वाद्य
ज्ञसंपत्तिःक्रियतेफलैक्यश्रुतेःछंदोगानांतुस्वतंत्रविद्याविधिरित्याह॥अपिचतससंन्यासामितिचिंतनाफलमाह॥तस्मादिति॥२५॥वेधाद्यर्थभेदात्॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

देवतामभिचारकर्त्ताप्रार्थयते॥सर्वमिति॥हेदेवतेमद्रिपोःसर्वमंगंप्रविध्यविदारयविशेषतश्चहृदयंभिंधिधमनीःशिराःप्रवृंज्यत्रोटयशिरश्चाभि
तोनाशयएवंत्रिधाविपृक्तोविश्लिष्टोभवतुमेशत्रुरित्यर्थः॥हेदेवसवितःयज्ञंतत्फलंचप्रसुवनिर्वर्तयेत्यर्थः॥उच्चैःश्रवाःश्वेतोश्वोयस्येंद्रस्यसत्वंहरितमणि
वन्नीलोसीत्यर्थः॥नोस्माकंशंसुखकरोभवत्वित्यर्थः॥अग्निष्टोमोब्रह्मैवसयस्मिन्नहनिक्रियतेतदपिब्रह्मतस्माद्यएतदहःसाध्यंकर्मोपयंत्यनुतिष्ठंतिते
ब्रह्मणैवसाधनेनब्रह्मोपयंतितेचक्रमेणामृतत्वमाप्नुवंतीतियोजना॥मंत्रादिषुतत्तदुपनिषद्विद्याशेषत्वेप्रमाणभावाभ्यांसंशयमाह॥किमितिफलंपूर्व

भा॰वा॰१

सर्वंप्रविध्यहृदयंप्रविध्यधमनीःप्रवृज्यशिरोभिवृज्यत्रिधाविपृक्तइत्यादिः॥तांडिनांदेवसवितःप्रसुवयज्ञमित्यादिःशाट्या
यनीनांश्वेताश्वोहरितनीलोसीत्यादिः॥कठानांतैत्तिरीयकाणांचशंनोमित्रःशंवरुणइत्यादिर्वाजसनेयिनांतूपनिषदारंभेप्रव-
र्ग्यब्राह्मणंपठ्यतेदेवाहवैसत्रंनिषेदुरित्यादिः कौषीतकिनामप्यग्निष्टोमब्राह्मणंब्रह्मवाअग्निष्टोमोब्रह्मैव तदहर्ब्रह्मणैव
तेब्रह्मोपयंतितेमृतत्वमाप्नुवंतियएतदहरुपयंतीति॥किमिमेसर्वेप्रविध्यादयोमंत्राःप्रवर्ग्यादीनिचकर्माणिविद्यासूपसंह्रिये
रन्किंवानोपसंह्रियेरन्नितिमीमांसामहे॥किंतावन्नःप्रतिभातिउपसंहारएवैषांविद्यास्विति॥कुतःविद्याप्रधानानामुप
निषद्ग्रंथानांसमीपेपाठात्॥नन्वेषांविद्यार्थतयाविधानंनोपलभामहे॥बाढं॥अनुपलभमानाअपित्वनुमास्यामहेसन्नि
धिसामर्थ्यात्॥नहिसन्निधेरर्थवत्वेसंभवत्यकस्मादसावनाश्रयितुंयुक्तः॥ननुनैषांमंत्राणांविद्याविषयंकिंचित्सामर्थ्यंपश्या
मः॥कथंचप्रवर्ग्यादीनिकर्माणिअन्यार्थत्वेनैवविनियुक्तानिसंतिविद्यार्थत्वेनापिप्रतिपद्येमहीति॥ ९ वत ननुतेषांशेषत्वेमानाभा

वाच्चोपसंहारइतिशंकते॥नन्वेषामिति॥मंत्रादयस्तत्तद्विद्याशेषाःफलवद्विद्यासन्निहितत्वात्तैत्तिरीयकगतपुरुषयज्ञवदितिसमाधत्ते॥बाढमिति
॥तथाचदृष्टांतसंगतिः॥सिद्धांतिपक्षेसन्निधिवैयर्थ्यंबाधकमाह॥नहीति॥अफलमंत्रादीनांफलवच्छेषत्वबोधनंसन्निधेरर्थवत्वंतत्संभवेसत्यकस्मादर्थ
शून्यत्वेनासौसन्निधिराश्रयितुंनहियुक्तइत्यर्थः॥तत्पाठेत्वकस्माद्धेतुंविनासावर्थोनाश्रयितुंनहियुक्तइत्यर्थः॥ननुमंत्राणांविद्यासंबंधेनार्थप्रकाशनसाम
र्थ्याभावान्नविद्याशेषत्वमितिशंकते॥नन्विति॥पुरस्तादुपसदांप्रवर्ग्येणप्रचरंतीतिवाक्येनप्रवर्ग्यस्यक्रतुशेषत्वंश्रुतं॥अग्निष्टोमादेश्चतत्तद्वाक्येनस्वर्गाद्यर्थ

स्तुतिमात्रविद्यार्थमिति॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मंत्राणां विद्यासमवेतहृदयनाड्यादिप्रकाशकत्वमस्तीत्याह॥ नैषइति॥ उपास्तिषु मंत्रप्रयोगः क्वापि न दृष्टइत्यत आह॥ दृष्टश्चेति॥ पुत्रस्य दीर्घायुष्यार्थं कोशोपासनायां सोऽयं लोके त्रैलोक्यस्य कोशत्वेनोपास्तिरुक्ता तत्र पितुरयं प्रार्थनामंत्रः॥ तत्राऽमुनेति पुत्रस्य त्रिर्नाम गृह्णाति॥ अमुना पुत्रेण सह भूरित्यादिमं लोकमसुं च प्रपद्ये न मे पुत्रवियोगः स्यादित्यर्थः॥ ननु द्वाक्येनाऽन्यत्र विनियुक्तानामपि कर्मणां सन्निधिना विद्यासु विनियोगो न विरुध्यत इत्यत्र दृष्टांतमाह॥ वाजपेय इति॥ ब्रह्मवर्चसकामो बृहस्पतिसवेन यजेतेति वाक्येन ब्रह्मवर्चसफले विनियुक्तस्यापि बृहस्पतिसवस्य वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति वाजपेयप्रकरणस्थवाक्येन वाजपेयांगतया विनियोगवददविरोध इत्यर्थः॥ यद्यप्येकेन वाक्येन प्रकरणांतरस्थबृहस्पतिसवस्य प्रत्यभिज्ञानमंगत्वविधानं च कर्तुमयुक्तं वाक्यभेदप्रसंगात् ततो मासमग्निहोत्रवत्कर्मांतरमेव बृहस्पतिसवाख्यमंगतया विधीयत इति न विनियुक्तस्य विनियोग इति मद्गुरुतंत्रदृ

नैषदोषः सामर्थ्यं तावन्मंत्राणां विद्याविषयमपि किंचिद्व्यक्तं कल्पयितुं हृदयादिसंकीर्तनात्॥ हृदयादीनि हि प्रायेणोपासनेष्वायतनादिभावेनोपदिष्टानि तद्द्वारेण च हृदयं प्रविध्येत्येवंजातीयकानां मंत्राणामुपपन्नमुपासनांगत्वं॥ दृष्टश्चोपासनेष्वपि मंत्रविनियोगो भूः प्रपद्येऽमुनाऽमुनेत्येवमादिः तथा प्रवर्ग्यादीनां कर्मणामन्यत्रापि विनियुक्तानां सतां न विरुद्धो विद्यासु विनियोगः॥ वाजपेय इव बृहस्पतिसवस्येत्येवं प्राप्ते ब्रूमः॥ २१

यसिद्धं तथापि यथा नित्याग्निहोत्रस्याश्वमेधप्रकरणे वाक्येन तस्य तां रात्रिमग्निहोत्रं जुहोतीति नाम्ना प्रत्यभिज्ञा यथा वा दर्शपूर्णमासविकृतौ सहावाज्यभागौ यजतीत्येकस्मिन्वाक्ये प्रकृतिस्थाज्यभागयोः पदेन प्रत्यभिज्ञा वाक्येन विधानं तथात्रापि बृहस्पतिसवपदेन प्रत्यभिज्ञानं वाक्येनांगता विधानं किं न स्यात्॥ न च साध्यभावार्थविधायकस्य नामपदस्य तंत्रांतरे नामपदं न सिद्धकर्मप्रत्यभिज्ञासमर्थमिति वाच्यं सिद्धस्यांगतया पुनः साध्यत्वसंभवेऽन्यथा सिद्धस्य तस्यैव प्रसिद्धार्थकनामपारतंत्र्योपपत्तेः॥ न चैवं सति कुंडपायिसत्रेऽप्यंगत्वेन नित्याग्निहोत्रस्यैव विधिः स्यादिति वाच्यं इष्टत्वान्न च पूर्वतंत्रविरोधः॥ उत्तरतंत्रस्य बलीयस्त्वात्पूर्वतंत्रस्य स्वतंत्रपरतंत्रभावनाभेदेनात्यर्थाच्च न। स्मादेकस्यैव बृहस्पतिनामकस्य धात्वर्थस्य ब्रह्मवर्चसे विनियुक्तस्यापि वाजपेयांगतया विनियोग इति भगवत्यादतात्पर्यमस्ति च विनियुक्तस्य विनियोगे सर्वसंमतमुदाहरणं खादिरत्वादिकं तस्य क्रतौ विनियुक्तस्य वीर्यादिफलेऽपि विनियोगात्तथा मंत्रकर्मणामन्यत्र विनियुक्तानां विद्याशेषत्वमिति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नैषामित्यादिना॥ विद्यासु हृदय्यादिसंबंधेपि वेधाद्यर्थानामसंबंधात्तत्तन्मंत्रार्थानामभिचारादिसंबंधलिंगेन सन्निधेर्बलीयस्त्वादभिचारादावे
वमंत्राणां विनियोग इत्यर्थः॥ देवसवितःप्रसुवेतिप्रदक्षिणतोग्निंपर्युक्षेदितिवाक्यादग्निपर्युक्षणे सावित्रं जुहोति कर्मणःपुरस्तात्सवने सवने जुहो
तीतिवाक्याद्वाजपेयेकर्मविशेषेसंबंधोस्यमंत्रस्येत्याह॥ नहिशेषेति॥ उक्तन्यायंश्वेताश्वद्वत्यादिष्वतिदिशति॥ एवमन्येषामिति॥ प्रमाणांतरं प्रक
रणादिकं॥ ननुलिंगादिभिरन्यत्रविनियुक्तानामपिसंनिधिना विद्यास्वपि विनियोगोस्त्वविरोधादित्युक्तं तत्राह॥ दुर्बलोहीति॥ समवायेसमानविष

नैषामुपसंहारो विद्यास्विति॥ कस्माद्वेधाद्यर्थभेदात्तहृदयंप्रविध्येत्येवंजातीयकानां हि मंत्राणां येऽर्थाहृदयवेधादयोभिन्नाः
अनभिसंबद्धास्तउपनिषदुदिताभिर्विद्याभिर्नतेषां ताभिः संगंतुं सामर्थ्यमस्ति॥ ननु हृदयस्योपासनेष्वप्युपयोगात्तद्वारकउ
पासनासंबंधउपन्यस्तः॥ नेत्युच्यते॥ हृदयमात्रसंकीर्तनस्यह्येवमुपयोगः कथंचिदुत्प्रेक्ष्येत॥ नचहृदयमात्रमत्रमंत्रार्थः
हृदयंप्रविध्यधमनीःप्रवृज्येत्येवंजातीयको हि न सकलो मंत्रार्थो विद्याभिरभिसंबध्यते॥ आभिचारिकविषयो ह्येषोर्थः।
स्तस्मादभिचारिकेण कर्मणा सर्वंप्रविध्येत्येतस्यमंत्रस्याभिसंबंधः॥ तथादेवसवितःप्रसुवयज्ञमित्यस्ययज्ञप्रसवलिं
गत्वात्तयज्ञेन कर्मणा संबंधः॥ नहि शेषसंबंधस्तुप्रमाणांतराद्वनुसर्तव्यः॥ एवमन्येषामपिमंत्राणां केषांचिल्लिंगेनके
षांचिद्वचनेन केषांचित्प्रमाणांतरेणेत्येवमर्थांतरेषु विनियुक्तानां रहस्यपठितानामपिसतां नसन्निधिमात्रेण विद्याशेषत्वोपप
त्तिर्दुर्बलो हि सन्निधिःश्रुत्यादिभ्य इत्युक्तं प्रथमेतंत्रे श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षा

त्त्वेन द्वयोर्विरोधे परस्य दौर्बल्यं कुतः॥ अर्थविप्रकर्षात्स्वार्थबोधने परस्य पूर्वव्यवधानेन प्रवृत्तेरित्यर्थः॥ अयमाशयः एकत्र विनियुक्तस्य निराकां
क्षत्वादन्यत्र विनियोगो विरुद्ध एव परं तु विनियोजकप्रमाणयोः समबलत्वेन्यतरविनियोगन्यायागायोगाद्द्वयान्याकांक्षोत्पादनेन विनियुक्तविनियोगः स्वीक्रि
यते यथा स्वादिरो यूपो भवतिखादिरं वीर्यकामस्य यूपं कुर्यादिति वाक्याभ्यां क्रतौ विनियुक्तस्य खादिरत्वस्य वीर्यफले विनियोगः॥ यत्रतु प्रमाणयोरतुल्यत्वं।
तत्र न स्वीक्रियते प्रबलप्रमाणेन दुर्बलविनियोगबाधात्॥ यथा कदाचन स्तरीरसि नेंद्र सश्चसी त्यस्याः ऋचः ऐंद्र्या गार्हपत्यमुपतिष्ठत इति तृतीया विभक्ति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गार्हपत्योपस्थानशेषत्वबोधिकयैंद्रप्रकाशनसामर्थ्यरूपलिंगप्राप्तमिंद्रशेषत्वंबाध्यते लिंगंहि न साक्षाच्छेषत्वंबोधयति किंत्विंद्रप्रकाशनमात्रंकरोतिते
नचलिंगेनानेनमंत्रेणेंद्रउपस्थापयितव्यइतिश्रुतिःकल्पनीयातयाशेषत्वबोधइतिश्रुतिव्यवधानेनशेषत्वबोधकंलिंगंझटितिस्वार्थबोधकश्रुत्याबाध्यंतत
थालिंगेनवाक्यंबाध्यंयथास्योनंतेसदनंकरोमिघृतस्यधारयासुशेवंकल्पयामितस्मिन्सीदामृतेप्रतितिष्ठव्रीहीणांमेधसुमनस्यमानइतिमंत्रभागयोःप्रा
थमिकंसदनकरणेपुरोडाशसादनेचतत्प्रकाशनसामर्थ्यलिंगेनश्रुतिद्वाराविनियोगेसतिप्रतीतमेकवाक्यत्वंबाध्यतेतस्यकृत्स्नस्यापिमंत्रेसदनकरणप्रकाशन
सामर्थ्यंपुरोडाशसादनप्रकाशनसामर्थ्यंचलिंगंकल्पयित्वाश्रुतिकल्पनयोभयत्रकृत्स्नमंत्रविनियोगबोधनेद्वाभ्यांलिंगश्रुतिभ्यांव्यवधानेनश्रुत्येकव्यव
हितक्लृप्तलिंगात्दुर्बलत्वात्॥नचसामर्थ्यंनकल्प्यमितिवाच्यं॥असमर्थस्यविनियोगायोगात्अतस्यगंगापदस्यतीरबोधविनियोगेलक्षणारूपंसामर्थ्यं
कल्प्यते॥तथावाक्येनप्रकरणंबाध्यंयथासाह्नप्रकरणाम्नातद्वादशोपसदांद्वादशाहीनस्येतिवाक्येनाहीनांगत्वबोधकेनप्रकरणप्राप्तसाह्नांगत्वबाधात्

तथाकर्मणामपिप्रवर्ग्यादीनांअन्यत्रविनियुक्तानांनविद्याशेषत्वोपपत्तिः॥नह्येषांविद्याभिःसहैकार्थ्यंकिंचिदस्ति॥वाजपेये
तुबृहस्पतिसवस्यस्पष्टंविनियोगांतरंवाजपेयेनेष्ट्वाबृहस्पतिसवेनयजेतेति॥ ((

स्प२

त्वर्थः॥प्रधानस्यांगाकांक्षारूपंप्रकरणंतस्यांगप्रधानवाक्यै
कवाक्यतासामर्थ्यश्रुतिभिःकल्प्यमानाभिःसार्थविनियोगप्रमितौव्यवधानेनांगसामर्थ्यश्रुत्योर्द्वयोःकल्पकवाक्यात्दुर्बलत्वात्॥तथाप्रकरणेनसन्निधिर्बाध्यः
॥यथाराजसूयप्रकरणेनतदंतर्गताभिषेचनीयसोमयागविशेषसन्निधिपाठप्राप्तंशुनःशेपोपाख्यानादेरभिषेचनीयशेषत्वंबाधित्वाकृत्स्नराजसूयशेषत्वमा
पादितंसन्निधेःप्रकरणादिकल्पकत्वेनक्लृप्तप्रकरणात्दुर्बलत्वात्॥तथासन्निधिनासमाख्याबाध्यतेतथाहिपौरोडाशिकेसमाख्याकेकांडेआग्नेयपुरोडाशा
दिकर्मणांक्रमेणमंत्राआम्नातास्तत्रदधिपयोरूपसान्नाय्यसन्निधौशुंधध्वंदैव्यायकर्मणइतिमंत्रआम्नातस्तत्रसमाख्याबलेनास्यमंत्रस्यपुरोडाशपात्रशुंध
नशेषत्वंप्राप्तसन्निधिनाबाधित्वासान्नाय्यपात्रशुंधनशेषत्वमापाद्यते॥पुरोडाशसंबंधिकांडंपौरोडाशिकमितिपौरुषसमाख्यायाःकांडांतर्गतमंत्रस्यपु
रोडाशसंबंधसामान्यबोधकत्वेपिशेषिभावरूपविनियोगबोधकत्वेसन्निध्याद्यपेक्षत्वेनदुर्बलत्वादिति॥एवंविरोधेसतिश्रुतिर्बाधिकैवसमाख्याबाध्यैवम
ध्यस्थानांतुचतुर्णांपूर्वबाध्यत्वंपरबाधकत्वंचेतिश्रुतिलिंगसूत्रार्थः॥तस्माल्लिंगादिनाऽन्यत्रविनियुक्तानांमंत्राणांदुर्बलसन्निधिनानविद्यासुविनियोगइतिसिद्धं॥

षशे२

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥ अपि चेत्युक्तार्थं ॥ ननु तर्हि वेधादिवाक्यानामुपनिषद्भिः सहपाठस्य का गतिस्तामाह ॥ अरण्येति ॥ तस्माद्वेधादिमंत्रकर्मणां विद्यास्वनुपसंहार
इति सिद्धं ॥ २५ ॥ हानौ तूक्तं ॥ यथाश्वो रजोयुक्तानि जीर्णरोमाणि त्यक्त्वा निर्मलो भवति ॥ तथाहमपि पापं विधूय कृतात्मा निर्मलीकृतचित्तः स
न्यथा वा राहुग्रस्तश्चंद्रो राहोर्मुखात्प्रमुच्य स्वच्छो भवति ॥ तथा शरीरं धूत्वा त्यक्त्वा देहाभिमानान्मुक्तः सन्कृतं कूटस्थं ब्रह्मात्मकं लोकं अभिसंभ्य।

अपि चैकोयं प्रवर्ग्यः सकृदुत्पन्नो बलीयसा प्रमाणेनान्यत्र विनियुक्तो न दुर्बलेन प्रमाणेनान्यत्रापि विनियोगमर्हति ॥ अगृह्यमाणवि
शेषत्वे हि प्रमाणयोरेतदेवं स्यात् ॥ ननु बलवदबलवतोः प्रमाणयोरगृह्यमाणविशेषता संभवति बलवदबलवत्त्वविशेषादेव ॥ तस्मादेवं
जातीयकानां मंत्राणां कर्मणां वा न सन्निधिपाठमात्रेण विद्याशेषत्वमाशंकितव्यम् अरण्यानुवचनत्वादिधर्मसामान्यात्तु सन्निधिपाठ
इति संतोष्टव्यं ॥ २४ ॥ २५ ॥ हानौ तूपायनशब्दशेषत्वात्कुशाच्छंदस्स्तुत्युपगानवत्तदुक्तं ॥ २६ ॥ अस्ति तांडिनां श्रुतिः ॥ अश्व इव रोमाणि विधूय
पापं चंद्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामीति ॥ तथाथर्वणिकानां तथा विद्वान्पुण्यपापे वि
धूय निरंजनः परमं साम्यमुपैतीति ॥ तथा शाट्यायनिनः पठंति तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापकृत्यामिति ॥ तथै
व कौषीतकिनस्तत्सुकृतदुष्कृते विधूनुते तस्य प्रिया ज्ञातयः सुकृतमुपयंत्यप्रिया दुष्कृतमिति ॥ तदिह क्वचित्सुकृतदुष्कृतयोर्हानं श्रूयते
क्वचित्तयोरेव विभागेन प्रियैरप्रियैश्चोपायनं क्वचित्तूभयमपि हानमुपायनं च ॥ तद्यत्रोभयं श्रूयते न तत्र तावत्किंचिद्वक्तव्यमस्ति ॥ यत्रा
प्युपायनमेव श्रूयते न हानं तत्राप्यर्थादेव हानं सन्निपतति ॥ अन्यैरात्मीययोः सुकृतदुष्कृतयोरुपेयमानयोरावश्यकत्वात्तद्धानस्य ॥ य
त्र तु हानमेव श्रूयते नोपायनं तत्राप्युपायनं सन्निपतेद्वा न वेति विचिकित्सायामश्रवणादसंनिपातो विद्यांतरगोचरत्वाच्छाखांतरीयस्य

त्वै नसंभवामीत्यर्थः ॥ यथा नद्यः समुद्रं प्राप्य नामरूपे त्यजंति तथा विद्वानित्यर्थः निरंजनः शुद्धः साम्यं ब्रह्म ॥ तस्य मृतस्य विदुषः दायं धनं ॥ तत्तेन
विद्याबलेन सुकृतदुःकृते त्यजतीत्यर्थः ॥ उपायनं ग्रहणं तस्य त्यागपूर्वकत्वादत्यक्तयोर्ग्रहणायोगात्त्यागोर्थाद्यातीति ॥ यत्र तु त्याग एव श्रुतः तत्र हा
नोपायनयोः सहभावस्यावश्यकत्वानावश्यकत्वाभ्यां संशयमाह ॥ यत्रत्विति ॥ अत्र पूर्वपक्षे स्तुतिप्रकर्षासिद्धिः सिद्धांते तत्सिद्धिरिति फलं ॥ ९ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यद्यपितांड्याथर्वणश्रुत्योर्निर्गुणविद्यार्थयोः कर्महानमेवश्रुतंनोपायनंतथापिकौषीतकिश्रुतौपर्यंकस्थसगुणब्रह्मविद्यायामुपायनंश्रुतमत्रोपसंहर्तव्यमि त्याशंक्यविद्याभेदान्नोपसंहारइत्याह॥ विद्यांतरेति॥ किंचयथामंत्रकर्मणामनावश्यकत्वाद्विद्यास्वनुपसंहारउक्तस्तथापरैरुपादानंविनापिहानसंभवेनो पादानस्यानावश्यकत्वान्नप्राप्तिरितिदृष्टांतसंगत्याप्राप्तेसिद्धांतयति॥ हानौत्वित्यादिनाउपायनशब्दस्यशेषत्वाद्धानशब्देनापेक्षितत्वादितिसूत्रार्थः॥

अपिचआत्मकर्तृकंसुकृतदुष्कृतयोर्हानंपरकर्तृकंतूपायनंतयोरत्यावश्यकभावेकथंहानेनोपायनमाक्षिप्येत॥ तस्मादस न्निपातोहानावुपायनस्येत्यस्यांप्राप्तौपठति॥ हानौत्विति॥ हानौत्वेतस्यांकेवलायामपिश्रूयमाणायामुपायनंसन्निपतितुमर्हतितन च्छेषत्वात्॥ हानशब्दशेषोह्युपायनशब्दः समधिगतःकौषीतकिरहस्ये॥ तस्मादन्यत्रकेवलहानशब्दश्रवणेप्युपायनानुवृत्तिः ॥यदुक्तमश्रवणाद्विद्यांतरगोचरत्वादनावश्यकत्वाच्चासन्निपातइति॥ तदुच्यते॥ भवेदेषाव्यवस्थोक्तिर्यद्यनुष्ठेयंकिंचिदन्य त्रश्रुतमन्यत्रनिनीष्येत॥ नत्विहहानमुपायनंवानुष्ठेयत्वेनसंकीर्त्यते॥ विद्यास्तुत्यर्थंत्वनयोःसंकीर्तनंइत्थंमहाभागाविद्या यत्सामर्थ्यादस्यविदुषःसुकृतदुष्कृतेसंसारकारणभूतेविधूयेतेतेचास्यसुहृद्द्विषत्सुनिविशेतेइतिस्तुत्यर्थेचास्मिन्संकीर्त नेहानानंतरभावित्वेनोपायनस्यक्वचिच्छ्रुतत्वादन्यत्रापिहानश्रुतावुपायनानुवृत्तिंमन्यतेस्तुतिप्रकर्षलाभाय॥ प्रसिद्धाचार्थवा दांतरापेक्षार्थवादांतरप्रवृत्तिरेकविंशोवाइतोसावादित्यइत्येवमादिषु॥ कथंह्येकविंशतादित्यस्याभिधीयेतानपेक्षमाणेर्थ वादांतरे द्वादशमासाःपंचर्तवस्त्रयइमेलोकाअसावादित्यएकविंशइत्येतस्मिन्॥ तथात्रिष्टुभौभवतःसेंद्रियत्वायेत्येवमादिवा देषुइंद्रियंवैत्रिष्टुप्इत्येवमाद्यर्थवादांतरापेक्षादृश्यते॥ ११ अश्वरोमदृष्टांतेनविधूतयोःपुण्यपापयोःपरत्रावस्थानसापेक्षत्वात्परैरुपादा नंवाच्यमितिभावः॥ विद्याभेदेगुणानुपसंहारइतिव्यवस्थानुष्ठानविषयानस्तुतिविषयेत्याह॥ तदुच्यतइति॥ मन्यतेसूत्रकारइत्यर्थः॥ ननुश्रुतहानार्थवा देनापिस्तुतिसिद्धेःकिमर्थमुपायनार्थवादआनीयतेतत्राह॥ स्तुतिप्रकर्षलाभायेति॥ नन्वर्थवादस्यविधिनासंबंधःप्रसिद्धोनार्थवादांतरेणेत्यतआह॥ प्र सिद्धाचेति॥ इतोभूलोकादित्यर्थः हेमंतशिशिरयोरैक्यात्पंचर्तवः॥ यज्ञस्यपुरुषरूपकल्पनायांसेंद्रियत्वायत्रिष्टुभौभवतइत्युक्तंचकृचब्राह्मणे तत्रत्रिष्टुभोः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नन्वमूर्त्तयोः पुण्यपापयोरुपादानस्यासंभवादनुपसंहार इत्यत आह॥ स्तुत्यर्थत्वाच्चेति॥ विद्वन्निष्ठयोरेव तयोः फलं परे प्राप्नुवंति विद्यासाम
र्थ्यादित्युपयंतिपदेनोच्यत इत्यर्थः॥ नन्वन्यनिष्ठकर्मणोरन्यत्र फलसंचारः कथं॥ ननु वचनबलादिति चेन्न फलमुपयंतीत्यश्रुतेः॥ न
च यथा पुत्रकृतश्राद्धस्य पितृषु फलं तथात्रेति वाच्यं यस्य फलमुद्दिश्य यत्कर्म विहितं तस्य तत्फलमिति न्यायेन पितॄणां तृप्त्युद्देशेन कृ
तकर्मणो व्यधिकरणफलत्वेपि विदुषः कर्मकालेनुद्दिष्टव्यधिकरणफलायोगात् किंच विदुषो देहपाते कर्मणोः सत्ताद्यावज्जीवं विद्व
त्सेवकस्य द्वेषिणो वा फलं स्यादित्यत आह॥ नातीवाभिनिवेष्टव्यमिति॥ विद्वत्सेवाद्वेषाभ्यां विद्वन्निष्ठपुण्यपापतुल्ये पुण्यपापे सेव।

॥ स्तुत्यर्थत्वाच्चास्योपायनवादस्य॥ कथमन्यदीये सुकृतदुष्कृते अन्यैरुपेयेते इति॥ नातीवाभिनिवे
ष्टव्यं॥ उपायनशब्दशेषत्वादिति तु —— शब्दमुच्चारयन् स्तुत्यर्थमेव हानावुपायनानुवृत्तिं सूचयति॥
गुणोपसंहारविवक्षायामुपायनार्थस्यैव हानावनुवृत्तिं ब्रूयात्॥ तस्माद्गुणोपसंहारविचारप्रसंगेन स्तुत्युपसंहारप्र
कारप्रदर्शनार्थमिदं सूत्रं॥ कुशाच्छंदस्तुत्युपगानवदित्युपमोपादानं॥ तद्यथा भाल्लविनां कुशा वानस्पत्याः स्थ ता मा पात
त्येतस्मिन्निगमे कुशानामविशेषेण वनस्पतियोनित्वश्रवणे शाट्यायनिनामौदुंबराः कुशा इति विशेषवचनादौदुंबर्यः
कुशा आश्रीयंते॥ यथा च क्वचिद्देवासुरच्छंदसामविशेषेण पौर्वापर्यप्रसंगे देवच्छंदांसि पूर्वाणीति पैंग्याम्नानात्प्रतीयते

कुशा॰

कृद्द्वेषिणोर्जायेते तानयोः फलतः स्वीकार उपायनमिति परिहारस्य सुलभत्वादनाग्रह इत्यर्थः॥ उपायनादेः स्तुतित्वे लिंगमाह॥ उपायनेति॥ उपा
यनविवक्षायामुपायनस्यैवोपसंहारं सूत्रकारो ब्रूयादतः शब्दस्यतं ब्रुवन् स्तुतिं सूचयतीत्यर्थः॥ विद्याविचारात्मके पादे स्तुतिविचारस्य कासंग
तिरित्यत आह॥ तस्मादिति॥ शाखांतरस्थो विशेषः शाखांतरेपि ग्राह्य इत्यत्र दृष्टांतमाह॥ कुशेति॥ कुशा उद्गातृणां स्तोत्रगणनार्थाः शलाकाः द्रुम
य्यः॥ भो कुशा यूयं वानस्पत्याः स्थ महावृक्षो वनस्पतिः तत्प्रभवाः स्थ तादृश्यं भूता यूयं मा पात मां रक्षतेति यजमानप्रार्थना॥ अत्र ता इति स्त्रीलिंगनि
र्देशादौदुंबर्य इति भाष्याच्च शलाकासु कुशशब्दस्य स्त्रीत्वं मंतव्यं दर्भविषयस्य तु स्त्रीत्वं अस्त्री कुशमित्यनुशासनात्॥ छंदो दृष्टांतं व्याचष्टे॥ यथा चेति॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नवाक्षराणि छंदांसि आसुराण्यन्यानि दैवानि तेषां कश्चिच्छंदोभिस्तुवन इत्यत्रा विशेषप्राप्तौ पैंगिवाक्याद्विशेषग्रह इत्यर्थः॥ स्तुतिं विवृणोति॥ यथेति॥ अतिरात्रे षोडशिनो ग्रहस्यांगभूतं स्तोत्रं कदेति छंदोगादीनामाकांक्षायामुदयसमया विष्टे सूर्ये षोडशिनः स्तोत्रमित्यार्चश्रुतेः कालविशेषग्रह इत्यर्थः॥ ऋचोधीयन इत्यार्चाः॥ उपगानं विभजते॥ यथेति॥ ऋत्विज उपगायंतीत्यविशेषश्रुतेर्नाध्वर्युरुपगायतीति श्रुत्यंतरादध्वर्युभिन्ना ऋत्विज उपगायंतीति विशेषग्रह इत्यर्थः॥ ननु कुशादिवाक्यानामपि किमिति विशेषश्रुत्यंतरैरेकवाक्यताभ्युपगम्यते तत्राह॥ श्रुत्यंतरस्कृत्यं हीति॥ सामान्यविशेषयोरेकवाक्यतारूपांगत्वे सत्यां वाक्यभेदं कृत्वा नाध्वर्युरितिनिषेधाद विशेषश्रुतेश्चाध्वर्युरुपगायति नोपगायति चेत्येवं सर्वत्र विकल्पो न युक्तः॥ व्रीहियवयोस्त्वगत्या विकल्प आश्रित इत्यर्थः॥ विकल्पस्यान्याय्यत्वमष्टदोषदुष्टत्वात्तथाहि यदि व्रीहिवाक्यमाश्रीयते॥ तदा यववाक्यस्य प्रामाण्यत्याग अनिष्टाप्रामाण्यस्वीकारः कदाचिद्यववाक्याश्रयणे त्यक्तप्रामाण्यस्वीकारः स्वीकृताप्रामाण्यत्यागश्चेत्येकस्मिन्यववाक्ये चत्वारो दोषाः भवंति॥ एवं व्रीहिवाक्येपि

मात्रं २

यथा च षोडशिस्तोत्रे केषांचित्कालविशेषप्राप्तौ समयाध्युषिते सूर्य इत्यार्च ˉˉश्रुतेः कालविशेषप्रतीतिः॥ यथैव चाविशेषेणोपगाने केचित्समामनंति विशेषेणभाल्लविनो॥ यथैतेषु कुशादिषु श्रुत्यंतरगतविशेषान्वयः एवं हानावप्युपायनान्वय इत्यर्थः॥ श्रुत्यंतरकृतं हि विशेषं श्रुत्यंतरेऽनभ्युपगच्छतः सर्वत्रैव विकल्पः स्यात् स चान्याय्यः सत्यां गतौ॥ तदुक्तं द्वादशलक्षण्यां॥

सू २

चत्वारो दोषा इति॥ एवंदुष्टविकल्पपरिहाराय भिन्नशाखाश्रुत्योरप्येकवाक्यतां जैमिनिः संमनुते त्याह॥ तदुक्तमिति ज्योतिष्टोमप्रकरणे दीक्षितो न जुहोतीति श्रुतं यावज्जीवमग्निहोत्रं जुहुयादिति चान्यत्र श्रुतं तत्र यदि न दीक्षितवाक्यं होमप्रतिषेधकं स्यात् तदा क्रत्वर्थत्वात् निषेधोनुष्ठेयः॥ यावज्जीवविधिना होमो वानुष्ठेय इति विकल्पः स्यात् स चान्याय्यः॥ अपि तु यावज्जीववाक्यं प्रति न दीक्षितवाक्यस्य शेषत्वान्नकार इतरपर्युदासार्थकः स्यात् दीक्षितान्यलक्षकः स्यान्न होमप्रतिषेधः तस्माद दीक्षितो यावज्जीवं जुहुयादित्येकवाक्यतेति न दीक्षिताधिकरणसिद्धांतसूत्रार्थः॥ अत्र भगवत्पादैः सूत्रमेव पठितं मिश्रैस्तु पर्युदासाधिकरणसिद्धांतसूत्रं अपि तु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्पस्य विधीनामेकदेशः स्यादिति स्थितमत्रार्थतः पठितमित्युक्तं नचिवियं सूत्रार्थः स्तुपन्नमात्रेये यजामह इति प्रयोक्तव्यमिति श्रुतं नानुयाजेषु ये यजामहं करोतीत्यपि श्रुतं तत्र नकारस्य निषेधकत्वे अतिरात्रे षोड

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रिवानुयाजेषु यज्ञत्वाविशेषात्प्रयोक्तव्यं निषेधात्त्वप्रयोक्तव्यमिति विकल्पः स्यात्तस्याप्याप्यत्वाद्येयजामह इति विधेरेव नानुयाजवाक्यमेकदेशः स्यात्पर्युद
स इत्याविधिवाक्यशेषः स्यादिति यावत्तथा चानुयाजभिन्नेषु यागेषु येयजामह इति प्रयोक्तव्यमित्येकवाक्यतेति॥ वर्णकांतरमाह॥ अथवेति॥ पूर्वत्र विधूननं
कर्महानिरितिसिद्धवत्कृत्य उपायनोपसंहार उक्तः अत्र सैव साध्यत इति भेदः॥ उभयत्र लक्षणासाम्यात्संशयमाह॥ किमिति॥ विधूननस्य हि फलद्वयमस्य
रोमादिषु दृष्टं पूर्वस्वभावाच्युतिरन्यत्र संक्रांतिश्चेति तत्र संक्रांतिरूपहानिर्लक्षणीया किं वा च्युतिरिति संशयार्थः तत्र विधूननशब्दस्य कंपनं मुख्यार्थ इति
तावत्सर्वसंमतं तच्चामूर्त्तयोः पुण्यपापयोर्न संभवति अतस्तयोर्यः स्वभावः फलदातृत्वशक्तिस्तस्माच्चालनं विधेयाप्रतिबंधात्च्युतिः सा लक्षणीया न हा।

अपितु वाक्यशेषत्वादितरपर्युदासः स्यात्प्रतिषेधे विकल्पः स्यादिति॥ अथवैतास्वेव विधूननश्रुतिषु एते नैर्ऋत्रेणोतच्चिंतयितव्यं किम
नेन विधूनवचनेन सुकृतदुःकृतयोर्हानमभिधीयते॥ किं वार्थांतरमिति॥ तत्र चैवं प्रापयितव्यं तद्धानं विधूननमभिधीयते॥ धूञ् कंपन
इति स्मरणात् दोधूयंते ध्वजाग्राणीति च वायुना चाल्यमानेषु ध्वजाग्रेषु प्रयोगदर्शनात् तस्माच्चालनं विधूननमभिधीयते चालनं तु
सुकृतदुष्कृतयोः कंचित्कालं फलप्रतिबंधनादित्येवं प्रापय्य प्रतिवक्तव्यं॥ हानावेवैष विधूननशब्दो वर्तितुमर्हति॥ उपायनशब्दशेषत्वा
त्॥ नहि परपरिग्रहभूतयोः सुकृतदुष्कृतयोरप्रहीणयोः परैरुपायनं संभवति॥ यद्यपीदं परकीययोः सुकृतदुष्कृतयोरप्रहीणयोः परै
रुपायनं नांजसं संभाव्यते तथापि तत्संकीर्तनात्तावत्तदानुगुण्येन हानमेव विधूननं नामेति निर्णेतुं शक्यते॥ क्वचिदपि चेदं विधूननस
न्निधावुपायनं श्रूयमाणं कुशाच्छंदस्तुत्युपगानवद्विधूननश्रुत्या सर्वत्रापेक्ष्यमाणं सार्वत्रिकं निर्णयकारणं संपद्यते॥ १ निरमूर्त्तयोरन्यत्रसं
क्रांत्ययोगात्सापेक्षत्वाच्चेति पूर्वपक्षार्थः॥ सिद्धांतयति॥ हानावेवेति॥ यदि च्युतिमात्रं लक्ष्यं तदा यं नीत्यन्वितं स्यात्तच यत्र धुनोतेरुपायनशब्दसान्निध्यं त
त्र हानिर्लक्ष्यते न केवलधुनोतेर्हानिश्चान्यत्र विदुषः सेवकादेस्तुल्यकर्मसंक्रांतिं विना संभवद् इति वाच्यं केवलधुनोतेरपि मुख्यार्थासंभवेनान्यत्र लक्ष्यतया बुद्धि
स्थहानिलक्षणायाएव युक्तत्वादिति भावः॥ उपायनस्यामुख्यत्वात्तत्रापि हानिलक्षणाबीजत्वमिति शंकित्वा पुण्यपापयोः फलतः स्वीकारात्मकमुपायनं
हानिं विनानुपपन्नं तल्लक्षणानिर्णायकमिति परिहरति॥ यद्यपीत्यादिना यथान्यत्र श्रुतमौदुंबरत्वादि कं कुशादिनिर्णायकं तथेदमुपायनं विधूननस्य हा

नष्टं निश्चायकत्वात्फलकृत्वा॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा·भा· विधूननंमुख्यंकिमितिनोच्यतेतत्राह॥नचेति॥तथापिहानंकथंलक्ष्यतइत्याशंक्यमुख्यसंबंधादित्याह॥अश्वश्चेति॥अनुपपत्तिसंबंधौलक्षणा अ·पा·
प्र·टी· बीजरूपावुक्त्वालक्षकंपदंनिर्दिशति॥अश्वइवेति॥विधूयेतिपदंदृष्टांतेहानपर्यंतंसहार्थांतिकेपिहानलक्षकमित्यर्थः॥यद्वाहानवाचकमेवास्तुनचधून- ३ ३
३४५ कंपनइतिधातुपाठविरोधस्तस्योपलक्षणार्थत्वादित्याह॥अनेकेति॥शाखांतरस्थमुपायनंविधूननस्यहानत्वनिश्चायकमित्यत्रजैमिनिसूत्रंतदुक्तमितिगृ-
हीतंपूर्वव्याख्यानमित्यर्थः॥एवंविधूननस्यहानित्वसिद्धेःकेवलहानावुपायनोपसंहारइतिसिद्धं॥२६॥१५॥सांपरायेऽन्ये॥व्यध्वनिअर्धमार्गे॥पूर्वोक्तंवि-

नचचालनंध्वजाग्रवत्सुकृतदुष्कृतयोर्मुख्यंसंभवतिअद्रव्यत्वात्॥अश्वःस्वरोमाणिविधून्वानस्त्यजन्रजःसहैवतेनरोमा-
ण्यपिजीर्णानिशातयति॥अश्वइवरोमाणिविधूयपापमितिचब्राह्मणं॥अनेकार्थत्वाभ्युपगमाच्चधातूनांनस्मरणविरोधः॥तदुक्तमि-
तिव्याख्यातं॥२६॥१५॥सांपरायेतर्तव्याभावात्तथाह्यन्ये॥२७॥देवयानेनपथापर्यंकस्थंब्रह्माभिप्रस्थितस्यव्यध्वनिसुकृत-
दुष्कृतयोर्वियोगंकौषीतकिनःपर्यंकविद्यायामामनंति॥सएतंदेवयानंपंथानमासाद्याग्निलोकमागच्छतीत्युपक्रम्यसआ-
गच्छतिविरजांनदींतांमनसैवात्येतितत्सुकृतदुःकृतेविधूनुतइति॥तत्किंयथाश्रुतंव्यध्वन्येववियोगवचनंप्रतिपत्तव्यंआ-
होस्विदादावेवदेहादपसर्पणइतिविचारणायांश्रुतिप्रामाण्याद्यथाश्रुतिप्रतिपत्तिप्रसक्तौपठति॥सांपरायइति॥सांपरायेगम-
नएवदेहादपसर्पणइदंविद्यासामर्थ्यात्सुकृतदुष्कृतहानंभवतीतिप्रतिजानीते॥हेतुंव्याचष्टेतर्तव्याभावादिति॥नहिविदुषः
संपरेतस्यविद्ययाब्रह्मप्रेप्सतोंतरालेसुकृतदुष्कृताभ्यांकिंचित्प्राप्तव्यमस्ति॥यदर्थंकतिचित्क्षणानक्षीणेतेकल्प्येयातां॥६॥

धूननस्यहानत्वमुपजीव्यहानस्यनदीतरणानंतर्यश्रुतेरश्वइवरोमाणीत्यादौदेहत्यागात्प्राक्कालत्वश्रुतेश्चसंशयमाह॥तत्किमिति॥ब्रह्मलोकमार्गम-
ध्येविरजाख्यानदीमत्येतितत्सुकृतदुष्कृतेविधूनुतइत्यत्रतदितिसर्वनामश्रुत्यानेनेत्यर्थंतयासन्निहितनदीतरणस्यकर्महानिहेतुत्वोक्तेरर्धपथेकर्मक्षय रत्न·
इतिपूर्वपक्षः॥तत्रविद्यायाःकर्मक्षयहेतुत्वासिद्धिःपूर्वपक्षेसिद्धांतेतत्सिद्धिरितिमत्वासिद्धांतयति॥सांपरायइति॥मरणात्प्रागित्यर्थः॥संपरेतस्यमृतस्यकं- ३४५
चित्कालंकर्मसत्त्वेफलाभावाद्देवयानमार्गप्रवेशायोगाच्चादावेवक्षयइत्यर्थः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

क्षयहेतोर्विद्याया मध्ये मार्गमसत्त्वाच्चेत्याह विद्याविरुद्धेति॥ नदीतरणानंतरपाठस्तु बाध्यः अर्थविरोधादित्याह॥ तस्मादिति॥ तदिति सर्वनाम्नापि प्रकृतं न विद्यैवोच्यत इ-
ति भावः॥२७॥ किंच मृतस्य छंदतो यथाकामं विद्यानुष्ठानानुपपत्तेरुभयोर्विद्याकर्मक्षययोः श्रुतो हेतुफलभावो विरुध्यते किंच सति पुष्कले हेतौ न कार्यविलंब इति न्या-
योपेततांड्यादिश्रुतिविरोधस्तवस्यादस्मत्पक्षे त्वविरोध इत्याह॥ छंदत इति॥ तस्मात्कर्महानस्य विद्याफलत्वात्केवलहानावुपायनोपसंहारो विद्यास्तुतय इति॥

विद्याविरुद्धफलत्वात्तु विद्यासामर्थ्येन तयोः क्षयः॥ स च यदैव विद्याफलाभिमुखीनस्तदैव भवितुमर्हति॥ तस्मात्प्रागेव सन्नयं सुकृ-
तदुष्कृतक्षयः पश्चात्पठ्यते॥ तथा ह्यन्येपि शाखिनस्तांडिनः शाट्यायनिनश्च प्रागवस्थायामेव सुकृतदुष्कृतहानिमामनंति॥ अश्व
इव रोमाणि विधूय पापमिति॥ तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापकृत्यामिति च॥२७॥ छंदत उभयाविरोधात्॥
॥२८॥ यदि च देहादपसृप्तस्य देवयानेन पथा प्रस्थितस्यार्धपथे सुकृतदुष्कृतक्षयोऽभ्युपगम्येत ततः पतिते देहे यमनियमविद्याभ्या-
सात्मकस्य सुकृतदुष्कृतक्षयहेतोः पुरुषप्रयत्नस्येच्छातोऽनुष्ठानानुपपत्तेरनुपपत्तिरेव तद्धेतुकस्य सुकृतदुष्कृतक्षयस्य स्यात्॥ त-
स्मात्पूर्वमेव साधकावस्थायां छंदतोऽनुष्ठानं तस्य स्यात्॥ तत्पूर्वकं च सुकृतदुष्कृतहानमिति द्रष्टव्यं॥ एवं निमित्तनैमित्तिकयोरुपप-
त्तिस्तांडिशाट्यायनश्रुत्योश्च संगतिरिति॥२८॥१६॥ गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः॥२९॥ क्वचित्पुण्यपापापहानसन्निधौ
देवयानः पंथाः श्रूयते क्वचिन्न॥ तत्र संशयः किं हानावविशेषेणैव देवयानः पंथाः संनिपतेत्॥ उत विभागेन क्वचित्संनिपतेत्क्वचि-
न्नेति॥ यथा तावद्धानावविशेषेणैवोपायनानुवृत्तिरुक्ता एवं देवयानानुवृत्तिरपि भवितुमर्हतीत्यस्यां प्राप्तावाचक्ष्महे॥ गतेर्देवयान-
स्य पथोऽर्थवत्त्वमुभयथा विभागेन भवितुमर्हति॥ क्वचिदर्थवती गतिः क्वचिन्नेति॥ नाविशेषेण॥ अन्यथा ह्यविशेषेणैव तस्यां गतावं-
गीक्रियमाणायां विरोधः स्यात्॥

सिद्धं॥२८॥१६॥ गतेरर्थवत्त्वं॥ क्वचित्सगुणविद्यायां मार्गः श्रूयते निर्गुणविद्यायां न श्रूयते॥ तत्र हानसन्निधौ
मार्गस्य श्रुतत्वादनपेक्षितत्वाच्च संशये दृष्टांतसंगत्या पूर्वपक्षमाह॥ यथा तावदिति॥ उपायनवत्मार्गस्यापि क्वचिच्छ्रुतत्वात्सर्वत्रोपसंहार इत्यर्थः॥ अत्र
निर्गुणविदोऽपि मुक्त्यर्थं मार्गापेक्षा पूर्वपक्षे सिद्धांते त्वनपेक्षेति फलं॥ देशादिव्यवहितवस्तुप्राप्तौ मार्गस्यापेक्षेति न्यायानुगृहीतश्रुतिविरोधान्नोपसंहार इति

सिद्धांतः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

निरंजनोऽसंगः साम्यं ब्रह्म॥२९॥ ननु तर्हि सगुणविद्यायामपि मार्गो व्यर्थ इत्यत आह उपपन्न इति॥ सा गतिः लक्षणं कारणं यस्यार्थस्य स तल्लक्षणार्थः॥३०॥ अनियमः सर्वासां॥ अत्राप्यर्चिरादिमार्ग एव विषयस्तत्र विद्याविशेषप्रकरणादविशेषश्रुतेश्च संशये पूर्वपक्षमाह॥ किं तावदिति॥ सगुणनिर्गुणविद्यासु

पुण्यपापे विधूय निरंजनः परमं साम्यमुपैतीत्यस्यां श्रुतौ देशांतरप्रापणी गतिर्विरुध्येत॥ कथं हि निरंजनो गंता देशांतरं गच्छेत्। गंतव्यं च परमं साम्यं न देशांतरप्राप्त्यायत्तमिति॥ आनर्थक्यमेवात्र गतेर्मन्यामहे॥२९॥ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्॥३०॥ उपपन्नश्चायमुभयथाभावः क्वचिदर्थवती गतिः क्वचिन्नेति॥ तल्लक्षणार्थोपलब्धेः गतिकारणभूतो ह्यर्थः पर्यंकविद्यादिषु सगुणेषूपासनेषूपलभ्यते॥ तत्र हि पर्यंकारोहणं पर्यंकस्थेन ब्रह्मणा संवदनं विशिष्टगंधादिप्राप्तिश्चेत्येवमादि बहु देशांतरप्राप्त्यायत्तं फलं श्रूयते तत्रार्थवती गतिः॥ न हि सम्यग्दर्शने तल्लक्षणार्थोपलब्धिरस्ति॥ न ह्यात्मैकत्वदर्शिनामाप्तकामानामिहैव दग्धाशेषक्लेशबीजानामारब्धभोगकर्माशयक्षपणव्यतिरेकेणापेक्षितव्यं किंचिदस्ति तत्रानर्थिका गतिः॥ लोकवच्चैष विभागो द्रष्टव्यः॥ यथा लोके ग्रामप्राप्तौ देशांतरप्रापणः पंथा अपेक्ष्यते नारोग्यप्राप्तौ एवमिहापीति॥ भूयश्चैनं विभागं चतुर्थाध्याये निपुणतरमुपपादयिष्यामः॥१७॥३०॥ अनियमः सर्वासामविरोधः शब्दानुमानाभ्यां॥३१॥ सगुणासु विद्यासु गतिरर्थवती न निर्गुणायां परमात्मविद्यायामित्युक्तं॥ सगुणास्वपि विद्यासु कासुचिद्गतिः श्रूयते॥ यथा पर्यंकविद्यायां उपकोसलविद्यायां पंचाग्निविद्यायां दहरविद्यायामिति॥ नान्यासु यथा मधुविद्यायां शांडिल्यविद्यायां षोडशकलविद्यायां वैश्वानरविद्यायामिति॥ तत्र संशयः किं यास्वेवैषा गतिः श्रूयते तास्वेव नियम्येत॥ उतानियमेन सर्वाभिरेवंजातीयकाभिर्विद्याभिरभिसंबध्येतेति॥ किं तावत्प्राप्तं नियम इति॥ यत्रैव श्रूयते तत्रैव भवितुमर्हति प्रकरणस्य नियामकत्वात्॥ यद्यन्यत्राश्रूयमाणापि गतिर्विद्यांतरं गच्छेत् श्रुत्यादीनां प्रामाण्यं हीयेत सर्वस्य सर्वार्थत्वप्रसंगात्॥ अपि चार्चिरादिका एकैव गतिरुपकोसलविद्यायां पंचाग्निविद्यायां च तुल्यवत्पठ्यते तत्सर्वार्थत्वेऽनर्थकं पुनर्वचनं स्यात्॥ तस्मान्नियम इत्येवं प्राप्ते पठति॥ अनियम इति॥

॥ मार्गस्य भावाभावव्यवस्थावत्सगुणास्वपि व्यवस्थेति दृष्टांतेन प्राप्तौ सिद्धांते व्यवस्थापवादात्संगतिः नियमो नियमश्च उभयत्र फलं॥ नियमे प्रकरणमुक्त्वा पुनरुक्तिं लिंगमाह अपि चेति एकत्रोक्तगतेरन्यत्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न २

॥सिद्धांतयति॥सर्वसामिति॥अभ्युदयोब्रह्मलोकः अविशेषश्रुत्यादिनाप्रकरणबाधोनदोषइत्याह॥नैषइति॥नत्र अधिकृतानांमध्येयइत्थंपंचा
ग्नीन्विदुर्येचामीअरण्येश्रद्धातपइत्युपासतेश्रद्धातपउपलक्षितंब्रह्मध्यायंतितेनेर्चिषमभिसंभवंतीत्यन्वयः॥ननुश्रद्धातपोमात्रश्रुतेस्ताभ्यामेवअर्चिरा
दिगमनंस्यातन्नवैश्वानरादिविद्याशीलानामितिशंकते॥कथंपुनरिति॥अविदुषांगतिनिषेधाच्छ्रद्धातपःशब्दाभ्यांतत्साध्यब्रह्मविद्यालक्षणेतिपरिहृ

सर्वासामेवाभ्युदयप्राप्तिफलानांसगुणानांविद्यानामविशेषेणैषादेवयानाख्यागतिर्भवितुमर्हति॥नन्वनियमाभ्युप
गमेप्रकरणविरोधउक्तः॥नैषोस्तिविरोधः॥शब्दानुमानाभ्यांश्रुतिस्मृतिभ्यामित्यर्थः॥तथाहिश्रुतिः॥नद्यइत्थंविदुरितिपंचाग्निवि
द्यावतांदेवयानंपंथानमवतारयंतीयेचेमेरण्येश्रद्धातपइत्युपासतइतिविद्यांतरशीलिनामपिपंचाग्निविद्याविद्भिःसमान
मार्गतांगमयति॥कथंपुनरवगम्यतेविद्यांतरशीलिनामियंगतिरिति॥ननुश्रद्धातपःपरायणानामेवस्यात्तन्मात्रश्रवणा
न्नैषदोषः॥नहिकेवलाभ्यांश्रद्धातपोभ्यामंतरेणविद्याबलमेषागतिर्लभ्यते॥विद्यया तदारोहंतियत्रकामाःपरागताः॥न
तत्रदक्षिणायंतिनाविद्वांसस्तपस्विनइतिश्रुत्यंतरात्॥तस्मादिह श्रद्धातपोभ्यांविद्यांतरोपलक्षणं॥ वाजसनेयिनस्तु
पंचाग्निविद्याधिकारेधीयते॥यएवमेतद्विदुर्येचामी अरण्येश्रद्धांसत्यमुपासतइति॥ तत्रश्रद्धालवोयेसत्यंब्रह्मोपा
सतइतिव्याख्येयं॥सत्यशब्दस्यब्रह्मण्यसकृत्प्रयुज्यमानत्वात्॥पंचाग्निविद्याविदांचेत्थंवित्तयैवोपात्तत्वात्विद्यांतरपरा
यणानामेवैतदुपादानंन्याय्यं॥अथयएतौपंथानौनविदुस्तेकीटाःपतंगायदिदंदंदश्शूकंइतिचमार्गद्वयभ्रष्टानांकष्टाम
ᐯ यंतीदेवयानपितृयाणयोरेवैनानंतर्भावयतितत्रापिविद्याविशेषादेषांदेवयानप्रतिपत्तिः॥ ᐯ रति॥नैषदोषइतिनन्ब्रह्मलो
धोगतिंगम१
कस्यानंपरागताःपराकृत्ताःकामक्रोधदोषानसंतीतियावत्॥दक्षिणाःकेवलकर्मिणस्तपस्विनोप्यविद्वांसोनगच्छंतीत्यर्थः॥लक्षणादोषहीनंवाक्यमा
ह॥वाजसनेयिनस्त्विति॥किंचविद्याकर्मलक्षणमार्गद्वयभ्रष्टानामधोगतिश्रुतेर्वैश्वानराद्युपासकानामर्चिरादिमार्गप्राप्तिरित्याह॥अथयएतावितिदंद
श्शूकःसर्पः॥किंचाग्निर्ज्योतिरहःशुक्लःषण्मासाउत्तरायणं॥तत्रप्रयाताग च्छंतिब्रह्मब्रह्मविदोजनाइत्यविशेषेणोपासका॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नामर्चिरादिगतिमुक्त्वोपसंहारस्तेष्वनेषांतत्प्राप्तिरित्याह ॥ स्मृतिरिति ॥ शुक्लागतिरर्चिरादिकाकृष्णाधूमादिका ॥ जगतोविद्याकर्माधिकृतस्यशाश्वतेध्रु
वेसंमतेनतत्रैकयाशुक्लयापुनरावृत्तिवर्जंकार्यंब्रह्मगच्छतिअन्ययास्वर्गंगत्वापुनरायातीत्यर्थः ॥ पुनरुक्तिदोषंदूषयति ॥ यत्तुनरिति ॥ तत्रतत्रमार्गश्रुतिरन्वहंमा
र्गचिंतनार्थंप्रकरणेनमार्गध्यानस्यविद्यांगत्वावगमात्तथाचवक्ष्यतिसूत्रकारः ॥ तच्छेषगत्यनुस्मृतियोगाच्चेति ॥ येषांतुश्रुतौमार्गस्तेमार्गध्यानंविना
पिविद्यासामर्थ्यात्मार्गलभंतद्विज्ञापनार्थापुनरुक्तिरित्यर्थः ॥ तस्मात्सर्वोपासनासुप्रतीकभिन्नास्वर्चिरादिप्राप्तिरितिसिद्धं ॥ ३२ ॥ यावदधिकारं ॥ नि

स्मृतिरपिशुक्लकृष्णेगतीह्येतेजगतःशाश्वतेमतेएकयायात्यनावृत्तिमन्ययावर्ततेपुनरिति ॥ यत्तुनर्देवयानस्यपथोद्विराम्नानमुपकोसल
विद्यायांपंचाग्निविद्यायांचतदुभयत्राप्यनुचिंतनार्थं ॥ तस्मादनियमः ॥ ३२ ॥ यावदधिकारमवस्थितिराधिकारिकाणां ॥ ३३ ॥ विदुषोवर्तमा
नदेहपातानंतरंदेहांतरमुत्पद्यतेनवेतिचिंत्यते ॥ ननुविद्यायाःसाधनभूतायांसंपत्तौकैवल्यनिर्वृत्तिःस्यान्नवेतिनेयंचिंतोपपद्यते ॥ नहिपा
कसाधनसंपत्तावोदनोभवेन्नवेतिचिंतासंभवतिनापिभुंजानस्तृप्येन्नवेतिचिंत्येत ॥ उपपन्नात्वियंचिंताब्रह्मविदामपिकेषांचिदितिहा
सपुराणयोर्देहांतरोत्पत्तिदर्शनात्तथाह्यपांतरतमानामवेदाचार्यःपुराणर्षिर्विष्णुनियोगात्कलिद्वापरयोःसंधौकृष्णद्वैपायनःसंबभूवेति
स्मरंति ॥ वसिष्ठश्चब्रह्मणोमानसःपुत्रःसन्निमिशापादपगतपूर्वदेहःपुनर्ब्रह्मादेशान्मित्रावरुणाभ्यांसंबभूवेति ॥ भृग्वादीनामपिब्र
ह्मणएवमानसानांपुत्राणांवारुणेयज्ञेपुनरुत्पत्तिःश्रूयते ॥ सनत्कुमारोपिब्रह्मणएवमानसःपुत्रःस्वयंरुद्रायवरप्रदानात्स्कंदत्वेन
प्रादुर्बभूव ॥ एवमेवदक्षनारदप्रभृतीनांभूयसीदेहांतरोत्पत्तिःकथ्यतेतेनतेननिमित्तेनस्मृतौ ॥ श्रुतावपिमंत्रार्थवादयोःप्रायेणोपल
भ्यते ॥ तेचकेचित्पतितेपूर्वदेहेदेहांतरमाददतेकेचित्तुस्थितएवतस्मिन्योगैश्वर्यवशादनेकदेहादानन्यायेन ॥ सर्वेचैतेसमधिगतसक

र्गुणविद्यार्थागतिर्व्यर्थामुक्तिफलत्वात्सगुणविद्यासुसर्वत्रअर्थवतीब्रह्मलोकफलत्वादितिव्यवस्थाकृतासानयुक्तातत्त्वज्ञानिनामपीतिहासादौपु
नर्जन्मदर्शनेनज्ञानस्यमुक्तिफलत्वाभावादित्याक्षेपात्संगतिः ॥ ज्ञानिनांपुनर्जन्मदर्शनंसंशयबीजंभाष्येदर्शितं ॥ पूर्वपक्षेज्ञानान्मुक्तिश्रुतीनांज्ञानस्तुति
मात्रत्वेनज्ञानस्यमुक्तिफलत्वाभावेसतिब्रह्मलोकफलत्वाविशेषादर्चिरादिमार्गोपसंहारःफलंसिद्धांतेतूक्तव्यवस्थासिद्धिरितिविवेकः ॥ श्रुतावपीति ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मेधातिथेर्मेषेतिमंत्रे इंद्रस्य मेषजन्मोपलक्ष्यते॥ वसिष्ठउर्वशीपुत्रोजातइत्येवमर्थो बह्वृचार्थवाद इत्यर्थः॥ पाक्षिकमित्यापाततः॥ अहेतुत्वमेवेति पूर्वपक्षः॥ ज्ञानस्य मुक्तिहेतुत्वं नेति सिद्धांतयति॥ नेति॥ लोकव्यवस्थासु स्वामित्वमधिकारः तत्प्रापकं प्रारब्धं यावदस्ति तावत्कालं जीवन्मुक्तत्वेनाधिकारिकाणामवस्थितिः॥ प्रारब्धक्षये प्रतिबंधकाभावाद्विदेहकैवल्यमित्यत्र मानमाह॥ अथेति॥ अथ प्रारब्धक्षयानंतरं ततः पश्चाद्ध्र्वो विलक्षणः केवलब्रह्मस्वरूपः सन् उदेत्योद्गम्य देहं त्यक्त्वेति यावत् एकल एव अद्वितीयो मध्ये उदासीनात्मकस्वरूपे तिष्ठतीत्यर्थः॥ ननु ज्ञानिनामपि जन्मांतरं चेत्कथं मुक्तिरित्य

तदेतेषां देहाद्देहांतरोत्पत्तिदर्शनात्प्राप्तं ब्रह्मविद्यायाः पाक्षिकं मोक्षहेतुत्वमहेतुत्वं वेत्यत उत्तरमुच्यते॥ न तेषामपांतरतमःप्रभृतीनां वेदप्रवर्त्तनादिषु लोकस्थितिहेतुष्वधिकारेषु नियुक्तानामधिकारतंत्रत्वात्स्थितेः॥ यथाऽसौ भगवान् सविता सहस्रयुगपर्यंतं जगतोऽधिकारं चरित्वा तदवसाने उदयास्तमयवर्जितं कैवल्यमनुभवति॥ अथ तत ऊर्ध्व उदेत्य नैवोदेता नास्तमेतैकल एव मध्ये स्थातेति श्रुतेः॥ यथा च वर्तमाना ब्रह्मविद आरब्धभोगक्षये कैवल्यमनुभवंति॥ तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति श्रुतेः॥ एवमपांतरतमःप्रभृतयोपीश्वराः परमेश्वरेण तेषु तेष्वधिकारेषु नियुक्ताः संतः सत्यपि सम्यक्दर्शने कैवल्यहेतावक्षीणकर्माणो यावदधिकारमवतिष्ठंते तदवसाने चापवृज्यंत इत्यविरुद्धं॥ सकृत्प्रवृत्तमेव हि ते फलदानाय कर्माशयमतिवाहयंतः स्वातंत्र्येणैव गृहाद्गृहमिव गृहांतरमन्यमन्यं देहं संचरंतः स्वाधिकारनिवर्तनायापरिमुषितस्मृतय एव देहेंद्रियप्रकृतिवशित्वान्निर्माय देहान्युगपत्क्रमेण वाधितिष्ठंति॥ न चैते जातिस्मरा इत्युच्यंते॥ त एवैत इति स्मृतिप्रसिद्धेः॥ ॥

त आह॥ सकृत्प्रवृत्तमिति यद्यपि ज्ञानिनां प्रारब्धातिरिक्तकर्माधीनं जन्मान्तरं स्यात्तदाज्ञानानुवृत्त्यभावः स्यान्नैतदस्ति किंतु बहुजन्मफलाय सकृद्रूढं प्रारब्धं ते सपर्यंति जन्मग्रहणेपि ज्ञानयोगबलान्न शोचंति प्रारब्धसमाप्तौ मुच्यंत इत्यर्थः॥ ज्ञानिनां जन्मांतरस्य पूर्वजन्महेतुप्रारब्धाधीनतयाऽलुप्तस्मृतित्वे हेतुः॥ यो ह्यजातिस्मरत्वे सति कर्मांतराधीनजन्मांतरवान् स लुप्तस्मृतिरिति व्याप्तेः ज्ञानिषु व्यापकाभावाद्विशिष्टव्याप्याभावसिद्धिः॥ ननु तेषां जातिस्मरत्वादलुप्तस्मृतित्वमन्यथासिद्धमित्यत आह॥ न चैत इति॥ तथा च तेषामजातिस्मरत्वरूपविशेषणे सति विशेष्याऽभावादेव विशिष्टाभावसिद्धिरित्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा·भा· पूर्वदेहनामप्रत्यभिज्ञानहीनाः परतंत्राः साभिमानाजातिस्मराः आधिकारिकास्तु पूर्वनामानः स्वतंत्रा निरभिमानाइति वैषम्यं॥ तेनजनकेनसहव्यु अ·पा·
र·प्र·दी· घविवादंकृतवेत्यर्थः॥ विदुषः प्रारब्धातिरिक्तकर्माभावान्नबंधः॥ निमित्ताभावेनैमित्तिकाभावइतिन्यायात्तुगृहीतानांज्ञानान्युक्तिश्रुतीनांनस्तुतिमात्रत्व ३ ३
३५७ मितीममसर्थमुपपादयति॥ यदिह्युपयुक्त इत्यादिना॥ श्रुतिस्मृत्युक्तार्थयुक्तिमप्याह॥ नचाविद्येति॥ विद्यादिक्लेशदाहात्तत्कार्यकर्मक्षयश्चेत्यहिप्रा

यथाहिसुलभानामब्रह्मवादिनीजनकेनविवदितुकामा व्युदस्यस्वंदेहंजानकमाविश्यव्युद्यतेनपश्चात्स्वमेवदेहमाविवेशेतिस्म र्यते॥ यदिह्युपयुक्तेसकृत्प्रवृत्तेकर्मणिकर्मांतरंदेहांतरारंभकारणंआविर्भवेत्ततोन्यदप्यदग्धबीजंकर्मांतरंतद्वदेवप्रसज्येतेति ब्रह्मविद्यायाःपाक्षिकंमोक्षहेतुत्वमहेतुत्वंवाशंकेत॥ नत्वियमाशंकायुक्ताज्ञानात्कर्मबीजदाहस्यश्रुतिस्मृतिप्रसिद्धत्वात्॥ त थाहिश्रुतिः॥ भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः॥ क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरइति॥ स्मृतिर्लंभेसर्वग्रंथीनांवि प्रमोक्षइतिचैवमाद्या॥ स्मृतिरपि॥ यथैधांसिसमिद्धोग्निर्भस्मसात्कुरुतेर्जुन॥ ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथेति॥ बीजान्यग्न्युपदग्धानिनरोहंतियथापुनः॥ ज्ञानदग्धैस्तथाक्लेशैर्नात्मासंपद्यतेपुनरितिचैवमाद्या॥ नचाविद्यादिक्लेशदाहेस ति क्लेशबीजस्यकर्माशयस्यैकदेशदाहएकदेशप्ररोहश्चेत्युपपद्यते॥ नह्यग्निदग्धस्यशालिबीजस्यैकदेशप्ररोहोदृश्यते॥ प्रवृत्तफलस्यतुकर्माशयस्यमुक्तेष्वोरिववेगक्षयान्निवृत्तिः॥ तस्यतावदेवचिरमितिशरीरपातक्षेपकरणात्॥ तस्मादुपपन्ना यावदधिकारमाधिकारिकाणामवस्थितिः॥ नचज्ञानफलस्यानैकांतिकता॥ तथाचश्रुतिरविशेषेणैवसर्वेषांज्ञानान्मोक्षंद र्शयति॥ तद्योयोदेवानांप्रत्यबुध्यतसएवतदभवत्तथर्षीणांतथामनुष्याणामिति॥ ज्ञानांतरेषुचैश्वर्यादिफलेष्वासक्ताःस्युर्महर्षयः तेपश्चादैश्वर्यक्षयदर्शनेननिर्विण्णाःपरमात्मज्ञानेपरिनिष्ठाः कैवल्यंप्रपुरित्युपपद्यते॥ ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे॥ पाप ३५७

रब्धस्यकथंस्थितिस्तत्राह॥ प्रवृत्तफलस्येति॥ विदुषोदेहपातावधिश्रुतेरनुभवाच्चज्ञानस्यावरकाज्ञानांशनिवर्तकस्यप्रारब्धविक्षेपस्थित्यनुकूला ज्ञानांशनिवर्तनसामर्थ्याभावसिद्धेर्भोगेनैवप्रारब्धक्षयइतिभावः॥ ज्ञानिनामाधिकारिकत्वंकथमित्याशंक्यज्ञानात्कृतोपासनादिवशादित्याह॥ ज्ञा नांतरेष्वचेति॥ प्रतिसंचरोमहाप्रलयः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

परस्य हिरण्यगर्भस्य अधिकारान्ते साक्षात्कृतात्मानो मुच्यंत इत्यर्थः॥ ब्रह्मभावफलस्यापि भावित्वमाकाशीति श्रुतिबाधमाह॥ नहीति॥ तस्मान्निर्गुणविद्यायां मार्गानुपसंहार इति सिद्धं॥३२॥ अक्षरधियां॥ अत्राक्षरब्रह्मप्रमापका निषेधशब्दा विषयास्तेसु यत्र यावंतः श्रुतास्तत्र तावतामशेषद्वैतनिषेधकत्वसंभवासंभवाभ्यां संशयमाह॥ नासामिति॥ यथा निर्गुणविद्यायां मार्गस्यानपेक्षितत्वादनुपसंहारस्तथा श्रुतनिषेधानामुपलक्षणतया सर्वद्वैतनिषेधसंभवात्

परस्यान्ते कृतात्मानः प्रविशंति परं पदमिति स्मरणात्॥ प्रत्यक्षफलत्वाच्च ज्ञानस्य फलविरहाशंकानुपपत्तिः॥ कर्मफले हि स्वर्गादावनुभवानारूढे स्यादाशंका भवेद्वा न वेति॥ अनुभवारूढं तु ज्ञानफलं यत्साक्षादपरोक्षाद्ब्रह्मेति श्रुतेः तत्त्वमसीति च सिद्धवदुपदेशात्॥ नहि तत्त्वमसीत्यस्य वाक्यस्यार्थस्तत्त्वं मृतो भविष्यसीत्येवं परिणेतुं शक्यः॥ तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति च सम्यग्दर्शनकालमेव तत्फलं सर्वात्मत्वं दर्शयति॥ तस्मादैकांतिकी विदुषः कैवल्यसिद्धिः॥३२॥१९॥ अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तं॥३३॥ वाजसनेयके श्रूयते॥ एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमित्यादि॥ तथाथर्वणे श्रूयते॥ अथ परा यया तदक्षरमधिगम्यते॥ यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमित्यादि॥ तथैवान्यत्रापि विशेषनिराकरणद्वारेणाक्षरं परं ब्रह्म श्राव्यते॥ तत्र च क्वचित्केचिदतिरिक्ता विशेषाः प्रतिषिध्यंते॥ तासां विशेषप्रतिषेधबुद्धीनां किं सर्वासां सर्वत्र प्राप्तिः उत व्यवस्थेति संशये श्रुतिविभागाद्व्यवस्थाप्राप्तौ उच्यते॥ अक्षरविषयास्तु विशेषप्रतिषेधबुद्धयः सर्वाः सर्वत्रावरोद्धव्याः॥ सामान्यतद्भावाभ्यां॥ समानो हि सर्वत्र विशेषनिराकरणरूपो ब्रह्मप्रतिपादनप्रकारस्तदेव च सर्वत्र प्रतिपाद्यं ब्रह्माभिन्नं प्रत्यभिज्ञायते॥ तत्र किमित्यन्यत्र कृता बुद्धयोऽन्यत्र न स्युः॥ तथा चानंदादयः प्रधानस्येत्यत्र व्याख्यातं॥ तत्र विधिरूपाणि विशेषणानि चिंतितानि इह प्रतिषेधरूपाणीति विशेषः॥

१ शाखांतरीयनिषेधशब्दानामनपेक्षितत्वादनुपसंहार इति दृष्टांतेन पूर्वपक्षस्तत्र लाघवं फलं सिद्धांते तु दोषद्वयाभावः फलं तथाहि यदि श्रुतशब्दैरश्रुतनिषेधा लक्ष्यंते तदा लक्षणादोषः यदि न लक्ष्यंते तदा सर्वद्वैतनिषेधासिद्धेर्निर्विशेषप्रमित्यभावदोष इति विवेकः॥ अक्षरे धर्मिणि द्वैतनिषेधधियोऽक्षरधियस्तद्वतः शब्दा इति यावत्तासामवरोध उपसंहार इति सूत्रयोज

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू·भा· त·प्र·टी· २५८

तया३

॥शेषिब्रह्मणःसर्वशाखासुभावात्तत्प्रमितेः समानत्वाच्छेषाणामुपसंहारइति चेत्तर्हिन्यायसाम्यान्‌ पुनरुक्तिनादवस्थ्यमित्यतआह॥प्रपं॥ अ·पा· २ ३
चार्थइति॥ आनंदादीनांस्वरूपत्वादस्तूपसंहारः निषेधानामनात्मत्वादानंत्याच्चानुपसंहारइत्यधि——काशंकायांतेषामनात्मत्वेपिनिर्विशेषब्र
ह्मप्रमित्यर्थत्वादविद्यातज्जनिषेधत्वेनसंग्रहसिद्धेश्चनिरपेक्षास्थूलानणुवाक्यस्थैकृत्स्ननिषेधशब्दानामन्यत्रश्रुतनिषेधवाक्यैकवाक्यतयोप॥
संहारइतिचिंतायुक्तेत्यर्थः॥ अन्यत्रश्रुतशेषाणांअन्यत्रस्य शेषिसंबंधेदृष्टांतंव्याचष्टे॥यथेति॥जमदग्निःपुष्टिकामश्चतूरात्रेणायजतइत्युप
क्रम्यविहितःजमदग्निनाक्रांतोजामदग्न्यअहीनश्चतुरात्रःक्रतुस्तस्मिन्पुरोडाशिन्यउपसदोभवंतीतिपुरोडाशसाध्याइष्टयस्तैत्तिरीयकेविहि
तास्तासामध्वर्युकर्तृकत्वात्सामवेदोत्पन्नमंत्राणांतासुविनियोगादध्वर्युणैवप्रयोगोनोद्गात्रेत्यर्थः॥वेर्देवगणस्यहोत्रंअध्वरंचकर्माग्नेस्त्वन्न

प्रपंचार्थश्चायंचिंताभेदः॥ औपसदवदितिनिदर्शनं॥यथाजामदग्न्येऽहीनेपुरोडाशिनीषूपसत्सुचोदिता
सुपुरोडाशप्रदानमंत्राणामग्नेर्वेर्होत्रंवेरध्वरमित्येवमादीनामुद्गातृवेदोत्पन्नानामप्यध्वर्युभिरभिसंबंधोभव
ति॥अध्वर्युकर्तृकत्वात्पुरोडाशप्रदानस्य॥प्रधानतंत्रत्वाच्चांगानांएवमिहाप्यक्षरतंत्रत्वात्तद्विशेषणानांयत्रक्व
चिदप्युत्पन्नानामक्षरेणसर्वत्राभिसंबंधइत्यर्थः॥तदुक्तंप्रथमेकांडे गुणमुख्यव्यतिक्रमेतदर्थत्वान्मुख्ये
नवेदसंयोगइत्यत्र ॥ ३३ ॥ २० ॥ ॥

सू१

एवेत्यग्ना मंत्रणमंत्रार्थः॥उत्पत्तिविधिर्गुणःफलापेक्षत्वादुत्पन्नस्यफलेविनियोगविधिर्मुख्यःसफलत्वात्तथाचमंत्राणामुद्गातृवेदोत्पन्नत्वादु ताण्ड्य· २५८
द्गात्राप्रयोगः॥विनियोगविधिनाध्वर्युणाप्रयोगइतिगुणमुख्ययोर्व्यतिक्रमेविरोधेसतिमुख्येनबलीयसामंत्रात्मकवेदस्याध्वर्युणासंप्रयोगउत्पत्तेर्विनियो
गार्थत्वादितिजैमिनिसूत्रार्थः॥यद्यपिशाबरभाष्येवारवंतीयादिसाम्नामुच्चैःस्वरकसामवेदोत्पन्नत्वाद्राधानांगत्वेनोच्चैःस्वरप्रयोगः॥यएवंविद्वान्वारवंती
यंगायतियज्ञायज्ञीयंगायतिवामदेव्यंगायतीत्याधानेतेषांविनियोगविधिनायाजुर्वेणयाजुषस्योपांशुस्वरस्यप्रयोगइतिगुणमुख्ययोर्विरोधेसत्युत्पत्तेर्वि॥
नियोगार्थत्वान्मुख्यविनियोगबलेनसाम्नांयजुर्वेदस्वरसंयोगइतिसूत्रंव्याख्यातंतथापिन्यायसाम्यादौपसदमंत्राःसूत्रविषयत्वेनोदाहृताइत्यविरोधः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इयदामननात्॥मंत्रद्वयेपिप्रतिपादनप्रकारभेदाज्ज्ञेयैकत्वाभानाच्चसंशयमाह॥किमत्रेति॥ऋतपानवाक्येक्षरंब्रह्मयत्परमितिगुणाःश्रुताःसुपर्णवाक्येऽनश्नत्वादय
स्तेषांमिथोनुपसंहारइतिपूर्वपक्षफलंसिद्धांतेत्वसंसारिब्रह्मस्वरूपवाक्यार्थैक्यादुपसंहारइतिविवेकः अस्तुवेद्यैक्यात् अक्षरधियामुपसंहारइहतुवेद्यभेदान्नोपसं

॥इयदामननात्॥३४॥द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते॥तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीतीत्यध्यात्माधिकारेमंत्रंआथर्वणिकाःश्वेताश्वतराश्चपठंति॥तथाकठाःऋतंपिबंतौसुकृतस्यलोकेगुहांप्रविष्टौपरमेपरार्धे॥छायातपौब्रह्मविदोवदंतिपंचाग्नयोयेचत्रिणाचिकेताइति॥किमत्रविद्यैकत्वंउतविद्यानानात्वंइतिसंशयः॥किंतावत्प्राप्तंविद्यानानात्वमिति॥कुतःविशेषदर्शनात्॥द्वासुपर्णेत्यत्रह्येकस्यभोक्तृत्वंदृश्यते॥एकस्यचाभोक्तृत्वं॥ऋतंपिबंतावित्यत्रउभयोरपिभोक्तृत्वमेवदृश्यतेतद्वेद्यरूपंभिद्यमानंविद्यांभिद्यात्इत्येवंप्राप्तेब्रवीति॥विद्यैकत्वमिति॥कुतःयतउभयोरप्यनयोर्मंत्रयोरियत्तापरिच्छिन्नंद्वित्वोपेतंवेद्यरूपमभिन्नमामनंति॥ननुदर्शितोरूपभेदोनेत्युच्यते॥उभावप्येतौमंत्रौजीवद्वितीयमीश्वरंप्रतिपादयतोनार्थांतरं॥द्वासुपर्णेत्यत्रतावत्अनश्नन्नन्योअभिचाकशीतीत्यशनायाद्यतीतःपरमात्माप्रतिपाद्यते॥वाक्यशेषेपिचसएवप्रतिपाद्यमानोदृश्यते॥जुष्टंयदापश्यत्यन्यमीशमस्यमहिमानमिति॥ऋतंपिबंतावित्यत्रतुजीवेपिबत्यशनायाद्यतीतःपरमात्मापिसाहचर्याच्छत्रिन्यायेनपिबतीत्युपचर्यते॥परमात्मप्रकरणंह्येतत्॥अन्यत्रधर्मादन्यत्राधर्मादित्युपक्रमात्॥तद्विषयएवचात्रापिवाक्यशेषोभवति॥यःसेतुरीजानानामक्षरंब्रह्मयत्परमिति॥गुहांप्रविष्टावात्मानौहीत्यत्रचैतत्प्रपंचितं॥तस्मान्नास्तिवेद्यभेदः॥तस्माच्चविद्यैकत्वं॥अपिचत्रिष्वप्येतेषुवेदांतेषुपौर्वापर्यालोचनेपरमात्मविद्यैवावगम्यते॥तादात्म्यविवक्षयैवजीवोपादानंनार्थांतरविवक्षया॥नचपरमात्मविद्यायांभेदाभेदविचारावतारोस्तीत्युक्तं॥तस्मात्प्रपंचार्थएवैषयोगः॥तस्माच्चाधिकधर्मोपसंहारइति॥३४॥२१॥

हारइतिप्रत्युदाहरणेनपूर्वपक्षःनन्वयंगुहाधि
करणेनिरस्तइतिचेन्नसत्यंकिंतुपिबत्पदस्यमुख्यार्थत्वायसत्तःकल्पनयाचपानकर्तृत्वाश्रयोबुद्धिजीवौपिबंतौग्राह्यौसुपर्णौतुजीवेश्वरावित्यधिकाशंकायांमं
त्रद्वयेपिद्विवचनशब्दसामान्याद्दौस्तिकद्वित्वविशिष्टतयातुल्यवस्तुद्वयप्रत्यभिज्ञानस्यबाधकाभावात्प्रकरणाद्यनुग्रहाच्चजीवानुवादेनासंसारिब्रह्म
णिमंत्रद्वयतात्पर्यमितिप्रपंचार्थमिदंसूत्रमितिभावः॥३४॥२१॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अंतराभूतग्रामवत्स्वात्मनः घटादिकं चिद्विषयत्वेनापरोक्षं ब्रह्मत्तु साक्षादविषयत्वेनापरोक्षमिति प्रथमार्थे पंचमी॥ अत्रश्रुतावात्मधर्मोऽपरोक्षत्वं ब्रह्म
ण्युक्तं ब्रह्मधर्मः सर्वांतरत्वमात्मन्युक्तं तेन तयोरैक्यं दृढीकृतं मंतव्यं॥ तत्त्वेव्याचक्षेत्युषस्तप्रश्नेयाज्ञवल्क्येन प्राणादिप्रेरकोद्रष्ट्यादिसाक्षीप्रतिपादितः तथैव

अंतराभूतग्रामवत्स्वात्मनः॥ ३५॥ यत्साक्षादपरोक्षाद्ब्रह्मय आत्मा सर्वांतर इत्येवं द्विरुषस्तकहोलप्रश्नयोर्नैरंतर्येण वाजसनेयिनः समा
मनंति॥ तत्र संशयः॥ विद्यैकत्वं वास्याद्विद्यानानात्वं वेति॥ विद्यानानात्वमिति तावत्प्राप्तं॥ अभ्याससामर्थ्यादन्यथा ह्यन्यूनानतिरिक्तार्थे द्विराम्ना
नमनर्थकमेव स्यात्॥ तस्माद्यथाभ्यासात्कर्मभेदः॥ एवमभ्यासाद्विद्याभेद इत्येवं प्राप्ते प्रत्याह॥ अंतराम्नानाविशेषात्स्वात्मनो विद्यैकत्वमि
ति॥ सर्वांतरो हि स्व आत्मोभयत्राप्यविशिष्टः पृच्छ्यते च प्रत्युच्यते च॥ न हि द्वावात्मानावेकस्मिन्देहे सर्वांतरौ भवतः॥ न दाह्येकस्यांजसं सर्वांत
रत्वमवकल्पेत॥ एकस्यतु भूतग्रामवन्नैव सर्वांतरत्वं स्यात्॥ यथा च पंचभूतसमूहे पृथिव्या आपोंतरा अद्भ्यस्तेजोंतरमिति सत्यप्या
पेक्षिकेंतरत्वे नैव मुख्यं सर्वांतरत्वं भवति॥ तथेहापीत्यर्थः॥ अथवा भूतग्रामवदिति श्रुत्यंतरं दर्शयति॥ यथा एको देवः सर्वभूतेषु गू
ढः सर्वव्यापी सर्वभूतांतरात्मेत्यस्मिन्मंत्रे समस्तेषु भूतग्रामेष्वेक एव सर्वांतर आत्मा आम्नायते एवमनयोरपि ब्राह्मणयोरित्यर्थः।
तस्माद्वेद्यैक्याद्विद्यैकामिति॥ ३५॥ अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशांतरवत्॥ ३६॥ अथ यदुक्तमनभ्युपगम्यमाने विद्याभेदे आम्नान
भेदानुपपत्तिरिति तत्परिहर्तव्यं॥ अत्रोच्यते नायं दोषः॥ उपदेशांतरवदुपपत्तेः॥ यथा तांडिनामुपनिषदि षष्ठे प्रपाठके स आत्मा तत्त्वमसि श्वे
तकेतो इति नवकृत्वोप्युपदेशे न विद्याभेदो भवति एवमिहापि भविष्यति॥ कथं च नवकृत्वोप्युपदेशे विद्याभेदो न भवति॥ उपक्रमोप।
संहाराभ्यामेकार्थतावगमात्॥ भूय एव मा भगवान्विज्ञापयत्विति चैकस्यैवार्थस्य पुनः पुनः प्रतिपिपादयिषितत्वेनोपक्षेपात्॥ आशंकां
तरनिराकरणेन चाऽसकृदुपदेशोपपत्तेः॥

यदेव साक्षादपरोक्षाद्ब्रह्मय आत्मा सर्वांतरस्तन्मे व्याचक्ष्वेति कहोलप्रश्नेऽशनायाद्यतीतः प्रतिपादितस्तत्र
ब्राह्मणद्वयेपि प्रश्नाद्यभ्यासात्सर्वांतरत्वप्रत्यभिज्ञानाच्च संशये मंत्रयोर्वेद्यैक्याद्वस्तु विद्यैक्यं इह तु ब्राह्मणयोर्वेद्यैक्येपि अभ्यासाद्विद्याभेदः प्रजत्यभ्यासान्नयाजभेदवदि
ति प्रत्युदाहरणेन पूर्वपक्षस्तत्र मिथो धर्मानुपसंहारः फलं सिद्धांते नूपसंहार इति विवेकः॥ द्वयोः सर्वांतरत्वानुपपत्त्या नावद्ब्राह्मणयोरेकवस्तुपरत्वं सिद्धं तथा च वे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नन्वन्यथाविद्यैक्यांगीकारेभ्यासानुपपत्तिरितिचेदुच्यते स एवाभ्यासः कर्मभेदकोयोनिरर्थकः इहतूषस्तब्राह्मणोक्तात्मनएवाशनायाद्यत्ययरूपविशेषक
थनार्थत्वादभ्यासोन्यथासिद्धोनविद्याभेदकइतिसमुदायार्थः।३६।।२२।। व्यतिहारः।। जीवेशयोर्मिथोविशेषणविशेष्यभावोव्यतिहारस्तस्याम्नातत्वादुक्तं।

एवमिहापिप्रश्नरूपाभेदादतोन्यदार्त्तमितिचपरिसमाप्त्यविशेषादुपक्रमोपसंहारौतावदेकार्थविषयौदृश्येते।। यदे
वसाक्षादपरोक्षात्ब्रह्मेतिद्वितीयेप्रश्नेएवकारंप्रयुंजानःपूर्वप्रश्नगतमेवार्थमुत्तरत्रानुकृष्यमाणंदर्शयतिपूर्वस्मिंश्चब्राह्म
णेकार्यकरणव्यतिरिक्तस्यात्मनःसद्भावःकथ्यते।।उत्तरस्मिंस्तुतस्यैवाशनायादिसंसारधर्मातीतत्वंकथ्यतइतिएकार्थतोपप
त्तिः।।तस्मादेकाविद्येति।।३७।।२२।। व्यतिहारोविशिंषंतिहीतरवत्।।३७।। तद्योहंसोसौयोसौसोहमित्यादित्यपुरुषंप्रकृत्यए
तरेयिणः समामनंति।।तथाजावालास्तुत्वंवाअहमस्मिभगवोदेवतेअहंवैत्वमसीति।।तत्रसंशयः।। किमिहव्यतिहा
रेणोभयरूपामतिःकर्त्तव्याउतैकरूपैवेतितावदाह।।नह्यत्रात्मनईश्वरेणैकत्वमुक्त्वान्यत्किंचिच्चिंतयितव्यमस्ति।।यदिचै
वंचिंतयितव्याविशेषःपरिकल्प्येतसंसारिणश्चेश्वरात्मत्वंईश्वरस्यचसंसार्यात्मत्वमिति।।तत्रसंसारिणस्तावदीश्वरात्मत्वेउ
त्कर्षोभवेत्।।ईश्वरस्यतुसंसार्यात्मत्वेनिकर्षःकृतःस्यात्।।तस्मादेकरूप्यमेवमतेर्व्यतिहाराम्नायस्त्वेकत्वदृढीकारार्थ
इत्येवंप्राप्तेप्रत्याह।।व्यतिहारोयमाध्यानायाम्नायतेइतरवत्।।यथेतरेगुणाःसर्वात्मत्वप्रभृतयआध्यानायाम्नायंतेत
द्वत्।।तथाहिविशिंषंतिसमाम्नातारः।।उभयोच्चारणेनत्वमहमस्मिअहंचत्वमसीति।।तच्चोभयरूपायांमतौकर्तव्यायामर्थ
वद्भवति।।अन्यथाहीदंविशेषेणोभयाम्नानमनर्थकंस्यात्एकेनैवकृतत्वात्।।ननूभयाम्नानस्यार्थविशेषपरिकल्प्यमानेदेव
तायाःसंसार्यात्मत्वापत्तेर्निकर्षःप्रसज्येतेत्युक्तं।। ११ दृष्टिर्निकृष्टेकृताफलवतीतिन्यायाच्चसंशयेजीवेईश्वरत्वमतिरेवकार्याउक्तन्यायात्

व्यतिहारश्रुतिस्तुतस्याएवदृढीकरणार्थत्वेनाभ्यासवदन्यथासिद्धेतिदृष्टांतेनपूर्वपक्षः।।तत्रलाघवंफलंसिद्धांतेश्रुत्यर्थवत्वमितिविवेकः।।एकेनैवत्वमहम
स्मीत्युच्चारणेनैकत्वमतेःकृतत्वादहंत्वमसीतिवृथास्यादित्यर्थः।।उक्तदोषंस्मारयति।।नन्विति।।

संदिग्धेर्थेन्यायःसावकाशः इहतुश्रुतत्वादन्योन्यात्मत्वंध्येयंब्रह्मणिमनोमयत्वादिवत्जीवात्मत्वस्यध्यानार्थंआरोपेपिनिकर्षप्रसक्त्यभावादितिपरिहर।
तिनैषदोषइतिब्रह्मणिनिकर्षंहित्वाजीवतादात्म्यध्यानेमदुक्तमेवागतमितिशंकतेनन्वेवमितिमतेर्हिरूपत्वंत्वदुक्तमस्माभिरुच्यतेध्यानपरंवाक्यमि
दमेकत्वंतुमानांतराविरोधात्सिध्यतीतिसमाधत्ते॥ नवयमिति॥ अहंग्रहोपास्तिष्वयंव्यतिहारःउपसंहर्तव्यइत्याह॥ तस्मादिति॥ ३७॥ ३८॥ सैवहिस
त्यादयः॥ सयःकश्चिदधिकारीमहद्यापकंयक्षंपूज्यंभौतिकेषुप्रथमजमेतंसच्चत्यच्चेतिसत्यंब्रह्महिरण्यगर्भाख्यंवेदोपास्तेतस्यलोकजयःफलमित्य
र्थः॥ सत्यमितिनामअक्षरंसतियमितितत्रप्रथमोत्तमेअक्षरेसत्यंमध्यस्थमक्षरमनृतमुभयतःसत्येनसंपुटितत्वात्सत्यप्रायमेवभवतीतिनामास्य।

नैषदोषः॥ ऐकात्म्यस्यैवानेनप्रकारेणानुचिंत्यमानत्वात्॥ नन्वेवंसतिसएवैकत्वदृढीकारआपद्येत॥ नवयमेकत्वदृढीकारं
वारयामः॥ किंतर्हिव्यतिहारेणेहद्विरूपामतिःकर्तव्यावचनप्रामाण्यात्नैकरूपेत्येतावदुपपादयामः॥ फलतस्त्वेकत्वमपिदृ
ढीभवति॥ यथाध्यानार्थेपिसत्यकामादिगुणोपदेशेनतद्गुणईश्वरःप्रसिध्यतितद्वत्॥ तस्मादयमाध्यानव्योव्यतिहारःसमानेच
विषयेउपसंहर्तव्योभवति॥ ३७॥ ३८॥ सैवहिसत्यादयः॥ ३९॥ सयोहैतंमहद्यक्षंप्रथमजंवेदसत्यंब्रह्मेत्यादिनावाजसनेय
केसत्यविद्यांसनामाक्षरोपासनांविधायानंतरमाम्नायते॥ तद्यत्तत्सत्यमसौसआदित्योयएषएतस्मिन्मंडलेपुरुषोयश्चायं
दक्षिणेक्षन्पुरुषइत्यादि॥ तत्रसंशयः॥ किंद्वेएतेसत्यविद्येकिंवैकैवेति॥ द्वइतितावत्प्राप्तंभेदेनहिफलसंयोगोभवतिजय
तीमांल्लोकानितिपुरस्ताद्धंतिपाप्मानंजहातिचयएवंवेदेति॥ उपरिष्टात्प्रकृताकर्षणंतूपास्यैकत्वादित्येवंप्राप्तेब्रूमः॥ ९

अन्यपुस्तकेषुत्वेवंपाठोदृश्यते जहातिचेत्युपरिष्टात् इति=१

रोपासनासत्यविद्यांगत्वेनोक्ता॥ यत्तत्पूर्वप्रकृतहृदयाख्यंतत्सत्प्रत्युक्तयक्षत्वादिगुणकंसोसावादित्यमंडलेक्षिणिचपुरुषस्तस्याहरित्यहमितिच।
नामद्वयज्ञानात्पाप्मक्षयःफलमित्यर्थः॥ अत्रपूर्वोत्तरवाक्ययोःफलभेदश्रुतेःप्रकृताकर्षणाच्चसंशयमाह॥ तत्रेति॥ पूर्वपक्षेगुणानांव्यवस्थयानुष्ठानं
सिद्धांतेत्वनुष्ठानैक्यमितिफलं॥ यथाजीवेशयोरन्योन्यात्मत्वश्रुतिभेदात्मतिद्वैरूप्यमुक्तंतथात्रफलश्रुतिभेदाद्विद्याभेदइतिदृष्टांतेनपूर्वपक्षयति॥ राम· ३५०
द्वइति॥ विशेष्यब्रह्ममात्राकर्षणमयुक्तंतद्यत्तदितिसर्वनामभिःपूर्वोक्तगुणविशिष्टंब्रह्मआकृष्यादित्याक्षिस्थानादिगुणविधानात्तथाचवाक्यादेवावि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सिद्धांतयति॥ एकैवेति॥ यथा दहरशांडिल्यविद्ययोर्ब्रह्मैक्यप्रत्यभिज्ञानमात्रं न तथात्रेत्याह॥ नैत दिति॥ कारणांतरं प्रकरणभेदादिकं एवं विद्याभेदेप्येतत्
दुपास्यैक्यज्ञानं स्यादत्र तूभयथा संभवे विद्यैक्यनानात्वसंशये सत्यमित्युपास्यरूपैक्यज्ञानाद्विद्यैक्यनिश्चय इत्यक्षरार्थः॥ असत्यपवादकारणेरूपै
क्याद्विद्यैक्योत्सर्गसिद्धिः न च फलभेदोऽपवादः अंगे फलश्रुतेः स्तुतिमात्रत्वेनया फलभेदासिद्धिरित्याह॥ यत्तु नरित्यादिना किंच यत्र प्रधानविधावेवं का
मइति फलं श्रुतं तत्र प्रधानफलेनैवांगानां फलाकांक्षानिवृत्तेरंगे फलश्रुतेः स्तुतिमात्रत्वं दहरतु प्रथमजं सत्यं ब्रह्मेति वेदेति प्रधानविद्याविधिस्थत्वं।

एकैवेयं सत्यविद्येति॥ कुतः तद्यत्तत्सत्यमितिप्रकृताकर्षणात्॥ ननु विद्याभेदेपि प्रकृताकर्षणमुपास्यैकत्वादुपपद्यत इत्युक्तं॥
नैतदेवं॥ यत्र तु विस्पष्टात्कारणांतरात् विद्याभेदः प्रतीयते तत्रैतदेवं स्यात्॥ अत्र तूभयथा संभवे तद्यत्तत्सत्यमिति प्रकृताकर्षणात् पूर्व
विद्यासंबद्धमेव सत्यमुत्तरत्राकृष्यत इति एकविद्यात्वनिश्चयः॥ यत्तु नरुक्तं फलांतरश्रवणात् विद्यांतरमिति॥ अत्रोच्यते॥ तस्यो
पनिषदहरहमिति चांगांतरोपदेशस्य स्तावकमिदं फलांतरश्रवणमित्यदोषः॥ अपि चार्थवादादेव फले कल्पयितव्ये सति वि
द्यैकत्वे चावयवेषु श्रूयमाणानि बहून्यपि फलानि अवयविन्यामेकविद्यायामुपसंहर्तव्यानि भवंति॥ तस्मात्सैवेयमेका सत्यविद्या तेन
तेन विशेषेणोपेताम्नातेत्यतः सर्व एव सत्यादयो गुणा एकस्मिन्नेव प्रयोग उपसंहर्तव्याः॥ केचित्तु नरस्मिन्सूत्रे इदं च वाजसनेयकमक्ष्या
दित्यपुरुषविषयं वाक्यं छांदोग्ये च अथ य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यते अथ य एषोंतरक्षिणि पुरुषो दृश्यत इत्युदाहृत्य सै
वेयमस्यादित्यपुरुषविषया विद्योभयत्रैकैवेति कृत्वा सत्यादीन् गुणान् वाजसनेयिभ्यः छंदोगानामुपसंहार्यानित्यमन्यंते तेन तन्न साधु ल
क्ष्यते॥ छांदोग्ये हि कर्मसंबंधिनीयमुद्गीथव्यपाश्रया विद्याविज्ञायते तत्रह्याद्यमध्यावसाने षुकर्मसंबंधिचिन्हानि भवंति॥ ❖ ॥

ज्योतिष्टोम१

लोकजयफलस्याप्युपेत्यास्मा भिर्नामरूपांगस्य फलश्रुतेः स्तुतित्वमुक्तं वस्तुतस्तु प्रधानविधावप्येवं कामपदाभावाद्गर्भिसत्रन्यायेन फले कल्पनी
ये सति प्रधाने तदंगे वा यत्किंचित्फलं श्रुतं तस्य सर्वस्यापि श्रुतत्वाविशेषाज्ज्ञानेष्टिफलन्यायेन समुच्चित्यैकप्रधानफलत्वकल्पनात्फलभेदोऽसिद्ध इ
त्याह॥ अपि चेति॥ सूत्रं योजयति॥ तस्मादिति॥ एकदेशिव्याख्यामुद्भाव्य दूषयति॥ केचिदित्यादिना। छांदोग्ये कर्मांगोद्गीथे हिरण्मयपुरुषदृष्टिरित्यत्र वि

पृथिव्यग्न्यात्मना दृष्टे ऋक्साम्ने गेष्णोतस्मादृक्साम गेष्णत्वात् पुरुष उद्गीथ इत्येवं विद्वाननुज्ञाता कर्मफलसमृद्धिसमर्थ इति श्रुत्यर्थः॥ सत्यविद्यानु-
नकर्मांगाश्रितेत्याह॥ नैवमिति॥ अंगविधानतः स्वतंत्रहिरण्यगर्भविद्यायाभेदान्नगुणोपसंहार इत्यर्थः॥३८॥ कामादी॥ सगुणनिर्गुणविद्ययोः श्रुताः सत्य

इयमेवर्गग्निः सामेत्युपक्रमेण तस्यर्क्चसाम च गेष्णौ तस्मादुद्गीथ इति मध्ये य एवं विद्वान्साम गायतीत्युपसंहारे। नैवं वाजसनेयके
किंचित्कर्मसंबंधिचिह्नमस्ति॥ तत्र प्रक्रमभेदाद्विद्याभेदे सति गुणव्यवस्थैव युक्तेति॥ २४॥ कामादीतरत्र तत्र चायतनादिभ्यः॥३९॥
अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोस्मिन्नंतराऽऽकाश इति प्रस्तुत्य छंदोगा अधीयते॥ एष आत्मापहतपाप्मा विजरो।
विमृत्युर्विशोको विजिघत्सोपिपासः सत्यकामः सत्यसंकल्प इत्यादि। तथा वाजसनेयिनः स वा एष महानज आत्मा योयं विज्ञा
नमयः प्राणेषु य एषोंतर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी इत्यादि। तत्र विद्यैकत्वं परस्परगुणयोगश्च किं वा नेति संश
ये विद्यैकत्वमिति॥ तत्रेदमुच्यते॥ कामादीति॥ सत्यकामादीत्यर्थः॥ यथा देवदत्तो दत्तः सत्यभामा भामेति॥ यदेतच्छांदोग्ये हृ
दयाकाशस्य सत्यकामत्वादि गुणजातमुपलभ्यते तदितरत्र वाजसनेयके स वा एष महानज आत्मा इत्यत्र संबध्येत। यच्च वाज
सनेयके वशित्वाद्युपलभ्यते तदपीतरत्र छांदोग्य एष आत्मापहतपाप्मेत्यत्र संबध्येत॥ आयतनादिसामान्यात्॥ समानं ह्युभय
त्रापि हृदयमायतनं समानश्च वेद्य ईश्वरः समानं च तस्य सेतुत्वं लोकासंभेदप्रयोजनमित्येवमादि बहु सामान्यं दृश्यते॥ ननु वि
शेषोपि दृश्यते छांदोग्ये हृदयाकाशस्य गुणयोगो वाजसनेयके त्वाकाशाश्रयस्य ब्रह्मण इति॥ न॥ दहर उत्तरेभ्य इत्यत्र छां
दोग्येपि आकाशशब्दं ब्रह्मैवेति प्रतिष्ठापितत्वात्॥ अयं त्वत्र विद्यते विशेषः॥ सगुणा हि ब्रह्मविद्या छांदोग्य उपदिश्यते॥ अथ
य इहात्मानमनुविद्य व्रजंत्येतांश्च सत्यान्कामानित्यात्मवत्कामानामपि वेद्यत्वश्रवणात्॥

कामाद्यो वशित्वादयश्च गुणा मिथ उपसंह
र्तव्या न वेत्युपसंहारस्य फलभावाभावाभ्यां संदेहे सत्यविद्याया एकत्वाद्गुणसांकर्ये प्यत्र विद्ययोः सगुणनिर्गुणारूपभेदेन भेदान्निर्गुणविद्यायां गुणो
पसंहारस्य फलाभावाच्चानुपसंहार इति बहिरेव प्राप्ते सिद्धांतयति॥ तत्रेदमित्यादिना॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं विद्याभेदे स्फुटे कथं गुणोपसंहारस्तत्राह॥ गुणवतस्त्विति॥ भिन्नविद्यास्थानामपि गुणानामायतनादिसाम्येन निर्गुणस्य त्वेबुद्धिस्थानां स्तुत्यर्थमुपसंहारो युक्तः ज्ञानस्तुतिप्रकर्षस्याकांक्षितत्वाद्यत्र क्वचिद्दृष्टगुणैः स्तुतेः कर्तुं योग्यत्वात् यद्यपि सगुणस्य सत्यकामादिषु निर्गुणस्य गुणांतर्भूतास्तथापि नोपसंहारो वैयर्थ्यं निर्गुणस्तावकत्वेन श्रुतगुणानामन्यत्राप्यध्येयत्वमिति शंकानिरासे लांतर्भावदार्थ्यार्थत्वादित्यनवद्यं॥ ३९॥ २५॥ आदराद लोपः॥ अत्र यच्छब्दाग्निहोत्रशब्दाभ्यां संशयमाह॥ तत्रेदं विचार्यत इति वैश्वानरोपासकेनातिथिभोजनात्प्राक् कार्य

वाजसनेयके तु निर्गुणमेव परं ब्रह्मोपदिश्यमानं दृश्यते॥ अत ऊर्ध्वं विमोक्षाय ब्रूहि असंगो ह्ययं पुरुष इत्यादिप्रश्नप्रतिवचनसमन्वयात्॥ वशित्वादि तु तत्स्तुत्यर्थमेव गुणजातं वाजसनेयके संकीर्त्यते॥ तथा चोपरिष्टात् स एष नेति नेत्यात्मेत्यादिना निर्गुणमेव ब्रह्मोपसंहरति॥ गुणवतस्तु ब्रह्मण एकत्वात् विभूतिप्रदर्शनाया यं गुणोपसंहारः सूत्रितो नोपासनायेति द्रष्टव्यं॥ ३९॥ २५॥ आदराद लोपः॥ ४०॥ छांदोग्ये वैश्वानरविद्यां प्रकृत्य श्रूयते॥ तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहेत्यादि॥ तत्र पंच प्राणाहुतयो विहितास्ता।सु च परस्तादग्निहोत्रशब्दः प्रयुक्तः स य एतदेवं विद्वानग्निहोत्रं जुहोतीति॥ यथेह क्षुधिता बाला मातरं पर्युपासते॥ एवं सर्वाणि भूतान्यग्निहोत्रमुपासत इति च॥ तत्रेदं विचार्यते किं भोजनलोपे लोपः प्राणाग्निहोत्रस्य उतालोप इति॥ तद्यद्भक्तमिति भक्तागमनसंयोगश्रवणाद्भक्तागमनस्य च भोजनार्थत्वाद्भोजनलोपे लोपः प्राणाग्निहोत्रस्येति॥ एवं प्राप्ते न लुप्येतेति तावदाह॥ कस्मात् आदरात्॥ तथा हि वैश्वानरविद्यायामेव जाबालानां श्रुतिः॥ ९

त्वेन विद्यांगप्राणाग्निहोत्रविचारात्स्यादसंगतिः पूर्वपक्षे भोजनलोपेपि द्रव्यांतरेण प्राणाग्निहोत्रानुष्ठानं सिद्धांते न त्वलोप इति भेदः॥ ननु यद्भक्तमितियच्छब्देन भोजनाक्षिप्तभक्तमनूद्य तद्धोमीयमिति होमसंयोगविधानादाक्षेपकभोजनलोपेन तदाक्षिप्तभक्ताश्रितहोमलोप इति सिद्धांती शंकते॥ नद्यदिति॥ निर्गुणस्योपास्तिलोपेपि स्तुत्यर्थगुणस्येयर्यवद्भोजनलोपेपि प्राणाग्निहोत्रस्यादरेण स्तुतिनिर्वाहार्थमलोप इति दृष्टांतेन पूर्वपक्षसूत्रेणप

सिद्धमिति॥ एवंप्राप्त इति॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं तर्हि स्वयं प्राणाग्निहोत्रं भुक्त्वातिथीनां तत्कारणमित्यर्थः॥ उक्तं स्मारयित्वा परिहरति नत्वित्यादिना॥ यथा कुंडपायिसत्रगते मासाग्निहोत्रे अग्नि
होत्रशब्दाद्गौणान्नित्याग्निहोत्रवाचकान्नित्याग्निहोत्रधर्माणां पयोद्रव्यादीनां प्राप्तिस्तथेहापि प्राणाहुतीष्वग्निहोत्रशब्दवत् पयोद्रव्यादीनामुत्सर्गतः प्राप्तौ सत्यां
भोजनार्थभक्तद्रव्यविधिनापवादः कृतः॥ अतो भक्तविधेरपवादार्थत्वाद्भोजनलोपे भक्ताख्यगुणस्यांगस्य लोपेपि न मुख्यस्याग्निहोत्रस्य लोपः अपवादाभावे तु
त्सर्गप्राप्तपय आदिना तस्य निष्पत्तिसंभवादिति प्राप्तमित्यर्थः॥ गुणलोपेन मुख्यस्येति जैमिनिसूत्रं आधाने संतिपवमानेष्टयस्तत्राग्नये पवमानाय पुरोडाश

पूर्वोतिथिभ्योश्नीयात् यथा ह वै स्वयमहुत्वाग्निहोत्रं परस्य जुहुयादेवं तदिति॥ अतिथिभोजनस्य प्राथम्यं निंदित्वा स्वामिभोजनं प्र
थमं प्रापयंती प्राणाग्निहोत्रआदरं करोति॥ या हि न प्राथम्यलोपं सहते न तरां सा प्राथम्यवतोग्निहोत्रस्य लोपं सहेत इति मन्यते॥ ननु भो
जनार्थभक्तागमनसंयोगात् भोजनलोपे लोपः प्रापितः॥ न॥ तस्य द्रव्यविशेषविधानार्थत्वात्॥ प्राकृते ह्यग्निहोत्रे पयः प्रभृतीनां
द्रव्याणां नियतत्वादिहाप्यग्निहोत्रशब्दात्कौंडपायिनामयनवत्तद्धर्मप्राप्तौ सत्यां भक्तद्रव्यैकता गुणविशेषविधानार्थमिदं वाक्यं न
घङ्क्तमिति॥ अतो गुणलोपेन मुख्यस्येत्येवं प्राप्तं भोजनलोपेप्यद्भिरन्येन वा द्रव्येणाविरुद्धेन प्रतिनिधानन्यायेन प्राणाग्निहोत्र
स्यानुष्ठानमिति॥ ५०॥ अत उत्तरं पठति॥ उपस्थितेऽतस्तद्वचनात्॥ ५१॥ उपस्थिते भोजनेऽतस्तस्मादेव भोजनद्रव्यात्प्रथमोप
निपतितात्प्राणाग्निहोत्रं निर्वर्तयितव्यं॥ कस्मात्तद्वचनात्॥ तथा हि तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयमिति सिद्धवद्भक्तोपनिपातप
रामर्शेन परार्थद्रव्यसाध्यतां प्राणाहुतीनां विदधाति॥ ता अप्रयोजकलक्षणापन्नाः सत्याः कथं भोजनलोपे द्रव्यांतरं प्रतिनिधापये

मष्टाकपालं निर्वपेदिति निर्वापः श्रुतस्तदंगत्वेनाग्निहोत्रहवण्यां हविषि निर्वपेदिति दर्शपूर्णमासाख्यप्रकृतौ विहिताग्निहोत्रहवण्या निर्देशेन प्राप्ता आधानका
ले चाग्निहोत्राभावात्तस्या गुणभूताया लोपेपि मुख्यस्य निर्वापस्य न लोप इत्यर्थः॥ आरब्धनित्यादिकर्मणोवश्यानुष्ठेयत्वात्कृतद्रव्यालाभे प्रतिनिहितद्रव्येणा
पि कर्म कर्तव्यमिति प्रतिनिधिन्यायः॥ ५०॥ सिद्धांतयति॥ उपस्थितेतस्त तद्वचनादिति॥ तद्धोमीयमिति तच्छब्देन भोजनार्थसिद्धभक्तमाश्रित्य होमविधानादित्यर्थः
सिद्धवद्भक्तोपनिपातः प्रकृतभक्तागमनं तस्य तच्छब्देन परामर्शेनेत्यर्थः आश्रित्य विहिताहुतीनामाश्रयलोपे लोप एव न द्रव्यांतराक्षेपकत्वं यथा क्रतुप्रयुक्ताप्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यदुक्तमग्निहोत्रशब्दात्तद्व्यांतरप्राप्तिरितितत्राह॥नचात्रेति॥तद्धावोनित्याग्निहोत्रसादृश्यमर्थवादस्यशब्दस्यस्तुतित्वेनोपपत्तेरित्यर्थः॥धर्मप्रापकत्वे
दोषमाहतद्धर्मप्राप्तौचेति॥अतएवेतितद्धर्मप्राप्त्यभावादेवेत्यर्थः प्राप्तौसंपादनंतद्यथास्यादितिभावः॥मुख्याग्निहोत्रांगानिसंपाद्यंतेचेत्कथंतदनंगंवेदित्र
संपाद्यतेतत्राह॥वेदिश्रुतिश्चेतिमुख्याग्निहोत्रस्याग्न्युद्धरणवत्सायंप्रातःकालद्वयस्यापिनप्राप्तिरित्याह॥भोजनेनेति॥उपस्थानपरिस्तरणादयोप्य

नचात्रप्राकृताग्निहोत्रधर्मप्राप्तिरस्ति॥कुंडपायिनामयनेहिमासमग्निहोत्रंजुहोतीतिविध्युद्देशगतोग्निहोत्रशब्दस्तद्भावंविधा
पयेदिति युक्तातद्धर्मप्राप्तिः॥इहपुनरर्थवादगतोग्निहोत्रशब्दोनतद्भावंविधापयितुमर्हति॥तद्धर्मप्राप्तौचाभ्युपगम्यमाना
यांअग्न्युद्धरणादयोपिप्राप्येरन्॥नचास्तिसंभवः॥अग्न्युद्धरणंतावद्धोमाधिकरणभावाय॥नचायमग्नौहोमोभोजनार्थत्वा
व्याघातप्रसंगात्॥भोजनोपनीतद्रव्यसंबंधाच्चास्यएवैषहोमः॥तथाचजाबालश्रुतिः पूर्वोतिथिभ्योश्नीयादितिआस्याधारामेवे
मांहोमनिर्वृत्तिंदर्शयति॥अतएवचेहापिसांपादिकान्येवाग्निहोत्रांगानिदर्शयति॥उरएववेदिर्लोमानिबर्हिर्हृदयंगार्हपत्यो
मनोन्वाहार्यपचनआस्यमाहवनीयइति॥वेदिश्रुतिश्चात्रस्थंडिलमात्रोपलक्षणार्थाद्रष्टव्यामुख्याग्निहोत्रेवेद्यभावात्तदंगा
नांचेहसंपिपादयिषितत्वात्॥भोजनेनैवचकृतकालेनसंयोगात्काग्निहोत्रकालावरोधसंभवःएवमन्येप्युपस्थानादयोधर्माः
केचित्कथंचिद्विरुध्यंते॥तस्माद्भोजनपक्षेएवैतेमंत्रद्रव्यदेवतासंयोगात्त्यंचहोमानिर्वर्त्तयितव्याः॥यत्त्वादरदर्शनवचनंतत्
द्भोजनपक्षेप्राथम्यविधानार्थं॥नह्यस्तिवचनस्यातिभारः॥नत्वनेनास्यनित्यताशक्यतेदर्शयितुं॥तस्माद्भोजनलोपेलोपएवप्राणा
ग्निहोत्रस्येति॥२६॥तन्निर्धारणानियमस्तद्दृष्टेःपृथग्ध्यप्रतिबंधःफलं॥४२॥संतिकर्मांगव्यपाश्रयाणिविज्ञानान्योमित्येतदक्षर
(मुद्गीथमुपासीतेत्येवमादीनि॥

न्यभावात्तप्राप्नुवंतीत्याहएवमिति॥यस्मात्तद्धर्मप्राप्त्यभावस्तस्माद्भोजनद्रव्येणैवहोमइत्युपसंहारःप्राणाय
स्वाहेत्यादयोमंत्राः॥ननुस्वामिभोजनस्योत्तरकालत्वंश्रुत्यादिविहितंकथंपूर्वोतिथिभ्योश्नीयादितिवचनेनबाध्यतेतत्राह नह्यस्तीति॥उपासका
न्यस्वामिविषयस्तुत्तरकालत्वविधानमित्यर्थः॥नत्विति॥प्राथम्यमात्रेणेत्यर्थःप्राणोपासकस्यप्राप्तेभोजनेप्राथम्यार्थतयादरस्यान्यथासिद्धेःफलि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उभयथा दृष्टांतदर्शनात्संशयमाह॥ किंतानीति यथानारभ्याधीतपर्णमयीत्वं जुहूद्वारा क्रत्वंगतया कर्मसु नित्यं प्रयुज्यते तथांगाश्रितोपासनान्युद्गीथादिद्वा
रांगतया नित्यानि उत क्रत्वंगपशुप्रणयनाश्रयो गोदोहनसंयोगः पशुफलार्थत्वादनित्यत्वेन यथा प्रयुज्यते॥ यथा वा पश्वंगयूपाश्रयं वैल्वत्वमन्नाद्यफलत्वा
दनित्यं तथा कर्मसमृद्ध्यादिफलकत्वोपासनान्यनंगत्वेनानित्यानीति संशयार्थः पूर्वपक्षे उपासनानां प्रयोगनित्यत्वं सिद्धांते त्वनित्यत्वमिति फलभेदः॥ अ
नित्यभोजनाश्रयप्राणाग्निहोत्रस्यानित्यत्ववन्नित्यकर्मांगोपास्तीनां नित्यत्वमिति प्रत्युदाहरणदृष्टांतेन पूर्वपक्षमाह॥ किंतावदिति॥ उपासनानि कर्मां

किंतानि नित्यान्येव स्युः कर्मसु पर्णमयीत्वादिवत्॥ उतानित्यानि गोदोहनादिवदिति विचारयामः॥ किंतावत्प्राप्तं नित्यानीति॥ कुतः॥
प्रयोगवचनपरिग्रहात्॥ अनारभ्याधीतान्यपि ह्येतानि उद्गीथादिद्वारेण क्रतुसंबंधात्क्रतुप्रयोगवचनेनैवांगांतरवत्संस्पृश्यंते॥ यत्त्वे
षां स्ववाक्येषु फलश्रवणं आपयिता ह वै कामानां भवतीत्यादि तद्वर्तमानापदेशरूपत्वादर्थवादमात्रमेव अपापश्लोकश्रवणादिवन्न फल
प्रधानं॥ तस्माद्यथा यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीत्येवमादीनामप्रकरणपठितानामपि जुह्वादिद्वारेण क्रतुप्रवेशा
त्प्रकरणपठितवन्नित्यता॥ एवमुद्गीथाद्युपासनानामपीत्येवं प्राप्ते ब्रूमः तन्निर्धारणानियम इति॥ यान्येतान्युद्गीथादिकर्मगुण
याथात्म्यनिर्धारणानि रसतम आप्तिः समृद्धिर्मुख्यप्राण आदित्य इत्येवमादीनि नैतानि नित्यवत्कर्मसु नियम्येरन्॥ कुतः॥ तद्दृष्टेः॥ त
थाह्यनियतत्वमेवंजातीयकानां दर्शयति श्रुतिः॥ तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेदेत्यविदुषोपि क्रियाभ्यनुज्ञानात्॥ प्र
स्तावादिदेवताविज्ञानविहीनानामपि प्रस्तोत्रादीनां याजनाध्यवसानदर्शनात्॥ प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्
प्रस्तोष्यसि तां चेदविद्वानुद्गास्यसि तां चेदविद्वान्प्रतिहरिष्यसीति च॥

१ गानि अफलत्वे सति कर्मांगाश्रितत्वात्पर्णमयीत्वादिवत्तथा चांगत
याप्रयोगविधिना नित्येन प्रयुज्यंत इति प्राप्ते सिद्धांतसूत्रं व्याचष्टे यानीत्यादिना॥ उद्गीथादयः कर्मणां गुणाः अंगानि तेषां याथात्म्यं रसतमत्वादिकं तन्नि
र्धारणान्युपासनानि यानि तानि कर्मसु नित्यपर्णमयीत्वादिवन्न नियम्येरन्नित्यर्थः॥ एषां कर्मांगत्वे तद्धीनस्याविदुषः कर्म न स्यादंगलोपात्तस्मादविदुषोपि
कर्मकर्तृत्वश्रुतिलिंगैरंगत्वानुमानबाध इत्याह॥ तद्दृष्टेरिति॥ तस्यानियमस्य दर्शनादित्यर्थः॥ तां चेदविद्वान्प्रस्तोष्यसि मूर्धा ते व्यपतिष्यतीति चाक्राय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उपासीनांकर्मफलात्पृथक्फलश्रुतेर्नकर्मागत्वमित्याह॥ अपिचेति॥ तेनोभित्यक्षरेणयश्चैतदक्षरमेवंरसतममत्वादिरूपेणवेदोपास्तेयश्चनवेदनावुभौक र्मकुरुतस्वयद्यपितथापितुविद्याविद्ययोर्नानात्वंभिन्नफलत्वंदृष्टंहिमणिविक्रयेज्ञानाज्ञानाभ्यांवणिक्शबरयोःफलवैषम्यंतस्माद्यदेवकर्मविद्ययोद्गीथाद्यु पास्याश्रद्धयास्तिक्यबुद्ध्योपनिषदारहस्यदेवताध्यानेनकरोतितदेवकर्मफलातिशयवदित्यर्थः॥ कर्मणोवीर्यवत्त्वंनामफलवत्त्वंविद्याहीनस्यापिगम्यमा नंविद्यायाअनंगत्वेलिंगमितिभावः॥ साम्निलोकादिदृष्ट्योपासनेषुकर्मसमृद्ध्यतिरिक्तलोकादिफलश्रुतेश्चनांगत्वमित्याह॥ तथेति॥ अस्मैविदुषेकल्पंते

अपिचैवंजातीयकस्यकर्मव्यपाश्रयस्यविज्ञानस्यपृथगेवकर्मणःफलमुपलभ्यते॥ कर्मफलसिद्ध्यप्रतिबंधस्तत्समृद्धिरतिशया यविशेषःकश्चित्॥ तेनोभौकुरुतोयश्चैतदेवंवेदयश्चनवेदनानातुविद्याचाविद्याचयदेवविद्ययाकरोतिश्रद्धयोपनिषदातदेववीर्य वत्तरंभवतीति॥ तत्रनानात्विितिविद्वदविद्वत्प्रयोगयोःपृथक्कारणात्वीर्यवत्तरमितिचतरप्प्रत्ययप्रयोगाद्धिद्याविहीनमपिकर्मवीर्य वदितिगम्यते॥ तस्मादनित्यत्वेविद्यायाउपपद्यते॥ नित्यत्वेतुकथंतद्धिहीनंकर्मवीर्यवदित्यनुज्ञायेत॥ सर्वांगोपसंहारेहिवीर्यवत्क र्मेतिस्थितिः॥ तथालोकसामादिषुप्रतिनियतानिप्रत्युपासनंफलानिशिष्यंतेकल्पंतेहास्मैलोकाऊर्ध्वाश्चावृत्ताश्चेत्येवमादीनि ॥नचेदंफलश्रवणमर्थवादमात्रंयुक्तंप्रतिपत्तुं॥ तथाहिगुणवादआपद्येत॥ फलोपदेशेतुमुख्यवादोपपत्तेः॥ प्रयाजादिषुत्वितिक र्तव्यताकांक्षस्यक्रतोःप्रकृतत्वात्तादर्थ्येसतियुक्तंफलश्रुतेरर्थवादत्वं॥ तथानारभ्याधीतेष्वपिपर्णमयीत्वादिषु॥ नहिपर्णमयीत्वा दीनामक्रियात्मकानामाश्रयमंतरेणफलसंबंधोवकल्पते॥ गोदोहनादीनांहिप्रकृताप्प्रणयनाद्याश्रयलाभादुपपन्नःफलविधिः॥

भोगायसमर्थाभवंति॥ भूमेरूर्ध्वालोकाआवृत्ताअधस्तनाश्चेत्यर्थः॥ तथाहिगुणवादइति॥ फलश्रुतेरर्थवादमात्रत्वेस्तुतिलक्षणास्यात्तस्यामुख्यवृत्त्या फलपरत्वसंभवात्॥ प्रयाजानुयाजकर्मणांतुप्रकरणाद्दर्शाद्यंगत्वलाभात्प्राचुर्याभिव्यूतिफलश्रुतेरगत्यास्तुतिलक्षकत्वं॥ यद्यपिपर्णमयीत्वादीनामंगत्वबोध कंप्रकरणंनास्तितथापितेषुफलश्रुतेःस्तुतित्वंतेषामक्रियात्वेनक्रियासंबंधंविनाफलहेतुत्वानुपपत्तेरतस्तेषांफलार्थक्रियापेक्षित्वात्क्रतोश्चजुहूप्रकृतिद्रव्या कांक्षित्वात्पर्णमयीजुहूरित्यादिवाक्येनैवप्रकृतिद्रव्यार्पकेणजुहूद्वारासन्निहितक्रत्वंगत्वसिद्धेर्युक्तंफलश्रुतेरर्थवादत्वमितिभावः॥ अक्रियात्मकगोदोहनादेरपि

[illegible]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यद्रूपः प्रणयेनत्पशुकामस्यसनोगोदोहनेनब्रह्मवर्चसकामस्यकांस्येनेतिफलार्थविधिरेवनार्थवादःगोदोहनादेःक्रत्वनाकांक्षितत्वेनांगत्वाभावाच्चमसेननिराकां
क्षक्रियासंबंधिनयास्वफलसाधकत्वसंभवात्तथास्वादिरत्वेननिराकांक्षक्रत्वंगयूपमाश्रित्यबैल्वमन्नाद्यकामस्यखादिरंवीर्यकामस्येतिफलार्थविधिरेवेत्यर्थः॥प
र्णमयीत्वादिषुफलविधिःकिंनस्यादतआह॥नन्विति॥एवंविधोयूपादिवन्निराकांक्षइत्यर्थःजुहूरेवाश्रयइत्यतआह॥वाक्येनेतिजुह्वाःप्रकृतिद्रव्यापेक्षित्वाद
नेनैववाक्येनक्रत्वंगतयाजुहूप्रकृतिद्रव्यसंबंधोविधेयःपश्चान्निराकांक्षजुहूमाश्रित्यतस्यैवप्रकृतिद्रव्यस्यफलसंयोगोविधेयइतिवाक्यभेदइत्यर्थः॥पर्णतादि

तथावैल्वादीनामपिप्रकृतयूपाद्याश्रयलाभादुपपन्नःफलविधिः॥नतुपर्णमयीत्वादिष्वेवंविधःकश्चिदाश्रयःप्रकृतोस्ति॥वाक्येनैवतुजुह्वा
द्याश्रयतांविवक्षित्वाफलेपिविधिंविवक्षतोवाक्यभेदःस्यात्॥उपासनानांतुक्रियात्मकत्वाद्विशिष्टविधानोपपत्तेरुद्गीथाद्याश्रयाणांफले
विधानंनविरुध्यते॥तस्माद्यथाक्रत्वाश्रयाण्यपिगोदोहनादीनिफलसंयोगादनित्यानिएवमुद्गीथाद्युपासनान्यपीतिद्रष्टव्यं॥अतएवचक
ल्पसूत्रकारानैवंजातीयकान्युपासनानिक्रतुषुकल्पयांचक्रुः॥४२॥२१॥प्रदानवदेवतदुक्तं॥४३॥वाजसनेयकेवदिष्याम्येवाहमितिवागध्य
इत्यत्राध्यात्मंवागादीनांप्राणःश्रेष्ठोवधारितः॥अधिदैवतमग्न्यादीनांवायुस्तथाछांदोग्येवायुर्वावसंवर्गइत्यत्रअधिदैवतमग्न्यादीनांवा
युःसंवर्गोवधारितः॥प्राणोवावसंवर्गइत्यत्रअध्यात्मंवागादीनांप्राणः॥तत्रसंशयःकिंपृथगेवेमौवायुप्राणावुपगंतव्यौस्यातांअपृथगेवे
ति॥अपृथगेवेतितात्म्यात्तत्वाभेदात्॥नह्यभिन्नेतत्त्वेपृथगनुचिंतनंन्याय्यं॥दर्शयतिचश्रुतिरध्यात्ममधिदैवतंचतत्त्वाभेदं॥अग्निर्वा
ग्भूत्वामुखंप्राविशदित्यारभ्यतथातएतेसर्वएवसमाःसर्वेनंताइत्याध्यात्मिकानांप्राणानामाधिदैविकींविभूतिमात्मभूतांदर्शयति॥१

वैलक्षण्यमुपासनानामाह॥उपासनानांत्विति॥स्वयंक्रियात्वाद्यागादिवत्फलविशिष्टत्वेनविधानोपपत्तिरित्यर्थः॥तस्मादिति॥अंगत्वावेदकमानाभावादित्य
र्थः॥अतएवेति॥अनंगत्वादेवेत्यर्थःतस्मादंगोपास्त्यभावेपिकर्माधिकारइतिसिद्धं॥४२॥२१॥प्रदानवदेवतदुक्तं॥वायुप्राणयोर्भेदाभेदवाक्याभ्यांसंश
यमाह॥तत्रेति॥अस्तुकर्मांगानांनत्संबद्धोपासनानांचफलभेदान्नित्यत्वानित्यत्वरूपःप्रयोगभेदःइहतुवायुप्राणयोःस्वरूपाभेदात्तत्स्वरूपप्राप्तिलक्ष
णफलैक्याच्चध्यानप्रयोगैक्यमितिपूर्वपक्षयतिअपृथगिति॥अग्निर्वाग्भूत्वेत्यारभ्यवायुःप्राणोभूत्वानासिकेप्राविशदित्यभेदंदर्शयतीत्यर्थः॥ १ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यतश्चोदेतिसूर्यस्तंवदेतिप्रश्नेसूत्रात्मकवायुर्वाच्योवायुस्थानेप्राणंवदन्नेकत्वंतयोर्दर्शयतीत्याह॥तथेति॥किंचयदिवायुप्राणयोःपृथक्ध्यानंस्यात्तर्हिध्यानांगव्रतभेदोपिस्यादिहतुप्राणापाननिरोधात्मकव्रतैक्यश्रुतेर्ध्यानैक्यमित्याह तस्मादिति॥व्रतैक्यस्यप्रशस्तत्वादित्यर्थः॥किंचवायुप्राणौसंवर्गौभेदेनोपक्रम्यपरस्ताद्वाक्यशेषेसंवर्गदेवैक्यश्रुतेःप्रयोगैक्यमित्याह॥तथेति॥महात्मनइतिद्वितीयाबहुवचनंचतुरश्चतुःसंख्याकानग्निसूर्योदकचंद्रानपरांश्चवाक्चक्षुःश्रोत्रमनोरूपानेकोदेवःकःप्रजापतिर्जगारजीर्णवानुपसंहृतवानित्यर्थः॥तन्नवीतिभेदमितिशेषः॥यथाग्निहोत्रंजुहोतीत्युत्पन्नाग्निहोत्रस्यैकस्यै

तथान्यत्रापितत्रतत्राध्यात्ममधिदैवतंचबहुधाततत्वाभेददर्शनंभवति॥क्वचिच्चयःप्राणःसवायुरितिसकृमेववायुंप्राणंचैकंकरोति॥तथोदाहृतेपिवाजसनेयिब्राह्मणेयतश्चोदेतिसूर्यइत्यस्मिन्नुपसंहारश्लोकेप्राणाद्वाएषउदेतिप्राणेऽस्तमेतीतिप्राणेनैवोपसंहरन्नेकत्वंदर्शयति॥तस्मादेकमेवव्रतंचरेत्प्राण्याच्चैवापान्याच्चेतिचप्राणव्रतेनैकेनोपसंहरन्नेतदेवदृढयति॥तथाछांदोग्येपिपरस्तान्महात्मनश्चतुरोदेवएकःकःसौजगारभुवनस्यगोपाइत्येकमेवसंवर्गंगमयति॥तन्नवीतिएकएकेषांचतुर्णांसंवर्गोऽपरोपरेषामिति॥तस्मादपृथक्त्वमुपगमनस्येत्येवंप्राप्तेब्रूमः॥पृथगेववायुप्राणावुपगंतव्याविति कस्मात्पृथगुपदेशात्॥आध्यानार्थोह्ययमध्यात्माधिदैवविभागोपदेशःसोऽसत्याध्यानपृथक्त्वेऽनर्थकएवस्यात्॥ननूक्तमपृथगनुचिंतनंतत्त्वाभेदादिति॥नैषदोषः॥तत्त्वाभेदेप्यवस्थाभेदादुपदेशभेदवशेनानुचिंतनभेदोपपत्तेः॥श्लोकोपन्यासस्यचतत्त्वाभेदाभिप्रायेणाप्युपपद्यमानस्यपूर्वोदितध्येयभेदनिराकरणसामर्थ्याभावात्॥ ९ वदधितंदुलादिगुणभेदेनसायंप्रातःकालभेदेनप्रयोगभेदस्तथा-

त्रादौभवतियएवंवेदेत्युत्पन्नायाःसंवर्गविद्यायाएकत्वेप्युत्पत्तिशिष्टवायुप्राणाख्यगुणभेदात्प्रयोगभेदइत्युक्तंसिद्धांतयति॥पृथगेवेति॥तौवाएतौद्वौसंवर्गावित्युपास्यभेदवाक्यस्यप्रयोगभेदपरत्वाद्वाक्याद्देवभेदसिद्धिरित्यर्थः॥पूर्वपक्षयुक्तमनूद्यप्रत्याहननूक्तमित्यादिना॥उपासनयाप्रधानभूतसंवर्गगुणविशिष्टोपास्यभेदवाक्यविरोधादनुपास्यवायुतत्त्वैक्यवाक्यंनप्रयोगैक्यप्रापकमितिभावः॥सूर्योदयास्तमययोर्वाय्वधीनत्वात्तदभेदाभिप्रायेणप्राणात्तावुक्तौनतोध्यात्माधिदैवावस्थाभेदेनोक्तस्यध्येयभेदस्यनिरासेयतश्चोदेतीतिश्लोकस्यनशक्तिरित्याह॥श्लोकेति॥ ॥६॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

असामर्थ्ये लिंगमाह॥ सयथेति॥ श्लोकोपन्यासवद्ब्राह्मणोपन्यासोपि तत्त्वाभेदाभिप्रायेणेत्याह॥ एतेनेति॥ नन्वेवकाराद्वायुव्रतनिवृत्तेः प्राण एवैको ध्येयो भातीत्यत आह॥ एकमेवेति॥ वदनदर्शनादीनि वाक्चक्षुरादीनां व्रतानि श्रमरूपमृत्युना भग्नानीत्युक्त्वा प्राणस्याभग्नव्रतत्वं निर्धारितं तथा ज्वलनतापादीन्यग्न्यादित्यादीनां व्रतानि भग्नानीत्युक्त्वा वायोरभग्नव्रतत्वं निर्धारितं सयथैषां प्राणानां मध्यमः प्राणः स्थिरव्रत एवमेतासां देवतानां वायुर्म्लोचंति ह्यन्या देवता न वायुः सैषानस्तमिता देवता यद्वायुरिति श्रुतेरतो भग्नव्रतनिरासार्थ एवकारो न वायुव्रतनिवृत्त्यर्थ इत्यर्थः॥ अत्रैवार्थे लिंगमाह एकमिति॥ उकारश्चा

सयथैषां प्राणानां मध्यमः प्राण एवमेतासां देवतानां वायुरिति चोपमानोपमेयकरणात्॥ एतेन व्रतोपन्यासो व्याख्यातः॥ एकमेव व्रतमिति चैवकारो वागादिव्रतनिवर्तनेन प्राणव्रतप्रतिपत्त्यर्थः॥ भग्नव्रतानि हि वागादीन्युक्तानि तानि मृत्युः श्रमो भूत्वोपयेमे इति श्रुतेः न वायुव्रतनिवृत्त्यर्थः॥ अथातो व्रतमीमांसेति प्रस्तुत्य तुल्यवद्वायुप्राणयोरभग्नव्रतत्वस्य निर्धारितत्वात्॥ एकमेव व्रतं चरेदिति चोक्त्वा तेनो एतस्यै देवतायै सायुज्यं सलोकतां जयतीति वायुप्राप्तिफलं ब्रुवन्वायुव्रतमनिवर्तितं दर्शयति॥ देवतेत्यत्र वायुः स्यात्॥ अपरिच्छिन्नात्मकत्वस्य प्रेप्सितत्वात्॥ पुरस्तात्प्रयोगाच्च सैषानस्तमिता देवता यद्वायुरिति॥ तथातो वा एतौ द्वौ संवर्गौ वायुरेव देवेषु प्राणः प्राणेष्विति भेदेन व्यपदिशति॥ तेवा एते पंचान्ये पंचान्ये दश संतस्तत्कृतमिति च भेदेनैवोपसंहरति॥ तस्मात्पृथगेवोपगमनं प्रदानवद्यथेंद्राय राज्ञे पुरोडाशमेकादशकपालमिंद्रायाधिराजायेंद्राय स्वराज्ञ इति॥ अस्यां त्रिपुरोडाशिन्यामिष्टौ सर्वेषामभिगमयन्नवद्यत्यच्छंबट्कारमिति॥ अतो वचनादिंद्राभेदाच्च सहप्रदानाशंकायां॥

॥ र्थः तेन व्रतेन वायोः सायुज्यं समानदेहत्वं सलोकतां च जयतीत्यर्थः नन्वत्र वायुप्राप्तिर्न श्रुतेत्यत्राह॥ देवतेति॥ तस्मात्तत्त्वाभेददृष्ट्या व्रतैक्यमिति स्थितं संप्रति पूर्वोक्तं पृथगुपदेशं विवृणोति तथातो वा इति सौत्रं दृष्टांतं व्याचष्टे॥ प्रदानवदिति॥ त्रयः पुरोडाशा अस्यां संतीति त्रिपुरोडाशिनी इष्टिस्तस्यां किं सहप्रदानमुत भेदेनेति संदेहे पूर्वपक्षमाह॥ सर्वेषामिति॥ सर्वेषां देवानामाभिमुख्येन प्रापयन्हविरवद्यति गृण्हाति अछंबट्कारं वषट्काराख्यदेवभागमित्यर्थः॥ यद्वा सर्वदेवार्थं युगपदवदानं कार्यमित्यत्र हेतुरछंबट्कारमिति॥ अव्यर्थत्वायेत्यर्थः॥ एकार्थमवत्तेह विषिशेषो यागानर्हत्वाद्वृथा स्यादिति भावः॥ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं सहावदानश्रुतेर्दैवैकाच्च पुरोडाशानां सहप्रक्षेपे प्राप्ते पृथक्प्रक्षेप इति सिद्धांतमाह॥ राजेति॥ राजाधिराजस्वराजगुणभेदेन विशिष्टदेवताभेदादित्यर्थः किंचाध्वर्युणा यजेति प्रैषे उक्ते होत्रा यो मंत्रः पठ्यते सा याज्या अनुब्रूहीति प्रैषानंतरं मंत्रः पुरोनुवाक्येति भेदोस्ति तत्रास्या मिष्टौ प्रथमपुरोडाशप्रदाने या क्रुप्ता याज्या सा द्वितीयप्रदाने पुरोनुवाक्या या च पूर्वमनुवाक्या सा पश्चाद्याज्येति व्यत्यासमन्वाहेति श्रुत्या विधानात् यथाश्रुति प्रक्षेपपृथक्त्वमित्याह॥ याज्येति॥ संकर्षो देवताकांडं॥ वाशब्दोवधारणे नानैव देवता राजादिगुणभेदेन भेदावगमादिति सूत्रार्थः दृष्टांते देवताभेदात् कर्मभेदवदिद्याभेदः स्यात् इत्यत आह॥ तत्रत्विति कर्मान्यत्वि वाक्यस्थदेवताभेदः कर्मभेदे हेतुः इह त्वन्नादो भवति य एवं वेदेत्युपनावेकत्वेन ज्ञातविद्यायाः पश्चाच्छ्रुतवायुप्राणभेदेन

राजादिगुणभेदाद्याज्यानुवाक्याव्यत्यासविधानाच्च यथान्यासमेव देवतापृथक्त्वात्प्रदानपृथक्त्वं भवति॥ एवं तत्त्वाभेदेपि आध्येयांशपृथक्त्वाद्ध्यानपृथक्त्वमित्यर्थः॥ तदुक्तं संकर्षे नानावादेवता पृथक् ज्ञानादिति॥ तत्र तु द्रव्यदेवताभेदाद्यागभेदोपि विघ्नेनैवमिह विद्याभेदोस्ति उपक्रमोपसंहाराभ्यामध्यात्माधिदैवोपदेशेषु एकविद्याविधानप्रतीतेर्विद्यैक्येपि त्वध्यात्माधिदैवभेदात्प्रवृत्तिभेदो भवति अग्निहोत्र इव सायंप्रातःकालभेदादित्येतावदभिप्रेत्य प्रदानवदित्युक्तं॥ २०॥ ४३॥ लिंगभूयस्त्वात्तद्धि बलीयस्तदपि ४४॥ वाजसनेयिनोग्निरहस्ये नैव वा इदमग्रे सदासीदित्येतस्मिन् ब्राह्मणे मनोधिकृत्याधीयते तत् षट्त्रिंशतं सहस्राण्यपश्यदात्मनोग्नीनर्कान्मनोमयान्मनश्चित इत्यादि॥ तथैव वाक्चितः प्राणचितश्चक्षुश्चितः श्रोत्रचितः कर्मचितोग्निचित इति पृथगग्नीनामनं

(१) तिसोपादिकान्॥

भेदकः॥ अग्निहोत्रस्येव दध्यादिद्रव्यभेद इत्यर्थः तर्हि केनांशेन प्रदानस्य दृष्टांतत्वमित्यत आह विद्यैक्येपीति अवस्थाभेदाद्देवताभेदः प्रयोगभेदश्चेत्यंशेनायं दृष्टांत इत्यर्थः॥ ४३॥ लिंगभूयस्त्वात्॥ उत्पत्तेः प्रागिदं सर्वं नैव सदासीन्नाप्यसदित्युपक्रम्य मनः सृष्टिमुक्त्वा तन्मन आत्मानमैक्षत तीक्ष्णपूर्वकमग्नीनपश्यदिति मनोधिकृत्य पठंतीत्यर्थः पुरुषायुष्येन क्रुप्तशतवर्षात्मर्गतैः षट्त्रिंशत्सहस्रैरहोरात्रैरवच्छिन्नतया मनोवृत्तीनामसंख्येयानामपि षट्त्रिंशत्सहस्रत्वं ताभिरिष्टकात्वेन कल्पिताभिर्मनसैव संपादिता अग्नयो मनश्चितस्तानर्कान्पूज्यांस्तान्मनोमयान्मनोवृत्तिषु संपादितान्मनःसत्त्वसंबंधित्वेन मनोपश्यत्॥ तथा वाक्प्राणादयोपि स्वस्ववृत्तिरूपानग्नीनपश्यन्नित्याह॥ तथेति॥ प्राणो घ्राणं कर्मेंद्रियेण हस्तादिना चितः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भा॰ पूर्वत्राग्निचयनप्रकरणात्किमेतेऽग्नयः क्रत्वर्था उत प्राधान्यज्ञापकलिंगादिभूयस्त्वात्पुरुषार्था वेति संशयमाह॥ तेष्विति॥ केवलविद्यात्मकाः क्रियां अ॰पा॰
प्र॰टी॰ गत्वं विनाभावनामया इत्यर्थः॥ एकप्रयोगासंभवाद्बूयमाणयोर्ध्यानप्रयोगभेदोस्तु इह तु मनश्चिदाद्यग्नीनां प्रकरणात्कर्मांगत्वेनैकप्रयोगत्वमिति प्राप्य॥ ३ ३
३५६ सिद्धांतमुपक्रमते तत्रेत्यादिना॥ पूर्वपक्षे भावनाग्नीनां क्रत्वंगत्वमिष्टं तेषां क्रियाग्निना विकल्पः समुच्चयो वास्तु सिद्धांते पुरुषार्थत्वमिति फलं॥ तत्र सर्वप्रा
णिमनोवृत्तिभिर्ममसदाग्नयश्चीयंत इति ध्यानदार्ढ्ये सति सर्वभूतानि यत्किंचिन्मनसा संकल्पयंति तेषामेवाग्नीनां सा कृतिः करणमित्येकं लिंगं क्रियांगस्य

तेषु संशयः॥ किमेते मनश्चिदादयः क्रियानुप्रवेशिनस्तच्छेषभूताः उत स्वतंत्राः केवलविद्यात्मका इति॥ तत्र प्रकरणात्क्रियानुप्रवेशे प्राप्ते स्वातंत्र्यं तावत्प्रतिजानीते॥ लिंगभूयस्त्वादिति॥ भूयांसि हि लिंगान्यस्मिन्ब्राह्मणे केवलविद्यात्मकत्वमेषामुपोद्बलयंति दृश्यंते॥ तद्यत्किंचेमानि भूतानि मनसा संकल्पयंति तेषामेव सा कृतिरिति तानेहैतानेवंविदे सर्वदा सर्वाणि भूतानि चिन्वंत्यपि स्वपत इति चैवंजातीयकानि॥ तद्धि लिंगं प्रकरणाद्बलीयस्तदप्युक्तं पूर्वस्मिन्कांडे श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति॥ ४४॥ पूर्वविकल्पः प्रकरणात्स्यात्क्रिया मानसवत्॥ ४५॥ नैतद्युक्तं॥ स्वतंत्रा एतेऽग्नयो न न्यशेषभूता इति॥ पूर्वस्य क्रियामयस्याग्नेः प्रकरणात्तद्विषय एवायं विकल्पविशेषोपदेशः स्यात् न स्वतंत्रः॥ ननु प्रकरणाल्लिंगं बलीयः॥ सत्यमेवमेतत्॥ लिंगमपि त्वेवंजातीयकं न प्रकरणाद्बलीयो भवति॥ अन्यार्थदर्शनं ह्येतत् संपादिकाग्निप्रशंसारूपत्वात्॥ अन्यार्थदर्शनं चासत्यामन्यस्यां प्राप्तौ गुणवादेनाप्युपपद्यमानं न प्रकरणं बाधितुमुत्सहते॥

१ यत्किंचिक रणेन सिध्यदर्शनादित्याह॥ तद्यदिति एवं विदे स्वप॥ रा॰म॰
ते जाग्रते पि तदीया अग्नीन् भूतानि सर्वदा चिन्वंतीति लिंगांतरं क्रियांगस्य चोदितकालानुष्ठेयस्य सदा सर्वैरनुष्ठीयमानत्वायोगादित्यर्थः षट्त्रिंशत्सहस्रत्वसंख्याप्या ३५६
मत्वे लिंगमेवंजातीयकपदेनोक्तं॥ ४४॥ एवं सिद्धांतमुपक्रम्य पूर्वपक्षयति॥ पूर्वेति॥ पूर्वस्येष्टकाभिरग्निं चिनुत इत्युक्तस्य स एष त्विष्टकोऽग्निरिति सन्निहितस्या
यं विकल्पविशेषोपदेशः संकल्पमयत्वाख्यप्रकारभेदोपदेशः क्रियाग्निवत्सांकल्पिकाग्नयोऽप्यंगमिति यावत्॥ किं विधिवाक्यस्थं लिंगं प्रकरणाद्बलीयः अ
र्थवादस्थं वा आद्यमंगीकरोति॥ सत्यमिति॥ न द्वितीय इत्याह॥ लिंगमिति॥ मानसाग्निविध्यर्थार्थवादस्थलिंगानां स्वार्थप्रापकमानाभावं द्वे वेत्यमित्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रस्थक्रियापदं व्याचष्टे। तस्मादिति ननु अक्रियारूपाग्नीनां ध्यानमयानां कथं क्रियांगत्वं तत्राह॥ मानसवदिति द्वादशाहस्याऽद्यंताहर्द्वयं त्यक्त्वा मध्यस्थदशरात्र
सैव द्विरात्रादिषु प्रकृतित्वं तद्धर्माणामेव तेष्वतिदेशात् तस्य मध्यदशरात्रस्य दशमेऽहन्यर्थादेकादशेऽहनि मानसग्रहः श्रूयते अनया त्वा पात्रेण समुद्रं रसया प्राजापत्यं म-
नोग्रहं गृह्णामीति॥ अनया रसया पृथिव्या पात्रेण समुद्रं त्वां प्रजापतिदेवताकं मनोग्रहं गृह्यत इति ग्रहः सोमरसः मनसा ऽसत्वेन भावितमध्वर्युर्गृह्णातीत्यर्थः॥ अत्र य
वर्त्विजा ध्यायितया विविधवाक्योच्चारणाभावाद् विवाक्यसंज्ञाऽह्नः प्राप्ता ग्रहणं नाम सोमपात्रस्योपादानं गृहीतस्य तस्य स्थाने स्थापनमासादनं सोमस्य होमो हु-

तस्मात्संपादिका अप्येतेऽग्नयः प्रकरणात् क्रियानुप्रवेशिन एव स्युः॥ मानसवत्॥ यथा दशरात्रस्य दशमेऽहन्यविवाक्ये पृथिव्या पात्रेण
समुद्रस्य सोमस्य प्रजापतये देवतायै गृह्यमाणस्य ग्रहणासादनहवनाहरणोपह्वानभक्षणानि मानसान्येवाम्नायंते॥ स च मानसोऽपि ग्र-
हकल्पः क्रियाप्रकरणात् क्रियाशेष एव भवति एवमयमप्यग्निकल्प इत्यर्थः॥४५ अतिदेशाच्च॥४६॥ अतिदेशश्चैषामग्नीनां क्रिया-
नुप्रवेशमुपोद्बलयति॥ षट्त्रिंशत्सहस्राण्यग्नयोऽर्कास्तेषामेकैक एव तावान्यावानसौ पूर्व इति॥ सति हि सामान्येऽतिदेशः प्रवर्त्तते॥
अतश्च पूर्वेणोपक्रान्तेन क्रियानुप्रवेशिनाग्निना संपादिकानग्नीनतिदिशन् क्रियानुप्रवेशमेवैषां द्योतयति॥४६॥ विद्यैव तु निर्धारणात्॥४७॥
तुशब्दः पक्षं व्यावर्त्तयति विद्यात्मका एवैते स्वतंत्रा मनश्चिदादयोऽग्नयः स्युर्न क्रियाशेषभूताः॥ तथा हि निर्धारयति ते हैते विद्याचित एवेति वि-
द्यया हैवैत एवं विदश्चिता भवंतीति च॥४७॥ दर्शनाच्च॥४८॥ दृश्यते चैषां स्वातंत्र्ये लिंगं तत्पुरस्तादृर्शितं लिंगभूयस्त्वादित्यत्र॥४८॥ न-
नु लिंगमप्यसत्यामन्यस्यां प्राप्तावसाधकं कस्यचिदर्थस्येत्यपास्य तत्प्रकरणसामर्थ्यात् क्रियाशेषत्वमध्यवसितमिति॥ ❈ ॥

वनं हुतशेषादानमाहरणं शेषभक्षणाय ऋत्विजां मिथोऽनुज्ञाकरणमुपह्वानं ततो भक्षणमित्येतानि मानसान्येवेत्यर्थः॥ स च मानसो ग्रहो द्वादशाहादहं-
तरं स्वतंत्रमित्याशंक्य द्वादशाहसंज्ञाविरोधाच्चाहरंतरं किंतु प्रकरणाद् विवाक्यस्याह्नोऽङ्गमिति सिद्धांतमाह स चेति॥ कल्पः कल्पनाप्रकारः॥ केचित्तु भाष्ये दश-
रात्रशब्दो विकृतिपरः तत्रापि दशमेऽहन्यविवाक्यसंज्ञके मानसग्रहस्यातिदेशप्राप्तनयांगत्वादित्याहुः॥४५॥ मनश्चिदादीनां क्रियांगत्वे प्रकरणमुक्त्वा लिं-
गमाह॥ अतिदेशाच्चेति॥ क्रियांगत्वसादृश्यादतिदेश इत्यर्थः॥४६॥ सिद्धांतमाह विद्येति श्रुतिलिंगवाक्यैः प्रकरणं बाध्यमिति सूत्रत्रयार्थः॥४७॥ ४८॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भा·
टी·
३५७

तत्रावधारणश्रुतेरन्यथासिद्धिं शंकतेनन्वबाह्येति॥ विद्याचितइतिपदेनैवाबाह्यसाधनत्वस्यलब्धत्वादवधारणंव्यर्थमित्याहनेतितर्हिकथमस्या अ·पा·
र्थवत्त्वंतत्राह॥ऽबाह्येति॥लिंगंव्यनक्तितथेति॥अग्नीनांसर्वकालव्यापित्वेनानंगत्वेदृष्टांतमाह॥यथेतितदाध्यानकालइत्यर्थः॥होमेयथासातत्यमु ३३

अतउत्तरंपठति॥श्रुत्यादिबलीयस्त्वाच्चनबाधः॥४९॥नैवंप्रकरणसामर्थ्यात्क्रियाशेषत्वमध्यवसायस्वातंत्र्यपक्षोबाधि
तव्यः श्रुत्यादेर्बलीयस्त्वात्॥बलीयांसिहिप्रकरणात् श्रुतिलिंगवाक्यानिइतिस्थितंश्रुतिलिंगसूत्रे॥तानिचेहस्वातंत्र्यपक्षंसा
धयंति दृश्यंते॥ कथंश्रुतिस्तावत् तेहैतेविद्याचितएवेति॥ तथालिंगंसर्वदासर्वाणिभूतानिचिन्वंत्यपिस्वपतेइति॥तथा
वाक्यमपिविद्ययाहैवैतएवंविदश्चितभवंतीति॥विद्याचितएवेतिहिसावधारणेयंश्रुतिःक्रियानुप्रवेशेमीषामभ्युपगम्यमा
नेपीडितास्यात्॥ नन्वबाह्यसाधनत्वाभिप्रायमिदमवधारणंभविष्यति॥ नेत्युच्यते॥ तदभिप्रायतायांहिविद्याचितइतीय
तास्वरूपसंकीर्तनेनैवकृतत्वादनर्थकमवधारणंभवेत्स्वरूपमेवह्येषामबाह्यसाधनमित्यऽबाह्यसाधनत्वेत्वमानसग्र
हवत्क्रियानुप्रवेशशंकायांतन्निवृत्तिफलमवधारणमर्थवद्भविष्यति॥तथास्वपतेजाग्रतेचैवंविदेसर्वदासर्वाणिभूतानिए
तानग्नींश्चिन्वंतीतिसातत्यदर्शनमेषांस्वातंत्र्येऽवकल्पते॥यथासांपादिकेवाक्प्राणमयेग्निहोत्रेप्राणंतदावाचिजुहोतिवाचं
तदाप्राणेजुहोतीतिचोक्तोच्यतेएतेऽनंतेऽमृतेआहुतीजाग्रच्चस्वपंश्चसततंजुहोतीतितद्वत्॥क्रियानुप्रवेशेतुक्रियाप्रयो
गस्याल्पकालत्वान्नसातत्येनैषांप्रयोगःकल्पेत॥नचेदमर्थवादमात्रमितिन्याय्यं॥यत्रहिविस्पष्टोविधायकोलिङ्गादिरुपल
भ्यतेयुक्तंतत्रसंकीर्तनमात्रस्यार्थवादत्वं इहतुविस्पष्टविध्यंतरानुपलब्धेःसंकीर्तनादेवैषांविज्ञानविधानंकल्पनीयं॥त राम·
च्चयथासंकीर्तनमेवकल्पयितुंशक्यतइतिसातत्यदर्शनात्तथाभूतमेवकल्प्यतेततश्चसामर्थ्यादेषांस्वातंत्र्यसिद्धिः॥ ॥ ३५७

च्यतेतद्वदग्नीनांसातत्यदर्शनमित्यन्वयः यदुक्तमर्थवादस्थत्वाल्लिंगंदुर्बलमितितत्रसर्वदासर्वभूतानिमदर्थमग्नीन्विन्वंतीतिध्यायेदित्यपूर्वार्थेनयावि
धिकल्पनातथाचविधिवाक्यस्थत्वाल्लिंगंप्रकरणाद्बलवदित्याह॥नचेदमित्यादिना॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एतेनेति॥ विधिनेनेत्यर्थः॥ वाक्यं विवृणोति॥ तथेति॥ ४९॥ संपदुपास्त्येमनोवृत्तिषु क्रियांगानां योजनमनुबंधः श्रुत्या क्रियते तदन्यथानुपपत्त्याप्यग्नीनां पुरुषार्थत्वं॥ क्रत्वर्थत्वे गानां सिद्धत्वेन संपादनानुपपत्तेरित्याह इतश्चेत्यादिना॥ तेऽग्नयः अधीयंते तेषामाधानं मनसैव कुर्यादित्यर्थः॥ कालस्यच्छंदस्य नियमाद॥ चीयंत इष्टकाश्चेतव्या इत्यर्थः॥ ग्रहाः पात्राणि अस्तुवन्नुद्गातारः आशंसन्होतारः शंसंति किं बहूक्त्वा यत्किंचयज्ञे कर्मारादुपकारकं यज्ञीयं यत्तत्स्वरूपोत्पादकं च

मी३

एतेन तद्यत्किंचेमानि भूतानि मनसा संकल्पयंति तेषामेव सा कृतिरित्यादिव्याख्यातं॥ तथा वाक्यमप्येवंविद इति पुरुषविशेषसंबंधमेवैषामाचक्षाणं न क्रतुसंबंधं मृष्यते॥ तस्मात्स्वातंत्र्यपक्ष एव ज्यायानिति॥ ४९॥ अनुबंधादिभ्यः प्रज्ञांतरपृथक्त्ववद्दृष्टश्च तदुक्तं॥ ५०॥ इतश्च प्रकरणमुपमृद्य स्वातंत्र्यं मनश्चिदादीनां प्रतिपत्तव्यं॥ यत्क्रियावयवान्मनआदिव्यापारेष्वनुबध्नाति॥ ते मनसैवाधीयंत मनसाचीयंत मनसैव ग्रहा अगृह्यंत मनसाऽस्तुवन् मनसाशंसन् यत्किंचयज्ञे कर्म क्रियते यत्किंच यज्ञीयं कर्म मनसैव तेषु तन्मनोमयेषु मनश्चित्सु मनोमयमक्रियतेत्यादिना संपत्फलो ह्ययमनुबंधः॥ नच प्रत्यक्षाः क्रियावयवाः संतः संपदा लिप्सितव्याः॥ नचोद्गीथाद्युपासनवत्क्रियांगसंबंधात्क्रतुप्रवेशित्वमाशंकितव्यं श्रुतिवैरूप्यात्॥ नह्यत्र क्रियांगं किंचिदादाय तस्मिन्नदो नामाध्यवसितव्यमिति वदति॥ षट्त्रिंशत्सहस्राणि तु मनोवृत्तिभेदानादाय तेष्वग्नित्वं ग्रहादींश्च कल्पयति पुरुषयज्ञादिवत्॥ संख्या चेयं पुरुषायुषस्याहःसु दृष्टा सती तत्संबंधिनीषु मनोवृत्तिष्वारोप्यत इति द्रष्टव्यं॥ एवमनुबंधात्स्वातंत्र्यं मनश्चिदादीनां॥ आदिशब्दादतिदेशाद्यपि यथासंभवं योजयितव्यं॥ तथा हि तेषामेकैक एव तावान्यावानसौ पूर्व इति क्रियामयस्याग्नेर्माहात्म्यं ज्ञानमयानामेकैकस्यातिदिशन् क्रियायामनादरं दर्शयति॥ नच सत्येव क्रियासंबंधे विकल्पः पूर्वेणोत्तरेषामिति शक्यं वक्तुं॥ नहि येन व्यापारेणाऽऽहवनीयधारणादिना पूर्वः क्रियायामुपकरोति तेनोत्तरे उपकर्तुं शक्नुवंति॥

९ तत्सर्वं मनोमयं कुर्यादिति श्रुत्यर्थः॥ वृत्तिष्वग्निध्यानस्य क्रियांगत्वेप्युद्गीथध्यानवत्क्रियांगाश्रितत्वं स्यादित्याह॥ नचात्रोद्गीथेति॥ अंगावबद्धश्रुतितोऽस्याः श्रुतेर्वैरूप्यं स्फुटयति नहीति॥ अतंगद्वृत्तिषु सांगक्रतुसंपादनं पुरुषयज्ञवद्ध्यानवत्स्वातंत्र्यमित्यर्थः॥ अनादरार्थो निर्देशो न भवति किंतु विकल्पार्थ इत्यत आह॥ नचेति॥ एकस्मिन्साध्ये निरपेक्षसाधनयोर्विकल्पो भवति॥ यथा व्रीहियवयोस्तत्र तु क्रियाग्नेर्ध्यानाग्नीनां साध्यभेदान्न विकल्प इत्यर्थः॥ अत एव समुच्चयोऽपि निरस्तः॥ ॥ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

·भा· ·टी· ५८ यदुक्तं क्रियांगत्वसामान्येनातिदेश इतितन्नेत्याह॥ यत्त्विति॥ सूत्रे बहुवचनार्थमाह॥ श्रुत्यादीनि चेति॥ अनुबंधातिदेशश्रुतिलिंगवाक्येभ्य इत्य र्थः एवमिति॥ अर्थ इति शेषः मनस्विरादीनां स्थानं त्वेक्रियाप्रकरणादुत्कर्षः स्यादित्याशंक्य सदृष्टमित्याह दृष्टश्चेति॥ एकादशेचिंतितं राजा स्वारा ज्यकामो राजसूयेन यजेतेति प्रकृत्या वेष्टिर्नाम काचिदिष्टिराम्नाता आग्नेयोष्टाकपालो हिरण्यं दक्षिणा बार्हस्पत्यं चरुः शितिपृष्ठो दक्षिणा ऐंद्रमेकाद शकपालमृषभो दक्षिणेति॥ तस्यां वर्णभेदेन प्रयोगभेदः श्रूयते यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वाभिघारयेत्॥ यदि वैश्यो वै श्वदेवं चरुं मध्ये निदध्यात् यदि राजन्यस्तदैंद्रमित्याग्नेयैंद्रपुरोडाशयोर्मध्ये बार्हस्पत्यं चरुं निधायेत्यर्थः॥ तत्राग्नेयादिचरुषु अंगानां तंत्रेण प्रयोगो भाति मध्ये निधानलिंगात्प्रयोगभेदे मध्ये निधानायोगात् तयान्नाद्यकामं याजयेदित्येकवचनाच्च सर्वतंत्रप्रयोगो राजसूयक्रतुबाह्यायामन्नाद्यकाम। अ·पा· ३ ३

यत्तु पूर्वपक्षेप्यतिदेश उपोद्बलक इत्युक्तं सति हि सामान्ये तिदेशः प्रवर्त्तत इति तदसत्पक्षेऽग्नित्वसामान्येनातिदेशसंभवात्प्रयु क्तं॥ अस्ति हि सांपादिकानामप्यग्नीनामग्नित्वमिति॥ श्रुत्यादीनि च कारणानि दर्शितानि॥ एवमनुबंधादिभ्यः कारणेभ्यः स्वा तंत्र्यं मनस्विरादीनां प्रज्ञातरपृथक्त्ववत्॥ यथा प्रज्ञातराणि शांडिल्यविद्याप्रभृतीनि स्वेन स्वेनानुबंधेनानुबध्यमानानि पृथगेव कर्मभ्यः प्रज्ञातरेभ्यश्च स्वतंत्राणि भवंत्येवमिति॥ दृष्टश्चावेष्टेः राजसूयप्रकरणपठितायाः प्रकरणादुत्कर्षो वर्णत्रयानुबंधाद्रा जयज्ञत्वाच्च राजसूयस्य॥ तदुक्तं प्रथमे कांडे क्रत्वर्थायामिति चेन्न वर्णत्रयसंयोगादिति॥ ५०॥

९ वर्णत्रयकर्तृकायामेवावेष्टौ ज्ञेयः

नतु क्रत्वंतर्गतायां॥ ननु किमत्र नियामकं क्रत्वर्थायामप्यवेष्टौ तंत्रप्रयोगः किं न स्यादिति चेन्न वर्णत्रयसंयुक्तायां काम्यायामेव अंगतंत्रैकसा धकस्य मध्ये निधानादिलिंगस्य सत्वात् ततो लिंगैकवचनाभ्यां तंत्रैक्ये सति हिरण्यादिकामिलितैकैव दक्षिणा देया अन्यथा प्रयोगैक्याऽयोगात्॥ राजमात्रकर्तृकक्रत्वंतर्गतेष्टौ तु वर्णत्रयसंयोगाभावान्मध्ये निधानादिलिंगं नास्ति ततश्च तंत्रैक्यसाधकाभावाद्दक्षिणाभेदेन तंत्रभेद इत्यं गानामावृत्तिरेव चरुष्विति सूत्रार्थः अत्रैकप्रयोगलिंगस्य क्रत्वर्थेष्टावसंभवं काम्येष्टौ च संभवं वदता नेन सूत्रेण काम्येष्टेः क्रत्वर्थेष्टिविलक्ष णत्वात्क्रतुप्रकरणादुत्कर्ष इति सूचितं सचोत्कर्षो युक्त एव राजमात्रकर्तृकराजसूयक्रतौ वर्णत्रयकर्तृकेष्टेरंतर्भावायोगादिति स्थितम् तथा मनस्विरादीना

राम· ३५८

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥परोक्तं दृष्टांतं विघटयति॥ न सामान्यादिति॥ क्रत्वर्थत्वैवैषम्येपि मानसत्वसामान्यं न विरुध्यते विषमयोरपि साम्यदर्शनादित्यर्थः॥ ५१॥ किंच पूर्वेत्तिर ब्राह्मणयोः स्वतंत्रविद्याविधानात्तन्मध्यस्थस्यापि ब्राह्मणस्य स्वतंत्रविद्याविधिपरत्वमित्याह॥ परेण चेति॥ चितेष्वग्नौ लोकदृष्टिविधानं स्वतंत्रमुत्तरत्र गम्यते पूर्वत्र मंडलपुरुषोपास्तिस्तन्मात्रिध्यात्मध्येपि मानसाग्नयः स्वतंत्रा इत्यर्थः॥ नहि क्रियाग्निना सहपाठः किमर्थमित्यत आह॥ भूयांस्त्वि॥

न सामान्यादप्युपलब्धेर्मृत्युवन्नहि लोकापत्तिः॥ ५१॥ यदुक्तं मानसवदिति तन्न्यत्युच्यते॥ न मानसग्रहसामान्यादपि मनश्चिदादीनां क्रियाशेषत्वं कल्प्यं पूर्वोक्तेभ्यः श्रुत्यादिभ्यो हेतुभ्यः केवलपुरुषार्थत्वोपलब्धेः॥ नहि किंचित्कस्यचित्केनचित्सामान्यं न संभवति॥ न च तावता यथास्वं वैषम्यं निवर्तते मृत्युवत्॥ यथा स वा एष एव मृत्युर्य एष एतस्मिन्मंडले पुरुष इति अग्निर्वै मृत्युरिति चाग्न्यादित्यपुरुषयोः समानेपि मृत्युशब्दप्रयोगे नात्यंतसाम्यापत्तिः॥ यथा चासौ वाव लोको गौतमाग्निस्तस्यादित्य एव समिदित्यत्र न समिदादिसामान्याल्लोकस्याग्निभावापत्तिस्तद्वत्॥ ५१॥ परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबंधः॥ ५२॥ परस्तादप्ययं वाव लोक एषोग्निश्चित इत्यस्मिन्ननंतरे ब्राह्मणे ताद्विध्यं केवलविद्याविधित्वं शब्दस्य प्रयोजनं लक्ष्यते न सुहृकर्मांगविधित्वं॥ तत्र हि विद्ययात दारोहंति यत्र कामाः परागताः॥ न तत्र दक्षिणायंति नाविद्वांसस्तपस्विन इत्यनेन श्लोकेन केवलं कर्म निंदन्विद्यां च प्रशंसन्निदं गमयति॥ तथा पुरस्तादपि यदेतन्मंडलं तपतीत्यस्मिन्ब्राह्मणे विद्याप्रधानत्वमेव लक्ष्यते॥ सोमृतो भवति मृत्युर्ह्यस्यात्मा भवतीति विद्याफलेनैवोपसंहारान्न कर्मप्रधानता तत्सामान्यादिहापि तथात्वं॥ भूयांसस्त्वग्न्यवयवाः संपादयितव्याः विद्यायामित्येतस्मात्कारणाद्ग्निनानुबध्यते विद्या न कर्मांगत्वात्॥ तस्मान्मनश्चिदादीनां केवलविद्यात्मकत्वसिद्धिः॥ २९॥ ५२॥ एक आत्मनः शरीरे भावात्॥ ५३॥ इह देहव्यतिरिक्तस्यात्मनः सद्भावः समर्थ्यते बंधमोक्षाधिकारसिद्धये॥ नह्यसति देहव्यतिरिक्त आत्मनि परलोकफलाश्चोदना उपपद्येरन् कस्य वा ब्रह्मात्मत्वमुपदिश्येत॥

ति॥ २९॥ मनश्चिदादीनां पुरुषार्थत्वमुक्तं तद्युक्तं देहातिरिक्तपुरुषाभावादित्याक्षिपति एक आत्मनः शरीरे भावात्॥ सिद्धांतफलमाह॥ बंधेति पूर्वपक्षेतु परलोकार्थकर्मसु मोक्षार्थविद्यायां च अप्रवृत्तिरिति व्यतिरेकमुखेन फलमाह नह्यसतीति॥

व्यतिरिक्तात्मविचारस्य पूर्वतंत्रे कृतत्वात्पौनरुक्त्यमित्याशंक्य तत्र न्यायस्यापीदमेव सूत्रं मूलं जैमिनिसूत्राभावादतः क्व पुनरुक्तिरित्याह ननु शास्त्रेत्यादिना यज्ञायुधीयजमानः स्वर्गलोकमेतीत्यादिवाक्यस्य भोक्तुरभावादप्रामाण्यप्राप्तावितस्वात्कृष्यभोक्तृविचारः कृत इति॥ अत्र वृत्तिकारवचनं लिंगमाह॥ अतएवेति॥ तत्र सूत्राभावादेवेत्यर्थः उद्धार उपरमः अस्याधिकरणस्यास्मिन्पादे प्रसंगसंगतिरित्याह॥ इह चेति॥ आमुष्मिकफलोपासनानिर्णयप्रसंगेन तदपेक्षितात्मास्तित्वमुच्यत इत्यर्थः॥ सत्सिद्धवत्कृत्य प्रथमसूत्रे अथशब्देनाधिकारी चिंतितस्तस्मादिदमधिकरणं सर्वशास्त्रांगमिति शास्त्रसंगतिमाह॥ कृत्स्नेति॥ आक्षेपलक्षणामवांतरसंगतिमाह॥ अ

ननु शास्त्रप्रमुख एव प्रथमे पादे शास्त्रफलोपभोगयोग्यस्य देहव्यतिरिक्तस्यात्मनोऽस्तित्वमुक्तं॥ सत्यमुक्तं भाष्यकृता न तु तत्रात्मास्तित्वे सूत्रमस्ति॥ इह तु स्वयमेव सूत्रकृता तदस्तित्वमाक्षेपपुरःसरं प्रतिष्ठापितं॥ इत एव चाऽकृष्याचार्येण शबरस्वामिना प्रमाणलक्षणे वर्णितं॥ अत एव च भगवतोपवर्षेण प्रथमतंत्रे आत्मास्तित्वाभिधानप्रसक्तौ शारीरके वक्ष्याम इत्युद्धारः कृतः॥ इह चेदं चोदनालक्षणेषूपासनेषु विचार्यमाणेषु आत्मास्तित्वं विचार्यते॥ कृत्स्नशास्त्रशेषत्वप्रदर्शनाय॥ अपि च पूर्वस्मिन्नधिकरणे प्रकरणोत्कर्षाभ्युपगमेन मनश्चिदादीनां पुरुषार्थत्वं वर्णितं कोऽसौ पुरुषो यदर्था एते मनश्चिदादय इत्यस्यां प्रसक्ताविदं देहव्यतिरिक्तस्यात्मनोऽस्तित्वमुच्यते॥ तदस्तित्वाक्षेपार्थं चेदमाद्यं सूत्रं॥ आक्षेपपूर्विका हि परिहारोक्तिर्विवक्षितेऽर्थे स्थूणानिखननन्यायेन दृढां बुद्धिमुत्पादयति॥ अत्रैके देहमात्रात्मदर्शिनो लोकायतिका देहव्यतिरिक्तस्यात्मनोऽभावं मन्यमानाः समस्तव्यस्तेषु बाह्येषु पृथिव्यादिष्वदृष्टमपि चैतन्यं शरीराकारपरिणतेषु भूतेषु स्यादिति संभावयन्तस्तेभ्यश्चैतन्यं मदशक्तिवद्विज्ञानं चैतन्यविशिष्टः कायः पुरुष इति चाहुः॥ न स्वर्गगमनायापवर्गगमनाय वा समर्थो देहव्यतिरिक्त आत्मास्ति यत्कृतं चैतन्यं देहे स्यात् देह एव तु चेतनश्चात्मा चेति प्रतिजानते॥

अपि चेति॥ देहातिरिक्त आत्मास्ति न वेति वादिविप्रतिपत्तेः संशये पूर्वपक्षमाह॥ अत्रैक इति यद्यपि समस्तेषु मिलितेषु भूतेषु चैतन्यं न दृष्टं नष्टोदकुंभस्य ज्ञानाभावात् व्यस्तेषु तु नास्त्येव तथापि देहात्मकभूतेषु स्यादिति तेभ्यो भूतेभ्यश्चैतन्यं संभावयंतो मदशक्तिवद्विज्ञानं संघातजं तद्विशिष्टसंघात आत्मेत्याहुरित्यन्वयः॥ यथा मादकद्रव्येषु तांबूलपत्रादिषु प्रत्येकमदृष्टापि मदशक्तिस्तत्संघाताज्जायते तद्वदित्यर्थः ननु देहः स्वयं न चेतनः घटवद्भौतिकत्वात्किंतु चेतनः कश्चित्स्वर्गादिभोक्तास्ति तत्सान्निध्याद्देहस्य चैतन्यविभ्रम इत्यत आह न स्वर्गेति॥ ५३॥ राम· ३५९

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥ मनुष्योऽहं जानामीति देहस्य ज्ञातृतायाः प्रत्यक्षत्वादात्मधर्मत्वेन प्रसिद्धानां धर्माणां देहान्वयव्यतिरेकानुभवात् तदन्यात्मनि प्रत्यक्षाभावादप्रत्य-
क्षस्य अप्रामाणिकत्वाद्देह एवात्मेति प्राप्ते सूत्रस्थ न त्विति पदेन सिद्धान्तं प्रतिजानीते॥ नन्वेतदिति॥ अनुमानस्य तावत्प्रामाण्यमनिच्छताप्यास्थे-
यमन्यथा व्यवहारासिद्धेः॥ नह्यनागतपाकादाविष्टसाधनतानुमितिं विना प्रवृत्तिः संभवति॥ तथा च ज्ञानादयो देहव्यतिरिक्ताश्रयाः देहसत्त्वेऽप्य-
सत्त्वात् व्यतिरेकेण देहरूपादिवदित्याह॥ व्यतिरेक एवास्येति॥ न चादौ श्यामदेहस्य पश्चाद्रूपान्तरे व्यभिचारः गुणत्वसाक्षाद्व्याप्यजात्यवच्छे-

हेतुं चाचक्षते शरीरे भावादिति॥ यद्धि यस्मिन्सति भवति असति च न भवति तत्तद्धर्मत्वेनाध्यवसीयते॥ यथाग्निधर्मावौष्ण्य-
प्रकाशौ॥ प्राणचेष्टाचैतन्यस्मृत्यादयश्चात्मधर्मत्वेनाभिमता आत्मवादिनां तेऽप्यन्तरेव देह उपलभ्यमाना बहिश्चानुपलभ्यमा-
ना असिद्धे देहव्यतिरिक्ते धर्मिणि देहधर्मा एव भवितुमर्हन्ति॥ तस्माद्व्यतिरेको देहादात्मन इत्येवं प्राप्ते ब्रूमः॥ व्यतिरेकस्त-
द्भावाभावित्वान्न तूपलब्धिवत्॥ ५४॥ न त्वेतदस्ति यदुक्तमव्यतिरेको देहादात्मन इति॥ व्यतिरेक एवास्य देहाद्भवितुमर्हति तद्भा-
वाभावित्वात्॥ यदि देहभावे भावाद्देहधर्मत्वमात्मधर्माणां मन्येत ततो देहभावेऽप्यभावादतद्धर्मत्वमेवैषां किं न मन्येत देहधर्म-
वैलक्षण्यात्॥ ये हि देहधर्मा रूपादयस्ते यावद्देहं भवन्ति॥ प्राणचेष्टादयस्तु सत्यपि देहे मृतावस्थायां न भवन्ति॥ देहधर्माश्च रूपादयः
परैरप्युपलभ्यन्ते न त्वात्मधर्माश्चैतन्यस्मृत्यादयः॥ अपि च सति हि तावद्देहे जीवदवस्थायामेषां भावः शक्यते निश्चेतुं न त्वसत्यभावः प-
तितेऽपि हि कदाचिदस्मिन्देहे देहान्तरसंचारेणात्मधर्मा अनुवर्तेरन्॥ संशयमात्रेणापि परपक्षः प्रतिषिध्यते॥ किमात्मकं च पुनरिदं
चैतन्यं मन्यते॥ यस्य भूतेभ्य उत्पत्तिमिच्छतीति परः पर्यनुयोक्तव्यः॥ न हि भूतचतुष्टयव्यतिरेकेण लोकायतिकः किंचित्तत्त्वं प्रत्ये-

देन असत्त्वस्य विवक्षितत्वाद्देहे च स्थिते सदा रूपत्वावच्छिन्नमस्त्येव ज्ञानत्वावच्छिन्नं तु नास्तीति न ज्ञानं देहधर्मः किंच एतेन देहगुणाः परैर्दृश्यत्वा-
दित्याह॥ देहधर्माश्चेति॥ किंच देहव्यतिरेके तेषामभावस्य संदिग्धत्वान्न देहधर्मत्वनिश्चय इत्याह॥ अपि चेति॥ न चानुपलम्भात्तेषामभावनिश्चयस्त-
त्त्वानुपलब्धेरमानत्वात् तद्धर्म्यात्मनो देहान्तरप्राप्त्याप्यनुपलंभोपपत्तेश्चेति भावः॥ उपलब्धिवदिति सूत्रस्थं पदं व्याख्यातुमुपक्रमते किमात्मकमिति॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू.भा. प्र.टी. ६० तत्किंभूतातिरिक्तं तत्त्वमुत रूपादिवद्भूतधर्मः नाद्यः अप्रसिद्धत्वादित्युक्त्वा द्वितीयमाशंक्य निषेधति॥ यत्त्वनुभवनमित्यादिना देहात्मकभूतानां चैतन्यं अ.पा. ३ ३
प्रतिविषयत्वात्कर्तृम् विरोधेन विषयस्य कर्तृत्वायोगात्तद्भूतकर्तृकत्वं चैतन्यस्येत्यर्थः किंच ज्ञानस्य भूतधर्मत्वे रूपादिवज्जाड्यापत्तेर्न तद्धर्मत्वमित्या-
ह नहीति॥ फलितं सूत्रपदार्थमाह॥ अतश्चेति॥ यदि देहातिरिक्तासद्रूपोपलब्धिः स एवात्मा चेदनित्यः स्यादुपलब्धेरनित्यत्वादित्यत आह नित्य-
त्वं चेति घटः स्फुरति पटः स्फुरतीति सर्वत्र स्फूर्तेरभेदान्नित्यत्वं विषयोपरागनाशे तु नाशभ्रम इत्यर्थः॥ एवमात्मा देहाद्भिन्न उपलब्धिरूपत्वादुपल-

यत्त्वनुभवनं भूतभौतिकानां तच्चैतन्यमिति चेन्न हि विषयत्वात्तेषां न तद्धर्मत्वमश्नुवीत स्वात्मनि क्रियाविरोधात्॥ न ह्यग्निरुष्णः सन्
स्वात्मानं दहति न हि नटः सुशिक्षितः सन् स्वस्कंधमधिरुह्यते न हि भूतभौतिकधर्मेण सता चैतन्येन भूतभौतिकानि विषयीक्रियेरन्॥
न हि रूपादिभिः स्वरूपं पररूपं वा विषयीक्रियते विषयीक्रियन्ते तु बाह्याध्यात्मिकानि भूतभौतिकानि चैतन्येन॥ अतश्च यथैवास्या भू-
तभौतिकविषयाया उपलब्धेर्भावोऽभ्युपगम्यते एवं व्यतिरेकोऽप्यस्यास्तेभ्योऽभ्युपगन्तव्यः॥ उपलब्धिस्वरूप एव च न आत्मेत्यात्मनो देह-
व्यतिरिक्तत्वं नित्यत्वं चोपलब्धेरैकरूप्यादहमिदमद्राक्षमिति चावस्थान्तरयोगेऽप्युपलब्धृत्वेन प्रत्यभिज्ञानात् स्मृत्याद्युपपत्तेश्च॥ यत्तू-
क्तं शरीरे भावाच्छरीरधर्म एवोपलब्धिरिति तद्दूषितेन प्रकारेण प्रत्युक्तम्॥ अपि च सत्सु प्रदीपादिषु उपकरणेषु उपलब्धिर्भवत्यसत्सु न
भवति॥ न चैतावता प्रदीपादिधर्म एवोपलब्धिर्भवति॥ एवं सति देहे उपलब्धिर्भवति असति च न भवतीति न देहधर्मो भवितुमर्हति॥ उ-
पकरणत्वमात्रेणापि प्रदीपादिवद्देहोपयोगोपपत्तेः॥ न चात्यन्तं देहस्योपलब्धावुपयोगो दृश्यते॥ निश्चेष्टेऽप्यस्मिन्देहे स्वप्ने नानाविधोप-
लब्धिदर्शनात्॥

ब्धिवदित्युक्तं किंच जाग्रत्स्वप्नयोर्देहभेदेऽप्यात्मैक्यप्रत्यभिज्ञानादात्मभेदे च अन्यानुभूते अन्यस्य स्मृतीच्छाद्यनुपपत्तेः स्वप्नस्मृत्या-
दिमानात्मा देहाद्भिन्न इत्याह॥ अहमिति॥ निरस्तमप्यधिकाऽभिधित्सयानुवदति यत्तूक्तमिति॥ उपलब्धेर्देहान्वयव्यतिरेकौ न देहधर्मत्वसाध- एम. ३६०
कौ तन्निमित्तत्वेन अन्यथासिद्धेरित्यधिकमाह॥ अपि चेति॥ उपलब्धिमात्रे देहस्य निमित्तत्वमप्यसिद्धमित्याह॥ न चात्यन्तमिति॥ स्वप्नोपलब्धिर्न दे-
हजन्या देहव्यापारं विनापि भावात् दृष्टवदत एव तन्वभावेऽपि स्वप्नवद्योगिनां भोगस्रष्टृत्वश्रुतेर्जाग्रदुपलब्धेर्देहजत्वमसिद्धमित्यत्यन्तमित्युक्तम्॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तस्मादुक्तानुमानानुगृहीतात्ममशरीरमिति भेदानुभवादहंमनुष्य इत्यभेदज्ञानंभ्रमइत्युपसंहरति तस्मादिति॥ २८॥ अंगावबद्धाः॥ उद्गीथावयवोंकारेप्राण-
दृष्टिः॥ पृथिवीहिंकारोऽग्निः प्रस्तावोंतरिक्षमुद्गीथ आदित्यः प्रतिहारो द्यौर्निधनमिति हिंकारादिपंचविधे साम्निपृथिव्यादिलोकदृष्टिः उक्थाख्यशस्त्रेपृ-
थिवीदृष्टिः इष्टकाचितानौ लोकदृष्टिरित्येवं कर्मांगाश्रिता उपासनयः संति तासूद्गीथादिसाधारणश्रुत्या विशेषसन्निधिनाच संशयः॥ ननूद्गीथादी-
नांसर्वशाखास्वेकत्वादुपास्तयः सर्वत्रेतिवेद्ये कात्र निश्चये कथं संशय इत्यत आह॥ प्रतिशाखं चेति॥ यथा देहात्मनोर्भेदात्म धर्मा देहेन संभवंति तथा प्र-

मुदथ२

तस्मादनवद्यं देहव्यतिरिक्तस्यात्मनोस्तित्वं॥ ३०॥ अंगावबद्धास्तु न शाखासु हि प्रतिवेदं॥ ५५॥ समाप्ताप्रासंगिकीकथा संप्रतितु
प्रकृतामेवानुवर्तामहे॥ ओमित्येतदक्षरमुद्गीथमुपासीत लोकेषुपंचविधं सामोपासीत उक्थमिति वै प्रजा वदंति तदिदमेवोक्थं
इयमेव पृथिवी अयं वाव लोक एषोऽग्निश्चित इत्येवमाद्या॥ य उद्गीथादिकर्मांगावबद्धाः प्रत्ययाः प्रतिवेदं शाखाभेदेषु विहिता
स्तेतत्तच्छाखागतेष्वेवोद्गीथादिषु भवेयुः अथवा सर्वशाखागतेष्विति विशयः प्रतिशाखं च स्वरादिभेदादुद्गीथादिभेदमादाया
यमुपन्यासः॥ किं तावत्प्राप्तं॥ स्वशाखागतेष्वेवोद्गीथादिषु विधीयेरन्निति॥ कुतः सन्निधानात् उद्गीथमुपासीतेति हि सामान्य
विहितानां विशेषाकांक्षायां सन्निकृष्टेनैव स्वशाखागतेन विशेषेणाकांक्षादि निवृत्तेस्तदतिलंघनेन शाखांतरविहित विशेषो
पादाने कारणं नास्ति तस्मात्प्रतिशाखं व्यवस्थेत्येवं प्राप्ते ब्रवीति॥ अंगावबद्धास्त्विति॥ तुशब्दः पक्षं व्यावर्तयति॥ नैते प्रतिवे
दं स्वशाखास्वेव व्यवतिष्ठेरन् अपितु सर्वशाखास्वनुवर्तेरन् कुतः॥ उद्गीथादिश्रुत्यविशेषात्॥ स्वशाखाव्यवस्थायां ह्युद्गीथमुपा
सीतेतिसामान्यश्रुतिरविशेषप्रवृत्तासतीसन्निधानवशेन विशेषे व्यवस्थाप्यमाना पीडिता स्यात्॥ १ तिवेदमुद्गीथादीनां भिन्नत्वादेकस्मि

न्वेदे विहितोद्गीथाद्युपास्तयो वेदांतरस्थोद्गीथादिषु न संभवंतीति दृष्टांतेन पूर्वपक्षयति॥ स्वशाखेति उद्गीथमुपासीतेति विधिवाक्यस्थोद्गीथत्व-
सामान्यस्य व्यक्त्यपेक्षत्वात्स्वशाखासन्निहितव्यक्तिग्रह इत्यर्थः॥ सामान्यश्रुतेः सन्निहितव्यक्तिग्रहाख्यसंकोचस्तत्र कर्तव्यः यत्र व्यक्तिमात्रग्रहो नोपपद्यते
यथा शुक्लां गामानयेत्यत्र गोश्रुतेः सन्निहितशुक्लव्यक्तिपरतया संकोचः अत्र चानुपपत्त्यभावाद्व्यक्तिमात्रसंबंध सामान्यमुपास्यमिति सिद्धांतयति एवमित्या

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥ पूर्वशाखांतरविहितोपासीनां शाखांतरस्थांगसंबंधेयः प्रतीतो विरोधस्तमंगीकृत्यसंबंधउक्तः संप्रतिविरोधएवनास्तिशाखांतरविहितां-
गानां शाखांतरस्थांगिसंबंधवदुक्तसंबंधोपपत्तेरित्याह॥ अथवेत्यादिनायजुर्वेदिनां कुक्कुटोसीतिमंत्रोस्तिकुटरुरसीतिनास्तितथापितंदुल-
पेषणार्थाश्मादाने मंत्रद्वयस्य विकल्पेन विनियोगात्सोपि प्राप्नोतीत्यर्थः सूत्रस्थादिपदोपात्तकर्मणामुदाहरणमाह॥ येषामिति॥ मैत्राय-
णीयानामित्यर्थः॥ हेमंतशिशिरयोरैक्या दृतवः पंचतद्धत्यंचसंख्याकाः प्रयाजाः समान ‾ त्रतुल्यकर्मस्थले होतव्या इति पंचत्वगुणविधानात्तु

नचैतन्न्याय्यं॥ सन्निधानात्तु श्रुतिर्बलीयसी॥ नचसामान्याश्रयः प्रत्ययो नोपपद्यते॥ तस्मात्स्वरादिभेदे सत्यप्युद्गीथत्वाद्यविशे-
षात्सर्वशाखागतेष्वेवोद्गीथादिषु एवंजातीयकाः प्रत्ययाः स्युः॥ ५५॥ मंत्रादिवद्वाऽविरोधः॥ ५६॥ अथवानैवात्रविरोधआशं-
कितव्यः॥ कथमन्यशाखागतेषूद्गीथादिषु अन्यशाखाविहिताः प्रत्यया भवेयुरितिमंत्रादिवदविरोधोपपत्तेः॥ तथाहि मंत्राणां कर्म-
णां गुणानां च शाखांतरोत्पन्नानामपि शाखांतरे उपसंग्रहो दृश्यते येषामपिहिशाखिनां कुटरुरसीत्यश्मादानमंत्रोनाम्नातः तेषा-
मप्यसौ विनियोगो दृश्यते कुक्कुटोसीत्यश्मानमादत्ते कुटरुरसीति वेति॥ येषामपि समिदादयः प्रयाजानाम्नातास्तेषामपि तेषु गुणवि-
धिराम्नायते ऋतवो वै प्रयाजाः समान ‾ त्रहोतव्या इति॥ तथायेषामप्यजोऽग्नीषोमीय इति जातिविशेषोपदेशो नास्ति तेषाम-
पि तद्विषयो मंत्रवर्ण उपलभ्यते॥ छागस्यवपाया मेदसोनुब्रूहीति॥ तथा वेदांतरोत्पन्नानामपि अग्रेर्वेर्होत्रं वेरध्वरमित्येवमादि-
मंत्राणां वेदांतरे परिग्रहो दृष्टः॥ तथा बह्वृचपठितस्य सूक्तस्य योजान एव प्रथमो मनस्वानित्यस्याऽध्वर्यवे सजनीयं शस्यमित्यत्र
परिग्रहो दृष्टः॥ तस्माद्यथाश्रयाणां कर्मांगानां सर्वत्रानुवृत्तिः॥ एवमाश्रितानामपि प्रत्ययानामितिअविरोधः॥ ३१॥ ५६॥

णिनः शाखांतरविहिताः संबध्यंत इति भावः॥ गुणमुदाहरति॥ तथायेषामिति॥ यजुर्वेदिनामग्नीषोमीयः पशुः श्रुतोनाज इति जातिविशेषस्तथापि-
प्रैषमंत्रलिंगाज्जाति विशेषसंग्रह इत्यर्थः॥ मंत्राणामुदाहरणांतरमाह॥ तथेति॥ सामवेदस्थानां यजुर्वेदे परिग्रह इत्यर्थः॥ तथेति॥ सजनाख इंद्र इत्यनेनो-
पलक्षितं सूक्तं सजनीयं तत्सयाजुषाध्वर्युकर्तृकप्रयोगे शंसनं दृष्टमित्यर्थः॥ योजातो बाल एव प्रथमो गुणैः श्रेष्ठोमनस्वान्विवेकवान्स इंद्र एवं विधो हे जनाः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भूम्नः क्रतुवत्॥ द्युलोकादित्यादिषु प्रत्येकं वैश्वानरत्वोपास्तिर्व्यस्तोपास्तिस्तदवयव्युपास्तिः समस्तोपास्तिरिति भेदः आख्यायिकापूर्वमेवव्या-
ख्यानात् तत्रोभयत्र विधिफलयोः श्रवणादेकवाक्यत्वोपपत्तेश्च संशयमाह॥ तत्रेति॥ सैव हि सत्यादय इत्यत्र तद्यत्तत्सत्यमिति प्रकृतानाक-
र्षाद्धि द्वैक्यमुक्तं तदत्रैक्यहेत्वभावादगतार्थत्वं मत्वा पूर्वत्रोक्तौ दीक्षादिष्वन्यासन्निधिबाधेनो दीक्षाद्युपास्तीनां सर्वशाखास्वप्युपसंहारवद्व्यस्तो-

भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति॥५७॥ प्राचीनशाल औपमन्यव इत्यस्यामाख्यायिकायां व्यस्तस्य समस्तस्य च वैश्वानर-
स्योपासनं श्रूयते॥ व्यस्तोपासनं तावदौपमन्यव कं त्वमात्मानमुपास्स इति दिवमेव भगवो राजन्निति होवाच एष वै सुतेजा आत्मा
वैश्वानरो यं त्वमात्मानमुपास्स इत्यादि॥ तथा समस्तोपासनमपि तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजाश्चक्षुर्विश्वरू-
पः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो वस्तिरेव रयिः पृथिव्येव पादावित्यादि॥ तत्र संशयः॥ किमिहोभयथाप्युपासनं स्यात्॥ व्य-
स्तस्य समस्तस्य च उत समस्तस्यैवेति॥ किं तावत्प्राप्तं॥ प्रत्यवयवं सुतेजःप्रभृतिषूपास्स इति क्रियापदश्रवणात्॥ तस्मात्तव सुतं
प्रसुतमासुतं कुले दृश्यत इत्यादिफलभेदश्रवणाच्च व्यस्तान्यप्युपासनानि स्युरिति प्राप्तं॥ ततोऽभिधीयते॥ भूम्नः पदार्थोपचयात्म-
कस्य समस्तस्य वैश्वानरोपासनस्य ज्यायस्त्वं प्राधान्यमस्मिन्वाक्ये विवक्षितं भवितुमर्हति॥ न प्रत्येकमवयवोपासनानामपि॥ क्र-
तुवत्॥ यथा क्रतुषु दर्शपौर्णमासप्रभृतिषु सामस्त्येन सांगप्रधानप्रयोगस्यैवैको विवक्ष्यते॥ न व्यस्तानामपि प्रयोगः प्रयाजादीनां
नाप्येकदेशांगयुक्तस्य प्रधानस्येति तद्वत्॥ कुत एतत्॥ भूमैव ज्यायानिति तथा हि श्रुतिः भूम्नो ज्यायस्त्वं दर्शयत्येकवाक्यतावग-
मात्॥ एकं ह्येदं वाक्यं वैश्वानरं[1] विषयं पौर्वापर्यालोचनयाऽवगम्यते॥

[1] विद्या

६६ पास्तीनां विधिश्रुतेः फलश्रवणस्य च समस्तोपास्तिसन्निधिप्रा-
संस्तुत्यर्थत्वं बाधित्वात्तद्विधेयत्वमिति पूर्वपक्षमाह॥ प्रत्यवयवमिति॥ फलानुक्तौ पूर्वोत्तरपक्षसिद्धिरेव फलं मन्तव्यं॥ सुतं खण्डितं सोमद्रव्यं तस्यैव प्र-
सुतत्वमासमन्तात्सुतत्वमवस्थाभेदः॥ सोमयागसंपत्तिस्तव कुले दृश्यत इति यावत्॥ आत्मनो वैश्वानरस्य मूर्द्धैव सुतेजा इति वाक्यप्रकरणाभ्यां व्य-
स्तोपास्तीनां समस्तोपास्त्यन्तर्भावेन प्रयाजदर्शवदेकप्रयोगत्वसिद्धेः प्रधानतदंगफलानां अर्थवादगतानामेकप्रधानफलतयोपसंहाराद्वाक्यभेदो न यु-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एकदेशिव्याख्यामनूद्य दूषयति केचित्त्विति ॥ यद्युभयथोपासनं सिद्धांतस्तर्हि व्यस्तोपासनमेवेति पूर्वपक्षो वक्तव्यः स च न संभवतीत्याह ॥ स्पष्टे चेति ॥ क-
थं तर्हि सूत्रे ज्यायस्त्वोक्तिस्तत्राह ॥ सौत्रस्येति ॥ व्यस्तोपास्तीनामप्रामाणिकत्वद्योतनार्थं तदुक्तिरिति भावः ॥ ५७ ॥ नानाशब्दादिभेदात् ॥ शांडिल्यादिब्र-

तथा हि प्राचीनशालप्रभृतय उद्दालकावसानाः षडृषयो वैश्वानरविद्यायां परिनिष्ठामप्रतिपद्यमाना अश्वपतिं कैकेयं राजानम-
भ्याजग्मुरित्युपक्रम्यैकैकस्य ऋषेरुपास्यं द्युप्रभृतीनामेकैकं श्रावयित्वा मूर्द्धा त्वेष आत्मन इति होवाचेत्यादिना मूर्धादिभावं तेषां
विदधाति मूर्धा ते व्यपतिष्यत् यन्मां नागमिष्यत् इत्यादिना च व्यस्तोपासनमपवदति ॥ पुनश्च व्यस्तोपासनं व्यावर्त्य समस्तो-
पासनमेवानुवर्त्य स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्तीति भूमाश्रयमेव फलं दर्शयति ॥ यत्तु प्रत्येकं सुतेजःप्रभृति-
षु फलभेदश्रवणं तदेवं सत्यंगफलानि प्रधान एवाभ्युपगतानीति द्रष्टव्यं ॥ तथोपास्त इत्यपि प्रत्यवयवमाख्यातश्रवणं परमाभिप्रा-
यानुवादार्थं न व्यस्तोपासनविधानार्थं ॥ तस्मात्समस्तोपासनपक्ष एव श्रेयानिति ॥ केचित्त्वत्र समस्तोपासनपक्षं ज्यायांसं प्रतिष्ठाप्य
ज्यायस्त्ववचनादेव किल व्यस्तोपासनपक्षमपि सूत्रकारोऽनुमन्यत इति कथयंति तदयुक्तं ॥ एकवाक्यतावगतौ सत्यां वाक्यभेदकल्पनस्या-
न्याय्यत्वात् ॥ मूर्धा ते व्यपतिष्यदिति चैवमादिनिंदावचनविरोधात् ॥ स्पष्टे चोपसंहारस्थे समस्तोपासनावगमे न तदभावस्य पूर्वपक्षेऽव-
कल्पनात् ॥ सौत्रस्य ज्यायस्त्ववचनस्य प्रमाणवत्त्वाभिप्रायेणाप्युपपद्यमानत्वात् ॥ ३२ ॥ ५७ ॥ नानाशब्दादिभेदात् ॥ ५८ ॥ पूर्व-
स्मिन्नधिकरणे सत्यामपि सुतेजःप्रभृतीनां फलभेदश्रुतौ समस्तोपासनं ज्याय इत्युक्तं ॥ अतः प्राप्ता बुद्धिरन्यान्यपि भिन्नश्रुतीन्यु-
पासनानि समस्योपासिष्यंत इति ॥ अपि च नैव वेद्याभेदे विद्याभेदो विज्ञातुं शक्यते ॥ वेद्यं हि रूपं विद्यायाः द्रव्यदेवतमिव यागस्य ॥
वेद्यश्चैक एवेश्वरः श्रुतिनानात्वेऽप्यवगम्यते ॥ मनोमयः प्राणशरीरः कं ब्रह्म खं ब्रह्म सत्यकामः सत्यसंकल्प इत्येवमादिषु ॥ त-
थैक एव प्राणः प्राणो वाव संवर्गः प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च प्राणो ह पिता प्राणो माता इत्येवमादिषु वेद्यैकत्वाच्च विद्यैकत्वं ॥ ९ ॥

ह्मविद्यैका नाना वा तथा संवर्गादिप्राणविद्यैका नाना वेति रूपैक्यभावाभावाभ्यां संशये दृष्टांतसंगत्या पूर्वपक्षमाह ॥ पूर्वस्मिन्निति ॥ रूपैक्याच्च विद्ये-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विधेयं चेदेकश्रुत्युक्तविद्यायाः श्रुत्यंतरेष्वुक्तिर्व्यर्थेत्यत आह ॥ श्रुतिनानात्वमपीति ॥ पूर्वपक्षफलमाह ॥ तस्मादिति सिद्धांते तु गुणानुपसंहारइ ति मत्वा सूत्रं योजयति विद्याभेदेपीति ॥ ननु भिन्नभावार्थवाचकशब्दः शब्दांतरं यथा यजति ददाति जुहोतीति तस्मिन् शब्दभेदे कर्मभेदे विध्यर्थभावनायाभे दो युक्तस्तस्याः कृतानुबंधत्वाद्भेदेन स्वीकृतविषयत्वाद्भावार्थभेदादिति यावत् ॥ प्रकृते तु वेदेपासीतेत्यादिशब्दार्थोपास्तेर्यागदानहोमवत्ततो भेदाभावा त्सिद्धगुणकब्रह्मण एकत्वेन विषयतोपि भेदाभावात् कथमुपास्तिभेद इति शंकते ॥ नन्विति ॥ अत्र सूत्रे शब्दभेदोभ्युच्चयमात्रं तयोक्तः विद्यानानात्वे सम्य

श्रुतिनानात्वमप्यस्मिन्पक्षे गुणांतरपरत्वान्नानर्थकं ॥ तस्मात्स्वपरशाखाविहितमेकवेद्यव्यपाश्रयं गुणजातमुपसंहर्तव्यं विद्याकार्त्स्न्यायेत्येवं प्राप्ते प्रतिपाद्यते ॥ नानेति वेद्याभेदेप्येवंजातीयका विद्या भिन्ना भवितुमर्हति ॥ कुतः शब्दादिभेदात् ॥ भवति हि शब्दभेदो वेदोपासीत स क्रतुं कुर्वीतेत्येवमादिः ॥ शब्दभेदश्च कर्मभेदहेतुः समधिगतः पुरस्तात् शब्दांतरे कर्मभेदः कृतानुबंधत्वादिति ॥ आदिग्रहणात् गुणादयोपि यथासंभवं भेदहेतवो योजयितव्याः ॥ ननु वेदेत्यादिषु शब्दभेद एवावगम्यते न यजतीत्यादिवदर्थभेदः सर्वेषामेवेषां मनोवृत्त्यर्थत्वाभेदादर्थांतरासंभवाच्च तत्कथं शब्दभेदाद्विद्याभेद इति ॥ नैष दोषः ॥ मनोवृत्त्यर्थत्वाभेदेपि अनुबंधभेदाद्वेद्यभेदे सति विद्याभेदोपपत्तेः ॥ एकस्यापीश्वरस्योपास्यस्य प्रतिप्रकरणं व्यावृत्ता गुणाः शिष्यंते ॥ तथैकस्यापि प्राणस्य तत्र तत्रोपास्यस्याभेदेपि अन्यादृग्गुणोन्यत्रोपासितव्यः अन्यादृग्गुणश्चान्यत्रेत्येवमनुबंधभेदाद्वेद्यभेदे सति विद्याभेदो विज्ञायते ॥ न चात्रैको विद्याविधिः इतरे गुणविधय इति शक्यं वक्तुं विनिगमनायां हेत्वभावात् ॥ अनेकत्वाच्च प्रतिप्रकरणं गुणानां प्राप्तविद्यानुवादेन विधानानुपपत्तेः ॥

((कुहेतवस्त्वादिपदोपात्तगुणादय एव ॥ तथाहि सिद्धस्यापि गुणस्य कार्यान्वयितया कार्यत्वमस्ति यथा आरुण्यादिगुणानां क्रयणभावनान्वयितया कार्यत्वं तथा च तत्तत्प्रकरणोक्तस्य त्तिशिष्टरूपास्तिभावनान्वयितया साध्यैस्तत्तद्गुणैर्विशिष्टतयोपास्यरूपभेदादुपासनाभेदः ॥ यथा छत्रचामरादिगुणभेदेन राजोपास्तिभेदः ॥ यथा वा मिक्षावाजिनगुणभेदेन यागभेदस्तद्वत् तथा प्रतिविद्यां फलसंयोगभेदाद्दहरशांडिल्यादिसमाख्याभेदाद्भेद इति समाधत्ते नैष दोष इत्यादिना यदुक्तं । श्रुतिनानात्वं गुणांतरविध्यर्थमिति तन्नेत्याह ॥ न चात्रैक इति ॥ किंच प्राप्तविद्यानुवादेनाप्राप्तानेकगुणविधाने वाक्यभेदः स्यादित्याह ॥ अनेकत्वाच्चेति ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किंचविद्यैक्यपक्षेगुणानांपुनरुक्तिर्वृथा नचप्रत्यभिज्ञानार्थाब्रह्मैक्यादेवतत्सिद्धेः॥ विद्यानानात्वपक्षेतुगुणानामप्राप्तेः सामार्थ्यर्थेत्याह॥ नचास्मिन्पक्षइति॥ फलभेदाच्चोदनैक्याभावात्सर्वगुणध्यानस्याशक्यत्वाच्च विद्यानानेत्याह॥ प्रतिप्रकरणंचेत्यादिना॥ दहरध्यातुः सर्वेषुलोकेषुकामचारोभवति वैश्वानरध्यातासर्वत्रान्नमत्तीत्यादिफलभेदइत्यर्थः॥ ननुविद्यानानात्वेसिद्धेपश्चाद्दहरादिविद्याप्रतिवेदांतमेकानेकावेतिचिंतोचितानत्वयमा।

नचास्मिन्पक्षेसमानाः संतः सत्यकामत्वादयोगुणाः असकृच्छ्रावयितव्याः॥ प्रतिप्रकरणंचेदंकामेनेदमुपासितव्यमिदंकामेन चेदमितिनैराकांक्ष्यावगमान्नैकवाक्यतापत्तिः॥ नचात्रवैश्वानरविद्यायामिवसमस्तचोदनाऽपरास्तियद्बलेनप्रतिप्रकरणवर्तीन्यवयवोपासनानिभूत्वैकवाक्यतांयायुः वेद्यैकत्वनिमित्तेचविद्यैकत्वेसर्वत्रनिरंकुशेप्रतिज्ञायमानेसमस्तगुणोपसंहारोऽशक्यः प्रतिज्ञायेत॥ तस्मात्सुष्ठूच्यतेनानाशब्दादिभेदादिति॥ स्थितेचैतस्मिन्नधिकरणेसर्ववेदांतप्रत्ययमित्यादिद्रष्टव्यं॥३३॥५८॥ विकल्पोऽविशिष्टफलत्वात्॥५९॥ स्थितेविद्याभेदेविचार्यते॥ किमासामिच्छयासमुच्चयोविकल्पोवास्यात्॥ अथवाविकल्पएवनियमेनेति॥ तत्रस्थितत्वात्तावद्विद्याभेदस्यनसमुच्चयनियमेकिंचित्कारणमस्ति॥ ननुभिन्नानामप्यग्निहोत्रदर्शपूर्णमासादीनां समुच्चयनियमोदृश्यते॥ नैषदोषः॥ नित्यताश्रुतिर्हितत्रकारणंनैवंविद्यानांकाचिन्नित्यताश्रुतिरस्तितस्मान्नसमुच्चयनियमः॥ नापिविकल्पनियमः विद्यांतराधिकृतस्यविद्यांतराप्रतिषेधात्॥ पारिशेष्याद्यथाकाम्यमापद्यते॥ नन्वविशिष्टफलत्वादासांविकल्पोन्याय्यः॥ तथाहिमनोमयः प्राणशरीरः कंब्रह्मखंब्रह्मसत्यकामः सत्यसंकल्पइत्येवमाद्यास्तुल्यवदीश्वरप्राप्तिफलालक्ष्यंते नैषदोषः॥ समानफलेष्वपिस्वर्गादिसाधनेषुकर्मसुयथाकाम्यदर्शनात्॥ तस्माद्यथाकामप्राप्तावुच्यते॥

११दोसाक्षतेत्यत आह। स्थितेचै।

ति॥ विद्यानानात्वाधिकरणंपादादावेवसंगतंअत्रप्रासंगिकमितिभावः॥५८॥ विकल्पोविशिष्टफलत्वात् विद्यानांस्वरूपमुक्त्वानुष्ठानप्रकारोत्रनिरूप्यतइत्युपजीव्यत्वसंगतिमाह॥ स्थितइति विद्यास्त्रिविधाअहंग्रहास्तटस्थाअंगाश्रिताश्चेतितत्राहंग्रहविद्यासुयथाकाम्यविकल्पयोर्विद्यानानात्वसाम्यात्संशयमाह॥ किमिति॥ पूर्वपक्षेयथेष्टमनुष्ठानमित्यनियमःसिद्धांतेविकल्पेनानुष्ठानमितिनियमइतिफलभेदः॥ तत्रानियमंसाधयति॥ तत्रस्थि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एकपुरोडाशफलत्वाद्यथा व्रीहियवयोर्विकल्पस्तथा विकल्पनियम एवासां विद्यानां न्याय्यः तुल्यफलत्वात् न च फलभूयस्त्वार्थिनः काम्यकर्मसमु-
च्चयोपि दृष्ट इति वाच्यं ईश्वरसाक्षात्कारात्परफले भेदेप्यासामहंग्रहोपास्तीनां साक्षात्कारात्मकफलस्य तुल्यत्वात्तस्य चैकयाकृतत्वे अन्यस्याः
कृत्याभावाच्चित्तविक्षेपकत्वाच्च न हि ध्यानकर्त्वाश्चेति सिद्धांतभाष्यार्थः॥ सा तु साक्षात्कार इत्यत आह॥ साक्षात्करणसाध्यं चेति॥ यस्य पुंसोऽ-
द्धाईश्वरोहमिति साक्षात्कारः स्यात् हि चिकित्सा च नास्ति अहमीश्वरो न वेति न स्येवेश्वरप्राप्तिरित्यर्थः॥ जीवन्नेव भावनया देवत्वं साक्षात्कृत्य

॥ विकल्प एवासां भवितुमर्हति॥ न समुच्चयः कस्मात्॥ अविशिष्टफलत्वात्॥ अविशिष्टं ह्यासां फलं उपास्यविषय
साक्षात्करणं॥ एकेन चोपासनेन साक्षात्कृत उपास्ये विषय ईश्वरादौ द्वितीयमनर्थकं॥ अपि चासंभवः साक्षात्करणस्य स-
मुच्चयपक्षे चित्तविक्षेपहेतुत्वात्॥ साक्षात्करणसाध्यं च विद्याफलं दर्शयंति श्रुतयः॥ यस्य स्यादद्धा न विचिकित्सास्तीति
देवो भूत्वा देवानप्येतीति चैवमाद्याः॥ स्मृतयश्च सदा तद्भावभावित इत्येवमाद्याः॥ तस्मादविशिष्टफलानां विद्या-
नामन्यतमामादाय तत्परः स्याद्यावदुपास्यविषयसाक्षात्करणेन तत्फलं प्राप्तमिति॥ ३५॥ ५९॥ काम्यास्तु यथा-
कामं समुच्चीयेरन्न वा पूर्वहेत्वभावात्॥ ६०॥ अविशिष्टफलत्वादित्यस्य प्रत्युदाहरणं॥ यास्तु पुनः काम्यास्तु विद्या-
सु स य एतमेवं वायुं दिशां वत्सं वेद न पुत्ररोदं रोदितिस यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य यथा कामचारो
भवतीति चैवमाद्यासु क्रियावददृष्टेनात्मनात्मीयं फलं साधयंतीषु साक्षात्करणापेक्षा नास्ति॥ ता यथाकामं समु-
च्चीयेरन्न वा समुच्चीयेरन्॥ पूर्वहेत्वभावात् पूर्वस्याविशिष्टफलत्वादित्यस्य विकल्पहेतोरभावात्॥ ३५॥ ६०॥ ९॥

देहपातोत्तरकालं देवानाप्नोतीति श्रुत्यंतरार्थः॥ अहंग्रहाणामनुष्ठानप्रकारमुपसंहरति॥ तस्मादिति॥ ५९॥ काम्यास्तु॥ तटस्थोपास्तयोऽत्र विषयस्ता-
सु किं विकल्प उत यथाकामं अनुष्ठानमिति पूर्ववत्संशये सत्युपास्तित्वाविशेषादहंग्रहवद्विकल्प इति प्राप्तावपवादं सिद्धांतयति अविशिष्टेति॥ स यः कश्चि-
देतं वायुमेवंगोत्वेन कल्पितानां दिशां वत्सं वेदोपास्ते नासौ पुत्रमरणनिमित्तं रोदनं रोदिति लभते नित्यमेव जीवत्पुत्रो भवतीत्यर्थः॥ अहंग्रहदृष्टांते साक्षा-

शा॰भा॰ संप्रत्यंगावबद्धोपास्तीनामनुष्ठानक्रमं वक्तुं पूर्वपक्षयति अंगेषु॥ अंगाश्रितत्वात्सफलत्वाच्च संशयमाह॥ किमिति॥ यथाक्रत्वनुष्ठानेन तदाश्रितांगानां स- अ॰पा॰
प्र॰टी॰ मुच्चित्यानुष्ठाननियमस्तथांगानुष्ठानेन तदाश्रितोपास्तीनां तन्नियम इति सूत्रार्थः॥ ननु तन्निर्धारणानियम इत्यत्रांगाश्रितानां गोदोहनवदनंगत्वमुक्तं त- ३ २
३६४ त्कथमनंगानामंगवत्समुच्चयशंकेति उच्यते॥ अंगान्यनुष्ठापयत्प्रयोगविधिर्यद्युपासनानि नानुष्ठापयेत्तर्हि तेषां तदाश्रितत्वं व्यर्थमिति मत्वा तस्य
शंकेति भावः॥ ६१॥ तर्हि गोदोहनस्यापि समुच्चयः स्यादित्यत आह॥ शिष्टेश्चेति॥ शिष्टिः शासनं विधानमिति यावत् विहितत्वाविशेषात्समुच्चयो गव-
दित्यर्थः॥ गोदोहनस्य तु नानुष्ठाननियमः॥ चमसस्थाने विहितत्वात् तन्नियमे चमसविधिवैयर्थ्यादुपासनानां तु न कस्यचिदंगस्य स्थाने विहितत्व-

अंगेषु यथाश्रयभावः॥ ६१॥ कर्मांगेषूद्गीथादिषु य आश्रिताः प्रत्यया वेदत्रयविहिताः॥ किं ते समुच्चीयेरन् किं वा यथाका-
मं स्युरिति संशये यथाश्रयभाव इत्याह॥ यथैवेषामाश्रयाः स्तोत्रादयः संभूय भवंति एवं प्रत्यया अपि आश्रयतंत्रत्वात्प्र-
त्ययानां॥ ६१॥ शिष्टेश्च॥ ६२॥ यथा चाश्रयाः स्तोत्रादयस्त्रिषु वेदेषु शिष्यंते॥ एवमाश्रिता अपि प्रत्ययाः॥ नोपदेशकृ-
तोपि कश्चिद्विशेषोंगानां तदाश्रयाणां च प्रत्ययानामित्यर्थः॥ ६२॥ समाहारात्॥ ६३॥ होतृषदनाद्धैवापि दुरुद्गीथमनु-
समाहरतीति च प्रणवोद्गीथैकत्वविज्ञानमाहात्म्यादुद्गाता स्वकर्मण्युत्पन्नं क्षतं होत्रात्कर्मणः प्रतिसमादधातीति ब्रुवन्वेदां-
तरोदितस्य प्रत्ययस्य वेदांतरोदितपदार्थसंबंधसामान्यात्सर्ववेदोदितप्रत्ययोपसंहारं सूचयतीति लिंगदर्शनं॥ ६३॥

मिति समुच्चयनियमो न विरुध्यत इति भावः॥ ६२॥ समुच्चये लिंगमाह॥ समाहारादिति॥ ऋग्वेदिनां यः प्रणवः स सामवेदिनामुद्गीथ इति
छांदोग्ये प्रणवोद्गीथयोरैक्यध्यानविधिरस्ति तस्य फलार्थवादो होतृषदनादित्यादिः होतुः शंसनस्थलं वाचिना होतृषदनशब्देन शंसनं लक्ष्य- सम॰
ते॥ उद्गाता स्वरादिप्रमादात् दुष्टमप्युद्गीथं सम्यक्कृतान् होतृशंसनादनुसमाहरत्येव निर्दोषं करोत्येव किल शंस्यमानप्रणवेन स्वीयो- ३६४
द्गीथस्यैक्यध्यानबलादित्यर्थः ततः किं तत्राह इति ब्रुवन्निति॥ सामवेदस्थोद्गीथध्यानस्य ऋग्वेदोक्तप्रणवसंबंधो यो दृष्टः स एवांगानां सर्व-
वेदांतविहितोपास्तिसमुच्चये लिंगं प्रणवरूपपदार्थस्योपास्तीनां च वेदांतरोक्तत्वसादृश्यात् वेदांतरोक्तांगसंबंधस्यापि समानत्वादित्यर्थः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ॐकारस्यध्येयस्यसाधारण्यादपितदाश्रितध्यानानांसमुच्चित्यानुष्ठानंगम्यतइतिलिंगांतरमाह॥गुणेति॥तेनोंकारेणवेदत्रयोक्तंकर्मप्रव-
र्त्ततइत्यर्थः॥ अन्वयमुखेनोक्तमेवार्थंव्यतिरेकतोपिव्याचष्टेअथवेति॥६४॥ फलेच्छाया अनियमादुपास्त्यनियमएवयुक्तः अंगवत्समुच्च-

गुणसाधारण्यश्रुतेश्च॥६४॥ विद्यागुणंचविद्याश्रयंसंतमोंकारंवेदत्रयसाधारणंश्रावयति॥ तेनेयंत्रयीविद्या-
वर्त्ततॐमित्याश्रावयत्योमितिशंसत्योमित्युद्गायतीतिच॥ ततश्चाश्रयसाधारण्यादाश्रितसाधारण्यमितिलिंगदर्श-
नमेव॥ अथवागुणसाधारण्यश्रुतेश्चेति॥ यदीमेकर्मगुणाउद्गीथादयः सर्वेसर्वप्रयोगसाधारणानस्युर्नस्या-
त्ततस्तदाश्रयाणांप्रत्ययानांसहभावः॥ तेतूद्गीथादयः सर्वांगग्राहिणाप्रयोगवचनेनसर्वेसर्वप्रयोगसाधार-
णाः श्राव्यंतेततश्चाश्रयसहभावात्प्रत्ययसहभावइति॥ ६४॥ नवातत्सहभावाश्रुतेः॥ ६५॥ नवेतिपक्षव्याव-
र्त्तनं॥ नयथाश्रयभावआश्रितानामुपासनानांभवितुमर्हति॥कुतः तत्सहभावाश्रुतेः॥ यथाहित्रिवेदीविहिता-
नामंगानांस्तोत्रादीनांसहभावः श्रूयतेग्रहंवागृहीत्वाचमसंवोन्नीयस्तोत्रमुपाकरोतिस्तुतमनुशंसतिप्रस्तोतः॥
साम गायहोतरेतद्यजेत्यादिना॥ नैवमुपासनानांसहभावश्रुतिरस्ति॥ ननुप्रयोगवचनएषांसहभावंप्रापयेत्॥
॥नेतिब्रूमः पुरुषार्थत्वादुपासनानां॥ प्रयोगवचनोहिक्रत्वर्थानामुद्गीथादीनांसहभावंप्रापयेत्॥ ६५ ॥

पनियमेमानाभावादितिसिद्धांतयति॥नवेति। प्रयोगविधिः खलुसांगप्रधानानुष्ठाननियामकः नत्वनंगानांसंग्राहकइत्याह।नेतिब्रूम।
इतिविमतोपास्तयः क्रतौनसमुच्चित्यानुष्ठेयाः भिन्नफलत्वाद्गोदोहनवदितिभावः॥ ६५ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिष्टश्चेत्युक्तं निरस्यति अयमेवेति॥ समाहाराद्गुणसाधारण्यश्रुतेश्चेत्युक्तं लिंगद्वयमपि मानांतरप्राप्तस्य द्योतकं न स्वयं साधकं॥ अर्थवादस्य त्वाद्वित्याह॥
परं चेति॥ गुणसाधारण्यसूत्रस्य द्वितीयां व्याख्यां दूषयति॥ न चेति॥ नन्वप्रयुक्तत्वाभावेन तदाश्रितत्वं कथमित्यत आह॥ आश्रयेति॥ इदमेव तेषां अं
गाश्रितत्वं यदंगाभावे सत्यसत्वं न त्वंगव्यापकत्वमित्यर्थः॥ ६५॥ किंच विदुषा ब्रह्मणान्येषामृत्विजां पाल्यत्ववचनान्न सर्वोपास्तीनां सहप्रयोगः

उद्गीथाद्युपासनानि क्रत्वर्थाश्रयाण्यपि गोदोहनादिवत्पुरुषार्थानीत्यवोचाम पृथग्घ्यप्रतिबंधः फलमित्यत्र॥ अयमेव चोपदे
शाश्रयो विशेषोंगानां तदालंबनानां चोपासनानां यदेकेषां क्रत्वर्थत्वमेकेषां पुरुषार्थत्वमिति॥ परं च लिंगद्वयमकारणं उपासनसह
भावस्य श्रुतिन्यायाभावात्॥ न च प्रतिप्रयोगमाश्रयकार्त्स्न्योपसंहारादाश्रितानामपि तथात्वं विज्ञातुं शक्यं अनन्यप्रयुक्तत्वादुपा
सनानां॥ आश्रयतंत्राण्यपि ह्युपासनानि कामं माश्रयाभावे माभूवन्॥ न त्वाश्रयसहभावेन सहभावनियममर्हंति॥ न
सहभावाश्रुतेरेव तस्माद्यथाकाममेवोपासनान्यनुष्ठीयेरन्॥ ६५॥ दर्शनाच्च॥ ६६॥ दर्शयति च श्रुतिरसहभावं प्रत्ययानां॥ ए
वंविद्ध वै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजोभिरक्षतीति॥ सर्वप्रत्ययोपसंहारे हि सर्वे सर्वविद इति न विज्ञानवता ब्रह्मणा परिपाल्य
त्वमितरेषां संकीर्त्येत॥ तस्माद्यथाकाममुपासनानां समुच्चयो विकल्पो वेति॥ ३६॥ इति श्रीशारीरकमीमांसाभाष्ये शंकरभ
गवत्पादकृतौ तृतीयस्याध्यायस्य तृतीयः पादः समाप्तः॥ ३॥ श्रीसीतारामचंद्राय नमः॥ श्रीसांबसदाशिवाय नमः॥ ९

त्याह॥ दर्शनाच्चेति॥ ऋग्वेदादिविहितांगलोपे व्याहृतिहोमप्रायश्चित्तादिविज्ञानवत्त्वमेवंवित्त्वं ब्रह्मण इत्यर्थः॥ ६६॥ इति श्रीमच्छारीरकमीमां
साव्याख्यायां भाष्यरत्नप्रभायां तृतीयस्याध्यायस्य तृतीयः पादः समाप्तः॥ भाष्यम्॥ ११६०॥ टीका १०५०॥ एवमादितः॥ २२१०॥ ९ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ शारीरकसूत्रभाष्ये रत्नप्रभायां तृतीयाध्यायस्य चतुर्थपादः प्रारम्भः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीगणेशाय नमः ॥ ॐ ॥ कर्माङ्गविद्याप्रसङ्गात् ब्रह्मज्ञानस्य कर्माङ्गत्वमाशङ्क्याह ॥ पुरुषार्थोऽतः शब्दादिति बादरायणः ॥ पूर्वपादे परापरविद्यानां गुणोपसंहारेणास्वरूपं निश्चितं अस्मिन्पादे तासां कर्मानङ्गतया पुरुषार्थहेतुत्वं निरूप्यते ॥ ततो याः काश्चापायज्ञादीनि बहिरङ्गानि शमादीन्यन्तरङ्गाणि च निरूप्यन्त इति सङ्कविद्याविषयत्वं पादयोः सङ्गतिः ॥ तत्रादौ तत्त्वज्ञानं विषयीकृत्य वादिविप्रतिपत्त्या संशयमाह ॥ अथेति ॥ पूर्वपक्षे ज्ञानं कर्मणामङ्गत्वेन समुच्चयः सिद्धान्ते केवलज्ञानान्मुक्तिरिति फलभेदः ॥ य आत्मेति प्रजापत्युक्तब्रह्मविद्यायां लोकादिकं सगुणविद्याफलं मोक्षानन्देन भोक्ताभिप्रायेणोक्तमिति मं-

॥ श्री ॥ पुरुषार्थोऽतः शब्दादिति बादरायणः ॥ १ ॥ अथेदानीमौपनिषदमात्मज्ञानं किमधिकारिद्वारेण कर्मण्येवानुप्रविशति ॥ आहोस्वित्स्वतन्त्रमेव पुरुषार्थसाधनं भवतीति मीमांसमानः सिद्धान्तेनैव तावदुपक्रमते पुरुषार्थोऽत इति ॥ अस्माद्वेदान्तविहितादात्मविज्ञानात्स्वतन्त्रात्पुरुषार्थः सिध्यतीति बादरायण आचार्यो मन्यते ॥ कुत एतदवगम्यते शब्दादित्याह ॥ तथाहि ॥ तरति शोकमात्मवित् स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति ब्रह्मविदाप्नोति परं आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति ॥ य आत्मापहतपाप्मेत्युपक्रम्य सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानमनुविद्य विजानातीति आत्मा वा अरे द्रष्टव्य इत्युपक्रम्य एतावदरे खल्वमृतत्वमिति एवंजातीयका श्रुतिः केवलाया विद्यायाः पुरुषार्थहेतुत्वं श्रावयति ॥ १ ॥

अथात्र प्रत्यवतिष्ठते ॥ शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः ॥ २ ॥ कर्तृत्वेनात्मनः कर्मशेषत्वात्तद्विज्ञानमपि व्रीहिप्रोक्षणादिवद्विषयद्वारेण कर्मसंबन्ध्येवेति ॥ अतस्तस्मिन्नवगतप्रयोजने आत्मज्ञाने या फलश्रुतिः सार्थवाद इति जैमिनिराचार्यो मन्यते ॥ यथान्येषु द्रव्यसंस्कारकर्मसु यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति यदङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते यत्प्रयाजानुयाजा इज्यन्ते वर्म वा एतद्यज्ञस्य क्रियते वर्म यजमानस्य भ्रातृव्याभिभूत्या इत्येवंजातीयका फलश्रुतिरर्थवादस्तद्वत् ॥ २ ॥

त्वम् ॥ १ ॥ एवं सिद्धान्तमुपक्रम्य पूर्वपक्षयति शेषत्वादिति ॥ सूत्रेऽर्थवादपदमावर्तनीयं ज्ञानात्पुरुषार्थवादोऽर्थवाद इत्यर्थः ॥ ज्ञानं कर्माङ्गमफलत्वे सति कर्मशेषाश्रयत्वात्प्रोक्षणपर्णमयीत्वादिवदिति भावः ॥ नन्वनिर्णयार्थं गुरुशिष्ययोः कथावादोऽयमिति ज्ञापनार्थं जैमिनिग्रहणं अङ्गिफलेनाङ्गभूतआत्मावगतप्रयोजनस्तदाश्रयेण तत्संस्कारे ज्ञाने फलश्रुतिरर्थवाद इत्यत्र दृष्टान्तः यथेति पर्णमयी द्रव्यं यजमानस्य अञ्जनसंस्कारः प्रयाजादीनि कर्माणि तेष्वित्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आत्मज्ञानेन कर्मांगमानाभावादिति सिद्धांती शंकते ॥ कथमिति ॥ पूर्वपक्ष्याह ॥ कर्त्रेति नियुक्तो ह्यनारभ्याधीतायाः पर्णताया जुहूद्वारेण वाक्यात्क्र
त्वंगभावोऽनुक्तः क्रत्वव्याप्यतया क्रतूपस्थापकत्वात् ॥ ननु तथात्मविज्ञानस्य आत्मा द्रष्टव्य इति वाक्यात्क्रतुसंबंध उपपद्यते ॥ आत्मनः क्रतु
व्याप्यभावादिति सिद्धान्ती दूषयति नेति ॥ देहभिन्नत्वेन ज्ञानात्मनः क्रतुव्याप्यत्वमस्तीति पूर्वपक्षी समाधत्ते न व्यतिरेकेति सर्वथेति ॥ देहात्म

कथं पुनरस्यानारभ्याधीतस्यात्मज्ञानस्य प्रकरणादीनामन्यतमेनापि हेतुना विना क्रतुप्रवेश आशंक्यते ॥ कर्तृद्वारेण
वाक्यात्तद्विज्ञानस्य क्रतुसंबंध इति चेन्न वाक्याद्विनियोगानुपपत्तेः ॥ अव्यभिचारिणा हि केनचिद्द्वारेणानारभ्याधीतानाम
पि वाक्यनिमित्तः क्रतुसंबंधोऽवकल्पते ॥ कर्ता तु व्यभिचारिद्वारं लौकिकवैदिककर्मसाधारण्यात् ॥ तस्मान्न तद्द्वारेणा
त्मज्ञानस्य क्रतुसंबंधसिद्धिरिति ॥ न व्यतिरेकज्ञानस्य वैदिकेभ्यः कर्मभ्योऽन्यत्रानुपयोगात् ॥ न हि देहव्यतिरिक्तात्म
ज्ञानं लौकिकेषु कर्मसूपयुज्यते सर्वथा दृष्टार्थप्रवृत्त्युपपत्तेः ॥ वैदिकेषु तु देहपातोत्तरकालफलेषु देहव्यतिरिक्तात्मज्ञा
नमंतरेण प्रवृत्तिर्नोपपद्यत इत्युपयुज्यते व्यतिरेकविज्ञानं ॥ नन्वपहतपाप्मत्वादिविशेषणादसंसार्यात्मविषयमौप
निषदं दर्शनं न प्रवृत्त्यंगं स्यात् ॥ न प्रियादिसंसूचितस्य संसारिण एवात्मनो द्रष्टव्यत्वेनोपदेशात् ॥ अपहतपाप्मत्वादिवि
शेषणं तु स्तुत्यर्थं भविष्यति ॥ ननु तत्र तत्र प्रसाधितमेतदधिकमसंसारि ब्रह्म जगत्कारणं तदेव च संसारिण आत्मनः पारमा
र्थिकं स्वरूपमुपनिषत्सूपदिश्यत इति ॥ सत्यं प्रसाधितं तस्यैव तु स्थूणानिखननवत्फलद्वारेणाक्षेपसमाधाने क्रियेते दार्ढ्या
य ॥ २ ॥ आचारदर्शनात् ॥ ३ ॥

त्वेनापीत्यर्थः ॥ देहभिन्नकर्तृज्ञानस्यांगत्वेऽप्यकर्तृब्रह्मात्मज्ञानस्य नांगत्वमिति शंकते ॥ नन्वपहतेति
॥ यस्यार्थे जायादिकं प्रियं भोग्यं स आत्मा द्रष्टव्य इति भोग्यलिंगेन सूचितभोक्तृभिन्नमकर्तृस्वरूपं नास्तीति समाध्यर्थः ॥ जन्मादिसूत्रमारभ्य साधि
तं स्वरूपं कथं नास्तीति शंकते ॥ नन्विति ॥ स्वरूपज्ञानं वेदान्तानां फलं तस्य क्रत्वर्थत्वं पुरुषार्थत्वं विचारेण दार्ढ्यं क्रियत इत्याह ॥ सत्यमिति ॥ २ ॥ ब्रह्म
विदां कर्माचारदर्शनं ब्रह्मविद्यायाः कर्मांगत्वे लिंगमित्याह ॥ आचारेति ॥ ७ ॥ ७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा.भा. ईजे यागं कृतवानित्यर्थः॥ हे भगवन्त इति ब्राह्मणान्संबोध्य अस्त्विन्ति केकयराजो ब्रूते॥ अहं यक्ष्यमाणो यागं करिष्यमाणोऽस्मि वसन्त्वत्र भगवन्त इत्यर्थः॥ अन्य
टी. परेष्विति विद्याविधिपरेष्वित्यर्थः॥ अल्पायाससमुक्ते रूपायं ज्ञानं तं लब्ध्वा बह्वायासं कर्म न कुर्युरित्यत्र दृष्टान्तमाह॥ अक्क इति समीप इत्यर्थः॥ अर्के इति अ.पा.
र.प्र. पारेष्वयमेवार्थः॥ ३॥ ब्रह्मविद्यायाः कर्माङ्गत्वे तृतीयाश्रुतिरप्यस्तीत्याह तच्छ्रुतेरिति॥ ४॥ लिङ्गान्तरमाह॥ समिति॥ तं परलोकं गच्छन्तं विद्याकर्मणी ३।४
३६७ अनुगच्छत इत्यर्थः॥ ५॥ गुरोः शुश्रूषारूपं कर्म कुर्वन्नतिशेषेणावशिष्टेन कालेन यथाविधानं वेदमधीत्यानन्तरमाचार्यस्य कुलाद्गृहाद्ब्रह्मचर्यादिति॥

जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे यक्ष्यमाणो वै भगवन्तोऽहमस्मीत्येवमादीनि ब्रह्मविदां सम्बन्धिषु वाक्येषु कर्मसंबन्ध-
दर्शनानि भवन्ति॥ तथोद्दालकादीनामपि पुत्रानुशासनादिदर्शनाद्गार्हस्थ्यसंबन्धोऽवगम्यते॥ केवलाच्चेज्ज्ञानात्पुरुषार्थसि-
द्धिः स्यात् किमर्थमनेकायाससमन्वितानि कर्माणि ते कुर्युः॥ अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेदिति न्यायात्॥ ३॥ तच्छ्रु-
तेः॥ ४॥ यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति च कर्मशेषत्वश्रवणाद्विद्याया न केवलायाः पुरुषार्थहे-
तुत्वं॥ ४॥ समन्वारम्भणात्॥ ५॥ तं विद्याकर्मणी समन्वारभेते इति च विद्याकर्मणोः फलारम्भे साहित्यदर्शनान्न स्वातन्त्र्यं
विद्यायाः॥ ५॥ तद्वतो विधानात्॥ ६॥ आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ
देशे स्वाध्यायमधीयान इति चैवंजातीयका श्रुतिः समस्तवेदार्थविज्ञानवतः कर्माधिकारं दर्शयति॥ तस्मादपि न विज्ञान-
स्य स्वातन्त्र्येण फलहेतुत्वं॥ नन्वत्राधीत्येत्यध्ययनमात्रं वेदस्य श्रूयते नार्थविज्ञानं॥ नैष दोषः॥ दृष्टार्थत्वाद्वेदाध्ययनमर्थाव-

यावत्॥ अभिसमावर्तनं कृत्वा कुटुम्बे गार्हस्थ्ये स्थितः सन् शुचौ देशे स्वाध्याया ऽवबोधपर्यन्तमिति स्थितं॥ ६॥ नियमाच्च॥ ७॥ पाम.
ध्ययनं कुर्वन्नन्यांश्च नित्यादिधर्माननुतिष्ठन् ब्रह्मलोकं प्राप्नोतीति श्रुत्यर्थः॥ यथाऽवघातस्तुषविमोकपर्यन्तः एवमध्ययनमर्थावबोधान्तं दृष्टे अ- ३६७
र्थावबोधाख्ये फले संभवति अध्ययनस्यादृष्टार्थत्वायोगादिति पूर्वतन्त्रे स्थितं तन्तस्य ब्रह्मापि वेदार्थ इति तदवबोधवतः कर्मविधानमित्यर्थः॥
॥ ६॥ यावज्जीवं कर्मनियमोऽप्यत्र लिङ्गमित्याह॥ नियमाच्चेति॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri.

इहदेहे कर्माणि कुर्वन्नेव शतं संवत्सरान् जीविषुमिच्छेदेवं कर्मित्वेन जीवनि त्वयि नरे कर्म पापं न लिप्यते इतः कर्मणोऽन्यथा नास्ति कर्म विना श्रेयो नास्तीत्य
र्थः जरामर्यं जरामरणावधिकमित्यर्थः ॥७॥ कर्त्तुरधिकस्यासंसार्यात्मनः कर्मशेषत्वाभावात्तत्त्वज्ञानं कर्माङ्गमिति सिद्धांतयत्यधिकेति ॥ अस्य महत इति वा

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ॥ एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नर इति ॥ तथा एतद्वै जरामर्यं सत्रं यदग्निहोत्रं जर
या वा ह्येवास्मान्मुच्यते मृत्युना वेति ॥ एवंजातीयकान्नियमादपि कर्मशेषत्वमेव विद्याया इति ॥७॥ एवं प्राप्ते प्रतिविधत्ते ॥ अधिकोप
देशात्तु बादरायणस्यैवं तद्दर्शनात् ॥८॥ तुशब्दात् पक्षो विपरिवर्तते ॥ यदुक्तं शेषत्वात् पुरुषार्थवाद इति तन्नोपपद्यते कस्मात् ॥ अधिको
पदेशात् ॥ यदि संसार्येवात्मा शारीरः कर्ता भोक्ता च शरीरमात्रव्यतिरेकेण वेदान्तेषूपदिष्टः स्यात्ततो वर्णितेन प्रकारेण फलश्रुतेरर्थवा
दत्वं स्यात् ॥ अधिकस्तावत् शारीरादात्मनोऽसंसारी ईश्वरः कर्तृत्वादिसंसारधर्मरहितोऽपहतपाप्मत्वादिविशेषणः परमात्मा वे
द्यत्वेनोपदिश्यते वेदान्तेषु ॥ न च तद्विज्ञानं कर्मणां प्रवर्तकं भवति प्रत्युत तत्कर्माण्युच्छित्तीति वक्ष्यति उपमर्दं चेत्यत्र ॥ तस्मा
त्पुरुषार्थोऽतः शब्दादिति यन्मतं भगवतो बादरायणस्य तत्तथैव तिष्ठति न शेषत्वप्रभृतिभिर्हेत्वाभासैश्चालयितुं शक्यते ॥ तथा
हि तमधिकं शारीरादीश्वरं आत्मानं दर्शयंति श्रुतयः ॥ यः सर्वज्ञः सर्ववित् भीषास्माद्वातः पवते महद्भयं वज्रमुद्यतं एतस्य वा
अक्षरस्य प्रशासने गार्गि तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेत्येवमाद्याः ॥ यत्तु प्रियादिसंसूचितस्य संसारिण एवात्मनो
वेद्यतयानुकर्षणं आत्मनस्तु कामाय सर्वं प्रियं भवति आत्मा वा अरे द्रष्टव्यः यः प्राणेन प्राणिति स त आत्मा सर्वान्तरः य एषो
क्षिणि पुरुषो दृश्यते इत्युपक्रम्य एतं त्वेव ते भूयोऽनुव्याख्यास्यामीति चैवमादि तदपि अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वे
दो योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुष इत्येवमादिभिर्वा
क्यशेषैः सत्यामेवाधिकोपदिष्टतायां मत्वं तद्भेदाभिप्रायमित्यविरोधः ॥ ९ ॥ काशेषात्प्रियसंसूचित आत्मा पर एव द्रष्टव्यः यः प्राणा
दि प्रेरयति सोऽप्यशनायाद्यत्ययवाक्यशेषात्पर एव तथाऽक्षिपुरुषोऽप्यवस्थात्साक्षि परंज्योतिरिति वाक्यशेषात्पर इति विभागः ॥ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा·भा· टी· र·प्र· ३९६ जीवानुकर्षेणमभेदाभिप्रायमित्यङ्गीकारेण विरोध इति कथं अभेदे जीवत्वविरोधादित्यत आह पारमेश्वरमिति ज्ञानं कर्माङ्गमफलत्वे सति कर्मशेषा- अ·पा· ३।४
श्रयत्वादित्युक्तो हेतुरसिद्ध इति भावः॥ ८॥ ब्रह्मविदां कर्मवत्संन्यासस्यापि दर्शनात्तेषां कर्मदर्शनात्मकं लिङ्गं लोकसंग्रहार्थत्वेनान्यथासिद्धमित्याह॥

पारमेश्वरमेव हि शारीरस्य पारमार्थिकं स्वरूपं उपाधिकृतं तु शारीरत्वं तत्त्वमसि नान्यदतोऽस्ति द्रष्टृ इत्यादिश्रुतिभ्यः॥ सर्वं चैतद्विस्तरेणास्माभिः पुरस्तात्तत्र तत्र वर्णितं॥ ८॥ तुल्यं तु दर्शनं॥ ९॥ यत्तूक्तं आचारदर्शनात्कर्मशेषो विद्येति अत्र ब्रूमः॥ तुल्यमाचारदर्शनमकर्मशेषत्वेऽपि विद्यायाः॥ तथा हि श्रुतिर्भवति॥ एतद्ध स्म वै तद्विद्वांस आहुर्ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे एतद्ध स्म वै तत्पूर्वे विद्वांसोऽग्निहोत्रं न जुहवांचक्रिरे एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्तीत्येवंजातीयका॥ याज्ञवल्क्यादीनामपि ब्रह्मविदामकर्मनिष्ठत्वं दृश्यते एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राजेत्यादिश्रुतिभ्यः॥ अपि च यक्ष्यमाणो वै भगवन्तोऽहमस्मीत्येतल्लिङ्गदर्शनं वैश्वानरविद्याविषयं॥ संभवति च सोपाधिकायां ब्रह्मविद्यायां कर्मसाहित्यदर्शनं॥ न त्वत्रापि कर्माङ्गत्वमस्ति प्रकरणाद्यभावात्॥ ९॥ यत्पुनरुक्तं तच्छ्रुतेरित्यत्र ब्रूमः॥ असार्वत्रिकी॥ १०॥ यदेव विद्यया करोतीत्येषा श्रुतिर्न सर्वविद्याविषया प्रकृतविद्याभिसंबंधात्॥ प्रकृता चोद्गीथविद्या ओमित्येतदक्षरमुद्गीथमुपासीतेत्यत्र॥ १०॥ विभागः शतवत्॥ ११॥ यदप्युक्तं तं विद्याकर्मणी समन्वारभेते इत्येतत्समन्वारंभवचनमस्वातन्त्र्ये विद्याया लिंगमिति तत्प्रत्युच्यते॥ विभागोऽत्र द्रष्टव्यो विद्यान्यं पुरुषमन्वारभते कर्मान्यमिति शतवत्॥ यथा शतमाभ्यां दीयतामित्युक्ते विभज्य दीयते पंचाशदेकस्मै पंचाशदपरस्मै तद्वत्॥ न चेदं समन्वारंभवचनं मुमुक्षुविषयं इति नु कामयमान इति संसारिविषयत्वोपसंहारात्॥ ६ ॥

॥ तुल्यं त्विति॥ किं च यस्य कर्म स न ब्रह्मविदित्याह अपि चेति तर्हि वैश्वानरविद्यायाः कर्माङ्गत्वं स्यादित्यत आह॥ न त्विति॥ ब्रह्मविदां लोकसंग्रहार्थं क्रियमाणमपि कर्म न भवति अभिमानाभावेनानधिकारित्वादिति भावः॥ ९॥ समन्वारंभवचनस्य मुमुक्षुविषयत्वमङ्गीकृत्य विद्या अन्यं मुमुक्षुं मुक्तत्वेनान्वा- राम· ३९९

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तत्र संसारिविषये तं विद्येत्यादिवाक्ये यथाप्राप्तानुवादित्वं विद्यादिपदार्थमाह तत्रेति ॥ विहितोद्गीथादिविद्या प्रतिषिद्धा नग्नस्त्रीध्यानादिरूपा ॥ ११
यद्वैतदिति ॥ उक्तमिति शेषः ॥ अविद्यत्वाद्वेदार्थज्ञानशून्यत्वादित्यर्थः ॥ मात्रपदमात्मज्ञानस्य व्यावर्तकं न कर्मज्ञानस्येत्याह ॥ नैषदोष इति ॥ १२ ॥ नि
यमवाक्यमज्ञविषयमित्युक्तं विदुषो ज्ञानस्तुत्यर्थं वेत्याह ॥ स्तुतय इति ॥ एवं कर्म कुर्वत्यपि तत्त्वविदि नरे नेतो विद्यालब्धाद्ब्रह्मभावादन्यथास्ति कर्मणा संस्प

अथाकाममयमान इति च मुमुक्षोः पृथगुपक्रमात् ॥ तत्र संसारिविषये विद्या विहिता प्रतिषिद्धा च परिगृह्यते विशेषाभावात्क
र्मापि विहितं प्रतिषिद्धं च यथाप्राप्तानुवादित्वात् ॥ एवं सत्यविभागेनापीदं समन्वारंभवचनमवकल्पते ॥ ११ ॥ यच्चैतत्तद्वतो विधा
नादित्यत उत्तरं पठति ॥ अध्ययनमात्रवतः ॥ १२ ॥ आचार्यकुलाद्वेदमधीत्येत्यत्राऽध्ययनमात्रस्य श्रवणात् ॥ अध्ययनमात्रव
त एव कर्मविधिरित्यध्यवसामः ॥ ननु एवं सत्यविद्यत्वादनधिकारः कर्मसु प्रसज्येत नैष दोषः ॥ न वयमध्ययनप्रभवं कर्माववो
धनमधिकारकारणं वारयामः ॥ किं तर्ह्यौपनिषदमात्मज्ञानं स्वातंत्र्येणैव प्रयोजनवत्प्रतीयमानं न कर्माधिकारकारणतां प्रति
पद्यत इत्येतावत्प्रतिपादयामः ॥ यथा च न क्रत्वंतरज्ञानं क्रत्वंतराधिकारेणापेक्ष्यत एवमेतदपि द्रष्टव्यमिति ॥ १२ ॥ यदप्युक्तं नि
यमाच्चेति अत्राभिधीयते ॥ नाविशेषात् ॥ १३ ॥ कुर्वन्नेवेह कर्माणि जिजीविषेदित्येवमादिषु नियमश्रवणेषु न विदुष इति विशेषो
ऽस्ति अविशेषेण नियमविधानात् ॥ १३ ॥ स्तुतयेऽनुमतिर्वा ॥ १४ ॥ कुर्वन्नेवेह कर्माणीत्यत्रापरो विशेष आख्यायते ॥ यद्यप्यत्र
प्रकरणसामर्थ्याद्विद्वानेव कुर्वन्निति संबध्यते तथापि विद्यास्तुतये कर्मानुज्ञानमेतद्द्रष्टव्यं ॥ न कर्म लिप्यते नरे इति हि वक्ष्य
ति ॥ एतदुक्तं भवति ॥ यावज्जीवं कर्म कुर्वत्यपि विदुषि पुरुषे न कर्म लेपाय भवति विद्यासामर्थ्यादिति ॥ तदेवं विद्या स्तूयते ॥ १४ ॥
कामकारेण चैके ॥ १५ ॥ अपि चैके विद्वांसः प्रत्यक्षीकृतविद्याफलाः संतस्तदवष्टंभात्फलांतरसाधनेषु प्रजादिषु प्रयोजनाभावं प
रामृशंति कामकारेणेति ॥ श्रुतिर्भवति वाजसनेयिनां ॥ एतद्ध स्म वै तत्पूर्वे विद्वांसः प्रजां न कामयंते किं प्रजया करिष्यामो येषां नोऽयमा

रो नास्तीति यावत् यतः कर्म न लिप्यते ॥ अपूर्वरूपलेपाय न भवतीत्यर्थः ॥ श्रुतेरिति भावः ॥ १४ ॥ स्वेच्छातः कर्मसाधनप्रजादित्यागलिंगाच्च विद्यायाः स्व
तंत्रफलेत्याह ॥ कामेति ॥ तदेतद्ब्रह्म येषां नोऽस्माकं अयमपरोक्ष आत्मा अयमेव लोकः पुरुषार्थस्ते वयं किं प्रजादिना करिष्याम इत्यालोच्य कर्म त्यक्तं व

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा०भा० टी० र०प्र० ३६९

नन्वयं लोक इति ज्ञानफलस्य प्रत्यक्षत्वोक्तिरयुक्ता कर्मफलवददृष्टत्वादित्यत आह ॥ अनुभवेति ॥ १५ ॥ न केवलमनुपयोगाज्ज्ञानस्य कर्माङ्गत्वं किंतु कर्मनाशकत्वाच्चेत्याह उपमर्दं चेति ॥ १६ ॥ किंच कर्मतत्त्वज्ञाने नाङ्गाङ्गीभूते भिन्नाधिकारिस्थत्वाद्राजसूयबृहस्पतिसववदित्याह ॥ ऊर्ध्वेति त्रयो धर्मस्कन्धाः कर्मप्रधाना आश्रमाश्चतुर्थो ब्रह्मसंस्थ इत्यर्थः ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृण इति

अ० ३ पा० ४

अनुभवारूढमेव च विद्याफलं न क्रियाफलवत्कालान्तरभावीत्यसकृदवोचाम ॥ अतोऽपि न विद्यायाः कर्मशेषत्वं नापि तद्विषयायाः फलश्रुतेरयथार्थत्वं शक्यमाश्रयितुम् ॥ १५ ॥ उपमर्दं च ॥ १६ ॥ अपि च कर्माधिकारहेतोः क्रियाकारकफललक्षणस्य समस्तस्य प्रपञ्चस्याविद्याकृतस्य विद्यासामर्थ्यात्स्वरूपोपमर्दमामनन्ति ॥ यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं जिघ्रेदित्यादिना वेदान्तोदितात्मज्ञानपूर्विकां तु कर्माधिकारसिद्धिं प्रत्याशासानस्य कर्माधिकारोच्छित्तिरेव प्रसज्येत ॥ तस्मादपि स्वातन्त्र्यं विद्यायाः ॥ १६ ॥ ऊर्ध्वरेतस्सु च शब्दे हि ॥ १७ ॥ ऊर्ध्वरेतःसु चाश्रमेषु विद्या श्रूयते ॥ न च तत्र कर्माङ्गत्वं विद्याया उपपद्यते ॥ कर्माभावान्न ह्यग्निहोत्रादीनि वैदिकानि कर्माणि तेषां सन्ति ॥ स्यादेतत् ऊर्ध्वरेतस आश्रमा न श्रूयन्ते वेद इति ॥ तदपि नास्ति तेऽपि हि वैदिकेषु शब्देष्ववगम्यन्ते ॥ त्रयो धर्मस्कन्धा ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तपः श्रद्धे ये ह्युपवसन्त्यरण्ये एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति ब्रह्मचर्यादेव प्रव्रजेदित्येवमादिषु ॥ प्रतिपन्नाप्रतिपन्नगार्हस्थ्यानामपाकृतानपाकृतर्णानां चोर्ध्वरेतस्त्वं श्रुतिस्मृतिप्रसिद्धम् ॥ तस्मादपि स्वातन्त्र्यं विद्यायाः ॥ १७ ॥ परामर्शं जैमिनिर

चोदना चापवदति हि ॥ १८ ॥

श्रुतेः ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ॥ अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः इति स्मृतेः श्चाप्रतिपन्नगार्हस्थ्यस्यैव निरस्तर्णत्रयस्य पारिव्राज्यमित्यपि शङ्का न कार्या ब्रह्मचर्यादेव प्रव्रजेदिति यमाश्रममिच्छेत्तमावसेदिति च विधिश्रुतिस्मृतिविरोधेन श्रुत्यर्थवादश्रुतिस्मृत्योर्विरक्तविषयत्वावगमादित्याह प्रतिपन्नेति ॥ तस्मादिति संन्यासनिष्ठत्वादित्यर्थः ॥ १७ ॥ संन्यासो नास्तीत्याक्षिपति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ऊर्ध्वरेतःशब्दितं पारिव्राज्यमनुष्ठेयं न वेति मानभ्रान्तिमूलत्वाभ्यां संदेहे भ्रान्तिमूलत्वान्नानुष्ठेयमित्याह त्रयइति आश्रमाणामवांतरभेदापेक्षया वहु-
वचनं तथा च काण्वायनस्मृतिरर्थतोनुक्रम्यते॥ गायत्रो ब्राह्मः प्राजापत्यो बृहन्निति ब्रह्मचारी चतुर्विधः॥ तत्रोपनयनादूर्ध्वं यस्त्रिरात्रमक्षारलवणाशी गाय-
त्रीमधीते स गायत्रः॥ यस्तु वेदस्य ग्रहणान्तं ब्रह्मचर्यं चरति स ब्राह्मः॥ ऋतुकाले स्वदारगामी नित्यं परस्त्रीविमुखः प्राजापत्यः संवत्सरं वेदव्रतकृद्वा प्राजाप-
त्यः॥ आमरणं गुरुकुलवासी नैष्ठिको बृहन्नित्युच्यते॥ गृहस्थोपि चतुर्विधः वार्त्ताको यायावरः शालीनो घोरसंन्यासिकश्चेति॥ तत्र कृषिगोरक्षादिकया वैश्यादि-
वृत्त्याजीवन्नित्यादिक्रियापरो वार्त्ताकवृत्तिः॥ यायावरस्त्वयाचितवृत्तिर्याजनाध्यापनप्रतिग्रहविमुखः॥ शालीनस्तु षट्कर्मनिरतो याजनादिवृत्तिः संचयी।
उद्धृतपरिपूताभिरद्भिः कार्यं कुर्वन्प्रत्यहं कृतोञ्छवृत्तिर्ग्रामवासी घोरसंन्यासिकइत्युच्यते हिंसाविमुखत्वात्॥ वानप्रस्थोपि चतुर्विधः वैखानस औदुंबरो वाल-

त्रयो धर्मस्कंधा इत्यादयो ये शब्दा ऊर्ध्वरेतसामाश्रमाणां सद्भावायोदाहृतास्तान्नचैतेनस्मृतिपादनाय प्रभवंति॥ यतः परामर्शमेषु
शब्देष्वाश्रमान्तराणां जैमिनिराचार्यो मन्यते न विधिं॥ कुतो न ह्यत्र लिङादीनामन्यतमश्चोदनाशब्दोस्ति॥ अर्थान्तरपरत्वं चैषु
प्रत्येकमुपलभ्यते त्रयो धर्मस्कंधा इत्यत्र तावत् यज्ञोध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृ-
तीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्सर्व एते पुण्यलोका भवन्तीति परामर्शपूर्वकमाश्रमाणामनात्यंतिकफलत्वं
संकीर्त्यात्यन्तिकफलतया ब्रह्मसंस्थतां स्तुवते ब्रह्मसंस्थोऽमृतत्वमेतीति॥ ((खिल्यः फेनपश्चेति॥ तत्राकृष्टपच्यौषधीभिर्ग्रामबहिष्कृता-

भिरग्निहोत्रादिकुर्वन्वैखानस उच्यते॥ यस्तु प्रातरुत्थाय यां दिशं पश्यति तत्रत्यैरौदुंबरबदरीनीवारश्यामाकैः कर्मपरः स औदुंबरः॥ यस्तु जटावल्कलधा-
री अष्टौ मासान्वृत्त्युपार्जनं कृत्वा चातुर्मास्ये संगृहीताशी कार्त्तिक्यां संगृहीतपुष्पफलत्यागी स वालखिल्यः॥ फेनपास्तु शीर्णपर्णफलभृतो यत्र क्वचिद्वसंतः
कर्मपरा इति॥ तथा परिव्राजकाश्चतुर्विधाः॥ कुटीचका बहूदका हंसाः परमहंसाश्चेति॥ तत्र स्वपुत्रगृहे भिक्षाचरंतस्त्रिदंडिनः कुटीचकाः बहूदकास्तु त्रि-
दंडिनः शिक्यजलपवित्रपादुकासनशिखायज्ञोपवीतकौपीनकाषायवेषधरास्तीर्थान्यटंतो भैक्ष्यं चरंत आत्मानं प्रार्थयंते॥ हंसास्तु एकदंडिनः शिखावर्जं
यज्ञोपवीतधराः शिक्यकमंडलुपाणयः ग्रामैकरात्रवासिनः कृच्छ्रचान्द्रायणपराः॥ परमहंसास्त्वेकदंडधरा मुंडा अयज्ञोपवीतिनः त्यक्तसर्वकर्माण आ-
त्मनिष्ठा इति॥ अत्र पूर्वपक्षे संन्यासाभावाज्ज्ञानस्य स्वतंत्रफलत्वासिद्धिः सिद्धांते तद्भावात्तत्सिद्धिरिति फलभेदः। स्कंधा आश्रमा आत्मानं शरीरं आचार्य

सकुले गृहे कर्शयन्नैष्ठिक इत्यर्थः॥

ब्र·भा· टी· र·प्र· २७०

स्कंधश्रुतावाश्रमान विधीयंते किंतु ब्रह्मसंस्थतास्तुत्यर्थमनूद्यंत इत्युक्ते शंकते ॥ ननु परामर्शेऽपीति ॥ अनुवादापेक्षितपुरोवादाप्रतीतिमंगीकरोति सत्यमिति प्रत्यक्षा स्कंधश्रुतिरेव पुरोवादोऽस्तु नानुवाद इत्यत आह स्मृतीति तयोरपि द्वयमेव श्रुतिमूलमस्तु प्रत्यक्षश्रुतौ विधिमात्रकल्पनालाघवात् अस्या अनुवादत्वे तु मूलत्वेन साग्निकानग्निकाश्रमश्रुतिकल्पने विधिश्चेति द्वयकल्पनागौरवादित्यत आह ॥ अतश्चेति स्यान्नेत्यादाश्रमाः प्रत्यक्षश्रुत्या विरुद्धा ग्राह्याः ॥ विरुद्धास्त्वनग्निकाश्रमा उपेक्ष्याः कर्मानधिकृतैरंधादिभिर्वा अनुष्ठेया इत्यर्थः ॥ याव । अ·३ पा·४

ननु परामर्शेऽप्याश्रमा गम्यंत एव । सत्यं गम्यंते । स्मृत्याचाराभ्यां तु तेषां प्रसिद्धिर्न प्रत्यक्षश्रुतेः । अतश्च प्रत्यक्षश्रुतिविरोधे सत्यनादरणीयास्ते भविष्यंत्यनधिकृतविषया वा । ननु गार्हस्थ्यमपि सहैवोर्ध्वरेतोभिः परामृष्टं यज्ञोऽध्ययनं दानमिति प्रथम इति । सत्यमेवं तथापि तु गृहस्थं प्रत्येवाग्निहोत्रादीनां कर्मणां विधानाच्छ्रुतिप्रसिद्धमेव हि तदस्तित्वं । तस्मात्स्तुत्यर्थ एवायं परामर्शो न चोदनार्थः । अपि चापवदति हि प्रत्यक्षा श्रुतिराश्रमांतरं वीरहा वा एष देवानां योऽग्निमुद्वासयते । आचार्याय प्रियं धनमाहृत्य प्रजातंतुं मा व्यवच्छेत्सीः । नापुत्रस्य लोकोऽस्तीति तत्सर्वे पशवो विदुरित्येवमाद्या । तथा ये चेमेऽरण्ये श्रद्धां तप इत्युपासते ते न पः श्रद्धे ये ह्युपवसंत्यरण्य इति देवयानोपदेशो नाश्रमांतरोपदेशः । संदिग्धं चाश्रमांतराभिधानं तप एव द्वितीय इत्येवमादिषु । तथैतमेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजंतीति लोकसंस्तवोऽयं न पारिव्राज्यविधिः । ननु ब्रह्मचर्यादेव प्रव्रजेदिति विस्पष्टमिदं प्रत्यक्षं पारिव्राज्यविधानं जाबालानां । सत्यमेतदनपेक्ष्य त्वेतां श्रुतिमयं विचार इति द्रष्टव्यम् ॥ १८ ॥ छ ॥ भाम· २७०

त्वीव श्रुतिविरोधात् लाघवं न्याय्यमिति भावः ॥ स्कंधश्रुतावनुवादत्वाविशेषात् गार्हस्थ्यवदितरेषामनुष्ठेयत्वमाशंक्य तस्य श्रौतत्वादनुष्ठानं नेतरेषामश्रौतत्वात् नो ब्रह्मसंस्थतास्तुतिपरमिदं स्कंधवाक्यमित्याह ॥ तन्वित्यादिना तत्तु संनिधानं यां ये चेति ॥ तेऽर्चिषमभिसंभवंतीति वाक्यशेषादित्यर्थः ॥ स्कंधशब्दस्य आश्रमेष्वरूढत्वात् अत्र नाश्रमविधिरित्याह ॥ संदिग्धं चेति तर्हि प्रव्रजंतीत्याश्रमविधिरित्यत आह तथैतमिति ॥ आत्मलोको महीयान् यदर्थमशक्यां प्रव्रज्यामपि कुर्वंतीति स्तुतिर्वर्तमानापदेशादित्यर्थः ॥ संप्रति पूर्वपक्षमासिध्येयं श्रुतिर्नास्तीति कृत्वा चिंत्यत इत्याह नन्वित्यादि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्कंधश्रुतावितराश्रमाः श्रुत्यंतरविहिता अनूद्यंते एतद्वाक्यानुवादत्वाद्गार्हस्थ्यवदिति सिद्धांतयति ॥ अनुष्ठेयमिति ॥ अनुवादस्यक्वचिद्विधिपूर्वक त्वे दृष्टांतमाह ॥ यथा चेति ॥ निवीतं मनुष्याणां प्राचीनावीतं पितॄणामुपवीतं देवानामिति वाक्ये दैवकर्मण्युपवीतं विधीयते ॥ तत्संनिधावेतद्द्वयमनू द्यते मानुषक्रियासु देहार्थवस्त्रबंधनात्मनिवीतस्य लोकतोऽर्थतया प्राप्तत्वात् पित्र्ये कर्मणि प्राचीनावीतस्यापि विध्यंतरप्राप्तत्वादित्यर्थः ॥ वा क्यांतरे च साक्षादेव पारिव्राज्यविधिर्विधेयैः साहित्यादित्याह ॥ तथैतमेवेति ॥ अस्येति पारिव्राज्योक्तिः विधेयवेदानुवचनादिसाहित्यात्पारि

अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥ अनुष्ठेयमाश्रमांतरं बादरायण आचार्यो मन्यते ॥ वेदेश्रवणादग्निहोत्रादीनां वावश्यानुष्ठेयत्वात्तद्विरोधादनधिकृतानुष्ठेयमाश्रमांतरमिति हीमामतिं निराकरोति ॥ गार्हस्थ्यवदेवाश्रमांतरमप्यनि कृतां प्रतिपत्तव्यमिति मन्यमानः ॥ कुतः साम्यश्रुतेः समा हि गार्हस्थ्येनाश्रमांतरस्य परामर्शश्रुतिर्दृश्यते त्रयो धर्मस्कंधा इत्याद्या ॥ यथेह श्रुत्यंतरविहितमेव गार्हस्थ्यं परामृष्टमेवमाश्रमांतरमपीति प्रतिपत्तव्यं ॥ यथा च शास्त्रांतरप्राप्तयोरे व निवीतप्राचीनावीतयोः परामर्श उपवीतविधिपरे वाक्ये ॥ तस्मात्तुल्यमनुष्ठेयत्वं गार्हस्थ्येनाश्रमांतरस्य ॥ तथैतमेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजंतीत्यस्य वेदानुवचनादिभिः समभिव्याहारो ये चेमेऽरण्ये श्रद्धां तप इत्युपासत इत्यस्य पंचाग्निविद्यया ॥ यत्तूक्तं तप एव द्वितीय इत्यादिषु आश्रमांतराभिधानं संदिग्धमिति ॥ नैष दोषः ॥ निश्चयकारणसद्भा वात् ॥ त्रयो धर्मस्कंधा इति हि स्कंधत्रित्वं प्रतिज्ञातं ॥ न च यज्ञादयो भूयांसो धर्मा उत्पत्तिभिन्नाः संतोऽन्यत्राश्रमसंबंधा त्रित्वे नभीवयितुं शक्यंते ॥ तत्र यज्ञादिलिंगो गृहाश्रम एको धर्मस्कंधो निर्दिष्टो ब्रह्मचारीति च स्पष्ट आश्रमनिर्देशस्त

व्राज्यस्य विधेयत्वेनेत्यर्थः वाक्यांतरेपि साम्यश्रुतिमाह ॥ ये चेति ॥ अस्येति ॥ तप इत्यपि कोऽत्र तपः प्रधानादाश्रमाद्धर्मस्कंधोऽभ्युपग वानप्रस्थोक्तिः ॥ विधेयपंचाग्निविद्यया वानप्रस्थस्य सहोक्त्यानद्यपि विधेयमित्यर्थः ॥ श्रुतत्रित्वान्यथानुपपत्त्या स्कंधशब्दस्य आश्रम परत्वनिश्चय इत्याह ॥ यत्तूक्तमित्यादिना उत्पत्तिभिन्ना इति यज्ञेनाध्ययनं दानमित्यादिभिः पृथक् श्रुतत्वादित्यर्थः ॥ १९ ॥ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा॰भा॰ स्कंधश्रुतेरनुवादकत्वं अंगीकृत्य विध्यंतरकल्पनेनाश्रमा अनुष्ठेया इत्युक्तं इदानीं विधित्वं तस्या एव कल्प्यं लाघवादित्याह विधिर्वेति ॥ याव
टी॰ ज्जीवादिश्रुतेरविरक्तविषयत्वान्न लाघवबाधकत्वमिति भावः अल्पफलत्वेनाश्रमत्रयनिंदया ब्रह्मसंस्थस्तुतिपरमेकमिदं वाक्यमाभाति तत्राश्र अ॰पा॰
र॰प्र॰ मविधिचतुष्टयं अयुक्तमिति शंकते ॥ नन्विति ॥ आश्रमाणां विध्यंतरप्राप्त्यभावादनुवादायोगात् स्तुतिलक्षणादोषाच्च वचनविस्पष्टाश्रमविधिभेद ३।४
३७१ कल्पनमपूर्वत्वादित्याह ॥ सत्यमित्यादिना ॥ प्रतीतैकवाक्यत्वभंगेन भेदकल्पने दृष्टांतमाह ॥ धारणवदिति ॥ महापितृयज्ञे प्रेताग्निहोत्रे च स्रु

ये चेमेऽरण्य इति चारण्यलिंगात् श्रद्धातपोभ्यां आश्रमगृहीतिस्तस्मात्परामर्शेऽप्यनुष्ठेयमाश्रमांतरं ॥ १९ ॥ विधिर्वा धारणवत् ॥ २० ॥ विधिर्वायमाश्रमांतरस्य न परामर्शमात्रं ॥ ननु विधित्वाभ्युपगमे एकवाक्यताप्रतीतिरुपरुध्येत प्रतीयते चात्रैकवाक्यता पुण्यलोकफलास्त्रयो धर्मस्कंधा ब्रह्मसंस्थ~त्वममृतत्वफलेति ॥ सत्यमेतत् सतीमपि त्वेकवाक्यताप्रतीतिं परित्यज्य विधिरेवाभ्युपगंतव्यः पूर्वत्वाद्विध्यंतरस्यादर्शनाद्विस्पष्टाच्चाश्रमांतरप्रत्ययाद्गुणवादकल्पनया एकवाक्यत्वयोजनानुपपत्तेः ॥ धारणवत् यथा अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयतीत्यत्र सत्यामप्यधोधारणेनैकवाक्यताप्रतीतौ विधीयत एवोपरिधारणमपूर्वत्वात् तथाचोक्तं शेषलक्षणे ॥ विधिस्तु धारणेऽपूर्वत्वादिति ॥ तद्वदिहाप्याश्रमपरामर्शश्रुतिर्विधिरेवेति कल्प्यते ॥ यदापि परामर्श एवायमाश्रमांतराणां तदापि ब्रह्मसंस्थता तावत्स्तुतिसामर्थ्याद् अवश्यं विधेयाभ्युपगंतव्या ॥ सा च किं चतुर्ष्वाश्रमेषु यस्य कस्यचिदाहोस्वित्परिव्राजकस्यैवेति विवेक्तव्यं ॥ ६ ॥ रत्न॰ ३७१

ति मस्मिन् दर्विहोमे आहवनीयं प्रति यदानीयते तदा तस्य हविषः अधस्तात्समिधं धारयन्ननुद्रवेदिति विहिताधोधारणस्तावकतयोपरि हीत्यस्यैकवाक्यत्वभानेऽपि देवेहोमे स्रुग्दंडोपरि समिद्धारणे विधिरेवापूर्वत्वादिति वाक्यभेदस्तृतीयाध्याये जैमिन्याचार्येणोक्त इत्यर्थः ॥ एवं चत्वार आश्रमा विधीयंत इति पक्ष उक्तः ॥ संप्रत्याश्रमत्रयानुवादेन पारिव्राज्यमेकमेव विधीयत इति पक्षांतरमाह ॥ यदापीत्यादिना ॥ ब्रह्मसंस्थताविधौ कथं पारिव्राज्यविधिरित्याशंक्य विचारयति ॥ सा चेति ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ननु त्रय इति वाक्य आश्रमचतुष्टयस्याप्राप्तेर्निर्बीजोऽयं विचार इत्याशंक्य तद्वाक्ये परिव्राजकः परामृष्टो न वेति संदिह्याद्ये पूर्वपक्षमाप्तिमाह यदि चेति
॥ नन्वनाश्रम्येव ब्रह्मसंस्थः किं न स्यादत आह ॥ अनाश्रमित्वेति ॥ अनाश्रमी न तिष्ठेतेति निषेधादिति भावः ॥ द्वितीये सिद्धान्तमाप्तिमाह ॥ अथेति ॥ एवं
परामर्शतदभावाभ्यां संशयमुक्त्वा पूर्वपक्षयति ॥ तत्रेति ॥ वनस्थस्यद्य साधारणं कृच्छ्रादिकं तप इति प्रसिद्धं तेनैकेन तपःशब्देनोभयग्रहणमन्याय्यं
भिक्षोस्तपस्त्वेन प्रसिद्ध्यभावाच्च तथा च यज्ञाद्यसाधारणधर्मद्वारा गृहस्थाद्याश्रमत्रयवत् ब्रह्मसंस्थशब्देनैव ब्रह्मनिष्ठाप्रधानश्चतुर्थाश्रमो गृह्यते

यदि च ब्रह्मचार्यंतेष्वाश्रमेषु परामृश्यमानेषु परिव्राजकोऽपि परामृष्टस्ततश्चतुर्णामप्याश्रमाणां परामृष्टत्वाविशेषादनाश्रमि-
त्वानुपपत्तेश्च यः कश्चिच्चतुर्ष्वाश्रमेषु ब्रह्मसंस्थो भविष्यत्यथ न परामृष्टस्ततः परिशिष्यमाणः परिव्राडेव ब्रह्मसंस्थ इति से-
त्स्यति ॥ तत्र तपःशब्देन वैखानसग्राहिणा परामृष्टः परिव्राडपीति केचित् ॥ तदयुक्तं ॥ न हि सत्यां गतौ वानप्रस्थविशेषणेन
परिव्राजको ग्रहणमर्हति ॥ यथात्र ब्रह्मचारिगृहमेधिनावसाधारणेनैव स्वेन स्वेन विशेषणेन विशेषितावेवं भिक्षुवैखा-
नसावपीति युक्तं ॥ तपश्चासाधारणो धर्मो वानप्रस्थानां कायक्लेशप्रधानत्वात् तपःशब्दस्य तत्र रूढेः भिक्षोस्तु धर्म इन्द्रिय-
संयमादिलक्षणो नैव तपःशब्देनाभिलप्यते ॥ चतुर्द्धेन च प्रसिद्धा आश्रमास्त्रित्वेन परामृश्यन्त इत्यन्याय्यं ॥ अपि च भेद-
व्यपदेशोऽत्र भवति त्रय एते पुण्यलोकभाज एकोऽमृतत्वभागिति पृथक्त्वे चैषां व्यपदेशोऽवकल्प्यते ॥ न ह्येवं भवति देवदत्तय-
ज्ञदत्तौ मंदप्रज्ञावन्यतरस्तयोर्महाप्रज्ञ इति ॥ भवति त्वेवं देवदत्तयज्ञदत्तौ मंदप्रज्ञौ विष्णुमित्रस्तु महाप्रज्ञ इति तस्मा-
त्पूर्वे त्रय आश्रमिणः पुण्यलोकभाजः परिशिष्यमाणः परिव्राडेवामृतत्वभाक् ॥ कथं पुनर्ब्रह्मसंस्थशब्दो योगात्प्रवर्त-
मानः सर्वत्र संभवन्परिव्राजक एवावतिष्ठेत ॥ रूढ्यभ्युपगमे चाश्रममात्रादमृतत्वप्राप्तेर्ज्ञानानर्थक्यप्रसंग इति ॥ ६ ॥

स च स्तुतिसामर्थ्यात् सह ब्रह्मसंस्थया विधीयत इति सिद्धान्तयति ॥ तदयुक्तमित्यादिना ॥ पृथग्व्यपदेशाच्च ब्रह्मसंस्थः पूर्वोक्तेभ्य आश्रमिभ्यः पृ-
थग्भूत इत्याह ॥ अपि चेति ॥ न चावस्थाभेदेन तेषामेव ब्रह्मसंस्थास्त्विति वाच्यं कालभेदेनापि सति मंदप्रज्ञत्वे प्रज्ञाधिक्यवत्सति कर्मित्वे तेषां वि-
क्षिप्तचेतसां ब्रह्मसंस्थानुपपत्तेः ॥ कर्मत्यागे च परिव्राडेव ब्रह्मसंस्थ इत्यस्मदिष्टसिद्धिरिति भावः ॥ इममेवार्थं स्पष्टयितुं शंकते कथं पुनरिति ॥ ६

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यद्यपि ब्रह्मसंस्थशब्दः संन्यासाश्रमेण रूढस्तथापि योगात्तमेवोपस्थापयति अन्याश्रमेषु यौगिकार्थासमवायादित्याह ॥ अत्रोच्यत इति ॥ सर्वकर्मत्यागिनः प्रणवार्थब्रह्मनिष्ठातिरेकेण अनुष्ठेयं नास्तीत्यत्र मानमाह ॥ तथा चेति न्यासः संन्यासो ब्रह्मेति स्तुतौ हेतुमाह ॥ ब्रह्मा हीति हिरण्यगर्भो हि पर इति प्रसिद्धः ॥ अतो ब्रह्मत्वेन स्तुतः संन्यासः पर एवेति स्तुत्वा कर्माणि निंदति तानीति ततो न्यास एव ज्ञानद्वारा मोचकत्वादधिक इत्यर्थः ॥ तद्बुद्धयो ब्रह्मचिन्तास्तदात्मा

अत्रोच्यते ब्रह्मसंस्थ इति ब्रह्मणि परिसमाप्तिरनन्यव्यापारतारूपं तन्निष्ठत्वमभिधीयते ॥ तच्च त्रयाणामाश्रमाणां न संभवति ॥ स्वाश्रमविहितकर्माननुष्ठाने प्रत्यवायश्रवणात् ॥ परिव्राजकस्य तु सर्वकर्मसंन्यासात्प्रत्यवायो न संभवत्यननुष्ठाननिमित्तः ॥ शमदमादिस्तु तदीयो धर्मो ब्रह्मसंस्थताया उपोद्बलको न विरोधी ॥ ब्रह्मनिष्ठत्वमेव हि तस्य शमदमाद्युपबृंहितं स्वाश्रमविहितं कर्म ॥ यज्ञादीनि चेतरेषाम् ॥ तद्व्यतिक्रमे च तस्य प्रत्यवायः ॥ तथा च न्यासश्रुतिः ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मा तानि वा एतान्यवराणि तपांसि न्यास एवात्यरेचयदिति वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वा इत्याद्याः श्रुतयः स्मृतयश्च तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणा इत्याद्या ब्रह्मसंस्थस्य कर्माभावं दर्शयन्ति ॥ तस्मात्परिव्राजकस्याश्रममात्रादमृतत्वप्राप्तेर्ज्ञानानर्थक्यप्रसंग इत्येषोपि दोषो नावतरति ॥ तदेवं परामर्शेपीतरेषामाश्रमाणां पारिव्राज्यं तावद्ब्रह्मसंस्थतालक्षणं लभ्यत एव ॥ अनपेक्ष्यैव जाबालश्रुतिमाश्रमान्तरविधायिनीमयमाचार्येण विचारः प्रवर्तितो विद्यत एव त्वाश्रमान्तरविधिश्रुतिः प्रत्यक्षा ॥ ब्रह्मचर्यं समाप्य गृही भवेद्गृही भूत्वा वनी भवेद्वनी भूत्वा प्रव्रजेद्यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वेति ॥ न चेयं श्रुतिरनधिकृतविषया शक्या वक्तुमविशेषश्रवणात् ॥ ११ नो ब्रह्मस्वरूपास्त-

न्निष्ठाः श्रवणादिपरास्तत्परायणाः ब्रह्मप्रेप्सवः निष्कामा इति यावत् ॥ एवं ब्रह्मसंस्थशब्दस्य ज्ञानप्रधानाश्रमवाचित्वादमृत — त्वकामस्तमाश्रममनुतिष्ठेदिति विधिः परिणम्यते ॥ अतो न ज्ञानानर्थक्यदोष इत्युपसंहरति ॥ तस्मादिति ॥ संप्रति कृत्वा चिंतामुद्घाटयति ॥ अनपेक्ष्येति शिष्यबुद्धिवैशद्यार्थं स्कंधश्रुतिमादाय चिंता कृतेति भावः ॥ यदि वेतरथेति ॥ ब्रह्मचर्ये स्थितस्यैव पूर्वकृतसुकृतपरिपाकाद्वैराग्यं यदि स्यादित्यर्थः ॥ यदुक्तं कर्मानधिकृतानां धारिवि

स्य: संन्यास इति तन्त्रेणाह ॥ नचेति ॥ सामान्यश्रुतेः संकोचहेत्वभावादिति भावः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पृथगिति ॥ संन्यासस्येति शेषः व्रती गोदानादिवेदव्रतवान् ॥ गुरुकुलान्निवृत्तिरूपस्नानानन्तरं अकृतगार्हस्थ्यो गुरुसेवी स्नातकः उत्सन्नाग्नि विधुरः ॥ अगृहीताग्निरनग्निकः प्रव्रजेदित्यन्वयः सकलाङ्गानामेव कथं विकर्मानधिकृतानां संन्यासो युक्तः विकलाङ्गानां त्वन्धादीनां तज्ज्ञानप्रधानसंन्यासाधिकार इत्याह ॥ अन्धेति दृष्टिपूतसंचारश्रवणादिकं विनाज्ञानानुत्पत्तेः शरीरं मे विचर्षणं जिह्वा मे मधुमत्तमा कर्णाभ्यां भूरि विश्रुवमित्यङ्गसाकल्यप्रार्थनालिङ्गाच्च तेषां पङ्गुमूकबधिरादीनामधिकार इत्यर्थः ॥ तच्चेति ॥ पारिव्राज्यस्य ब्रह्मज्ञानाङ्गत्वं चेत्यर्थः ब्रह्मभूयाय ब्रह्मसाक्षात्कारायेति यावत् ॥ २० ॥ स्तुतिमात्रं ॥ पृथिव्यपोषधिपुरुषवागृक्साम्नां समग्राणां रसानां रसतमोऽष्टम उद्गीथावयव ॐकारः परमः परमात्मप्रतीकत्वात्परस्य ब्रह्मणो

पृथग्विधानाच्चानधिकृतानामथ पुनरेव व्रती वाव्रती वा स्नातको वास्नातको वोत्सन्नाग्निरनग्निको वेत्यादिना ॥ ब्रह्मज्ञानपरिपाकाङ्गत्वाच्च पारिव्राज्यस्यानधिकृतविषयत्वं ॥ तच्च दर्शयति ॥ अथ परिव्राड्विवर्णवासा मुण्डोऽपरिग्रहः शुचिरद्रोही भैक्षाणो ब्रह्मभूयाय भवतीति ॥ तस्मात्सिद्धा ऊर्ध्वरेतस आश्रमाः सिद्धं चोर्ध्वरेतस्सु विधानाद्विद्यायाः स्थानत्वमिति ॥ २

० ॥ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥ स एष रसानां रसतमः परमः परार्ध्योऽष्टमो यदुद्गीथः ॥ इयमेवर्गग्निः साम ॥ अयं वाव लोक एषोऽग्निश्चितस्तदिदमेवोक्थमियमेव पृथिवीत्येवंजातीयकाः श्रुतयः ॥ किमुद्गीथादेः स्तुत्यर्था आहोस्विदुपासनविध्यर्था इत्यस्मिन्संशये स्तुत्यर्था इति युक्तमुद्गीथादीनि कर्माङ्गान्युपादाय श्रवणाद्यथेयमेव जुहूरादित्यः कूर्मः स्वर्गो लोक आहवनीय इत्याद्या जुह्वादिस्तुत्यर्थास्तद्वदिति चेन्नेत्याह ॥ न स्तुतिमात्रमासां श्रुतीनां प्रयोजनं युक्तमपूर्वत्वा-

ईस्थानं तदर्हतीति परार्ध्य इत्यर्थः ॥ आसु श्रुतिषूद्गीथोपादानादपूर्वार्थत्वाच्च

त् । विध्यर्थेन त्वासामपूर्वोऽर्थो विहितो भवति ॥ स्तुत्यर्थेनासां

संशयमाह ॥ किमिति ॥ यथानुष्ठेयगार्हस्थ्यसाम्यश्रुतेः पारिव्राज्यस्य अनुष्ठेयत्वं तद्वदासां श्रुतीनां जुह्वादिस्तुतिश्रुतिसाम्यात्स्तुतित्वमिति पूर्वपक्षयति ॥ स्तुत्यर्था इति ॥ जुहूरियमेव पृथिवीति स्तूयते ॥ चयनस्थः कूर्म आदित्य इति स्तुतिः ॥ आहवनीयः स्वर्गलोक इति स्तुतिः ॥ तथोद्गीथादीनां रसतमत्वादिगुणैः स्तुतिरित्यर्थः स्तुतिलक्षणातो वरं विधिकल्पनमनुष्ठानफललाभादिति सिद्धान्तयति न स्तुतीति ॥ पूर्वपक्षे त्वननुष्ठानं फलं सिद्धान्ते त्व-

ग्रा·भा· स्तावकत्वेनार्थवत्त्वं किं न स्यादित्यत आह विधायकस्येति युक्तमियमेवज्जुहूरित्यादिश्रुतीनां फलवज्जुह्वादिविधिप्रकरणस्थतया स्तावकत्वेनार्थवत्त्व अ·पा·
टी· सनमादिश्रुतीनां तु क्रत्वंगविधिप्रकरणस्थताभावात्फलवदपूर्वोपास्तिविधायकत्वमेव युक्तं क्रत्वंतरश्रुतिवदिति भावः॥२१॥ किंचात्र विधिः कल्प्य इति ३·४
र·प्र· कृत्वा चिंतयोक्तं वस्तुतस्तु न कल्प्यः क्लृप्तत्वादित्याह भावेति॥ न चैवमुपासनाविधिस्तावकत्वं सनमादिश्रुतीनामिति संप्रतं विध्यपेक्षितविषयार्पकत्व।
३७३ संभवेस्तुतिलक्षणायोगादिति भावः॥ देवोमदिष्टं कुर्यादिति प्रार्थनादावपि लिंगादिप्रयोगादुपासीतेत्यादिशब्दानां कथं विधिपरत्वनिश्चय इत्यत आह॥
तथा चेति॥ एतल्लिङादिकं वेदे पूर्वसर्गे तो नियमेनेष्टसाधनत्वाख्यविधेर्लक्षणं ज्ञापकं स्यात् उपपदादिबाधके तत्त्वन्यार्थपरमित्यर्थः॥ तदिदमाह॥ लिङ
हीति न च श्लोके पंचममित्युक्तेः पंचपदानामेव विधिलक्षणत्वेनोपासीतेत्यादीनामिति भ्रमितव्यं क्रियासामान्यवाचिनां कृभ्वस्तीनामुदाहरणेनत्व।

विधायकस्य हि शब्दस्य वाक्यशेषभावं प्रतिपद्यमानास्तुतिरुपयुज्यत इत्युक्तं॥ विधिनानेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्यु।
रित्यत्र॥ प्रदेशांतरविहितानां तूष्णीयादीनामियं प्रदेशांतरपठितास्तुतिर्वाक्यशेषभावमप्रतिपद्यमानाः नर्थिकैव स्यादियमे
वज्जुहूरित्यादिषु विधिसंनिधावेवाम्नानमिति वैषम्यं॥ तस्माद्विध्यर्था एवैवंजातीयकाः स्तुतयः॥२१॥ भावशब्दाच्च॥२२॥ उ
द्गीथमुपासीत सामोपासीत अहमुक्थमस्मीति विद्यादित्यादयश्च विस्पष्टा विधिशब्दाः श्रूयंते॥ ते च स्तुतिमात्रप्रयोजनतायां
व्याहन्येरंस्तथा च न्यायविदां स्मरणं॥ कुर्यात्क्रियेत कर्तव्यं भवेत्स्यादिति पंचमं॥ एतत्स्यात्सर्ववेदेषु नियतं विधिलक्षणमि

वेधातूपरक्तलिङादीनां विधिलक्षणत्वस्य विवक्षितत्वात्पंचमपदं तूक्तापेक्षया श्लोकपूरणा((नि॥ लिङाद्यर्थो विधिरिति मन्यमानास्तए
र्थं मूलस्थोदाहरति पंचम इति वत्॥ यद्यपि डुकृञ् करण इति धातोरेव करणशब्दितभावनाख्यक्रियासामान्यवाचित्वं नेतरयोर्धात्वोर्भूसत्तायामस्भु राम·
वी सत्यर्थत्वोक्तेः॥ तथापि जन्माख्यभवनस्य तत्फलस्यास्तित्वस्य च प्रयोज्यनिष्ठस्य प्रयोजकव्यापारात्मकभावनाव्याप्तत्वात्तयोः क्रियासामान्यवा ३७३
चित्वव्यवहारः तत्र कुर्यादिति प्रकृत्यर्थभावनाख्यानेनानूद्यते यथा दाति प्रयोगे प्रकृत्यर्थो हित्वं प्रत्ययेनानूद्यते तद्वल्लिङा च तत्स्यादिष्टसाधना।
त्वाख्यविधिर्बोध्यते कर्तानुतपास्थिप्यत इति आक्षिप्तकर्तृका भावनोदाहृता तथा क्रियेते त्यत्रापि प्रकृतिप्रत्ययार्थौ व्याख्यातौ कर्ममात्रप्राधान्येना।
क्षिप्यत इत्याक्षिप्तकर्मिका भावनोदाहृता आख्यातानां कर्त्रादिकारके शक्त्याभावात्कर्तृकर्मणोराक्षेप एवेति मीमांसकमतं॥ ७०७॥ ६॥ ७०७॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कर्तव्यमिति कृत्यप्रत्ययेन कर्मकारकमुच्यते तस्योपसर्जनत्वेन प्रकृत्या भावमोक्ते इति भेदः ॥ तथा दंडी भवेत् भूयेत दंडिना भवितव्यमित्युदाहृतं यत्तथा
स्याद्भूयेत भवितव्यमित्यस्ति धातोरप्युदाहरणं द्रष्टव्यं ॥ अस्तेर्भूरादेशात् ॥ एतदात्मनुत्र योपरक्तलिङादिभिः सर्वधात्वर्थोपरक्तभावनागतेष्टसाधनत्वरूपो वि
धिरेक एवोच्यते ॥ धातूनां प्रत्ययानां कर्त्रादिकारकाणां च भेदेऽपि विधिभेदो नास्तीति ज्ञापनार्थं प्रतिधातूदाहरणत्रयं दर्शितमिति सर्वमवदातं ॥ एवं सूत्रे
भावो विधिरिति व्याख्याय च शब्दात्फलमिति व्याचष्टे प्रतिप्रकरणं चेति एष ऋत्विगुपासकः कामागानस्य गानेन फलसंपादनस्येष्टे समर्थ इत्यर्थः एवमंगा
श्रितविद्या अपि स्वतंत्रफलाः किमु वक्तव्यमनंगात्मविद्यायाः स्वातंत्र्ये इति नास्या अस्याः पर्यवसानात्स्वसंगतिर्बोध्या ॥२२॥ पारिप्लवार्थाः ॥ अश्वमेधे

प्रतिप्रकरणं च फलानि श्रूयंते ॥ आपयिता ह वै कामानां भवति एष ह्येव कामागानस्येष्टे कल्पंते हास्मै लोका ऊर्ध्वाश्चावृत्ताश्चेत्यादी
नि ॥ तस्मादप्युपासनविधानार्था उद्गीथादिश्रुतयः ॥३॥२२॥ पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥२३॥ अथ ह याज्ञवल्क्यस्य द्वे
भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च प्रतर्दनो ह वै दैवोदासिरिंद्रस्य प्रियं धामोपजगाम जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी
बहुपाक्य आसेत्येवमादिषु वेदांतपठितेष्वाख्यानेषु संशयः किमिमानि पारिप्लवप्रयोगार्थान्याहोस्वित्सन्निहितविद्याप्रतिपत्त्यर्था
नीति ॥ पारिप्लवार्था इमा आख्यानश्रुतयः ॥ आख्यानसामान्यादाख्यानप्रयोगस्य च पारिप्लवे चोदितत्वात् ॥ ततश्च विद्याप्रधा
नत्वं वेदांतानां न स्यान्मंत्रवत्प्रयोगशेषत्वादिति चेत् ॥ तन्न कस्माद्विशेषितत्वात् ॥ पारिप्लवमाचक्षीतेति हि प्रकृत्य मनुर्वैवस्वतो रा
जेत्येवमादीनि कानिचिदेवाख्यानानि तत्र विशेष्यंते ॥ आख्यानसामान्याच्चेत्सर्वगृहीतिः स्यादनर्थकमेवेदं विशेषणं भवेत् ॥

पुत्रादिपरिवृताय राज्ञे पारिप्लवमाचक्षीतेति नानाविधाख्यानकथनात्मकः पारिप्लवप्रयोगो विहितः त((स्मान्न पारिप्लवार्था एता आख्यानश्रु
याच वेदांतस्थकथानामाख्यानत्वसामान्याद्विद्यासन्निधानाच्च संशयमाह ॥ किमिति ॥ पूर्वं स्तुत्यपेक्षया विधिर्ज्योयानत्रुष्ठानलाभादित्युक्तं तथैव कथा
नां न विद्यास्तावकत्वं पारिप्लवानुष्ठानलाभादिति पूर्वपक्षः तत्र फलमाह ॥ ततश्चेति ॥ यथा देवस्य त्वा सवितुरित्यादिमंत्रकस्यचित्प्रदस्य प्रयोगसम
वेतार्थतया शेषस्य प्रयोगांगत्वं तथा वेदांतस्थकथानां प्रयोगशेषत्वं तदेकवाक्यतया सर्ववेदांतानां कर्मशेषत्वान्न विद्याप्राधान्यमित्यर्थः ॥ ७ ॥

ब्र·भा· कथानां गुरुशिष्यसमाचारप्रदर्शनेन बुद्धिसौकर्यद्वारा सन्निहितविद्याशेषत्वं सामर्थ्यलिंगादतो विद्याप्राधान्यमिति फलं मत्वा सिद्धान्तयति तत्रेत्यादिना अ·पा·
टी· अश्वमेधप्रथमेहनि मनुर्वैवस्वत इति कथां ब्रूयाद्द्वितीयेहनि यमो वैवस्वत इति तृतीयेहनि वरुण आदित्य इति वाक्यशेषे कथानां विशिष्योक्तत्वादुपक्रम- ३।४
र·प्र· स्य संकोचो युक्त इति भावः॥२३॥ क्व तर्हि कथानां विनियोग इत्याशंक्य सन्निधानाद्विद्यास्वित्याह॥ तथा चेति प्ररोचनं प्रीतिजननं स प्रजापतिर्वपामुदखिद-
३७५ त् होमायोद्यतवानित्यस्य प्राजापत्यमजं तूपरमालभेतेति विधिशेषत्व एवमन्येषां तत्तद्विधिशेषत्वं द्रष्टव्यम्॥२४॥ एवमाद्याधिकरणप्रमेयं विद्यास्वातं-
त्र्यमधिकरणत्रयेण दृढीकृत्याद्याधिकरणस्य फलमाह॥ अत एव चेति॥ ब्रह्मविद्या स्वफले मोक्षे जनयितव्ये सहकारित्वेन कर्माण्यपेक्षते न वेति वादिवि-

तथा चैकवाक्यतोपबन्धात्॥२४॥ असति च पारिप्लवार्थत्वे आख्यानानां संनिहितविद्याप्रतिपादनोपयोगितैव न्याय्यैकवा-
क्यतोपबन्धात्। तथा हि तत्र तत्र संनिहिताभिर्विद्याभिरेकवाक्यता दृश्यते प्ररोचनोपयोगात् प्रतिपत्तिसौकर्योपयोगाच्च। मैत्रे-
यीब्राह्मणे तावत् आत्मा वा अरे द्रष्टव्य इत्याद्यया विद्ययैकवाक्यता दृश्यते। प्रातर्दनेऽपि प्राणोऽस्मि प्रज्ञात्मेत्याद्यया जानश्रुति-
रित्यत्रापि वायुर्वाव संवर्ग इत्याद्यया। यथा च स आत्मनो वपामुदखिददित्येवमादीनां कर्मश्रुतिगतानामाख्यानानां सं-
निहितविधिस्तुत्यर्थता तद्वत्तस्मान्न पारिप्लवार्थत्वं॥४॥ अत एव चाग्नीन्धनाद्यनपेक्षा॥५॥ पुरुषार्थोऽतः शब्दादि-
त्येतत् व्यवहितमपि संभवात्तदिति परामृश्यते। अत एव च विद्यायाः पुरुषार्थहेतुत्वादग्नीन्धनादीन्याश्रमकर्माणि वि-
द्यया स्वार्थसिद्धौ नापेक्षितव्यानीत्याद्यस्यैवाधिकरणस्य फलमुपसंहरत्यधिकविवक्षया॥२५॥५॥ सर्वापेक्षा च यज्ञादि- सम·

वादात्संशये तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्चेत्यादिश्रुत्या ज्ञानकर्मसमुच्चयेन मोक्षप्राप्तिकथनादपेक्षत इति प्राप्ते ((श्रुतेरश्ववत्॥२६॥ ३७५
विद्याया मुक्तिहेतुत्वादविद्यानिवृत्त्याख्यमुक्तौ न कर्मापेक्षेति सिद्धान्तयति॥ पुरुषार्थ इति॥ अग्नीन्धनपदेन तत्साध्यकर्माणि लक्ष्यन्ते पुण्यकृत्तैजस-
श्च इत्यतो ब्रह्मवित्त्वात्तेन वेदनेनैति ब्रह्म प्राप्नोतीति श्रुतिर्व्याख्येयेति भावः॥ मुक्तावेव कर्मणामसामर्थ्यादनपेक्षा विद्यायां त्वस्ति चित्तशुद्धिद्वा-
रा तेषामपेक्षेत्यधिकं वक्तुमयमुपसंहार इत्युपसंहारसूत्रस्य फलमाह॥ अधिकेति॥२५॥ अधिकमाह॥ सर्वापेक्षा॥ ॥ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यथाप्रमाफलत्वाद्विद्यानिवृत्तौ कर्मानपेक्षा तथा प्रमात्वाद्विद्यायामपि प्रमाकरणमात्रसाध्यायां नास्ति कर्मापेक्षेति पूर्वपक्षः तत्र विद्यार्थकर्मानुष्ठानासिद्धिः फलं सिद्धान्ते तु सिद्धिरिति भेदः ॥ अत्र विविदिषायां इष्यमाणज्ञाने वा यज्ञादीनां कर्मणां हेतुत्वमपूर्वत्वाद्विधीयते ॥ प्रमाया अप्युत्पत्तिप्रतिबंधकदुरितक्षयारम्भशुद्धिद्वारा कर्मसाध्यत्वसंभवात् ॥ न च पारंपर्ये तृतीयाश्रुतिविरोधः ॥ ज्वालाद्वारा पारंपर्येपि काष्ठैः पचतीति प्रयोगात् द्वारस्याव्यवधायकत्वान्न च शुद्धेर्द्वारत्वे मानाभावः ॥ ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः कषायैः कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते इति स्मृतेः अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत इत्यादिश्रुत्या कर्मणा पापनिवृत्तौ ज्ञानेनामृतत्वाभिधानाच्चेति सिद्धान्तयति ॥ इदमिति नन्वत्र विविदिषन्तीति पंचमलकारेण विविदिषां भावयेयु

इदमिदानीं चिन्त्यते किं विद्याया अत्यन्तमेवानपेक्षाश्रमकर्मणामुतास्ति काचिदपेक्षेति ॥ तत्रात एवाग्नींधनादीन्याश्रमकर्माणि विद्यायाः स्वार्थसिद्धौ नापेक्ष्यन्त इत्येवमत्यन्तमेवानपेक्षायां प्राप्तायां इदमुच्यते सर्वापेक्षा चेति ॥ अपेक्षते च विद्या सर्वाण्याश्रमकर्माणि नात्यन्तमनपेक्षैव ॥ ननु विरुद्धमिदं वचनं अपेक्षते चाश्रमकर्माणि विद्या नापेक्षते चेति ॥ नेति ब्रूमः ॥ उत्पन्ना हि विद्या फलसिद्धिं प्रति न किंचिदन्यदपेक्षते ॥ उत्पत्तिं प्रति त्वपेक्षते ॥ कुतः यज्ञादिश्रुतेः तथा हि श्रुतिस्तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेति यज्ञादीनां विद्यासाधनभावं दर्शयति ॥ विविदिषासंयोगाच्चैषामुत्पत्तिसाधनभावो वसीयते ॥ अथ यद्यज्ञ इत्याचक्षते ब्रह्मचर्यमेव तदित्यत्र च विद्यासाधनभूतस्य ब्रह्मचर्यस्य यज्ञादिभिः संस्तवात् यज्ञादीनामपि हि साधनभावः सूच्यते ॥ सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदंति ॥ छ ॥

रिति सन्नर्थे स्थैव भाष्यतया भाति तां विषयसौंदर्यलभ्यतयोल्लंघ्य वेदनं चेज्ज्ञाव्यमुच्यते नहि वेदनमपुष्कलं घ्यनफलं मोक्ष एव कर्मभिर्भाव्यः किं न स्यादित्यत आह विविदिषासंयोगाच्चेति ॥ इष्यमाणतया विद्यायाः शब्दतः फलत्वभानादृष्टत्वमोक्षो न फलमन्यथा काष्ठैः पचतीत्यत्रापि काष्ठानां पाकफलतृप्तिहेतुत्वप्रसंगादिति भावः ॥ कर्मणां ज्ञानार्थत्वे लिंगवाक्यान्याह ॥ अथेत्यादिना कश्चिच्छन्दोभागः साक्षाद्ब्रह्मचर्यं परत्वं ब्रूते कश्चित्तु ज्ञानार्थकर्मद्वारेति मत्वा सर्वे वेदा इत्युक्तं स्पष्टमन्यत् ॥ २६ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा·भा·टी· र·प्र ३७५ एवंविदोऽपनीतबहिरंगानि कर्माण्युक्तानंतरंगाण्याह शान्त इति विद्यास्तुत्यर्थत्वेनैकवाक्यत्वसंभवे वर्तमानोक्तिभंगेन विधिकल्पनमयुक्तं विद्यावाक्या अ·पा· ३·४
द्देहप्रसंगादनस्तत्त्वमसीतिशब्दमात्रलभ्या विद्येति पराभिप्रायमनूद्यांगीकरोति ॥ तथापीति ॥ शमादेरावश्यकत्वान्न शब्दमात्रलभ्या विद्येत्यर्थः ॥
यस्मादेवंवित्न लिप्यते कर्मणा पापकेन तस्मादेवंविद्यार्थी शमाद्युपेतो भूत्वा विचारयेदिति विधिर्गम्यत इत्याह ॥ नेति ब्रूम इति ॥ अत्रोपरतपदेन सं

यदिच्छंतो ब्रह्मचर्यं चरंतीति तत्पदसंग्रहेण त्रयीम्योमित्येतदित्येवमाद्या श्रुतिराश्रमकर्मणां विद्यासाधनभावं सूचयति ॥ स्मृ
तिरपि कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः ॥ कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तत इत्येवमाद्या ॥ अश्ववदिति योग्यतानिद
र्शनं यथा च योग्यतावशेनाश्वो न लांगलाकर्षणे युज्यते रथचर्यायां तु युज्यते ॥ एवमाश्रमकर्माणि विद्यया फलसिद्धौ ना
पेक्ष्यंते उत्पत्तौ चापेक्ष्यंत इति ॥ शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदंगतया तेषामवश्यानुष्ठेयत्वात् ॥ २७ ॥ यदि कश्चि
न्मन्येत यज्ञादीनां विद्यासाधनभावो न न्याय्यो विध्यभावात् ॥ यज्ञेन विविदिषंतीत्येवंजातीयका हि श्रुतिरनुवादस्वरूपा
विद्याभिष्टवपरा न यज्ञादिविधिपरा ॥ इत्थं महाभागा विद्या यद्यज्ञादिभिरेनामवाप्तुमिच्छंतीति ॥ तथापि तु शमदमाद्यु
पेतः स्यात् विद्यार्थी ॥ तस्मादेवंविच्छांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यतीति । विद्यासाधन
त्वेन शमदमादीनां विधानाद्विहितानां चावश्यानुष्ठेयत्वात् ॥ नन्वत्रापि शमाद्युपेतो भूत्वा पश्यतीति वर्तमानापदेश उपल
भ्यते न विधिः ॥ नेति ब्रूमः ॥ तस्मादिति प्रकृतप्रशंसापरिग्रहाद्विधित्वप्रतीतेः पश्येदिति च माध्यंदिना विस्पष्टमेव विधिम राम· ३७५
धीयते ॥ तस्माद्यज्ञाद्यनपेक्षायामपि शमादीन्यपेक्षितव्यानि ॥ ९ न्यासउक्तस्तस्य श्रवणांगत्वमते शमादिविशिष्टश्रवणमत्र विधी
यते यदि तु लोकमिच्छंतः प्रव्रजंतीति ज्ञानं पुरस्कृत्य संन्यसेदित्यादिश्रुतिस्मृतिषु फलवत्त्वेनोक्तसंन्यासस्यांगत्वायोगात् ॥ श्रोतव्य इति विहित
श्रवणानुवादेनानेकशमादिविधाने वाक्यभेदापातात् ॥ पश्येदिति च प्रकृत्या श्रवणलक्षणा दोषाच्च संन्यासो न श्रवणस्यांगं किंतु ततः प्राग
नुष्ठेयत्वेऽपि श्रवणवत् ज्ञानार्थ इति मतं तदा शमादिसमुच्चये तत्ज्ञानं भावयेदिति ज्ञानार्थे शमादिसमुच्चयविधिरित्यनवद्यं ॥ ७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यः पूर्वं यज्ञादिश्रुतेः स्तुत्यर्थत्वांगीकारः आपाततो गुडजिह्विकान्यायेन शमादिस्वीकारार्थं कृतस्तमिदानीं त्यजति यज्ञादीन्यपीति॥ यज्ञादीनां विद्या
साधनत्वरूपसंयोगस्यापूर्वत्वाद्वाक्यभेदेन विधिः स्वीक्रियते ब्रह्मविद्यावाक्येन महावाक्यैकवाक्यतां वेत्यर्थः॥ परमप्रकरणेप्यवांतरविधि
रित्यत्र पूर्वतंत्रसंमतिमाह॥ तस्मात्पूषेति दर्शपूर्णमासप्रकरणे श्रुतं पूषा प्रपिष्टभाग इति तत्र पूषादेवतापिष्टभागो दर्शपूर्णमासयोर्नास्ति अतः स
मासाम्नातीतस्य कालत्रयानवमृष्टस्य द्रव्यदेवतासंबंधस्याविनाभावेन यागविध्युपस्थापकत्वात् प्रयोगज्ञानाय विधिपदमध्याहृत्य प्रकरणादु

यज्ञादीन्यपि त्वपेक्षितव्यानीति यज्ञादिश्रुतेरेव॥ ननूक्तं यज्ञादिभिर्विविदिषंतीत्यत्र न विधिरुपलभ्यत इति॥ सत्यमुक्तं॥
तथापि त्वपूर्वत्वात्संयोगस्य विधिः परिकल्प्यते॥ नह्ययं यज्ञादीनां विविदिषासंयोगः पूर्वं प्राप्तो येनानूद्येत॥ तस्मात्पूषाप्र
पिष्टभागोऽदंतको हीत्येवमादिषु चाश्रुतविधिकेष्वपि वाक्येष्वपूर्वत्वाद्विधिं परिकल्प्य पौष्णं पेषणं विकृतौ प्रतीयेतेत्यादि वि
चारः प्रथमे तंत्रे प्रवर्तितः॥ तथा चोक्तं विधिर्वा धारणवदिति स्मृतिष्वपि भगवद्गीतास्वनभिसंधाय फलमनुष्ठितानि य
ज्ञादीनि मुमुक्षोर्ज्ञानसाधनानि भवंतीति प्रपंचितं॥ तस्माद्यज्ञादीनि शमदमादीनि च यथाश्रमं सर्वाण्येवाश्रमकर्मा
णि विद्योत्पत्तावपेक्षितव्यानि॥ तत्राप्येवंविदिति विद्यासंयोगात् प्रत्यासन्नानि विद्यासाधनानि शमादीनि विविदिषासं
योगात्तु बाह्यतराणि यज्ञादीनीति विवेक्तव्यं॥ ६॥ २७॥ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्॥ २८॥ प्राणसंवादे श्रूयते छं
दोगानां न ह वा एवंविदि किंचनानन्नं भवतीति॥ तथा वाजसनेयिनां न ह वा अस्यानन्नं जग्धं भवति नानन्नं परिगृहीतमिति।
सर्वमेवास्यादनीयमेव भवतीत्यर्थः॥ किमिदं सर्वान्नानुज्ञानं शमादिवद्विद्यांगं विधीयते उत स्तुत्यर्थं संकीर्त्यत इति संशये

त्कर्षेण पूषोद्देशेन पिष्टभागः कर्तव्य इति विकृतौ संबंधः पौष्णं पेषणमिति सूत्रे विचारितमित्यर्थः॥ स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानव इत्याद्याः
स्मृतयः कर्मणां ज्ञानहेतुत्वे शमादिवद्यावज्ज्ञानोदयमनुवृत्तिः स्यात्तथा च संन्यासाभाव इत्यत आह॥ तत्रापीति दृष्टविक्षेपनिवृत्तिद्वारा शमादी
नां ज्ञानार्थत्वादनुवृत्तिर्न कर्मणामदृष्टद्वारा ज्ञानार्थत्वादिति भावः २७॥ सर्वान्नानुमतिः एवंविदि प्राणस्यान्नं सर्वमिति ध्यानवतीत्यर्थः॥ जग्धं भक्षि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा.भा. टी. र.म. ३७६ अ.पा ३.४

अपूर्वत्वाद्यज्ञादिवत् विधिः कल्प्य इति पूर्वपक्षयति विधिरिति अत्र भक्ष्याभक्ष्यनियमत्यागस्य विद्याङ्गत्वसिद्धिः फलं सिद्धान्ते तु विद्यास्तुतिरिति निर्विवेकः नकलञ्जं भक्षयेदिति शास्त्रं प्राणविद्यातिरिक्तविषयं यथा ग्राम्यकर्माणि वामदेव्यसामोपासकव्यतिरिक्तविषयं परस्त्रीनिषेधशास्त्रं तद्वदिति भा

विधिरिति नानुवादमात्रम् तथा हि प्रवृत्तिविशेषकर उपदेशो भवत्यतः प्राणविद्यासन्निधानात्तदङ्गत्वेनेयं नियमनिवृत्तिरुपदिश्यते॥ नन्वेवं सति भक्ष्याभक्ष्यविभागशास्त्रव्याघातः स्यात्॥ नैष दोषः सामान्यविशेषभावाद्बाधोपपत्तेः॥ यथा प्राणिहिंसाप्रतिषेधस्य पशुसंज्ञपनविधिना बाधः॥ यथा च न काञ्चन स्त्रियं परिहरेत्तद्व्रतमित्यनेन वामदेव्यविद्याविषयेण सर्वस्त्र्यपरिहारवचनेन सामान्यविषयं गम्यागम्यविभागशास्त्रं बाध्यते॥ एवमनेनापि प्राणविद्याविषयेण सर्वान्नभक्षणवचनेन भक्ष्याभक्ष्यविभागशास्त्रं बाध्येतेत्येवं प्राप्ते ब्रूमः॥ नेदं सर्वान्नानुज्ञानं विधीयते इति नह्यत्र विधायकः शब्द उपलभ्यते॥ न ह वा एवंविदि किंचनानन्नं भवतीति वर्तमानापदेशात्॥ न चासत्यामपि विधिप्रतीतौ प्रवृत्तिविशेषकरत्वलोभेनैव विधिरभ्युपगन्तुं शक्यते॥ अपि च श्वादिमर्यादं प्राणस्यान्नमित्युक्त्वेदमुच्यते नैवंविदः किंचिदनन्नं भवतीति। न च श्वादिमर्यादमन्नं मानुषेण देहेनोपभोक्तुं शक्यते॥ शक्यते तु प्राणस्यान्नमिदं सर्वमिति विचिन्तयितुं॥ तस्मात्प्राणान्नविज्ञानप्रशंसार्थोयमर्थवादो न सर्वान्नानुज्ञानविधिः॥ तद्दर्शयति॥ सर्वान्नानुमतिश्च प्राणात्यये इति॥ एतदुक्तं भवति प्राणात्यय एव हि परस्यामापदि सर्वमन्नमदनीयत्वेनाभ्यनुज्ञायते तद्दर्शनात्। तथा हि श्रुतिश्चाक्रायणस्यर्षेः कष्टायामवस्थायामभक्ष्यभक्षणे प्रवृत्तिं दर्शयति॥ मटचीहतेषु कुरुष्वित्यस्मिन् ब्राह्मणे चाक्रायणः किल ऋषिरापद्गत इभ्येन सामिखादितान् कुल्माषांश्चखाद अनुपानं तु तदीयमुच्छिष्टदोषात्प्रत्याचचक्षे कारणं चात्रोवाच न वा अजीविष्यमिमानखादन्निति कामो म उदपानमिति च पुनश्च तेनैव ((स्वपरोच्छिष्टान् पर्युषितान् कुल्माषान् भक्षयांचभूवेति॥

ते सिद्धान्तसूत्रात्प्रागेव दर्शयति॥ नेदमिति॥ प्राणविद्याविधिसन्निधेः अशक्यत्वाच्च स्तुतिरेव न विधिः कल्प्यः निषेधशास्त्रविरोधात्॥ क्लृप्तो हि विधिः सामान्यशास्त्रबाधकः न तु कल्प्य इति भावः॥ स्वस्य स्वप्राणविदो न सर्वान्नानुमतिरित्यत्र लिंगं वदन् सूत्रं योजयति तद्दर्शयतीति॥

रा.म. ३७६

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मटच्योरक्तक्षुद्रपक्षिणस्तैर्हतेषु कुरुदेशस्थसस्येषु दुर्भिक्षे जाते बालया सह जायया उषस्तिर्देशान्तरं गच्छन्निभ्यग्रामे स्थितवान् इभ्यो हस्तिपालकस्तेन सा
मिश्रखादितानर्धभक्षितान् कुत्सितमाषान् याचयित्वा भक्षितवान् इभ्ये न जलं गृहाणेत्युक्ते सत्युच्छिष्टं वै मे पीतं स्यादिति प्रतिषिध्य माषाः किं नोच्छिष्टा
इतीभ्येनोक्ते सति माषभक्षणे जलत्यागे च कारणमुवाच अन्नाशे मम आपदस्ति जलपानं तु स्वेच्छातस्तडागादौ लभ्यत इति माषान् खादित्वा च।
शिष्टाञ्जायायै दत्तवान् सा चानापद्गतापसुरापदं ज्ञात्वा माषान् संरक्ष्य प्रातस्तस्मै दत्तैः स च तान् खादित्वा राज्ञो यज्ञं गत्वा प्रस्तोत्रादीनाक्षिप्यमाणाः

तदेतदुच्छिष्टोच्छिष्टपर्युषितभक्षणं दर्शयन्त्याः श्रुतेराश्रयातिशयो लक्ष्यते ॥ प्राणात्ययप्रसंगे प्राणसंधारणायाभक्ष्यमपि भ
क्षयितव्यमिति स्वस्थावस्थायां तु तन्न कर्तव्यं विद्यावतापीत्युत्तरं पानमप्याख्यानाद्गम्यते ॥ तस्मादर्थवादो न हवा एवं विदीत्येवमा
दिः ॥२८॥ अबाधाच्च ॥२९॥ एवं च सत्याहारशुद्धौ सत्त्वशुद्धिरित्येवमादि भक्ष्याभक्ष्यविभागशास्त्रमबाधितं भविष्यति ॥२९॥
अपि च स्मर्यते ॥३०॥ अपि चापदि सर्वान्नभक्षणमपि स्मर्यते विदुषोऽविदुषश्चाविशेषेण । जीवितात्ययमापन्नो योऽन्नमत्ति।
यतस्ततः ॥ लिप्यते न स पापेन पद्मपत्रमिवांभसेति ॥ तथा मद्यं नित्यं ब्राह्मणः ॥ सुरापस्य ब्राह्मणस्योष्णामासिंचेयुः ॥ सुरा।
पाः कृमयो भवंत्यभक्ष्यभक्षणात् इति च स्मर्यते वर्जनमनन्नस्य ॥३०॥ शब्दश्चातोऽकामकारे ॥३१॥ शब्दश्चानन्नस्य प्रतिषे
धकः कामकारनिवृत्तिप्रयोजकः काठकानां संहितायां श्रूयते ॥ तस्माद्ब्राह्मणः सुरां न पिबेदिति ॥ सोऽपि न हवा एवं विदीत्यस्यार्थ।
वादत्वादुपपन्नतरो भवति ॥ तस्मादेवंजातीयकार्थवादानविधय इति ॥ १ कां प्रस्तावादिदेवतां उपदिश्य धनं प्राप्य स्थित इति भावः अत्रो

च्छिष्टभक्षणजलत्यागात्मकशिष्टाचारलिंगाच्छ्रौतादनापदि विदुषाप्यभक्ष्यं न भक्षणीयमिति सूच्यत इति भावः ॥२८॥ २९॥ सुरापानेनापि जीवना
माशंक्य कदापि तन्न कार्यमित्याह ॥ तथा मद्यं नित्यं ब्राह्मण इति वर्जयेदिति शेषः ॥ कुत इत्याशंक्य मरणांतप्रायश्चित्तविधानादित्याह सुरापस्येति ॥
उष्णामतितप्तां सुरामिति शेषः इतश्च सा न पेयेत्याह ॥ सुरापा इति ॥३०॥ उदाहृतस्मृतीनां मूलश्रुतिमाह ॥ शब्दश्चेति ॥ कामकारो यथेष्टप्रवृत्तिः सो
पि निषेधोपि उपपन्नतरो भवति न हवा एवंविदीत्यस्यार्थवादत्वात् ॥ यद्ययमपि विधिः स्यात्तर्हि विहितप्रतिषिद्धत्वात् षोडशिग्रहणाग्रहणवत्सुरापा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ब्रा.भा. टी. र.प्र. ३११

अ.पा ३.४

विहितत्वाच्चाश्रमकर्मापि ॥ नित्याग्निहोत्रादिकर्मसु विहितत्वाद्धि नियुक्तविनियोगविरोधाच्च संशये शास्त्रांतरविरोधात्सर्वान्नत्वोक्तेः स्तुति।
त्ववन्नित्यविनियुक्तत्वश्रुतिविरोधाद्धि विविदिषायां विनियोगश्रुतेः स्तुतित्वमिति पूर्वपक्षमाह ॥ तत्रेति। ज्ञानकामनयानुष्ठाने कर्मणामनित्यत्वं अ।
नावश्यकत्वं तस्याः अनित्यत्वाद्यावज्जीवादिविधिनानुनित्यत्वं चेति विरुद्धधर्मद्वयापातात् हि विविदिषाश्रुतेः स्तुतित्वमिति फलं पूर्वपक्षे सिद्धांते तूभ

विहितत्वाच्चाश्रमकर्मापि ॥३२॥ सर्वापेक्षा चेत्यत्राश्रमकर्मणां विद्यासाधनत्वमवधारितमिदानीं तु किममुमुक्षोरप्याश्रममा
त्रनिष्ठस्य विद्यामकामयमानस्य नान्यनुष्ठेयान्युताहो नेति चिंत्यते तत्र तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंतीत्यादिनाऽऽ
श्रमकर्मणां विद्यासाधनत्वेन विहितत्वात् विद्यामनिच्छतः फलांतरं कामयमानस्य नित्यान्यननुष्ठेयानि ॥ अथ तस्याप्यनु
ष्ठेयानि न तर्ह्येषां विद्यासाधनत्वं नित्यानित्यसंयोगविरोधादित्यस्यां प्राप्तौ पठति ॥ आश्रममात्रनिष्ठस्याप्यमुमुक्षोः कर्त्तव्या।
न्येव नित्यानि कर्माणि यावज्जीवमग्निहोत्रं जुहोतीत्यादिना विहितत्वात् ॥ न हि वचनस्याति भारो नाम कश्चिदस्ति ॥३२॥ अ
थ यदुक्तं नैवं सति विद्यासाधनत्वमेषां स्यादिति ॥ अत उत्तरं पठति ॥ सहकारित्वेन च ॥३३॥ विद्यासहकारीणि चैतानि स्यु।
र्विहितत्वादेव ॥ तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंतीत्यादिना ॥ तदुक्तं सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति ॥ न चेदं वि
द्यासहकारित्ववचनमाश्रमकर्मणां प्रयाजादिवद्विद्याफलविषयं मंतव्यमविधिलक्षणत्वात् विद्यायाः ॥ असाध्यत्वाच्च वि
द्याफलस्य विधिलक्षणं हि साधनं दर्शपूर्णमासादिस्व फलसिसाधयिषया सहकारिसाधनांतरमाकांक्षतेनैवं विद्या ॥ तथा।
चोक्तमत एव चाग्नींधनाद्यनपेक्षेति ॥ तस्मादुत्पत्तिसाधनत्व एवैषां सहकारित्ववाचोयुक्तिः न चात्र नित्यानित्यसंयोगविरोध

राम. ३११

यथा अनुष्ठानं फलं ॥३३॥ सहमिलित्वा शुद्धिद्वारा विद्यां कुर्वंतीति सहकारीणि कर्माणि तेषां भावस्तत्त्व आशंकाः कर्माभेदेपि संयोगभेदात् ॥ ६ ॥
त्वेनेत्यर्थः ॥ विद्यया सहफलकारित्वं सहकारिपदात्प्राप्तं निरस्यति ॥ न चेदमिति ॥ विद्याया अविहितत्वान्नांगापेक्षास्ति अतो विहितानि कर्मा।
णि अविहिताया न सहकार्यंगानि मोक्षस्यासाध्यत्वाच्च न कर्मणां सहकारित्वसम्भव इत्यर्थः ॥ ॥ ॥ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तुल्यबलश्रुतिद्वयेन विनियोगपृथक्त्वं संयोगभेदस्ततो न विरोधः कामनाया अनित्ये पि कर्मणां नानित्यत्वं नित्यविधिना प्रयोगस्य नित्यत्वात्सत्यां कामनायां काम्यप्रयोगे नैव नित्यत्वसिद्धेर्न कश्चिद्विरोधः॥ इदं चैकस्य तूभयत्वे संयोगपृथक्त्वमिति सूत्रे चिंतितं यथा खादिरो यूपो भवति इति श्रुत्या खादिरत्वस्य क्रत्वर्थता खादिरं वीर्यकामस्येति स्मृत्या पुरुषार्थता चेति अतः सति वाक्यद्वये विनियुक्तविनियोगो न विरुध्यत इत्यर्थः ३३ ननु नित्याग्निहोत्रादिभ्यो भिन्ना एवापूर्वयज्ञादयो विविदिषायां विनियुज्यंतां न तत्र कुतो विनियुक्तविनियोगस्तत्राह सर्वथा पीति नित्यत्वे काम्यत्वे चेत्यर्थः

नित्यो ह्येकः संयोगो यावज्जीवादिवाक्यकल्पितो न तस्य विद्याफलत्वम् अनित्यस्त्वपरः संयोगस्तमेतं वेदानुवचनेनेत्यादिवाक्यकल्पितस्तस्य विद्याफलत्वं॥ यथैकस्यापि खादिरत्वस्य नित्येन संयोगेन क्रत्वर्थत्वमनित्येन संयोगेन पुरुषार्थत्वं तद्वत्॥३३

॥सर्वथापि त एवोभयलिंगात्॥३४॥ सर्वथाप्याश्रमकर्मत्वपक्षे विद्यासहकारित्वपक्षे च त एवाग्निहोत्रादयो धर्मा अनुष्ठेयास्त एवेत्यवधारयत्याचार्यः किं निवर्तयति कर्मभेदाशंकामिति ब्रूमः॥ यथा मासमग्निहोत्रं जुह्वतीत्यत्र नित्यादग्निहोत्रात्कर्मांतरमुपदिश्यते नैवमिह कर्मभेदोस्तीत्यर्थः॥ कुत उभयलिंगात् श्रुतिलिंगात्स्मृतिलिंगाच्च॥ श्रुतिलिंगं तावत् तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंतीति सिद्धवदुत्पन्नरूपाण्येव यज्ञादीनि विविदिषायां विनियुंक्ते न तु जुह्वतीत्यादिवदपूर्वमेषां रूपमुत्पादयतीति॥ स्मृतिलिंगमप्यनाश्रितः कर्मफलं कार्यं कर्म करोति यः इति विज्ञातकर्तव्यताकमेव कर्म विद्योत्पत्त्यर्थं दर्शयति॥ यस्यैतेऽष्टचत्वारिंशत्संस्कारा इत्याद्या च संस्कारत्वप्रसिद्धिर्वैदिकेषु कर्मसु तत्संस्कृतस्य विद्योत्पत्तिमभिप्रेत्य स्मृतौ भवति॥ तस्मात्साध्विदमभेदावधारणं॥३४॥

११ कुंडपायिनामयने मासमग्निहोत्रं जुह्वतीत्यस्यानस्य। साध्यहोमवाचित्वात्तद्देकार्थकाग्निहोत्रपदस्य व्यवहितसिद्धाग्निहोत्रपरामर्शकत्वायोगात् मासगुणविशिष्टं कर्मांतरं विधीयत इति युक्तमिह तु यज्ञेनेत्यादिस्कृवंतानामाख्यातेनैकार्थत्वाभावात्सिद्धव्यवहितकर्मानुवादकत्वात्तेषामेव कर्मणां ज्ञानार्थत्वविधिरिति भावः॥ सिद्धकर्मसु संस्कारत्वप्रसिद्धिरपि शुद्ध्याख्यसंस्कारद्वारा ज्ञानार्थकर्माभेदे लिंगमित्याह यस्यैत इति॥३४॥ ७ ॥ ७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मूल·पं·३ क्वचित्पुस्तके उचितमिति पाठः

भा· ब्रह्मचर्यादिकर्मणांप्रतिबंधध्वंसद्वाराविद्यार्थत्वेलिंगमाह॥अनभिभवंचेति ३५ अंतराचापितुतद्दृष्टेः॥अनाश्रमिणांजपादिकर्मसत्त्वान्निर्दि अ·पा
गी· ष्टत्वाच्चसंशयेसतिआश्रमकर्मणामेवविद्याहेतुत्वश्रुतेरनाश्रमस्यनिर्दिष्टत्वाच्चानधिकारइतिपूर्वपक्षः॥तत्रानाश्रमकर्मणांविद्याहेतुत्वा ३।४
प्र·

३८ अनभिभवंचदर्शयति॥३५॥सहकारित्वस्यैवैतद्रूपोद्बलकंलिंगदर्शनमनभिभवंचदर्शयतिश्रुतिर्ब्रह्मचर्यादिसाधनसंपन्नस्यरागादिभिःक्लेशैरेषह्यात्मानतश्यतियंब्रह्मचर्येणानुविंदतीत्यादिना॥तस्मात्तुयज्ञादीन्याश्रमकर्माणिचभवंतिविद्यासहकारीणिचेतिनिश्चितं॥८॥३५॥अंतराचापितद्दृष्टेः॥३६॥विधुरादीनांद्रव्यादिसंपद्रहितानांचान्यतमाश्रमप्रतिपत्तिहीनानामंतरालवर्तिनांकिंविद्यायामधिकारोस्तिकिंवानास्तीतिसंशयेनास्तीतितावत्प्राप्तं।आश्रमकर्मणांविद्याहेतुत्वावधारणादाश्रमकर्मासंभवाच्चैतेषामित्येवंप्राप्तइदमाह॥अंतराचापितुअनाश्रमित्वेनवर्तमानोपिविद्यायामधिक्रियते॥कुतस्तद्दृष्टेः रैक्ववाचक्नवीप्रभृतीनामेवंभूतानामपिब्रह्मवित्त्वश्रुत्युपलब्धेः॥३६॥अपिचस्मर्यते॥३७
संवर्तप्रभृतीनांचनग्नचर्यादियोगादनपेक्षिताश्रमकर्मणामपिमहायोगित्वंस्मर्यतेइतिहासे॥३७॥ननुलिंगमिदंश्रुतिस्मृतिदर्शनमुपन्यस्तंकानुखलुप्राप्तिरितिसाभिधीयते॥विशेषानुग्रहश्च॥३८॥तेषामपिचविधुरादीनामविरुद्धैःपुरुषमात्रसंबंधिभिर्जपोपवासदेवताराधनादिभिर्धर्मविशेषैरनुग्रहोविद्यायाःसंभवति॥तथाचस्मृतिर्जप्येनैवतुसंसिद्ध्येत्ब्राह्मणोनात्रसंशयः॥कुर्यादन्यन्नवाकुर्यान्मैत्रोब्राह्मणउच्यतेइत्यसंभवदाश्रमकर्मणोपिजप्येधिका पाम·
रंदर्शयति॥जन्मांतरानुष्ठितैरपिचाश्रमकर्मभिः संभवत्येवविद्याया अनुग्रहस्तथाचस्मृतिः॥अनेकजन्मसंसिद्धस्ततो ३७८
यातिपरांगतिमिति॥जन्मांतरसंचितानपिसंस्कारविशेषाननुगृह्णंतीं विद्यांदर्शयति॥ ९ सिद्धेः॥ सिद्धांतेतत्सिद्धिरि

तिफलं॥३६॥रैक्वादीनांविद्यावत्त्वलिंगस्यजन्मांतराश्रमकर्मणाऽन्यथासिद्धेरनाश्रमकर्मणोविद्यार्थत्वप्रापकंमानांतरंवाच्यमितिशंकते।ननुलिंगमिति॥अनाश्रमित्वाविरुद्धानांवर्णमात्रप्राप्तधर्माणांविद्यार्थत्वेमानमाह॥तथाचेति॥मैत्रोदयालुरितिस्यार्थः॥ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नन्वनाश्रमिणांकर्मभवतुविद्याहेतुस्तथापितेषांनश्रवणाद्यावधिकारःसंन्यासाभावादित्यतआह दृष्टार्थाचेति॥बंधकाज्ञानध्वस्तिफलकवि-
द्याकामस्यश्रवणेधिकारः संन्यासोपिकदाचित्कृतोज्ञानउपकरोतिश्रवणंप्रत्यनंगत्वादितिभावः॥३८॥ तर्ह्याश्रमित्वंवृथेत्यतआह॥
अतस्त्वितिपुण्यकृत्तैजसः शुद्धसत्वस्तेनज्ञानमार्गेणेतिब्रह्मप्राप्नोतीत्यर्थः॥अत्रपुण्यकृत्त्वलिंगादाश्रमित्वंज्यायःपुण्योपचयेशीघ्रंवि-
द्यालाभादनाश्रमस्यनिंदितत्वाच्चेतिभावः॥३९॥ तद्भूतस्यतु॥उक्ताश्रमात्पूर्वाश्रमंप्राप्तस्यप्रच्युतस्यकर्मापिविद्याहेतुरनाश्रमिकर्मवदि-

दृष्टार्थाचविद्याप्रतिषेधाभावमात्रेणाप्यर्थिनमधिकरोतिश्रवणादिषु॥तस्माद्विधुरादीनामप्यधिकारोनविरुध्यते॥३८॥
अतस्त्वितरज्ज्यायोलिंगाच्च॥३९॥अतस्त्वितरात्तवर्जित्वादितरदाश्रमवर्जित्वंज्यायोविद्यासाधनंश्रुतिलिंगात्स्मृतिलिंगा-
च्च॥तेनैतिब्रह्मवित्पुण्यकृत्तैजसश्चेति॥अनाश्रमीनतिष्ठेतदिनमेकमपिद्विजः॥संवत्सरमनाश्रमीस्थित्वाकृच्छ्रमेकंचरेदि-
तिचस्मृतिलिंगात्॥१।३९॥ तद्भूतस्यतुनातद्भावोजैमिनेरपिनियमात्तद्रूपाभावेभ्यः॥४०॥ संत्यूर्ध्वरेतसआश्रमाइतिस्थापि-
तंतांस्तुप्राप्तस्यकथंचित्ततःप्रच्युतिरस्तिनास्तिवेतिसंशयः॥पूर्वकर्मस्वनुष्ठानचिकीर्षयारागादिवशेनवाप्रच्युतोपिस्या-
त् विशेषाभावादित्येवंप्राप्तउच्यते॥तद्भूतस्यतुप्रतिपन्नोर्ध्वरेतोभावस्यकथंचिदप्यतद्भावोनततःप्रच्युतिःस्यात्॥कुतः
नियमातद्रूपाभावेभ्यः॥तथाह्यत्यंतमात्मानमाचार्यकुलेऽवसादयन्निति॥अरण्यमियादितिपदंततोनपुनरेयादित्युप-
निषदिति॥आचार्येणाभ्यनुज्ञातश्चतुर्णामेकमाश्रमं॥आविमोक्षाच्छरीरस्यसोनुतिष्ठेद्यथाविधीतिचैवंजातीयकोनियमः
प्रच्युत्यभावंदर्शयति॥यथाचब्रह्मचर्यंसमाप्यगृहीभवेत्॥ब्रह्मचर्यादेवप्रव्रजेदितिचैवमादीन्यारोहरूपाणिवचांसु-
पलभ्यंतेनैवंप्रत्यवरोहरूपाणि॥नचैवमाचाराःशिष्टाविद्यंते॥यत्तुपूर्वकर्मस्वनुष्ठानचिकीर्षयाप्रत्यवरोहणमिति॥ः

तिसंगतिः पूर्वपक्षफलंचैतत्सिद्धांतेतुभ्रष्टस्यकर्मनहेतुरितिफलंरागादिमत्त्वात्प्रच्युतिनिषेधाच्चप्रच्युतिः प्रामाणिकीनवेतिसंशयःसिद्धांतसू-
त्रेनियमंव्याचष्टेतथाहीति॥अत्यंतमितिनैष्ठिकत्वनियमः॥अरण्यमित्येकांतोपलक्षितंपारिव्राज्यंगृह्यतेतेनदिशागच्छेदितिपदंशास्त्रमार्गस्ततस्तस्मा

चंडालाः प्रत्यवसितादिनिस्मृतेश्च पतितानां कर्म निष्फलमितिभावः॥४०॥ नचाधिकारिकं॥ अवकीर्येत व्यभिचरेदित्यर्थः अवकीर्णं योनौ निषि क्तं रेतो यस्यास्तीत्यवकीर्णी॥ अत्र प्रच्युतस्य प्रायश्चित्तं स्यान्नवेति उपपातकत्वात्पतनस्मृतेश्च संशयः प्रच्युतस्य यज्ञादिकं निष्फलमित्युक्तं तद्वत्प्रा यश्चित्तमपि निष्फलमिति पूर्वपक्षयति॥ नेत्युच्यतइति॥ अत्र कृतप्रायश्चित्तस्य कर्मज्ञानहेतुर्न भवतीति फलं सिद्धान्ते तु भवतीति भेदः॥ यद्योप

तदसच्छ्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितादिति स्मरणात्॥ न्यायाच्च यो हि यं प्रति विधीयते स तस्य धर्मो न तु यो येन स्वनुष्ठातुं शक्यते॥ चोदनालक्षणत्वाद्धर्मस्य॥ न च रागादिवशात्प्रच्युतिर्नियमशास्त्रस्य बलीयस्त्वात्॥ जैमिनेरपीत्यपिशब्देन जैमिनिबादरायणयोरत्र संप्रतिपत्तिं शास्ति प्रतिपत्तिदार्ढ्याय॥१०॥४०॥ न चाधिकारिकमपि पतनानुमानात्तदयोगात्॥४१॥ यदि नैष्ठिको ब्रह्मचारी प्रमादादवकीर्येत किं तस्य ब्रह्मचार्यवकीर्णी नैर्ऋतं गर्दभमालभेतेत्येतत्प्रायश्चित्तं स्यादुत नेति नेत्युच्यते॥ यदप्यधिकारलक्षणे निर्णीतं प्रायश्चित्तमवकीर्णिपशुश्च तद्वदाधानस्याप्राप्तकालत्वादिति॥ तदपि न नैष्ठिकस्य भवितुमर्हति किं कारणं॥ आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः॥ प्रायश्चित्तं न पश्यामि येन शुद्ध्येत्स आत्महेति अप्रतिसमाधेयपतनस्मरणाच्छिन्नशिरस इव प्रतिक्रियानुपपत्तेः॥ उपकुर्वाणस्य तु तादृक्पतनस्मरणाभावादुपपद्यते तत्प्रायश्चित्तं॥४१॥ उपपूर्वमपि त्वेके भावमशनवत्तदुक्तं॥४२॥ अपि त्वेके आचार्या उपपातकमेवैतदिति मन्यन्ते॥ यन्नैष्ठिकस्य गुरुदारादिभ्योऽन्यत्र ब्रह्मचर्यं विशीर्येत॥ न तन्महापातकं भवति॥ गुरुतल्पादिषु महापातकेष्वपरिगणनात्तस्मादुपकुर्वाणवन्नैष्ठिकस्यापि प्रायाश्चित्तस्य भावमिच्छन्ति ब्रह्मचारित्वाविशेषादवकीर्णित्वाविशेषाच्चाशनवद्यथा ब्रह्मचारिणो मधुमांसाशने व्रतलोपः पुनः संस्कारश्चैवमिति॥ ये हि प्रायश्चित्तस्याभावमिच्छन्ति तेषां न मूलमुपलभ्यते॥

९ नयनकाले होमो लौकिकाग्नावेव कार्यः दारसंबंधोत्तरकालविहिताधानस्य संप्रत्यप्राप्तकालत्वेनाहवनीयाभावात्तद्वदवकीर्णिनो ब्रह्मचारिणः प्रायश्चित्तपशुर्गर्दभो लौकिकाग्नौ होतव्य इत्यधिकारलक्षणे षष्ठाध्याये निर्णीतं॥४१॥ प्रायश्चित्तमाधिकारिकं तदुपकुर्वाणस्येव नैष्ठिकस्येति प्राप्ते सिद्धान्तयति॥ उपपूर्वमिति॥ उपपदं पूर्वं यस्य पातक

उपपातकाधिकरणं॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रायश्चित्तं न पश्यामि इति दर्शनाभावस्मृतेः प्रायश्चित्ताभावपरत्वं कस्यचित्तान्मूलश्रुतिकल्पनात्प्रागेव क्रमप्रसाधारणश्रुत्या प्रायश्चित्तसद्भा॰
वसिद्धेः कल्पनेनोदेति क्रमश्रुतिविरोधादिति भावः प्रायश्चित्तस्य भावाभावसिद्धोः समत्वेपि भावप्रसिद्धिः श्रुतिमूलत्वादादर्तव्येत्यत्र संमतिमा
ह तदुक्तमिति यवमयश्चरुरित्यत्र यवशब्दं केचिद्दीर्घशूके प्रयुञ्जते केचित्तु शविशेषे प्रियंगुष्वतः कस्यचरुः कार्य इति संदेहे दृढप्रयोगसाम्या॰
त्समानुल्याविकल्पेन प्रतिपत्तिः स्यादिति प्राप्ते सिद्धान्तः ॥ शास्त्रमूला प्रतिपत्तिर्ग्राह्या शास्त्रनिमित्तत्वाद्यवादीनां तथा च यदान्या ओषधयो म्ला
यन्तेऽथैते यवा मोदमाना स्तिष्ठन्तीति शास्त्रमूलत्वाद्दीर्घशूकप्रयोगस्यैवादरणीयत्वमर्थः स्मृतेर्गतिमाह ॥ प्रायश्चित्तेति ॥ ब्रह्मचर्यरक्षार्थं यत्नाधिक्य
कार्यमिति ज्ञापनार्थं प्रायश्चित्तं सदपि न पश्यामीत्युक्तं भगवदङ्गिरेत्यर्थः नैष्ठिकवद्यतिवनस्थयोरपि प्रमादाद्ब्रह्मचर्यभंगे प्रायश्चित्तमः

यत्तु भावमित्युक्तं तिनेषां ब्रह्मचार्येवकीर्णोन्येन तद्विशेषश्रवणमूलं तस्माज्ज्ञानाद्युक्ततरः ॥ तदुक्तं प्रमाणलक्षणे समाविप्रति
पत्तिः स्याच्छास्त्रस्थावा तन्निमित्तत्वादिति ॥ प्रायश्चित्ताभावस्मरणं त्वेवं सति यत्नगौरवोत्पादनार्थमिति व्याख्यानत्रयमेवं ।
भिक्षुवैखानसयोरपि वानप्रस्थो दीक्षाभेदे कृच्छ्रं द्वादशरात्रं च चित्वा महाकक्षं वर्धयेत् ॥ भिक्षुर्वानप्रस्थवत्सोमवल्लिवर्ज्जं
स्वशास्त्रसंस्कारश्चेत्येवमादि प्रायश्चित्तस्मरणमनुसर्तव्यं ॥ ४२ ॥ ११ ॥ बहिस्तूभयथापि स्मृतेराचाराच्च ॥ ४३ ॥ यदूर्ध्वरे
तसां स्वाश्रमेभ्यः प्रच्यवनं महापातकं यदि चोपपातकमुभयथापि शिष्टैस्ते बहिः कर्तव्याः ॥ ११ स्त्रीत्याह ॥ एवमिति कृच्छ्रं प्राजाप॰

त्य महाकक्षं वहुतृणकाष्ठदेशं जलदानादिना वर्द्धयेत् ॥ यतिस्तु सोमलतावर्जं वर्धयेत् ॥ सर्वपापप्रसक्तोपि ध्यायन्निमिषमच्युतं ॥ भूयस्तपस्वी भ
वति पंक्तिपावनपावनः ॥ उपपातकसंघेषु पातकेषु महत्सु च ॥ प्रविश्य रजनीपादं ब्रह्मध्यानं समाचरेदित्यादि स्वशास्त्रविहितध्यानप्राणायामा
दि संस्कारोपि भिक्षुणा कार्य इत्यर्थः ॥ आदिपदात्स्मनोवाक्कायजान् दोषान् ज्ञानोत्थान्प्रमादजान् ॥ सर्वान्दहति योगाग्निस्तूलराशिमिवानलः
॥ नित्यमेव तु कुर्वीत प्राणायामांस्तु षोडश ॥ अपि भ्रूणहनं मासात्पुनन्त्यहरहः कृताः इत्यादि वाक्यं ग्राह्यम् ॥ ४२ ॥ ११ ॥ बहिस्तूभयथापि कृतप्राय॰
श्चित्तैस्तैः सह कृतश्रवणादिकं ज्ञानसाधनं नवेति संदेहे तेषां शुद्धत्वात्साधनमिति प्राप्ते प्रायश्चित्तात्परलोके तेषां शुद्धत्वेप्यत्र शुद्ध्यभावात्साधनमि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा.भा. स्वामिनः फलश्रुतेः ।। अंगाश्रितोपास्तिषूभयकर्तृकत्वसंभवात्संशयः ।। यत्कृतमात्विग्भिः ससंव्यवहार्यस्तुत्सर्गस्य निर्दानिशयस्मृत्यानैष्ठिकादिषुवा।

दी. धवद्योयदंगकर्तासनदाश्रितस्यकर्तैत्युत्सर्गस्यकर्तुः फलश्रुत्यावाधइतिपूर्वपक्षमाह ।। किमिति ।। अत्रकर्तृत्वभोक्तृत्वयोरैकाधिकरण्यंफलेति। अ.पा.

र.भ. द्धुतेत्वंगाश्रिताऋत्विक्कर्तृकाअप्युपास्तयोयजमानगामिस्वतंत्रफलाः किंतुवाच्यंस्वनिष्ठब्रह्मविद्यायाःस्वातंत्र्यमितिफलविवेकयंत्र ।। अतःपार ३.४

१९० आरूढोनैष्ठिकंधर्मंयस्तुप्रच्यवतेपुनः ।। प्रायश्चित्तंनपश्यामियेनशुध्येत्सआत्महेति ।। आरूढपतितंविप्रंमंडलाच्चवि

निःसृतं ।। उद्बद्धंकृमिदष्टंचस्पृष्ट्वाचांद्रायणंचरेदितिचैवमादिनिर्दानिशयस्मृतिभ्यः ।। शिष्टाचाराच्चनहियज्ञाध्ययनवि

वाहादीनितैःसहाचरंतिशिष्टाः ।।९२।।४३।। स्वामिनःफलश्रुतेरित्यात्रेयः ।।४४।। अंगेषूपासनेषुसंशयः ।। किंतानियजमानक

र्माण्याहोस्विदार्त्विक्कर्माणीति ।। किंतावत्प्राप्तं ।। यजमानकर्माणीति ।। कुतःफलश्रुतेः फलंहिश्रूयते ।। वर्षतिहास्मैवर्षयतिहयए

तदेवंविद्वान्वृष्टौपंचविधंसामोपास्तइत्यादि ।। तच्चस्वामिगामिन्याय्यं ।। तस्यसांगेप्रयोगेअधिकृतत्वादधिकृताधिकारि

त्वाच्चैवंजातीयकस्य ।। फलंचकर्तर्युपासनानांश्रूयतेवर्षत्यस्मैयउपास्तइत्यादि ।। नन्वृत्विजोपिफलंदृष्टमात्मनेवाय

जमानायवायंकामंकामयतेतमागायतीति ।। नतस्यवाचनिकत्वात् ।। तस्मात्स्वामिनएवफलवत्सूपासनेषुकर्तृत्वमि

त्यात्रेयआचार्योमन्यते ।।४५।। आर्त्विज्यमित्यौडुलोमिस्तस्मैहिपरिक्रीयते ।। नैतदस्तिस्वामिकर्माण्युपासनानीति ऋत्वि

क्कर्माण्येतानिस्युरित्यौडुलोमिराचार्योमन्यते ।। किंकारणंतस्मैहिसांगायकर्मणेयजमानेनऋत्विक्परिक्रीयते ।। तन्त्रयो

गांतःपातीनिचोद्गीथाद्युपासनान्यधिकृताधिकारित्वात् ।। ११ संगतिः ।। हिंकारप्रस्तावोद्गीथप्रतिहारनिधनाख्यपंचप्रकारेसाम्नि

दृष्ट्यानुर्वर्षसमृद्धिःफलमितिश्रुत्यर्थः ।। श्रुतंफलंऋत्विग्गतंकिंनस्यादित्यतआह ।। तच्चेति ।। यथासांगऋत्वधिकृताधिकारत्वाद्गोदोहन

सफलंऋत्वधिकारितंतद्वद्गोपासनस्यापिफलंतद्गतमेवेत्यर्थः ।। अस्तुतस्यफलंतद्गतंकर्तात्वन्यःकिंनस्यादित्यतआह ।। फलंचेति ।। यदुक्तंय

जमानगामिफलमितितत्सापवादंशंकतेनन्विति ।। उक्तानेनसाधयतीत्यर्थः ।। यजमानफलमित्युत्सर्गस्यासतिबाधकवचनेसिद्धिरितिसमाध्यर्थः ।।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उपासनमार्त्विज्यं ऋत्विक्कर्तृकमित्यत्र श्रौतं लिंगमाह ॥ तथा चेति ॥ तमुद्गीथाख्यं प्रणवं प्राणदृष्ट्या ध्यातवान्ध्यातवांश्च नैमिशीयानां स-
त्रिणामुद्गातासीदित्यर्थः ॥ यजमानेन स्वगामिफलकसांगप्रयोगकरणाय निर्जाक्रीतत्वात्कर्तृत्वेपि तत्फलभाक्त्वं उत्सर्गस्य बाधकाभावा-
दित्युक्तत्वात्क्रयणद्वारा कर्तृत्वभोक्तृत्वसामानाधिकरण्यं चोपपद्यते ॥ भृत्यकर्तृके युद्धे राजा युध्यते जयति चेतिवदिति भावः ॥ ४५ ॥ ४६ ॥ स-
हकार्यंतरविधिः ॥ यस्मात्पूर्वे ब्राह्मणा आत्मानं विदित्वा संन्यस्य भिक्षाचर्यं चरंति तस्मादद्यतनोपि ब्राह्मण आपातज्ञानरूपपंडावान्पंडितः तस्य
कृत्यं पांडित्यं श्रवणं तन्निर्विद्य निश्चयेन लब्ध्वा बाल्येन श्रवणजज्ञानस्य बलभावेन मननेनासंभावनानिरासेन बालस्यभावेन वासुदृढचित्तत्वेन ९

तस्माद्धोरोहमाहेति नियमवदेव ऋत्विग्भिर्निर्वर्त्यं स्यात्तथा च तं ह बको दाल्भ्यो विदांचकार स ह नैमिशीयानामुद्गाता बभूव।
स्युद्गातृकर्तृकतां विज्ञानस्य दर्शयति ॥ यत्तूक्तं कर्त्राश्रयं फलं श्रूयत इति ॥ नैष दोषः ॥ परार्थत्वादृत्विजोन्यत्र वचनात्फ-
लसंबंधानुपपत्तेः ॥ ४५ ॥ श्रुतेश्च ॥ ४६ ॥ यां वै कांचन यज्ञ ऋत्विज आशिषमाशासत इति यजमानायैव तामाशासत।
इति होवाचेति तस्मादु हैवंविदुद्गाता ब्रूयात्कं ते काममागायानीति चर्त्विक्कर्तृकस्य विज्ञानस्य यजमानगामिफलं दर्शय-
ति ॥ तस्मादंगोपासनानामृत्विक्कर्मत्वसिद्धिः ॥ २३ ॥ ४६ ॥ सहकार्यंतरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४७ ॥ त-
स्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पांडित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मण इति
बृहदारण्यके श्रूयते ॥ तत्र संशयो मौनं विधीयते न वेति ॥ न विधीयत इति तावत्प्राप्तं ॥ बाल्येन तिष्ठासेदित्यत्रैव विधेरव-

स्यानुमिके देवं मननश्रवणे कृत्वा यानंतरं मुनिर्निदिध्यासनकृत्स्यादेवममौनं च मौनात्यबाल्यपांडित्यद्वयं मौनं च ((सितत्वात् ॥ ९
निदिध्यासनं लब्ध्वा श्रवणज्ञानसामग्रीपौष्कल्यानंतरं ब्रह्मास्मीति साक्षात्कारवान्ब्राह्मणो भवतीत्यर्थः ॥ मौनशब्दस्य सिद्धरूपे परिव्राज्ये अनु-
ष्ठेये च ध्याने प्रयोगात्संशयः ॥ यथा तं ह बक इत्यादिवाक्यशेषादुद्गीथाद्युपासनस्यार्त्विज्यत्वनिर्णयस्तद्वदथ ब्राह्मण इति विधिहीनवाक्यशेषात्
मौनस्याप्यविधेयत्वनिश्चय इति पूर्वपक्षमाह ॥ न विधीयत इति ॥ अत्र ध्यानस्याऽननुष्ठानं सिद्धांते त्वनुष्ठानमिति फलं ॥ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

च मौनं ॥३॥

यदि मौनं पाण्डित्यादन्यं तदा वाक्यांतरमाश्रममनूद्यते बाल्यविधिप्रशंसार्थं यदि ज्ञानं तदा पांडित्यशब्दात्प्राप्तमिति पूर्वपक्षग्रंथार्थः ॥ मुनिशब्दाद्धि ज्ञानातिशयः प्रतीयते ॥ तस्य ज्ञानमात्रवाचिपांडित्यशब्दादप्राप्तेर्नापि मुनिशब्दः परिव्राड्वाचकः वाल्मीकादिषु प्रयुज्यमानत्वात्तस्मादप्राप्तं मौनमपूर्वत्वाद्विधिं कल्पयतीति सिद्धांतयत्येवमित्यादिना आपस्तंबप्रयोगस्य गतिमाह ॥ इतराश्रमेति किंचामौनं च निर्विद्येति श्रवणमननवदनुष्ठेयत्वोक्तेर्मौन

नह्ययं मुनिरित्यत्र विधायिका विभक्तिरुपलभ्यते तस्मादयमनुवादो युक्तः ॥ कुतः प्राप्तिरिति चेत् ॥ मुनिपंडितशब्दयोर्ज्ञानार्थत्वात्पांडित्यं निर्विद्येत्येवं प्राप्तं मौनं ॥ अपि चामौनं मौनं च निर्विद्याथ ब्राह्मण इत्यत्र तावन्न ब्राह्मण्यं विधीयते ॥ प्रागेव प्राप्तत्वात्तस्मादथ ब्राह्मण इति प्रशंसावादस्तथैवायं मुनिरित्यपि भवितुमर्हति ॥ समाननिर्देशत्वादिति ॥ एवं प्राप्ते ब्रूमः ॥ सहकार्यंतरविधिरिति ॥ विद्यासहकारिणो मौनस्य बाल्यपांडित्यवद्विधिरेवाश्रयितव्योऽपूर्वत्वान्न तु पांडित्यशब्देनैव मौनस्यावगतत्वमुक्तं ॥ नैष दोषो मुनिशब्दस्य ज्ञानातिशयार्थत्वान्मननान्मुनिरिति च व्युत्पत्तिसंभवान्मुनीनामप्यहं व्यास इति च प्रयोगदर्शनात् ॥ ननु मुनिशब्द उत्तमाश्रमवचनोऽपि श्रूयते गार्हस्थ्यमाचार्यकुलं मौनं वानप्रस्थमित्यत्र न वाल्मीकिर्मुनिपुंगव इत्यादिषु व्यभिचारदर्शनात् ॥ इतराश्रमसन्निधानात्तु पारिशेष्यात्तत्रोत्तमाश्रमोपादानं ज्ञानप्रधानत्वादुत्तमाश्रमस्य ॥ तस्माद्बाल्यपांडित्यापेक्षया तृतीयमिदं मौनं ज्ञानातिशयरूपं विधीयते ॥ यत्तु बाल्य एव विधेः पर्यवसानमिति ॥ तथाप्यपूर्वत्वान्मुनित्वस्य विधेयत्वमाश्रीयते मुनिः स्यादिति ॥ निर्वेदनीयत्वनिर्देशादिति मौनस्य बाल्यपांडित्यवत् विधेयताश्रयणं तद्वतो विद्यावतः संन्यासिनः ॥ कथं विद्यावतः संन्यासिन इत्यवगम्यते तदधिकारादात्मानं विदित्वा पुत्राद्येषणाभ्यो व्युत्थायाथ भिक्षाचर्यं चरंतीति ॥ ननु सति विद्यावत्त्वे प्राप्नोत्येव ज्ञानातिशयः किं मौनविधिनेत्यत आह पक्षेणेति ॥ एतदुक्तं भ

स्य विधेयतेत्याह ॥ निर्वेदनीयत्वेति न च त्रयाणां विधाने वाक्यभेदो दोषः ॥ उपविधारणवदिष्टत्वात्तद्वाक्यभेदस्येति भावः ॥ कस्येदं ध्यानं विधीयत इत्याह तद्वत इति ॥ आत्मानं विदित्वेति परोक्षज्ञानवतः संन्यासिनः प्रकृतत्वादित्यर्थः ॥ सूक्ष्मार्थस्य साक्षात्कारसाधनत्वेन ध्यानादेः षड्जादौ लोकतः प्राप्तिं श्रो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ननु ब्रह्मविद्यापरे वाक्ये कथं ज्ञानांगमिति चेत्तत्फलक्रतुपरवाक्येंगविधिवदित्याह ॥ विध्यादिवदिति प्रधानमारभ्यांगपर्यंतो विधिः तत्र प्रधानः क्रतुर्विध्यादिरत एवांगं विध्यंत इत्युच्यत इत्यर्थः ॥ एतत्सूत्रभाष्यभावानभिज्ञाः संन्यासाश्रमधर्मश्रवणादेर्विधिर्नास्तीति वदंति विधौ ह्यप्राप्तिमात्रमपेक्षितं तत्त्वभेददर्शनप्राबल्याद्दर्शितमिति ॥४७॥ संप्रदायविदः समावर्तनानंतरं कुटुंबे स्थितो ब्रह्मलोकं प्राप्नोति न च पुनरावर्तत इत्युपसंहारात्संन्यासो नास्ती

यस्मिन्पक्षे भेददर्शनप्राबल्यान्न प्राप्नोति तस्मिन्नेष विधिरिति ॥ विध्यादिवद्यथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्येवंजातीयके विध्यादौ सहकारित्वेनाग्न्यन्वाधानादिकमंगजातं विधीयते ॥ एवमविधिप्रधानेप्यस्मिन्विद्यावाक्ये मौनविधिरित्यर्थः ॥ ४७ ॥ एवं बाल्यादिविशिष्टे कैवल्याश्रमे श्रुतिमति विद्यमाने कस्माच्छांदोग्ये गृहिणोपसंहारोऽभिसमावृत्य कुटुंब इत्यत्र तेन ह्युपसंहरंस्तद्विषयमादरं दर्शयतीत्यत उत्तरं पठति ॥ कृत्स्नभावात्तु गृहिणोपसंहारः ॥४८॥ तुशब्दो विशेषणार्थः ॥ कृत्स्नभावोऽस्य विशेष्यते बहुलायासानि बहून्याश्रमकर्माणि यज्ञादीनि तं प्रति कर्तव्यतयोपदिष्टान्याश्रमांतरकर्माणि च यथासंभवमहिंसेंद्रियसंयमादीनि तस्य विद्यंते तस्माद्गृहमेधिनोपसंहारो न विरुध्यते ॥ ४८ ॥ मौनवदितरेषामप्युपदेशात् ॥ ४९ ॥ यथा मौनं गार्हस्थ्यं चैतावाश्रमौ श्रुतिमंतावेवमितरावपि वानप्रस्थगुरुकुलवासौ ॥ दर्शिता हि पुरस्ताच्छ्रुतिस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीय इत्याद्या ॥ तस्माच्चतुर्णामप्याश्रमाणामुपदेशाविशेषात्तुल्यवद्विकल्पसमुच्चयाभ्यां प्रतिपत्तिरितरेषामिति द्वयोराश्रमयोर्बहुवचनं वृत्तिभेदापेक्षया अनुष्ठातृभेदापेक्षया वेति द्रष्टव्यम् ॥ २४ ॥ ४९ ॥ अनाविष्कुर्वन्नन्वयात् ॥ ५० ॥ तस्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासेदिति

तिशंकार्थः ॥ आयासविशिष्टकर्मबाहुल्याद्गृहिणोपसंहारः कृतो न संन्यासाभावादिति समाध्यर्थः ॥४८॥ (१ बाल्यमनुष्ठेयतया श्रूयते ॥ ९ं
संन्यासगार्हस्थ्यद्वयमत्र सूत्रकृतोक्तं ततोऽन्यदाश्रमद्वयं नास्तीति कस्यचिद्भ्रमः स्यात्तं निरस्यति ॥ मौनवदिति ॥ आश्रमद्वयवदित्यर्थः ॥ इतरयोरपीतिवाच्ये बहूक्तिरवांतरभेदमपेक्ष्य स चास्माभिः प्राक्दर्शितः ॥४९॥ अनाविष्कुर्वन्नन्वयात् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तत्रबाल्येविषयेनहितस्यभावार्थत्वासंभवात् कर्मार्थत्वंगृहीत्वातिष्ठन्मूत्रत्वादिकर्मणोऽप्ररूढेंद्रियत्वादिरूपभाववृद्देश्चबालकर्मत्वाविशेषात्संशयमा-
ह तत्रेति॥पूर्वपक्षेविध्यंगत्वेनतिष्ठन्मूत्रत्वादेरप्यनुष्ठानंसिद्धांतेभावशुद्धेरेवेतिफलं॥पूर्वत्रमौनशब्दस्यज्ञानातिशयेध्यानेप्रसिद्धत्वात् ध्यानंविधे-
यमित्युक्तं॥तद्वद्बाल्यशब्दस्यकामचारादौप्रसिद्धेस्तद्विधिग्रहणमित्याह किंतावदिति॥कामतश्चरणवदनभक्षणानियस्यसकामचारवादभक्षणस्त।

तत्रबालस्यभावःकर्मवाबाल्यमितितद्धितेसतिबालभावस्यवयोविशेषस्येच्छयासंपादयितुमशक्यत्वाद्यथोपपादमूत्रपुरीष-
त्वादिबालचरितमंतर्गताबाभावविशुद्धिरप्ररूढेंद्रियत्वंदंभदर्पादिरहितत्वंबाल्यंस्यादितिसंशयः॥किंतावत्प्राप्तं॥काम-
चारवादभक्षणतायथोपपादमूत्रपुरीषत्वंचप्रसिद्धतरंलोकेबाल्यमिति तद्ग्रहणंयुक्तं॥ननुपतितत्वादिदोषप्राप्तेर्नयुक्तंका-
मचारताद्याश्रयणंनविद्यावतःसंन्यासिनोवचनसामर्थ्याद्दोषनिवृत्तेःपशुहिंसादिष्विवेत्येवंप्राप्तेऽभिधीयते॥नवच-
नस्यगत्यंतरसंभवादविरुद्धेह्यन्यस्मिन्बाल्यशब्दाभिलप्येलभ्यमानेनविध्यंतरव्याघातकल्पनायुक्ता॥प्रधानोपका-
रायचांगंविधीयते॥ज्ञानाभ्यासश्चप्रधानमिहयतीनामनुष्ठेयं॥नचसकलायांबालचर्यायामंगीक्रियमाणायांज्ञानाभ्यासः
संभाव्यते॥तस्मादांतरोभावविशेषोबालस्याप्ररूढेंद्रियत्वादिरिहबाल्यमाश्रीयते॥तदाहाऽनाविःकुर्वन्निति॥ज्ञानाध्य-
यनधार्मिकत्वादिभिरात्मानमविख्यापयन् दंभदर्पादिरहितोभवेत्॥यथाबालोऽप्ररूढेंद्रिय नपरेषामात्मानमाविः
कर्तुमीहतेतद्वदेवंह्यस्यवाक्यस्यप्रधानोपकार्यर्थानुगमउपपद्यते॥तथाचोक्तंस्मृतिकारैः॥यंनसंतंनचासंतंनाश्रुतंन
बहुश्रुतं॥नसुवृत्तंनदुर्वृत्तंवेदकश्चित्सब्राह्मणः॥गूढधर्माश्रितोविद्वानज्ञातचरितंचरेत्॥अंधवज्जडवच्चापिमूकवच्च
महींचरेत्॥अव्यक्तलिंगोऽव्य-

स्वभावस्तत्तेत्यर्थः॥यथोपपादंयथासंभवंमूत्रादियस्यतद्भावस्तत्त्वं बाल्यविधिबलात्यातित्यशास्त्रमन्यविषयं
यमितिभावः॥यस्त्वविज्ञानवान्भवत्यमनस्कःसदाऽशुचिःनसतत्पदमाप्नोतिसंसारंचाधिगच्छतीत्यादिशौचभिक्षादिनियमविधिशास्त्राविरुद्धस्यभा-
वशुद्ध्याख्यबाल्यस्यविधिसंभवात्नयथेष्टचेष्टाविधिरितिसिद्धांतयति॥एवमितिप्रधानविरोधित्वाच्चनतद्विधिरित्याह॥प्रधानेति॥भावशुद्धेर्विधौ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ऐहिकमपि॥ संन्यासादिबाल्यांतंसाधनजातमुक्तंतत्साध्यविद्याजन्मविचार्यतइतिसंगतिंवदन्साधनस्यद्विधाफलसंभवात्संशयमाह॥ सर्वेत्यादिना॥ कारीरीष्टिवदैहिकफलत्वनियमःश्रवणादीनामितिपूर्वपक्षमाह॥ किंतावदिति॥ नन्वामुष्मिकफलकयज्ञादिसाध्यविद्यायाःकथमैहिकत्वनियमइत्यतआह॥ यज्ञादीन्यपीति॥ शुद्धिद्वारायज्ञादिभिःश्रवणादिषुसाक्षाद्विद्याहेतुषुघटितेषुविद्याविलंबोनयुक्तःदृश्यतेचविलंबः॥ अतःश्रवणादेर्विद्याहेतुत्वमसिद्धमितिपूर्वपक्षेफलं॥ प्रतिबंधकवशाद्विलंबेपिहेतुत्वसिद्धिरितिसिद्धांतेफलंमत्वाविद्यादिवदनियतफलंश्रवणादिकमितिसिद्धांतयतिएव

ऐहिकमप्यप्रस्तुतप्रतिबंधेतद्दर्शनात्॥५१॥ सर्वापेक्षाचयज्ञादिश्रुतेरित्यतआरभ्योच्चावचंविद्यासाधनमवधारितं॥ तत्फलंविद्यासिध्यंतीकिमिहैवजन्मनिसिध्यतिउतकदाचिदमुत्रापीतिचिंत्यते॥ किंतावत्प्राप्तमिहैवेति॥ किंकारणंश्रवणादिपूर्विकाहिविद्या॥ नचकश्चिदमुत्रमेविद्याजायतामित्यभिसंधायश्रवणादिषुप्रवर्तते॥ समानएवतुजन्मनिविद्याजन्माभिसंधायएतेषुप्रवर्तमानोदृश्यते॥ यज्ञादीन्यपिश्रवणादिद्वारेणैवविद्यांजनयंतिप्रमाणजन्यत्वाद्विद्यायाःतस्मादैहिकमेवविद्याजन्मेति॥ एवंप्राप्तेवदामः॥ ऐहिकंविद्याजन्मभवत्यसतिप्रस्तुतप्रतिबंधइति॥ एतदुक्तंभवति॥ यदाप्रक्रांतस्यविद्यासाधनस्यकश्चित्प्रतिबंधोनक्रियते उपस्थितविपाकेनकर्मांतरेणतदैहैवविद्याविपच्यते॥ यदातुखलुतत्प्रतिबंधःक्रियतेतदामुत्रेति॥ उपस्थितविपाकत्वंचकर्मणोदेशकालनिमित्तोपनिपाताद्भवति॥ यानिचैकस्यकर्मणोविपाचकानिदेशकालनिमित्तानितान्येवान्यस्यापीतिननियंतुंशक्यते॥ यतोविरुद्धफलान्यपिकर्माणिभवंति॥ शास्त्रमप्यस्यकर्मणइदंफलंभवतीत्येतावतिपर्यवसितं॥ नदेशकालनिमित्तविशेषमपिसंकीर्तयति॥ ६ ॥

मिति॥ ननुप्रारब्धकर्मविशेषेणश्रवणादिफलप्रतिबंधःकिमितिक्रियतेश्रवणादिनैवकर्मविपाकप्रतिबंधःकिंनस्यादित्यतआह॥ उपस्थितविपाकत्वंचेतिदेशादिमहिम्नाकर्माणिविपच्यंतइत्यर्थः॥ तेनश्रवणादिकमेवकिमितिनविपच्यतेतत्राह॥ यानिचेतिविपाचकत्वंफलोन्मुखत्वहेतुत्वंननुतर्हिश्रवणादिविपाचकदेशादिकंकीदृशमित्यतआहशास्त्रमपीतिफलवत्त्वाद्देशादिज्ञानमिति

भा. तथापि कर्मणैव श्रवणादिप्रतिबंधो न वैपरीत्यमित्यत्र को हेतुस्तमाह साधनेति ॥ प्रतिबंधकत्वशक्तिरपि फलबलात्ज्ञातव्येति भावः ॥ प्रतिबंधकसद्भावे श्रौतस्मा अ.पा.
टी. र्तं च लिंगमाह ॥ तथा चेत्यादिना ॥ शृण्वंतोपि न विद्युरित्युक्तेः प्रतिबंधसिद्धिरात्मनो यथावद्वक्ता आश्चर्यः अर्जुनवत् कश्चिदेव भवति निपुणं तु लब्धा साक्षात् ३।४
र.प्र. कारवानपरोस्त्यतो ज्ञाताप्याश्चर्यः कुशलेनाचार्येणानुशिष्टोपीत्यर्थः ॥ असति प्रारब्धकर्मप्रतिबंधे श्रवणादिनेहैव विद्योदयः यज्ञादिभिः संचितपाप।
३८३

साधनवीर्यविशेषात्तु तीव्रात्कस्यचिद्व्यक्तिराविर्भवति ॥ तत्प्रतिबद्धापरस्य तिष्ठति ॥ न चाविशेषेण विद्यायामभिसंधिर्नोपपद्यते इहामुत्र वा मे विद्या जायतामिति अभिसंधेर्निरंकुशत्वात् ॥ श्रवणादिद्वारेणापि विद्योत्पद्यमाना प्रतिबंधक्षयापेक्षैवोत्पद्यते ॥ तथा च श्रुतिर्दुर्बोधत्वमात्मनो दर्शयति श्रवणायापि बहुभिर्यो न लभ्यः शृण्वंतोपि बहवो यं न विद्युः ॥ आश्चर्यो वक्ता कुशलोस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्ट इति ॥ गर्भस्थ एव च वामदेवः प्रतिपेदे ब्रह्मभावमिति वदंती जन्मांतरसंचितात् साधनात् जन्मांतरे विद्योत्पत्तिं दर्शयति ॥ न हि गर्भस्थस्यैवैहिकं किंचित्साधनं संभाव्यते ॥ स्मृतावप्यप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति इत्यर्जुनेन पृष्टो भगवान् वासुदेवो न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छतीत्युक्त्वा पुनस्तस्य पुण्यलोकप्राप्तिं साधुकुले संभूतिं चाभिधायानंतरं तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकमित्यादिनानेकजन्मसंसिद्धस्ततो याति परां गतिमित्यंतेनैतदेव दर्शयति ॥ तस्मादैहिकमामुष्मिकं वा विद्याजन्म प्रतिबंधक्षयापेक्षमिति स्थितं ॥ ५१ ॥ ५१ ॥ एवं मुक्तिफलानियमस्तदवस्थाव भाम
धृतेस्तदवस्थावधृतेः ॥ ५२ ॥ यथा मुमुक्षोर्विद्यासाधनावलंबिनः साधनवीर्यविशेषाद्विद्यालक्षणे फले ऐहिकामुष्मिक ३८३
फलत्वकृतो विशेषप्रतिनियमो दृष्टः एवं मुक्तिलक्षणेप्युत्कर्षापकर्षकृतः कश्चिद्विशेषप्रतिनियमः स्यादित्याशंकायामाहैवं मुक्ति फलानियम इति ॥ न खलु मुक्तिफले कश्चिदेवंभूतो विशेषप्रतिनियम आशंकितव्यः ॥ कुतस्तदवस्थावधृतेः ॥ प्रतिबंधस्य निरस्तत्वात्सति तु भोगेन तन्निरासात्स मुक्तेति विद्याया ऐहिकामुष्मिकत्वविशेषनियमवदुत्कर्षलक्षणफलेपि मोक्षे कश्चिदुत्कर्षादिविशेषः स्यादित्यत आह ॥ एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः मुक्तिरत्र विषयः तस्यां विद्यावद्विशेषनियमोस्ति न वेति फलस्योभयथासंभवात्संशये पूर्वपक्ष

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मुक्तिः सविशेषफलत्वात् विद्यावत् अतः कर्मसाध्या मुक्तिरिति फलं सिद्धं नेतु निर्विशेषत्वावधारणश्रुतिबाधितमनुमानमतो ज्ञानैकव्यंग्या मुक्तिरि
तिफलं॥ किंच श्रवणादितारतम्याद्विद्यायां कंचिदतिशयमंगीकृत्य विद्यालभ्यमुक्तौ नातिशय इत्याह॥ अपि च विद्यासाधनमिति मन्त्रब्रह्मणो नि
त्यसिद्धत्वादविद्यानिवृत्तेश्चात्मत्वे द्वैतापत्तेः अनन्यत्वे चासाध्यत्वात्किं विद्याफलमित्यत आह नहीति विद्ययाभिव्यक्तत्वेन ब्रह्मानंद एव मुख्यफल-
मभिव्यक्तिरविद्यानिवृत्तिरानंदस्वरूपस्फूर्तिप्रतिबंधकाभावतया विद्यया साध्यत्वे सा चानिर्वाच्येति न द्वैतापत्तिरत्येतत्साब्रह्मानन्देत्याहुः न

मुक्त्यवस्था हि सर्ववेदान्तेष्वेकरूपैवावधार्यते॥ ब्रह्मैव हि मुक्त्यवस्था॥ न च ब्रह्मणोनेकाकारयोगोस्त्येकलिंगत्वा
वधारणादस्थूलमनण्वित्येष नेति नेत्यात्मा यत्र नान्यत्पश्यति ब्रह्मैवेदममृतं पुरस्तादिदं सर्वं यदयमात्मा स वा एष म-
हानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिश्रुतिभ्यः॥ अपि च विद्यासा-
धनं स्ववीर्यविशेषात्स्वफल एव विद्यायां कंचिदतिशयमासंजयेन्न विद्याफले मुक्तौ॥ तद्धि असाध्यं नित्यसिद्धस्वभा
वमेव विद्ययाधिगम्यत इत्यसकृदवादिष्म॥ न च तस्यामप्युत्कर्षनिकर्षात्मकोऽतिशय उपपद्यते निकृष्टायां विद्यात्वा
भावादुत्कृष्टैव हि विद्याभव

च साध्यत्वानुपपत्तेस्तत्र विद्यावैयर्थ्यमिति वाच्यं यदभावे यदभावस्तत्तत्साध्यमिति ज्ञानात्सर्वो लोकः प्रवर्तते
तेनयाच विद्याया अभावे ब्रह्मरूपमुक्तेरभावो अनर्थरूपा अविद्यैवास्ति अस्या अविद्याया एव मुक्तिर्नास्तीति व्यवहारविषयत्वेन मुक्त्यभावतातथा
च विद्यां विना मुक्तिर्नास्तीति निश्चयाद्विद्यामुपादत्ते विद्योदये च स्वतः सिद्धनित्यनिवृत्तानर्थस्वप्रकाशब्रह्मानंदात्मना अवतिष्ठत इत्यनवद्यं॥
संप्रति विद्यायामतिशयांगीकारं त्यजति नचेति एकरूपे विषये प्रमायां तारतम्यानुपपत्तेरित्यर्थः कथं तर्हि पूर्वाधिकरणे विद्याया विशेष उक्तस्त

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा.भा. तस्मादिति सत्यामपि सामग्र्यां ज्ञाने विलंबउक्तो न तारतम्यमित्यर्थः॥ तर्हि सत्यपि ज्ञाने मुक्तौ विलंबः किं न स्यादित्यत आह नत्विति॥ वाच्यादिप्र अ.पा.
टी. तिबंधाद्दीपोत्पत्तिविलंबेप्युत्पन्नेनमोनिवृत्तिविलंबादर्शनात्सति ज्ञाने नाज्ञाननिवृत्तौ विलंब इति भावः किंच कर्मणामुपासनानां च गुणभे ३.४
र.प्र. देन तारतम्यात्फलतारतम्यं युक्तं निर्गुणविद्यायास्त्वेकरूपत्वात्तत्फलैकरूप्यमित्याह॥ विद्याभेदेत्यादिना स्मृतौ कस्यचिन्निर्गुणविद इत्यर्थः
३८४

तस्मात्तस्यां चिराचिरोत्पत्तिरूपोतिशयो भवन्भवेत्॥ ननु मुक्तौ कश्चिदतिशयसंभवोस्ति॥ विद्याभेदाभावादपि त
त्फलभेदनियमाभावः कर्मफलवन्नहि मुक्तिसाधनभूताया विद्यायाः कर्मणामिव भेदोस्तीति॥ सगुणासु तु विद्यासु म
नोमयः प्राणशरीर इत्याद्यासु गुणावापोद्वापवशाद्भेदोपपत्तौ सत्यामुपपद्यते यथास्वं फलनियमः कर्मफलवत्तथा
च लिंगदर्शनं यथा यथोपासते तदेव भवतीति॥ नैवं निर्गुणायां गुणाभावात्तथा च स्मृतिर्न हि गतिरधिकास्ति कस्यचि
त्सति हि गुणे प्रवदंत्यतुल्यतामिति॥ तदवस्थावधृतेस्तदवस्थावधृतेरिति पदाभ्यासोऽध्यायपरिसमाप्तिं द्योतयति॥ ०॥
इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यविरचिते शारीरकमीमांसाभाष्ये श्रीशंकरभगवत्पादकृतौ तृतीयस्याध्या-
यस्य चतुर्थपादः समाप्तः॥ ४॥ ५२॥ १९६॥ १५४॥ राम.
३८४

तस्माद्विद्यासमकालैव मुक्तिरिति सिद्धम्॥ ०॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदानन्दभगवत्कृतौ शारीरकव्याख्यायां भा-
ष्यरत्नप्रभायां तृतीयस्याध्यायस्य चतुर्थः पादः समाप्तः॥ ०॥ भाष्य॥ ४८५॥ टीका॥ ४२५॥ सर्व॥ ९१०॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथशारीरकसूत्रभाष्येरत्नप्रभायांचतुर्थाध्यायस्यप्रथमपादःप्रारम्भः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भा श्रीगणेशायनमः॥ यज्ज्ञानाज्जीवतोमुक्तिरुक्तानिर्गुणनिर्वर्जिता॥ लभ्यतेतत्परंब्रह्मरामनामास्मिनिर्भयं॥ ॐ आवृत्तिरसकृदुपदेशात्॥ साधनंनिरूप्य
गी· फलंनिरूप्यतइत्यध्याययोर्हेतुफलभावंसंगतिमाह तृतीयइति फलप्रसंगेनोक्तानिरर्चिरादिमार्गश्चविचार्यतइत्याह प्रसंगेनेति पूर्वंसासारादेवसूत्रमुक्तं।
म· संन्यासादिसाधनंचिंतितंसंप्रतिफलाध्यायंप्रतिगम्य मावृत्त्यादिक्रमघाः श्लेषाधिकरणात्प्राक् चिंत्यतेततआरभ्यजीवन्मुक्तिस्ततोद्वितीयपादेउत्क्रांतिस्तृती
२५ येअर्चिरादिमार्गेस्यगंतव्यस्यचनिर्णयश्चतुर्थेज्ञानोपासनयोःफलनिर्णयइतिपादार्थविवेकः॥ आद्याधिकरणस्यश्रवणादिसाधनंविषयमनूद्य

॥श्रीगणेशायनमः॥ आवृत्तिरसकृदुपदेशात्॥ १॥ तृतीयेऽध्यायेपरापरासुविद्यासुसाधनाश्रयोविचारःप्रायेणात्यगात्अथेह चतुर्थेफलाश्रयआगमिष्यति॥ प्रसंगागतंचान्यदपिकिंचिच्चिंतयिष्यते॥ प्रथमंतावत्कतिभिश्चिदधिकरणैःसाधनाश्रयविचारशेषमेवानुसरामः॥ आत्मावाअरेद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्यः तमेवधीरोविज्ञायप्रज्ञांकुर्वीतसोन्वेष्टव्यःसविजिज्ञासितव्यइत्येवमादिश्रवणेषुसंशयः॥ किंसकृत्प्रत्ययःकर्तव्यःआहोस्विदावृत्त्येति॥ किंतावत्प्राप्तंसकृत्प्रत्ययःस्यात्प्रयाजादिवत्॥ तावताशास्त्रस्यकृतार्थत्वात् अश्रूयमाणायांह्यावृत्तौक्रियमाणायामशास्त्रार्थःकृतोभवेत् नन्वसकृदुपदेशाउदाहृताःश्रोतव्योमंतव्योनिदिध्यासितव्यइत्येवमादयः॥ एवमपियावच्छ्रुतमावर्तयेत्सकृच्छ्रवणंसकृन्मननंसकृन्निदिध्यासनंचेतिनातिरिक्तं॥ सकृदुपदेशेषुतुवेदोपासीतेत्येवमादिष्वनावृत्तिरित्येवंप्राप्तेब्रूमः॥ प्रत्ययावृत्तिःकर्तव्याकुतः ॥असकृदुपदेशात्॥ श्रोतव्योमंतव्योनिदिध्यासितव्यइत्येवंजातीयकोह्यसकृदुपदेशःप्रत्ययावृत्तिंसूचयति॥ ननूक्तंयावच्छ्रु

द्विधानुष्ठानदर्शनात्संशयमाह॥ आत्मावाइति॥ श्रौतात्मधीसाधनफलविचारात्मकत्वात्सर्वाधिकरणानांश्रुतिशास्त्राध्यायसंगतयः उक्तास्तत्र त्पदार्थसंबंधात्तत्पादसंगतिः मोक्षेविशेषाभाववच्छ्रवणादावावृत्तिविशेषोनास्तीतिदृष्टांतलक्षणावांतरसंगत्यापूर्वपक्षमाह॥ किंतावदिति॥ अत्रपूर्वपक्षेश्रवणादेःप्रयाजवददृष्टार्थत्वात्सकृदनुष्ठानंफलंसिद्धांतेत्ववघातवद्दृष्टार्थत्वाद्यावत्फलमावृत्तिरितिभेदः॥ असकृदुपदेशात्प्र त्यानुपपत्त्यासाधनावृत्तौशास्त्रस्यतात्पर्यमितिशंकते॥ नन्वसकृदिति॥ श्रवणादीनांसमुच्चयसिद्ध्यर्थत्वेनासकृदुक्तेरन्यथोपपत्तेर्नावृत्तौतात्पर्यमित्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यद्यप्यसकृदुपदेश आवृत्तिसमुच्चययोरन्यतरसूचकत्वेनान्यथासिद्धस्तथापि दृष्टे संभवत्यदृष्टमात्रकल्पनानुपपत्तेः श्रवणादेरावृत्ति-
द्वारा साक्षात्कारफलस्य षड्जादौ दृष्टत्वात् सकृदुक्तिरावृत्तिं सूचयति दृष्टार्थत्वादिति न्यायानुग्रहादित्याह॥ तद्दर्शनपर्यवसानत्वादिति॥ ध्यानस्य
त्वावृत्तेर्वेदोपासीतेति शब्दैक्यं तत्वाच्च केवलार्थिकत्वमित्याह॥ अपि चेति॥ अस्तूपास्तिशब्दस्यावृत्तिवाचित्वं तथापि वेदेतिशब्दोक्तवेदनेष्वहङ्ग्र-
हेषु कथमावृत्तिसिद्धिरित्यत आह॥ विद्युपास्त्योश्चेति॥ शब्दयोरेकार्थत्वमुदाहरति॥ क्वचिदिति॥ स रैक्वो यद्वेद तत्प्राणतत्त्वं रैक्वादन्योऽपि यः

तद्दर्शनपर्यवसितत्वादेषां॥ दर्शनपर्यवसानानि हि श्रवणादीन्यावर्त्यमानानि दृष्टार्थानि भवंति॥ यथावघातादीनि तंडुलादि-
निष्पत्तिपर्यवसानानि तद्वत्॥ अपि चोपासनं निदिध्यासनं चेत्यंतर्णीतावृत्तिगुणैव क्रियाभिधीयते॥ तथा हि लोके गुरुमुपास्ते
राजानमुपास्त इति च यस्तात्पर्येण गुर्वादीननुवर्तते स एवमुच्यते॥ तथा ध्यायति प्रोषितनाथा पतिमिति या निरंतरस्मरणा प-
तिं प्रति सोत्कंठा सैवमभिधीयते॥ विद्युपास्त्योश्च वेदांतेष्वव्यतिरेकेण प्रयोगो दृश्यते॥ क्वचिद्विदिनोपक्रम्योपासिनोपसंह-
रति॥ यथा यस्तद्वेद यत्स वेद स मयैतदुक्त इत्यत्रानु म एतां भगवो देवतां शाधि यां देवतामुपास्स इति॥ क्वचिच्चोपासिनोप-
क्रम्य विदिनोपसंहरति॥ यथा मनो ब्रह्मेत्युपासीतेत्यत्र भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेदेति॥ तस्मा-
दसकृदुपदेशेऽप्यावृत्तिसिद्धिरसकृदुपदेशस्त्वावृत्तेः सूचकः॥१॥ लिंगाच्च॥२॥ लिंगमपि प्रत्ययावृत्तिं प्रत्याययति॥ तथा
उद्गीथविज्ञानं प्रस्तुत्यादित्य उद्गीथ इत्यनेनैकपुत्रतादोषेणापोद्य रश्मींस्त्वं पर्यावर्तयादिति रश्मिबहुत्वविज्ञानं बहुपुत्रतायै वि-
दधत्सिद्धवत्प्रत्ययावृत्तिं दर्शयति तस्मात्तत्सामान्यात्सर्वप्रत्ययेष्वावृत्तिसिद्धिः॥२॥ कश्चिद्वेद तत्फले सर्वमंतर्भवतीत्येतदुक्तं स्यं

मयोक्तः पृष्टेन स रैक्व उक्त इति हंसं प्रति हंसांतरवचनं तच्छ्रुत्वा रैक्वं गत्वोवाच जानश्रुतिः॥ हे भगव एतां रैक्व विदितां देवतां मेऽनुशाधि मह्यमुपदिश इ-
त्यर्थः॥ एवं सगुणनिर्गुणसाक्षात्कारसाधनध्यानस्यावृत्तिः श्रौतार्थसिद्धा च दृष्टार्थत्वाच्छ्रवणमननयोस्त्वसकृदुपदेशादर्थसिद्धैवावृत्तिरिति
विशेषः॥१॥ आदित्यस्यैकस्यैवोद्गीथे संपाद्योपासनात्ममत्वमेक एव पुत्रोऽसीति कौषीतकिः पुत्रमुवाचातस्त्वं तथा माकृथाः किंतु बहून् रश्मीनादित्यं
च पर्यावर्तयतात् पृथगावर्तयस्वेत्यर्थः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नस्योपसंहारः ॥ अत्र पर्यायावृत्तिश्रवणात्सिद्धवदुद्गीथध्यानस्यावृत्तिरुक्ता ततो ध्यानत्वसामान्यात् फलपर्यन्तत्वसामान्याद्वा लिंगात् सर्वत्र श्रवणमनन ध्यानेष्वावृत्तिसिद्धिरित्याह लिंगाच्चेति ॥ एवं तावत्सगुणनिर्गुणसाक्षात्कारसाधनेष्वावृत्तिरुक्ता तत्र सगुणध्यानादेरावृत्तिमंगीकृत्य निर्गुणश्रवणादि ष्वावृत्तिमाक्षिपत्यत्राहेत्यादिना ॥ वाक्यं निर्गुणसाक्षात्कारजननशक्तं न वा ॥ आद्ये सकृत्श्रुतवाक्यात्साक्षात्कारसिद्धेरावृत्तिर्व्यर्थेत्युक्ते द्वितीयं शंकते

अत्राह भवतु नाम साध्यफलेषु प्रत्ययेष्वावृत्तिः ॥ तेष्वावृत्तिसाध्यस्यातिशयस्य संभवात् ॥ यस्तु परब्रह्मविषयः प्रत्ययः नित्यशुद्धबुद्धमुक्तस्वभावमेवात्मभूतं परं ब्रह्म समर्पयति तत्र किमर्थावृत्तिरिति ॥ सकृच्छ्रुतौ च ब्रह्मात्मत्वप्रतीत्यनुपपत्तेरावृत्त्यभ्युपगम इति चेन्नावृत्तावपि तदनुपपत्तेः ॥ यदि हि तत्त्वमसीत्येवंजातीयकं वाक्यं सकृच्छ्रूयमाणं ब्रह्मात्मत्वप्रतीतिं नोत्पादयेत्ततस्तदेवावर्त्यमानमुत्पादयिष्यतीति का प्रत्याशा स्यात् ॥ अथोच्येत न केवलं वाक्यं कंचिदर्थं साक्षात्कर्तुं शक्नोति अतो युक्त्यपेक्षं वाक्यमनुभावयिष्यति ब्रह्मात्मत्वमिति ॥ तथाप्यावृत्त्यानर्थक्यमेव ॥ सापि हि युक्तिः सकृत्प्रवृत्तैव स्वमर्थमनुभावयिष्यति ॥ अथापि स्यात् युक्त्या वाक्येन च सामान्यविषयमेव विज्ञानं क्रियते न विशेषविषयं ॥ यथास्ति मे हृदये शूलमित्यतो वाक्यात् गात्रकंपादिलिंगाच्च शूलसद्भावसामान्यमेव परः प्रतिपद्यते न विशेषमनुभवति ॥ यथा स एव शूली विशेषानुभवश्चाविद्याया निवर्तकस्तत्तदर्थावृत्तिरिति चेन्नासकृदपि तावन्मात्रे क्रियमाणे विशेषविज्ञानोत्पत्त्यसंभवात् न हि सकृत्प्रयुक्ताभ्यां शास्त्रयुक्तिभ्यामनवगतो विशेषः शतकृत्वोपि प्रयुज्यमानाभ्यामवगंतुं शक्यते ॥ तस्माद्यदि शास्त्रयुक्तिभ्यां विशेषः प्रतिपाद्येत यदि वा सामान्यमेवोभयथापि सकृत्प्रयुक्ते एव ते स्वकार्यं कुरुत इत्यावृत्त्यनुपयोगः ॥ न च सकृत्प्रयुक्ते शास्त्रयुक्ती कस्यचिदप्य

सकृदिति ॥ अशक्तस्यावृत्तावपि फलानुपपत्तिरित्याह नेति ॥ तथापीति स्वतोऽशक्तस्य युक्तिसाहित्याच्छ्रुतावपीत्यर्थः (अनुभवं नोत्पादयत इति वाक्ययुक्तिभ्यां परोक्षज्ञाने जातेऽप्यपरोक्षज्ञानार्थमावृत्तिरिति शंकतेऽथापि स्यादिति ॥ तयोः परोक्षज्ञानहेतुत्वस्वाभाव्यात् आवृत्तावपि न साक्षात्कारः स्यादिति परिहरति ॥ नासकृदपीति यदि तयोः साक्षात्कारसामर्थ्यमुभयथाप्यावृत्त्यनपेक्षेत्याह ॥ तस्मादिति ॥ प्रमातृवैचित्र्याद्याप्यावृत्त्यनिय

यदि वा परोक्षज्ञानसामर्थ्यं ॥ १ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रमेयस्यानंशत्वाच्चेत्यर्थ इत्याह अपि चेति द्विविधो ह्यधिकारी स्यात् कश्चिज्जन्मांतराभ्यासान्निरस्तसमस्तासंभावनादिप्रतिबंधः कश्चित्तु प्रतिबंधवानि
ति तत्राद्यं प्रत्यावृत्तेरानर्थक्यमिष्टं द्वितीयस्य तु प्रतिबंधनिरासाय तदपेक्षेति समाधत्ते ॥ अत्रोच्यत इति आवृत्तेः प्रतिबंधनिरासार्थत्वे लिंगमा

विचित्रप्रज्ञत्वात्प्रतिपत्तॄणामपि चानेकांशोपेते लौकिके पदार्थे सामान्यविशेषवति एकेनावधानेनैकमंशमवधारयत्यपरेणा
परमिति स्यादभ्यासोपयोगो यथा दीर्घप्रपाठकग्रहणादिषु ॥ ननु निर्विशेषे ब्रह्मणि सामान्यविशेषरहिते चैतन्यमात्रात्मके प्र
मोत्पत्तावभ्यासापेक्षायुक्तेति ॥ अत्रोच्यते भवेदावृत्त्यानर्थक्यं तं प्रति यस्तत्त्वमसीति सकृदुक्तमेव ब्रह्मात्मत्वमनुभवितुं शक्नुया
त् ॥ यस्तु न शक्नोति तं प्रत्युपयुज्यत एवावृत्तिः ॥ तथा हि छांदोग्ये तत्त्वमसि श्वेतकेतो इत्युपदिश्य भूय एव मा भगवान् ॥ ७ ॥
विज्ञापयत्विति पुनः पुनः परिचोद्यमानस्तत्तदाशंकाकारणं निराकृत्य तत्त्वमसीत्येवासकृदुपदिशति तथा च श्रोतव्यो मंतव्यो नि
दिध्यासितव्य इत्यादि दर्शितं ॥ ननूक्तं सकृच्छ्रुतं चेत्तत्त्वमसि वाक्यं स्वमर्थमनुभावयितुं न शक्नोति तत आवर्त्यमानमपि नैव
शक्ष्यतीति नैष दोषो न हि दृष्टेऽनुपपन्नं नाम ॥ दृश्यंते हि सकृच्छ्रुताद्वाक्यान्मंदप्रतीतं वाक्यार्थमावर्तयंतस्तत्तदाभासव्युदासे
न सम्यक्प्रतिपद्यमानाः ॥ अपि च तत्त्वमसीत्येतद्वाक्यं त्वंपदार्थस्य तत्पदार्थभावमाचष्टे ॥ तत्पदेन च प्रकृतं सद्ब्रह्मेक्षितृ
जगतो जन्मादिकारणमभिधीयते ॥ सत्यं ज्ञानमनंतं ब्रह्म ॥ विज्ञानमानंदं ब्रह्म ॥ अदृष्टं द्रष्टृ अविज्ञातं विज्ञातृ अजमजरममरम
स्थूलमनण्वह्रस्वमदीर्घमित्यादिशास्त्रप्रसिद्धं ॥ तत्राजादिशब्दैर्जन्मादयो भावविकारा निवर्तिताः ॥ अस्थूलादिशब्दैश्च
स्थौल्यादयो द्रव्यधर्माः ॥ विज्ञानादिशब्दैश्च चैतन्यप्रकाशात्मकत्वमुक्तं ॥ एष व्यावृत्तसर्वसंसारधर्मकोऽनुभवात्मको
ब्रह्मसंज्ञकस्तत्पदार्थो वेदांताभियुक्तानां प्रसिद्धः तथा त्वंपदार्थोऽपि प्रत्यगात्मा श्रोता देहादारभ्य प्रत्यगात्मतया संभाव्यमान श्चैतन्यपर्यंतत्वेनावधारितः ॥

हृत तथा हीति यथा षड्जादिस्वरभेदसाक्षात्कारशक्तमपि श्रोत्रमभ्यासमपेक्षते तथा ब्रह्मात्मसाक्षात्कारशक्तं वाक्यं तदपेक्षमित्यनुभवमाश्रित्याह
॥ न हि दृष्टेऽनुपपन्नं नामेति त्वंपदलक्ष्यार्थस्य दुर्बोधत्वादज्ञानप्रयुक्तसंशयादिप्रतिबंधसंभवात्तन्निरासाय आवृत्तिरेष्टव्येति वाच्यलक्ष्यविवे कपूर्वकमाह अपि चेत्यादिना ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा॰भा॰ टी॰ र॰प्र॰ ३८७ यदुक्तंमनंशत्वात्प्रमेयस्यावृत्त्यानर्थक्यमिति तत्राह॥ यद्यपीति॥ आरोपितांशनिरासाय न मे देहो नेंद्रियं इत्यभ्यासो युक्त इत्यर्थः॥ वाक्यार्थज्ञाने अ॰पा॰
सति कथमभ्यासनियमः प्रमाणज्ञानस्याभ्यासायोगात् ज्ञानिनः श्रवणादिनियमायोगाच्चेत्यत आह॥ तत्त्विति ज्ञानात्प्रागेव श्रवणादिव्यापारनि ४।१

ननु येषामेतौ पदार्थावज्ञानसंशयविपर्ययप्रतिबद्धौ तेषां तत्त्वमसीत्येतद्वाक्यं स्वार्थे प्रमां नोत्पादयितुं शक्नोति पदार्थज्ञानपूर्वकत्वाद्वाक्यार्थस्य अतस्तान्प्रत्येष्टव्यः पदार्थविवेकप्रयोजनः शास्त्रयुक्त्यभ्यासः॥ यद्यपि च प्रतिपत्तव्य आत्मा निरंशस्तथापि अध्यारोपितं तस्मिन् बह्वंशत्वं देहेंद्रियमनोबुद्धिविषयवेदनादिलक्षणं॥ तत्रैकेनावधानेनैकमंशमपोहत्यापरेणापरमिति युज्यते तत्र क्रमवती प्रतिपत्तिः॥ तत्तु पूर्वरूपमेवात्मप्रतिपत्तेः॥ येषां पुनर्निपुणमतीनां नाज्ञानसंशयविपर्ययलक्षणः पदार्थविषयः प्रतिबंधोऽस्ति ते शक्नुवंति सकृदुक्तमेव तत्त्वमसिवाक्यार्थमनुभवितुमिति तान्प्रत्यावृत्त्यानर्थक्यमिष्टमेव॥ सकृदुत्पन्नैव ह्यात्मप्रतिपत्तिरविद्यां निवर्तयतीति नात्र कश्चिदपि क्रमोऽभ्युपगम्यते॥ सत्यमेवं युज्येत यदि कस्यचिदेवं प्रतिपत्तिर्भवेत्॥ बलवती ह्यात्मनो दुःखित्वादिप्रतिपत्तिरतो न दुःखित्वाद्यभावं कश्चित्प्रतिपद्यत इति चेत् न॥ देहाद्यभिमानवद्दुःखित्वाद्यभिमानस्य मिथ्याभिमानत्वोपपत्तेः॥ प्रत्यक्षं हि देहे छिद्यमाने दह्यमाने वाहं छिद्ये दह्ये इति च मिथ्याभिमानो दृष्टस्तथा बाह्यतरेष्वपि पुत्रमित्रादिषु संतप्यमानेषु अहमेव संतप्य इत्यध्यारोपो दृष्टस्तथा दुःखित्वाद्यभिमानोऽपि स्यात् देहादिवदेव चैतन्याद्बहिरुपलभ्यमानत्वाद्दुःखित्वादीनां॥ सुषुप्तादिषु चाननुवृत्तेश्चैतन्यस्य तु सुषुप्तेऽप्यनुवृत्तिमामनंति॥ यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यतीत्यादिना॥ तस्मात्सर्वदुःखविनिर्मुक्तैकचैतन्यात्मकोऽहमित्येष आत्मानुभवः॥ न चैवमात्मानमनुभवतः किंचिदन्यत्कृत्यमवशिष्यते॥ २८७

यमनं क्रियत इत्यर्थः॥ अधिकं शंकितुमुक्तमनुवदति॥ येषामिति॥ अधिकं शंकते॥ सत्यमिति॥ दुःखित्वप्रत्यक्षविरोधाद्वाक्यादैक्यधीर्नोदेतीत्यर्थः॥ प्रत्यक्षस्य भ्रांतित्वादविरोध इत्याह॥ नेत्यादिना॥ दुःखादयो नात्मधर्माः दृश्यत्वात् दे
हादिवन्नाप्यात्मस्वरूपा आत्मनि सत्यप्यननुवृत्तत्वाद्व्यतिरेकेण चैतन्यवदित्यर्थः॥ निर्दुःखचिदात्मनि दुःखादिधियो भ्रांतित्वाद्वाक्यार्थानुभवो न विरुध्य

तदस्मात्तस्मादिति॥ अत्र भवेदित्यतः प्राक् किंचेत्यधिकं सन्नाइ सन्नेव स्तिति॥

रतिः कामः आत्मकामतया तृप्तिर्विषयतृष्णाक्षयः तेन संतोष आत्मानंदानुभव इति भेदः ॥ नन्वावृत्तौ --- नियोगात्प्रवृत्तिर्व्याख्यातया च नियु
क्तत्वबुद्धेरकर्त्रात्मधीनेत्यादित्यत आह तत्रापीति ॥ आवृत्त्यभ्युपगमेप्यकर्ताहमित्यनुभवात्प्रच्याव्य गुरुर्न्नो वा नियोगात्प्रवर्तयेदुक्तदोषा
दित्यर्थः ॥ कथं तर्हि प्रवृत्तिरित्यत आह ॥ यस्त्विति अप्रतिभानादसंभावनादिनेत्यर्थः शिष्यबुद्ध्यनुसारेण श्रोतव्यादिवचोभिः प्रधानसिद्ध्यर्थे ।
मावृत्त्यादौ प्रवर्तयेदित्यर्थः ॥ २ ॥ आत्मेति तूपगच्छंति ग्राहयंति च ॥ पूर्वत्र ध्यानादेरावृत्तिरुक्ता तामुपजीव्य तत्त्वज्ञानार्थे ध्यानावृत्तिकाले किम

तथा च श्रुतिः किं प्रजया करिष्यामो येषां नोयमात्मायं लोक इत्यात्मविदः कर्तव्याभावं दर्शयति ॥ स्मृतिरपि ॥ यस्त्वात्म
रतिरेव स्यादात्मतृप्तश्च मानवः ॥ आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यत इति ॥ यस्य तु नैषोनुभवो द्रागिव जायते ॥ तं प्रत्य
नुभवार्थमेवावृत्त्यभ्युपगमः ॥ तत्रापि न तत्त्वमसि वाक्यार्थात्प्रच्याव्यावृत्तौ प्रवर्तयेत्न हि वरघाताय कन्यामुद्वाहयं-
ति ॥ नियुक्तस्य चास्मिन्नधिकृतोहं कर्ता मयेदं कर्तव्यमित्यवश्यं ब्रह्मप्रत्ययाद्विपरीतप्रत्यय उत्पद्यते ॥ यस्तु स्वयमेव
मंदमतिरप्रतिभानात्तं वाक्यार्थं जिहासेत्तस्यैतस्मिन्नेव वाक्यार्थे स्थिरीकार आवृत्त्यादिवाचो युक्त्याभ्युपेयते ॥ तस्मात्पर
ब्रह्मविषयेपि प्रत्यये तदुपायोपदेशेष्वावृत्तिसिद्धिः ॥ २ ॥ आत्मेति तूपगच्छंति ग्राहयंति च ॥ ३ ॥ यः शास्त्रोक्तविशेषणः
परमात्मा स किं अहमिति ग्रहीतव्यः किं वा मदन्य इत्येतद्विचारयति ॥ कथं पुनरात्मशब्दे प्रत्यगात्मविषये श्रूयमाणे सं
शय इति ॥ उच्यते ॥ अयमात्मशब्दो मुख्यः शक्यतेभ्युपगंतुं सति जीवेश्वरयोरभेदसंभवे इतरथा तु गौणोयमभ्युपगंत

हं ब्रह्मेति ध्यातव्यं उत मत्स्वामीश्वर इत्यैक्यभेदमानाभ्यां संशयमाह य इति ॥ शब्दादेव प्रमित इत्यादावयमात्मा ब्रह्मे (व्य इति मन्यते ॥
त्याद्यभेदश्रुतिभिरैक्यनिर्णयात्संशयमाक्षिपति ॥ कथमिति भेदश्रुत्यनुग्रहाद्भेदप्रत्यक्षादिप्राबल्यमालंब्य संशय इत्याह ॥ उच्यत इति ॥
अभेदश्रुतीनां गौणत्वमुख्यत्वे उभयत्र फलं यद्यप्ययं प्रत्यक्षादिविरोधपरिहारो द्वितीयाध्यायसंगतस्तथाप्यैक्यश्रुतेरविरुद्धत्वनिश्चय-
स्य समाधावंतरंगत्वादिह संगतिः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शां·भा· विरुद्धयोरैक्यादृष्टिरसिद्धेत्याह नाहमिति किंच किमीश्वरस्य जीवमात्रमैक्यं जीवस्येश्वरमात्रत्वं वेति विकल्प्य क्रमेण दूषयति ईश्वरस्य चेत्यादिना एक-
टी· त्वश्रुतिप्रामाण्याय ऐक्यध्यानं कार्यमिति शङ्कते ॥ अन्यत्वेपीति ॥ एकत्वध्यानमस्त्वदृष्टमेव एकत्वं तु नास्तीत्याह ॥ काममिति ॥ अभेदश्रुतीनां फलवद् अ·पा·
र·प्र· किं तावत्प्राप्तं ॥ नाहमिति प्राप्ते ॥ नह्यपहतपाप्मत्वादिगुणो विपरीतगुणत्वेन शक्यते ग्रहीतुं विपरीतगुणो वापहतपाप्मत्वादिगु- ४।१
३८८ णत्वेन ॥ अपहतपाप्मादिगुणश्च परमेश्वरस्तद्विपरीतगुणस्तु शारीरः ॥ ईश्वरस्य च संसार्यात्मत्वे ईश्वराभावप्रसंगः ततः शास्त्रा-
नर्थक्यं संसारिणोपीश्वरात्मत्वे ऽधिकार्यभावाच्छास्त्रानर्थक्यमेव प्रत्यक्षादिविरोधश्चान्यत्वेपि तादात्म्यदर्शनं शास्त्रात्कर्तव्यं
प्रतिमादिष्विव विष्ण्वादिदर्शनमिति चेत् ॥ काममेवं भवतु ॥ न तु संसारिणो मुख्य आत्मेश्वर इत्येतन्नः ग्राहयितव्यमेवं प्राप्ते ब्रू-
मः ॥ आत्मेत्येव परमेश्वरः प्रतिपत्तव्यः ॥ तथाहि ॥ परमेश्वरप्रक्रियायां जाबाला आत्मत्वेनैवैतमुपगच्छंति ॥ त्वं वा अहमस्मि भ-
गवो देवते अहं वै त्वमसि देवते इति ॥ तथान्येपि अहं ब्रह्मास्मीत्येवमादय आत्मत्वोपगमा द्रष्टव्याः ॥ ग्राहयंति चात्मत्वेनेश्वरं
वेदांतवाक्यानि ॥ एष त आत्मा सर्वांतरः एष त आत्मांतर्याम्यमृतः तत्सत्यं स आत्मा तत्त्वमसीत्येवमादीनि ॥ यदुक्तं प्रतीकद-
र्शनमिदं विष्णुप्रतिमान्यायेन भविष्यतीति तदयुक्तं ॥ गौणत्वप्रसंगाद्वाक्यवैरूप्याच्च ॥ यत्र हि प्रतीकदृष्टिरभिप्रेयते सकृ-
देव तत्र वचनं भवति ॥ यथा मनो ब्रह्मादित्यो ब्रह्मेत्यादि ॥ इह पुनस्त्वमहमस्म्यहं च त्वमसीत्याह ॥ ततः प्रतीकश्रुतिवैरूप्या-
दभेदप्रतिपत्तिर्भेददृष्ट्यपवादाच्च ॥ तथाहि ॥ अथ योन्यां देवतामुपास्तेऽन्योसावन्योहमस्मीति न स वेद ॥ मृत्योः स मृत्यु-
माप्नोति य इह नानेव पश्यति ॥ सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वेदेत्येवमाद्या भूयसी श्रुतिर्भेददर्शनमपवदति ॥ यत्तूक्तं न वि-
रुद्धगुणयोरन्योन्यात्मत्वसंभव इति ॥ नायं दोषो विरुद्धगुणताया मिथ्यात्वोपपत्तेः यत्पुनरुक्तं ईश्वराभावप्रसंग इति तदस-

पूर्वार्थेनान्यर्थेण गौणत्वायोगाद्भेदश्रुतीनां कस्मिंश्चित्भेदानुवादित्वात्प्रत्यक्षादेरपि तद्विषयत्वाद्बिंबप्रतिबिंबयोरिव विरुद्धधर्माणां मिथ्यात्वान्मुख्यमै-
क्यमिति सिद्धांतयत्येवमित्यादिना ॥ ईश्वरस्य जीवत्वं न प्रतिपाद्यं येनेश्वराभावः स्यात्किंतु जीवस्येश्वरत्वं न चैवमधिकार्यभावः एकत्वप्रबोधात्प्रागधि-

…कारिभेदांगीकारादित्याह ॥ यत्तु नरूक्तमित्यादिना ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वेदसत्यत्वे श्रद्धालुः शंकते प्रत्यक्षाद्यभाव इति वर्णेषु क्रमस्वरयोरभावाद् उपलभ्य ध्वनिस्थयोरारोपो वाच्यस्तथा चारोपितक्रमस्वरविशिष्टवर्णात्म
कवेदस्य मिथ्यात्वे दुर्वारे वास्तविंसत्यत्वाग्रहस्त्वविद्याविजृम्भित इति वेदसत्यत्वाभावेन दोष इत्याह ॥ नेति ॥ अविद्यामाक्षिपति ॥ कस्येति प्रश्नलिंगेन
त्वयैव तस्याः सिद्धत्वदासेपानुपपत्तिरित्याह ॥ यत्त्वमिति ॥ अज्ञानमूलत्वाच्छ्नादेरिति भावः सर्वज्ञाभिन्ने मयि कथमज्ञानमिति शंकते न त्विति अभे

शास्त्रप्रामाण्यादनभ्युपगमाच्च ॥ नहीश्वरस्य संसारात्मत्वं प्रतिपाद्यते इत्यभ्युपगच्छामः किंतर्हि संसारिणः संसारित्वापोहे
नेश्वरात्मत्वं प्रतिपिपादयिषितमिति ॥ एवं च सत्यद्वैते श्वरस्यापहतपाप्मत्वादिगुणता विपरीतगुणतात्वितरस्य मिथ्येति व्यव
तिष्ठते ॥ यदप्युक्तमधिकार्यभावः प्रत्यक्षादिविरोधश्चेति तदप्यसत् ॥ प्राक्प्रबोधात्संसारित्वाभ्युपगमात् ॥ तद्विषयत्वाच्च
प्रत्यक्षादिव्यवहारस्य ॥ यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिना हि प्रबोधे प्रत्यक्षाद्यभावं दर्शयति ॥ प्रत्यक्षा
द्यभावे श्रुतेरप्यभावप्रसंग इति चेन्नेष्टत्वात् अत्रापि तापिता भवतीत्युपक्रम्य वेदा अवेदा इति वचनादिष्यत एवास्माभिः श्रु
तेरप्यभावः प्रबोधे ॥ कस्य पुनरयमप्रबोध इति चेद्यस्त्वं पृच्छसि तस्येति वदामः ॥ नन्वहमीश्वर एवोक्तः श्रुत्या ॥ यद्ये
वं प्रतिबुद्धोसि नास्ति कस्यचिदप्रबोधः ॥ योपि दोषश्चोद्यते कैश्चिद् अविद्यया किलात्मनः सद्वितीयत्वादद्वैतानुपपत्तिरिति सो
प्येतेन प्रत्युक्तस्तस्मादात्मेत्येवेश्वरे मनो दधीत ॥ ३ ॥ २ ॥ न प्रतीके न हि सः ॥ ४ ॥ मनो ब्रह्मेत्युपासीतेत्यध्यात्ममथाधिदैवतं
माकाशो ब्रह्मेति तथादित्यो ब्रह्मेत्यादेशः स यो नाम ब्रह्मेत्युपास्त इत्येवमादिषु प्रतीकोपासनेषु संशयः ॥ किं तेष्वप्यात्मग्र
हः कर्तव्यो न वेति ॥ किं तावत्प्राप्तं ॥ तेष्वप्यात्मग्रह एव युक्तः ॥ कस्माद्ब्रह्मणः श्रुतिष्वात्मत्वेन प्रसिद्धत्वात् ॥ प्रतीकाना
मपि ब्रह्मविकारत्वात् ब्रह्मत्वे सत्यात्मत्वोपपत्तेरित्येवं प्राप्ते ब्रूमः ॥ न प्रतीकेष्वात्ममतिं बध्नीयात् ॥ ५ दज्ञानात्साक्षित्वात्रस्य न त्वे

वाज्ञानाश्रयत्वमनुभवसिद्धाज्ञानस्यापलापायोगात् ॥ ज्ञानेत्वनिर्वाच्यस्य तस्य बाधात्त्वाश्रयापेक्षेत्याह यद्येवमिति ॥ अनिर्वाच्यत्वेन दोषांतरमपि
निरस्तमित्याह ॥ योपीति ॥ ३ ॥ न प्रतीके न हि सः उभयथाध्यानसंभवात्संशयः यथा ब्रह्मण्यभेदसत्त्वादहंग्रह उक्तः ॥ एवं प्रतीकेष्वपि ब्रह्मविकारतया

जीवाभिन्नब्रह्माभिन्नत्वाज्जीवाभेदसत्त्वेनाहंग्रहः कार्य इति दृष्टान्ते

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा·भा· अत्रप्रतीकोपासीनामहंग्रहोपास्तिभिरविशेषः॥ सिद्धान्ते तु विशेषसिद्धिरिति फलं। एतदारभ्याधिकरणत्रयस्य प्रासंगिकी पादसंगतिः ब्रह्मैक्य अ·पा·
टी· ध्यानप्रसंगागतत्वादिति विवेकः। किं प्रतीकेष्वात्मत्वानुभवबलादहंग्रहः उत वस्तुतो जीवाभेदसत्त्वान्नाद्य इत्याह न हि स इति नानुभवतीत्यर्थः। ४।१
र·प्र· द्वितीयमप्यसिद्ध्या दूषयति यत्पुनरित्यादिना विकारस्य ब्रह्मणा स्वरूपैक्यायोगात् बाधेनैक्यं वाच्यं प्रतीकबाधे चोपास्तिविधिर्न स्यादित्यर्थः॥
३८९ किंच कर्तृत्वाद्यबाधेनोपास्तिविधिप्रवृत्तिर्वाच्या बाधेन तद्योगात्तथा च बाधमूलब्रह्मैक्यज्ञानं द्वारीकृत्य प्रतीकेष्वहंग्रहोपास्तिकल्पनानयु॥

न हि स उपासकः प्रतीकानि व्यस्तान्यात्मत्वेनाकलयेत्॥ यत्पुनर्ब्रह्मविकारत्वात्प्रतीकानां ब्रह्मत्वं ततश्चात्मत्वमिति॥ तदसत् प्रतीकाभावप्रसंगात्॥ विकारस्वरूपोपमर्देन हि नामादिजातस्य ब्रह्मत्वमेवाश्रितं भवति॥ स्वरूपोपमर्दे च नामादीनां कुतः प्रतीकत्वं आत्मग्रहो वा॥ न च ब्रह्मण आत्मत्वात् ब्रह्मदृष्ट्युपदेशेषु आत्मदृष्टिः कल्प्या॥ कर्तृत्वाद्यनिराकरणात्॥ कर्तृत्वादिसर्वसंसारधर्मनिराकरणेन हि ब्रह्मण आत्मत्वोपदेशः तदनिराकरणेन चोपासनविधानं॥ अतश्चोपासकस्य प्रतीकैः समत्वादात्मग्रहो नोपपद्यते॥ न हि रुचकस्वस्तिकयोरितरेतरात्मत्वमस्ति सुवर्णात्मनेव तु ब्रह्मात्मनैकत्वे प्रतीकाभावप्रसंगमवोचाम अतो न प्रतीकेष्वात्मदृष्टिः क्रियते॥ ३।४॥ ब्रह्मदृष्टिरुत्कर्षात्॥ ५॥ तेष्वेवोदाहरणेषु अन्यः संशयः॥ किमादित्यादिदृष्टयो ब्रह्मण्यध्यसितव्याः॥ किं वा ब्रह्मदृष्टिरादित्यादिष्विति॥ कुतः संशयः सामानाधिकरण्ये कारणानवधारणात्॥ अत्र हि ब्रह्मशब्दस्यादित्यादिशब्दैः सामानाधिकरण्यमुपलभ्यते आदित्यो ब्रह्मेत्यादेशः ३८९
णो ब्रह्म विद्युत् ब्रह्मेत्यादिसमानविभक्तिनिर्देशात्॥ न चात्रांजसं सामानाधिकरण्यमवकल्पते॥ १ क्ताबाधविरोधादित्या

ह न च ब्रह्मण इति अतो जीवप्रतीकयोः स्वरूपभेदादहंग्रहे विध्यश्रवणाच्च नाहंग्रह इति फलितमाह॥ अतश्चेति यथा रुचकस्वस्तिकयोः सुवर्णात्मनैक्येऽपि मिथो नैक्यं तथा जीवप्रतीकयोर्ब्रह्मात्मनैक्येऽपि भेदः समः यद्विच धर्मिव्यतिरेकेण तयोरभावनिश्चयात् तदैक्यं तदोपासनोच्छेद उक्त इत्यर्थः॥ ४॥ ब्रह्मदृष्टिरुत्कर्षात् एकविषयत्वं संगतिः॥ प्रश्नपूर्वकं संशयबीजमाह॥ कुत इत्यादिना सामानाधिकरण्यं श्रुतं तत्तावन्मुख्यं ब्रह्मविकारयोर्गवाश्वयोरिवा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नापि प्रकृतिविकारभावनिबंधनं वाक्यस्य विकारबाधेन ब्रह्मपरत्वापातात् न चेष्टापत्तिः नाम ब्रह्मेत्युपासीतेति विधिश्रुतिविरोधात् परिमितनामग्रह
णानर्थक्यापाताच्च ब्रह्मपरत्वे सर्वं ब्रह्मेति वक्तव्यत्वात् अतः परिशेषादध्यास एव सामानाधिकरण्यकारणं अध्यासे च नियामकाभावात् संशय इत्यर्थः॥
उत्कृष्टनिकृष्टयोः निकृष्टमप्युपास्यफलवत्वादिति न्यायो नियामक इत्यरुचेराह अथवेति अत्र विकारदृष्टिभिर्ब्रह्मोपास्तिसिद्धिः फलं सिद्धान्ते तु वि

अर्थान्तरवचनत्वात् ब्रह्मादित्यादिशब्दानां॥ न हि भवति गौरश्व इति सामानाधिकरण्यम्॥ ननु प्रकृतिविकारभावात् ब्रह्मादि
त्यादीनां मृच्छरावादिवत् सामानाधिकरण्यं स्यात्॥ नेत्युच्यते॥ विकारप्रविलयो ह्येवं प्रकृतिसामानाधिकरण्यात् स्यात् ततश्च प्रती
काभावप्रसंगमयोत्याम॥ परमात्मवाक्यं चेदं तदानीं स्यात्॥ ततश्चोपासनाधिकारो बाध्येत॥ परिमितविकारोपादानं च व्य
र्थं तस्माद्ब्रह्मणोग्निर्वैश्वानर इत्यादिवदन्यत्रान्यदृष्ट्यध्यासे सति क्व किंदृष्टिरध्यस्यतामिति संशये तत्रानियमो नियमका
रिणः शास्त्रस्याभावादित्येवं प्राप्तं॥ अथवादित्यादिदृष्टय एव ब्रह्मणि कर्तव्या इत्येवं प्राप्तं॥ एवं हि आदित्यादिदृष्टिभिर्ब्र
ह्मोपासितं भवति ब्रह्मोपासनं च फलवदिति शास्त्रमर्यादा॥ तस्मान्न ब्रह्मदृष्टिरादित्यादिष्वित्येवं प्राप्ते ब्रूमः॥ ब्रह्मदृष्टिरेवा
दित्यादिषु स्यादिति॥ कस्मादुत्कर्षात् एवमुत्कर्षेणादित्यादयो दृष्टा भवंत्युत्कृष्टदृष्टेस्तेष्वध्यासात्॥ तथा च लौकिको न्यायोनु
गतो भवति॥ उत्कृष्टदृष्टिर्हि निकृष्टेध्यसितव्येति लौकिको न्यायः यथा राजदृष्टिः क्षत्तरि स चानुसर्तव्यः॥ विपर्यये प्रत्यवा
यप्रसंगात्॥ न हि क्षत्तृदृष्टिपरिगृहीतो राजा निकर्षं नीयमानः श्रेयसे स्यात्॥ ननु शास्त्रप्रामाण्यादनाशंकनीयोत्र प्रत्यवाय
प्रसंगः॥ न च लौकिकेन न्यायेन शास्त्रीया दृष्टिर्नियंतुं युक्तेति॥ अत्रोच्यते॥ निर्धारिते शास्त्रार्थ एतदेवं स्यात् संदिग्धे तु तस्मिं
स्तन्निर्णयं प्रति लौकिकोपि न्याय आश्रीयमाणो न विरुध्यते॥ ११ कारदृष्ट्या ब्रह्मण उपास्यत्वे निकर्षप्राप्तौ प्रत्यवायः फलवत्वासिद्धेर्वि
कारा एवोत्कृष्टब्रह्मदृष्ट्योपास्या इति फलं किंच लौकिकन्यायाविरुद्धोर्थो न ग्राह्यः प्रत्यवायप्रसंगात् किंच प्रथमश्रुतानामादित्यादिपदानामसं
जातविरोधितया मुख्यार्थेन ग्रहो न्याय्यः ब्रह्मशब्दे च दृष्टिलक्षणाग्रहः तथा चादित्यादयो ब्रह्मदृष्ट्योपास्या इत्येव वाक्यार्थ इत्याह॥ ॥
द्धार्थसंभवे विरु॥२॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ग·भा·
टी·
म·
२९०

माथम्याच्चेति ब्रह्मशब्दस्यैवदृष्ट्यर्थत्वे हेत्वंतरमाह॥ इतिपरत्वादितिइतिशब्दशिरस्कःशब्दः समभिव्याहृतक्रियालक्षकइतिलोके प्रसिद्धिरित्यर्थः द्वितीयाश्रुतेश्चादित्यादीनामेवोपास्तिकर्मत्वमित्याह॥ वाक्यशेषोपीतिउत्कृष्टमेवोपास्यमितिन्यायमुक्तमनुवदति॥ यत्तूक्तमितिद्वितीयेतिश्रुतिभ्यां तेनचोत्कृष्टदृष्ट्यध्यासेशास्त्रार्थे अवधार्यमाणेनिकृष्टदृष्टिमध्यस्यन् प्रत्यवेयादितिक्लिश्यते॥ प्राथम्याच्चादित्यादिशब्दानांमुख्यार्थत्वमविरोधात्गृहीतत्वमतेःस्वार्थवृत्तिभिरवरुद्धायांबुद्धौपश्चादवतरतोब्रह्मशब्दस्यमुख्ययावृत्त्यासामानाधिकरण्यासंभवात् ब्रह्मदृष्टिविधानार्थतैवावतिष्ठते॥ इतिपरत्वादपिब्रह्मशब्दस्यैषएवार्थोन्याय्यः॥ तथाहिब्रह्मेत्यादेशः ब्रह्मेत्युपासीतब्रह्मेत्युपास्तइतिचसर्वत्रेतिपरंब्रह्मशब्दमुच्चारयतिशुद्धांस्त्वादित्यादिशब्दान्॥ ततश्चयथाशुक्तिकांरजतमितिप्रत्येतीत्यत्रशुक्तिवचनएवशुक्तिकाशब्दोरजतशब्दस्तुरजतप्रतीतिलक्षणार्थः॥ प्रत्येत्येवहिकेवलंरजतमितिनतुतत्ररजतमस्तिएवमत्राप्यादित्यादीन्ब्रह्मेतिप्रतीयादितिगम्यते॥ वाक्यशेषोपिचद्वितीयानिर्देशेनादित्यादीनेवोपास्तिक्रिययाव्याप्यमानान्दर्शयति॥ सयएतदेवंविद्वानादित्यंब्रह्मेत्युपास्तेयोवाचंब्रह्मेत्युपास्तेयः संकल्पंब्रह्मेत्युपास्तइतिच यत्तूक्तंब्रह्मोपासनमेवात्रादरणीयंफलवत्त्वादितितदयुक्तंउक्तेनन्यायेनादित्यादीनामेवोपास्यत्वावगमात्॥ फलंत्वतिथ्याद्युपासनइवादित्याद्युपासनेपिब्रह्मैवदास्यति॥ सर्वाध्यक्षत्वात्॥ वर्णितंचैतत्फलमतउपपत्तेरित्यत्र॥ ईदृशंचात्रब्रह्मणउपास्यत्वंयत्प्रतीकेषुतद्दृष्ट्यध्यारोपणंप्रतिमादिष्विवविष्ण्वादीनां॥ ५॥ ४॥ आदित्यादिमतयश्चांगउपपत्तेः॥ ६॥ यएवासौतपतितमुद्गीथमुपासीतलोकेषुपंचविधंसामोपासीतवाचिसप्तविधंसामोपासीतइयमेवर्गग्निःसामेत्येवमादिष्वंगावबद्धेषूपासनेषुसंशयः॥ किमादित्यादिषुउद्गीथादिदृष्टयोविधीयंतेकिंवोद्गीथादिष्वेवादित्यादिदृष्टयइति॥ ११ लौकिकन्यायाच्चोत्कन्यायबाधइत्याह॥ तदितिब्रह्मणोनुपास्यत्वेकथंफलंदातृत्वंतत्राह॥ फलंत्वितिकिंचयद्ब्रह्माविकारस्योत्कर्षस्तस्यब्रह्मणोविशेषणत्वेप्युपास्यत्वंचास्तीत्याहईदृशंचेति॥ ४॥ आदित्यादि॥ पृथिव्यग्न्यंतरिक्षादित्यद्युसंज्ञेषुलोकेषुहिंकारप्रस्तावोद्गीथप्रतिहारनिधनैरंशैःपंचांशंसामनैरवादृष्टिरितिउपद्रवइति

अ·पा·
४।१

२९०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पूर्ववदुत्कर्षानवधारणादनियम इति प्रत्युदाहरणेन पूर्वपक्षमाह ॥ तुल्येति सिद्धरूपादित्यादिभ्यः कर्मरूपोद्गीथादीनां फलसन्निकर्षेणो-
त्कर्षोऽग्रलब्धविशेषणत्वेनियम इति दृष्टान्तेन सुलभं पूर्वपक्षमाह ॥ अथवेति तत्तत्त्यक्तसिद्धिरेव पूर्वोत्तरपक्षफलं मंतव्यं किंच अनंगेष्वेवांग
दृष्टिरित्यत्र तेष्वंगवाचिपदप्रयोगं लिंगमाह ॥ तथा चेयमेवेति तदेतदृग्ध्यारूढं साम एतस्यां पृथिवीरूपायामृच्यध्यूढमुपरिस्थितमित्यर्थः ॥

तत्रानियमः नियमकारणाभावादिति प्राप्तं ॥ न ह्यत्र ब्राह्मणइव कस्यचिदुत्कर्षविशेषोवधार्यते ॥ ब्रह्मादिसमस्तजगत्
कारणत्वादपहतपाप्मत्वादिगुणयोगाच्चादित्यादिष्वउत्कृष्टमिति शक्यमवधारयितुं ॥ तत्वादित्योद्गीथादीनां विकारत्वावि
शेषात् किंचिदुत्कर्षविशेषावधारणे कारणमस्ति ॥ अथवा नियमेनैवोद्गीथादिमतय आदित्यादिष्वध्यस्येरन् ॥ कस्मात्
कर्मात्मकत्वादुद्गीथादीनां ॥ कर्मणश्च फलप्राप्तिप्रसिद्धेरुद्गीथादिमतिभिरुपास्यमाना आदित्यादयः कर्मात्मकाः संतः
फलहेतवो भविष्यंति ॥ तथा चेयमेवर्गग्निः सामेत्यत्र तदेतदेतस्यामृच्यध्यूढं सामेत्यृक्शब्देन पृथिवीं निर्दिशति सामश
ब्देनाग्निं ॥ तच्च पृथिव्यग्न्योरृक्सामदृष्टिचिकीर्षायामवकल्पते न ऋक्सामयोः पृथिव्यग्निदृष्टिचिकीर्षायां ॥ क्षत्
रि हि राजदृष्टिकरणाद्राजशब्द उपचर्यते न राजनि क्षत्तृशब्दः ॥ अपि च लोकेषु पंचविधं सामोपासीतेत्यधिकरणनिर्दे
शात् लोकेषु सामाध्यसितव्यमिति प्रतीयते ॥ एतद्गायत्रं प्राणेषु प्रोतमिति चैतदेव दर्शयति ॥ प्रथमनिर्दिष्टेषु चादित्या
दिषु चरमनिर्दिष्टं ब्रह्माध्यस्तं आदित्यो ब्रह्मेत्यादेश इत्यादिषु ॥ प्रथमनिर्दिष्टाश्च पृथिव्यादयश्चरमनिर्दिष्टा हिंकाराद
यः पृथिवी हिंकार इत्यादिश्रुतिषु ॥ अतोऽनंगेष्वादित्यादिष्वंगमतिनिक्षेप इति ॥ एवं प्राप्ते ब्रूमः ॥ ९ ॥ ऋचि सामवत्पृथिव्या-

मग्निर्दृश्यते अतः साम्यात्पृथिव्येवर्गग्निः सामेति ध्यानं विहितं तत्र यदि ऋक्सामात्मकयोः कर्मांगयोः पृथिव्यग्निदृष्टिः स्यात्तदा पृथिव्यग्न्योर्ऋक्
सामपदप्रयोगो न स्यादित्यत्र दृष्टान्तमाह ॥ क्षत्तरीति अतः प्रयोगोऽन्यथानुपपत्त्या पृथिव्यग्न्योः ऋक्सामदृष्टिरित्यर्थः विपर्ययस्तन्मा भूदेवमेवेत्याह
॥ अपि चेति गायत्रसंज्ञं साम किंच पूर्वाधिकरणसिद्धान्तन्यायेनाप्येवमित्याह ॥ प्रथमेति अनंगबुद्ध्यांगान्युपास्यानीति सिद्धान्तयति एवमिति ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भा· उपासीनां हि कर्मसमृद्धिः फलं श्रूयते सा च नाभिरंगेषु संक्रियमाणेषूपपद्यते॥ अंगानां समृद्ध्यनुकूलप्रकृतकर्मापूर्वजनकत्वादित्यर्थः ननु य- अ·पा
ी· त्रोपासीनामप्रकृतकर्मापूर्वसन्निकृष्टांगद्वारापेक्षं फलं श्रुतं तत्र फलोपपत्तये अंगानामुपास्यत्वं भवतु न तदनपेक्षलोकादिफलेषूपासनेषु कथमुपा- ४।१
म· स्यविवेक इति शंकते भवत्विति यथा स्वतंत्रपशुफलस्यापि गोदोहनस्य अंगद्वारापेक्षस्यैव फलमिष्टं तद्वल्लोकादिफलेषूपासनेष्वपि कर्मापूर्व-
२९१ द्वारैव फलकल्पना युक्ता कर्माधिकृतस्यैवांगाश्रितोपासनेष्वधिकारादतोंगानामेवोपास्यमिति समाधत्ते॥ तेष्वपीति उत्कर्षानवधारणादः

आदित्यादिमतय एवांगेषूद्गीथादिषु क्षिप्येरन्॥ कुतः उपपत्तेः उपपद्यते ह्येवमपूर्वसन्निकर्षादादित्यादिमतिभिः सं-
स्क्रियमाणेषूद्गीथादिषु कर्मसमृद्धिः॥ यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति च विद्यायाः कर्मस-
मृद्धिहेतुत्वं दर्शयति॥ भवतु कर्मसमृद्धिफलेष्वेवं॥ स्वतंत्रफलेषु तु कथं य एतदेवं विद्वांल्लोकेषु पंचविधं सामोपास्त इत्या-
दिषु॥ तेष्वप्यधिकृताधिकारात्प्रकृतापूर्वसन्निकर्षेणैव फलकल्पना युक्ता॥ गोदोहनादिनियमवत्फलात्मकत्वाच्चादि-
त्यादीनामुद्गीथादिभ्यः कर्मात्मकेभ्य उत्कर्षोपपत्तिः॥ आदित्यादिप्राप्तिलक्षणं हि कर्मफलं शिष्यते श्रुतिषु॥ अपि च ओ-
मित्येतदक्षरमुद्गीथमुपासीतेत्यक्षरत्वेन स्वैवाक्षरस्योपव्याख्यानं भवतीति चोद्गीथमेवोपास्यत्वेनोपक्रम्यादित्यादिम-
तीर्विदधाति॥ यत्तूक्तं उद्गीथादिमतिभिरुपास्यमाना आदित्यादयः कर्मभूयं भूत्वा फलं करिष्यन्तीति तदयुक्तं स्वय-
मेवोपासनस्य कर्मत्वात्फलवत्त्वोपपत्तेः॥ आदित्यादिभावेनापि च दृश्यमानानामुद्गीथादीनां कर्मात्मत्वानपायात्॥
तदेतदेतस्यामृच्यध्यूढं सामेति तु लाक्षणिक एवं पृथिव्यग्न्योर्ऋक्सामशब्दप्रयोगः॥ ९१ नियमद्वत्युक्तं निरस्यति॥ फला- ३९१
त्मेति उपक्रमवलादंगमुपास्यमित्याह॥ अपि चेति रसतमत्वादिगुणाद्युपसंख्यानमित्यर्थः द्वितीयं पूर्वपक्षं दूषयति यत्तूक्तमित्यादिना कर्म-
भूयं कर्मात्मकत्वमाप्येत्यर्थः सिद्धादित्याद्यात्मना कर्मणा दृष्टौ कर्मत्वहानिः स्यादित्यत आह॥ आदित्यादिभावेनेति माणवकेऽग्निदृष्टिवदुद्गी-
थादिष्वादित्यादिधियो गौणत्वान्न कर्मत्वाभिभावकत्वमित्यंगेष्वेव नियतधीरविरुद्धेत्याशयः प्रयोगानुपपत्तिमुक्तां निरस्यति तदेतदिति॥ ६ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लक्षणबीजं संबंधमाह लक्षणा चेति गंगायां घोष इत्यत्र सन्निकृष्टसंयोगसंबंधेन तीरलक्षणा अग्निर्माणवक इत्यत्र अग्निनिष्ठशुचित्वादिगुणवत्त्वरूपपरंपरासंबंधेन लक्षणा दृष्टा तथा चात्र ऋक्सामयोः पृथिव्यग्निदृष्टिपक्षेपि ऋक्सामपदाभ्यां स्ववाच्यार्थे दृष्टव्यतास्यपरंपरासंबंधेन पृथिव्यग्निलक्षणा युक्तेत्यर्थः॥ ननु प्रतीकवाचिपदस्य ध्येयेऽर्थे लक्षणा न युक्ता क्षत्तृपदस्य राजन्यप्रयोगादिति शंकते॥ तत्र यद्यपीति तथापि ऋक्सामसंबंधात्पृथिव्यग्न्योरेवैतस्यामृच्यध्यूढं सामेत्येवमृक्सामपदप्रयोग इत्यन्वयः ननु मुख्यार्थ एव कुतो न गृह्यते तत्राह प्रसिद्धयोरिति तस्मादृच्यध्यूढं सामेति मुख्ययोः पृथगुक्तत्वादेतदेतस्यामित्यत्रापि तयोर्ग्रहे पुनरुक्तिः स्यात् अतः प्रतीकाभेददृष्ट्या पृथि

लक्षणा च यथासंभवं संनिकृष्टेन विप्रकृष्टेन वा स्वार्थसंबंधेन प्रवर्तते तत्र यद्यपि ऋक्सामयोः पृथिव्यग्निदृष्टिचिकीर्षीत थापि प्रसिद्धयोर्ऋक्सामयोर्भेदेनानुकीर्तनात् पृथिव्यग्न्योश्च सन्निधानात्तयोरेवैष ऋक्साशब्दप्रयोगः ऋक्सामसंबंधादिति निश्चीयते॥ क्षत्तृशब्दोपि हि कुतश्चित् कारणाद्राजानमुपसर्पन्तं निवारयितुं प्रार्थ्यते॥ इयमेवर्गग्निशिति च यथाक्षरन्यासमृच एव पृथिवीत्वमवधारयति॥ पृथिव्या ह्यृक्त्वेऽवधार्यमाणे इयमृगेवेत्यक्षरन्यासः स्यात्॥ य एवं विद्वान्साम गायतीति चांगाश्रयमेव विज्ञानमुपसंहरति न पृथिव्याद्याश्रयं॥ तथा लोकेषु पंचविधं सामोपासीतेति यद्यपि सप्तमीनिर्दिष्टा लोकास्तथापि साम्न्येव तेऽध्यस्येरन् द्वितीयानिर्देशेन साम्न उपास्यत्वावगमात् साम्नि हि लोकेष्वध्यस्यमानेषु साम लोकात्मनोपासितं भवति॥ अन्यथा पुनर्लोकाः सामात्मनोपासिताः स्युः एतेनैतद्गायत्रं प्राणेषु प्रोतमित्यादि व्याख्यातं॥ १ व्यग्न्योः प्रतीकसन्निधानात्तयोरेव प्रतीकपदप्रयोगः कृतस्तदभेददार्ढ्यायेत्यर्थः तर्हि क्षत्तृशब्दोपि राजनि स्यादित्यत आह क्षत्त्रिति स्थितप्रयोगस्य निमित्तं किमपि वाच्यं न तु निमित्तमस्तीति प्रयोग आपाद्य इति भावः॥ क्षत्ता सूतः तस्य कार्यं रथचर्यादि यदा राजैव करोति तदा क्षत्तृशब्दो राजन्यप्यस्तीत्यक्षरार्थः ऋगादावेव पृथिव्यादिदृष्टिरित्यत्र हेत्वंतरमाह॥ इयमिति॥ सप्तम्या लोकानामुपास्यत्वमुक्तं निरस्यति॥ तथा लोकेष्विति सामात्मना लोकानुपासीतेति द्वितीयासप्तम्योर्भंगस्तथा कार्यस्ततो वरं लोकात्मना सामोपासीतेति सप्तमीमात्रभंग इत्यर्थः॥ एतेनेति॥ एकविभक्तिभंगलाघवेन प्राणात्मना

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ननु विभक्तिसाम्ये कथं निर्णयस्तत्राह ॥ यत्रापीति साम्न उपासनं साध्विति उपक्रम्य पृथिवी हिंकार इत्यादिना हिंकारादिपंचावयवस्य साम्न उपासनमुक्त्वा इति तु पंचविधस्योपासनमित्युपसंहृत्य अथेति सप्तविधस्य साम्न उपासनं प्रक्रम्य प्रपंचितमतः साम्न एवोपास्यत्वमित्यर्थः यदुक्तं प्राथम्यात्पृथिव्यादेरुपास्यत्वमिति तत्राह ॥ एतस्मादेवेति यद्यपि हिंकारोद्देशेन पृथिवीत्वविधेरुद्देश्यस्य प्रथमनिर्देशो वाच्यस्तथाप्युक्तन्यायबलाद्व्यत्ययो ग्राह्य

यत्रापि तु स्पष्टो द्वितीयानिर्देशः अथ खल्वमुमादित्यं सप्तविधं सामोपासीतेति तत्रापि समस्तस्य खलु साम्न उपासनं साध्विति तु पंचविधस्याथ सप्तविधस्येति च साम्न एवोपास्यत्वोपक्रमात्तस्मिन्नेवादित्याद्यध्यासः ॥ एतस्मादेव च साम्न उपास्यत्वावगमात् पृथिवी हिंकार इत्यादिनिर्देशविपर्ययेऽपि हिंकारादिष्वेव पृथिव्यादिदृष्टिः ॥ तस्मादंगाश्रया आदित्यादिमतयो योगेषूद्गीथादिषु क्षिप्येरन्निति सिद्धं ॥ ५ ॥ ६ ॥ आसीनः संभवात् ॥ ७ ॥ कर्मांगसंबद्धेषु तावदुपासनेषु कर्मतंत्रत्वान्नासनादिचिंता ॥ नापि सम्यक्दर्शने वस्तुतंत्रत्वाद्विज्ञानस्य ॥ इतरेषु तूपासनेषु किमनियमेन तिष्ठन्नासीनः शयानो वा प्रवर्तेत उत नियमेनासीन एवेति चिंतयति ॥ तत्र मानसत्वादुपासनस्यानियमः शरीरस्थितेरिति ॥ एवं प्राप्ते ब्रवीति ॥ आसीन एवोपासीतेति ॥ कुतः संभवात् ॥ उपासनं नाम समानप्रत्ययप्रवाहकरणं न च तद्गच्छतो धावतो वा संभवति गत्यादीनां चित्तविक्षेपकरत्वात् तिष्ठतोऽपि देहधारणे व्यापृतं मनो न सूक्ष्मवस्तुनिरीक्षणक्षमं भवति ॥ शयानस्याप्यकस्मादेव निद्रयाभिभूयेत ॥ आसीनस्य त्वेवंजातीयको भूयान्दोषः सुपरिहर इति संभवति तस्योपासनं ॥ ७ ॥ ध्यानाच्च ॥ ८ ॥ अपि च ध्यायत्यर्थ एषः यत्समानप्रत्ययप्रवाहकरणं ॥ ध्यायतिश्च प्रशिथिलांगचेष्टेषु प्रतिष्ठितदृष्टिष्वेकविषयाक्षिप्तचित्तेषूपचर्यमाणो दृश्यते ॥ ध्या((यति प्रोषितबंधुरिति ॥ आसीनश्चानायासो भवति

तस्मादप्यासीनकर्मोपासनं ॥ ८ ॥

इत्यर्थः ॥ ६ ॥ आसीनः संभवात् कर्मण उत्थितेनोपविष्टेन वानेकधानुष्ठानदर्शनात्संशयः कर्मांगाश्रितोपासनानामासननियमानपेक्षाणामनुष्ठानप्रकार उक्तः तद्वदंगानाश्रितोपासनेष्वप्यनियम इति पूर्वपक्षयति ॥ तत्रेति अत्रासनाभ्यासासिद्धिः सिद्धांतेतु मनोदेहयोर्भिन्नत्वेऽपि देहचांचल्ये मनसोऽनवस्थानस्य अनुभवसिद्धत्वान्मनोव्यापारेषूपासनेषु देहस्थैर्यार्थमासननियमापेक्षे निष्फलभेदः तिष्ठत उत्थितस्य ॥ ७ ॥ किंच ध्यानात् आसीना एव सम्यक् ध्यायतिशब्दार्हत्वाद्बकादिवदित्याह ध्यानाच्चेति ॥ ८ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्रैव श्रोतं दृष्टांतमाह॥ अचलत्वं चेति॥९॥ बाह्यस्य शरीरस्य चासनस्य स्मरणान्नियमइत्याह॥ स्मरंति चेति॥१०॥ यत्रैकाग्रता तत्राविशेषात्॥
नेषेवं गानाग्निनोपासने षु प्राच्यादिदिशि तीर्थादिदेशे प्रदोषादिकाले नियमो स्ति न वेत्युभयथा संभवात्संशयः एकविषयत्वं संगतिरुपास्तीनां विहि
तत्वाद्यागादिवदस्ति दिगादिनियमइतिपूर्वपक्षः॥ अत्र दिगादिषु आदरः फलं सिद्धांते त्वनादरः॥ ध्येये चित्तैकाग्र्यस्य प्राधान्यात्प्रधानाश्रितं देशा

अचलत्वं चापेक्ष्य॥९॥ अपि च ध्यायतीव पृथिवीत्यत्र पृथिव्यादिषु चलत्वमेवापेक्ष्य ध्यायतिवादो भवति॥ तच्च लिंगमुपासन
स्यासीनकर्मत्वे॥९॥ स्मरंति च॥१०॥ स्मरंत्यपि च शिष्टा उपासनांगत्वेनासनं॥ शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनइत्यादिना॥
अत एव पद्मकादीनामासनविशेषाणामुपदेशो योगशास्त्रे॥१०॥६॥ यत्रैकाग्रता तत्राविशेषात्॥११॥ दिग्देशकालेषु संशयः॥
किमस्ति कश्चिन्नियमो नास्ति वेति॥ प्रायेण वैदिकेष्वारंभेषु दिगादिनियमदर्शनात्स्यादिहापि कश्चिन्नियमइति यस्य मतिस्त
प्रत्याह॥ दिग्देशकालेष्वर्थलक्षणएव नियमः॥ यत्रैवास्य दिशि देशे काले वा मनसः सौकर्येणैकाग्रता भवति तत्रैवोपासीत॥
प्राचीदिक्पूर्वाह्णः प्राचीनप्रवणादिवद्विशेषाश्रवणात्॥ एकाग्रता ह्यष्टा याः सर्वत्राविशेषात्॥ ननु विशेषमपि केचिदामनंति
॥ समे शुचौ शर्करावह्निवालुकाविवर्जिते शब्दजलाश्रयादिभिः॥ मनोनुकूले न तु चक्षुःपीडने गुहानिवाताश्रयणे प्रयोजयेदि
ति यथेति उच्यते॥ सत्यमस्त्येवंजातीयको नियमः सति त्वेतस्मिंस्तद्गतेषु विशेषेष्वनियमइति सुहृद्भूत्वाचार्य आचष्टे॥ मनो
नुकूलइति चैषा श्रुतिर्यत्रैकाग्रता तत्रैवेत्येतदेव दर्शयति॥७॥११॥ आप्रायणात्तत्रापि हि दृष्टं॥१२॥ आवृत्तिः सर्वोपासन
ष्वादर्तव्येति स्थितमाद्येधिकरणे॥ दिग्ग्रहणस्योचितत्वादिति विवेकः अर्थलक्षणएवेति ऐकाग्र्यफललिंगकएवेत्यर्थः प्राचीनप्रवणे
प्राग्देशे निम्नस्थले वैश्वदेवं कुर्यादिति वदत्र दिगादिविशेषो न श्रूयते अतो नु मानमप्रयोजकमिति भावः॥ विशेषाश्रवणमसिद्धमिति शंकते॥ ननु
विशेषमपीति॥ शर्कराः सूक्ष्मपाषाणाः जलाश्रयवर्जनं शीतनिवृत्त्यर्थं चक्षुःपीडनो मशकः वाचनिकं समदेशादिनियममंगीकृत्य चित्तैकाग्र्य
विरुद्धेषु देशादिगतेषु प्राचीनप्रवणत्वादिष्वनादरइति सुहृद्भावेन सूत्रकृदुपदिशति देशाद्याग्रहे चित्तविक्षेपात्समाधिभंगः स्यात्समाभूदिति॥११॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा·भा अनियोज्येब्रह्मण्यात्मत्वप्रतिपत्तिर्येषां तस्याविदुष इत्यर्थः अहंग्रहोपासने घनुष्ठानस्योभयथा दृष्टेः संशयमाह॥ यानिपुनरिति यथादिगादिनियम अ·पा
टी· साविधेस्तनाहरस्तद्दामरणमुपास्यावृत्तेः अविधानादनियमइति पूर्वपक्षः मरणपर्यंतमावृत्तिरिति सिद्धांतयति॥ एवमिति॥ उपासीनां कर्मणां चात्मका- ४।१
२·प्र· लेमाप्तव्यफलस्फूर्तिद्वाराफलहेतुत्वेमानमाह॥ सविज्ञानइति भावनामयं विज्ञानं फलस्फुरणं तेन सहितः सविज्ञानो विज्ञानस्फुरितं फलं विज्ञानमित्य-
३९३

तत्र यानि तावत्सम्यग्दर्शनानि उपासनानि तान्यवघातादिवत्कार्यपर्यवसानानीति ज्ञातमेवैषामावृत्तिपरिमाणं॥ नहि सम्यग्दर्शने कार्ये निष्पन्ने यत्नांतरं किंचिच्छासितुं शक्यं॥ अनियोज्यब्रह्मात्मत्वप्रतिपत्तेः शास्त्रस्याविषयत्वात्॥ यानि पुनरभ्युदयफलानि तेषां चिंता॥ किं कियंतं चित्कालं प्रत्ययमावर्त्योपरमेत्॥ उत यावज्जीवमावर्तयेदिति॥ किं तावत्प्राप्तं॥ कियंतं चित्कालं प्रत्ययमभ्यस्योत्सृजेत्॥ आवृत्तिविशिष्टस्योपासनशब्दार्थस्य कृतत्वादिति॥ एवं प्राप्ते ब्रूमः॥ आप्रायणादेवावर्तयेत्प्रत्ययं॥ अंत्यप्रत्ययवशाददृष्टफलप्राप्तेः॥ कर्माण्यपि हि जन्मांतरोपभोग्यं फलमारभमाणानि तदनुरूपं भावनाविज्ञानं प्रायणकाले आक्षिपंति॥ सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति यच्चित्तस्तेनैष प्राणमायाति प्राणस्तेजसा युक्तः सहात्मना यथासंकल्पितं लोकं नयतीति चैवमादिश्रुतिभ्यः॥ तृणजलूकानिदर्शनाच्च॥ प्रत्ययास्त्वेते स्वरूपानुवृत्तिमुक्त्वा किमन्यत्प्रायणकालभाविभावनाविज्ञानमपेक्षेरन्॥ तस्माद्ये प्रतिपत्तव्यफलभावनात्मकाः प्रत्ययास्तेषां प्रायणादावृत्तिः तथा च श्रुतिः॥ स यावत्क्रतुरयमस्माल्लोकात्प्रैतीति प्रायणकालेपि प्रत्ययानुवृत्तिं दर्शयति॥ स्मृतिरपि॥ यं यं वापि स्मरन्भावं त्यजत्यंते कलेवरं॥ तं तमेवैति कौंतेय सदा तद्भावभावित इति॥ प्रयाणकाले मनसाऽचलेनेति च॥ ११

र्थः यस्मिन् लोके चित्तं संकल्पोस्येति यच्चित्तस्तेन संकल्पि- ३९३
तेन लोकेन सह फलस्फूर्त्येत्यंतरं मनः प्राणे लीयत इति यावत्॥ तेज उदान आत्मा जीवः॥ जलूकादृष्टांतश्रुतेश्च भाविफलस्फूर्तिरस्तीत्यर्थः॥ अस्त्विदमंत्यफलं विज्ञानं कर्मणामिवादृष्टद्वारोपासीनानां ततः कुत आमरणमावृत्तिरित्यत आह॥ प्रत्ययास्त्विति उपासिप्रत्ययानां धारावाहिकतया स्वरूपानुवृत्तिरेवांत्यविज्ञानं न तु अदृष्टद्वारकमन्यदपेक्षितं सर्वभावानामेव स्वसमानजातीयद्वारानपेक्षतया प्रत्ययानां प्रत्ययांतरापेक्षायोगात्॥ कर्मणां तु दृष्टद्वा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एतत्त्रयमक्षितमस्यच्युतमसि प्राणसंशितमसीति मंत्रत्रयं मरणकालेपिस्मरेदित्यर्थः॥१२॥ यथोपासकानां यावज्जीवं कर्तव्यमस्ति न तथा त्मविदामिति कर्मक्षयलक्षणां जीवन्मुक्तिमाह ॥ तदधिगममिति॥ ज्ञानसाधनेषु यत्नाधिकार्थं फलाध्याये विसाधनविचारः कृतः संप्रतिफ लाध्यायेस्याफलचिंताक्रियत इत्याह ॥ गतइति कर्मणां फलांतत्वशास्त्रात् ज्ञाननाश्यत्वशास्त्राच्च संशयः ॥ पूर्वपक्षे ज्ञानिनोपि संचितपाप भोगानंतरं मुक्तिः सिद्धांते तु ज्ञानसमकालं पापनाशाज्जीवन्मुक्तिरिति फलं ॥ न हिंस्यादित्यादिनिषेधशास्त्राद्दुरितादृष्टस्य दुःखदायिनी शक्ति रधिगता ॥ नाभुक्तं क्षीयते कर्मेति च स्मरंति ॥ अतः फलांतमेव पापं न मध्ये नश्यतीति पूर्वपक्षः ननु तर्हि तन्नाशार्थं प्रायश्चित्तविधिर्न स्यादि

सोंतवेलायामेतत्त्रयंप्रतिपद्येतेति च मरणवेलायामपि कर्तव्यशेषं श्रावयति ॥८॥१२॥ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥१३॥ गतस्तृतीयशेषः ॥ अथेदानीं ब्रह्मविद्याफलं प्रति चिंता प्रतीयते ॥ ब्रह्माधिगमेसति तद्विपरीतफलं दुरितं क्षीयते न क्षीयते वेति संशयः॥ किं तावत्प्राप्तं ॥ फलार्थत्वात्कर्मणः फलमदत्वा न संभाव्यते क्षयः फलदायिनी ह्यस्य शक्तिः श्रुत्या समधिगता ॥ यदि तदंतरेणैव फलोपभोगमपवृज्येत श्रुतिः कदर्थिता स्यात् ॥ स्मरंति च न हि कर्म क्षीयते इति ॥ नन्वेवं सति प्रायश्चित्तोपदेशोऽनर्थकः प्राप्नोतीति नैष दोषः ॥ प्रायश्चित्तानां नैमित्तिकत्वोपपत्तेर्गृहदाहेष्ट्यादिवत् ॥ अपि च प्रायश्चित्तानां दोषसंयोगेन विधानाद्भवेदपि दोषक्षपणार्थता ॥ न त्वेवं ब्रह्मविद्यायां विधानमस्ति ॥ नन्वनभ्युपगम्यमाने ब्रह्मविदः कर्मक्षये तत्फलस्यावश्यं भोक्तव्यत्वादनिर्मोक्षः स्यात्॥ ९ ॥

तिचेन्न यथा आहिताग्नेर्गृहदाहे निमित्ते सति अग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेदितीष्टिविधिस्तद्वद्दोषे निमित्तमात्रे सति प्रायश्चित्त-विधेर्दोषनाशार्थत्वासिद्धेः॥ ननु विषम उपन्यासः युक्तं गृहदाहस्य सिद्धत्वादयोग्यत्वाच्च फलतया निमित्तमात्रत्वं दोषवान् प्रायश्चित्तं कुर्यादित्यत्र तु मलिनः स्नायादितिवद्दोषपदस्य निवृत्तिद्वारा फलपरत्वसंभवात् तरति ब्रह्महत्यां योऽश्वमेधेन यजत इति प्रायश्चित्तानां पापनिवर्तकत्वश्रुतेश्चायुक्तं प्रायश्चित्तस्य नैमित्तिकत्वमित्यत आह ॥ अपि चेति ज्ञानस्य दोषनाशार्थतया विधानं नास्ति क्षीयंते चास्य कर्माणीत्यादेर्ज्ञानस्तावकमात्रत्वादित्यर्थः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रा·भा कर्मभोगानंतरं देशकालांतरे मोक्षो भविष्यतीति शास्त्रप्रामाण्यादित्याह॥ नेत्युच्यत इति ज्ञानात्कर्मक्षयस्यापूर्वत्वान्मानांतराविरुद्धत्वाच्च नतत्प- अ·४
टी· रानेकवाक्यानां स्तावकत्वायोगात्तस्यास्तित्वमिति सिद्धांतयति॥ एवमित्यादिना पापक्रियातोऽपूर्वात्तूत्पत्तिरश्लेषः॥ सगुणब्रह्मविद्यायां— ४·१
र·प्र
३५५४

नेत्युच्यते देशकालनिमित्तापेक्षो मोक्षः कर्मफलवत् भविष्यति॥ तस्मान्न ब्रह्माधिगमे दुरितनिवृत्तिरिति॥ एवं प्राप्ते ब्रूमः॥
तदधिगमे ब्रह्माधिगमे सति उत्तरपूर्वयोरघयोरश्लेषविनाशौ भवतः॥ उत्तरस्याश्लेषः पूर्वस्य विनाशः कस्मात्॥ तद्व्यपदे-
शात्॥ तथाहि ब्रह्मविद्याप्रक्रियायां संभाव्यमानसंबंधस्यागामिनो दुरितस्यानभिसंबंधं विदुषो व्यपदिशति॥ यथा पुष्क-
रपलाश आपो न श्लिष्यंत एवमेवंविदि पापं कर्म न श्लिष्यत इति॥ तथा विनाशमपि पूर्वोपचितस्य दुरितस्य व्यपदिशति॥
तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयंत इति॥ अयमपरः कर्मक्षयव्यपदेशो भवति॥ भिद्यते हृद-
यग्रंथिश्छिद्यंते सर्वसंशयाः॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इति॥ यदुक्तं॥ अनुपभुक्तफलस्य कर्मणः क्षयकल्प-
नायां शास्त्रं कदर्थितं स्यादिति॥ नैष दोषः॥ नहि वयं कर्मणः फलदायिनीं शक्तिमवजानीमहे॥ विद्यत एव सा॥ सा तु विद्या-
दिना कारणांतरेण प्रतिबध्यत इति वदामः॥ शक्तिसद्भावमात्रे च शास्त्रं व्याप्रियते न प्रतिबंधाप्रतिबंधयोरपि॥ नहि कर्म
क्षीयत इत्येतदपि स्मरणमौत्सर्गिकं न भोगादृते कर्म क्षीयते तदर्थत्वादिति॥ इष्यत एव तु प्रायश्चित्तादिना तस्य क्षयः॥ स-
र्वं पाप्मानं तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेदेत्यादिश्रुतिस्मृतिभ्यः॥ यत्तूक्तं नैमित्तिकानि प्रायश्चि-
त्तानि भविष्यंतीति तदसत् दोषसंयोगेन चोद्यमानानामेषां दोषनिर्घातफलसंभवे फलांतरकल्पनानुपपत्तेः॥ यत्पुनरेतदु-
क्तं न प्रायश्चित्तवद्दोषक्षयोद्देशेन विद्याविधानमस्तीति ब्रूमः सगुणासु तावद्विद्यासु विद्यत एव विधानं तासु च वाक्यशेषे-

—व्यपदेशमुक्त्वा निर्गुणायां तमाह॥ अयमपर इति परोक्तं दूषयति॥ यदुक्तमित्या ((ऐश्वर्यप्राप्तिः पापनिवृत्तिश्च विद्यावत उच्यते॥
दिना विधिनिषेधशास्त्रे नाभुक्तं क्षीयत इत्यादिस्मृतिश्च कर्मणः फलशक्तौ प्रमाणमतः शक्तस्यापि कुतश्चिन्नाशांगीकारे न शास्त्रविरोध इत्यर्थः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तत्त्वज्ञानमात्मन्यशेषदुरितनाशकं तन्मूलाध्यासबाधकत्वात् स्वप्नदुरितमूलकर्तृत्वाध्यासबाधकजाग्रद्बोधवदित्याह तथाप्यकर्त्रात्मबोधादिति ॥
श्रुतार्थमेव युक्त्या दृढयत्यश्लेषइति चेति मूलाध्यासानुवृत्तेः पापस्याश्लेषः ॥ तन्नाशान्तरं हि नाश इत्यर्थः । अध्यासाभावे विद्वदनुभवमाह पूर्वेति तोक्षशास्त्र
नयोश्चाविवक्षाकारणं नास्तीत्यतः पापप्रहाणपूर्वकैश्वर्यप्राप्तिस्तासां फलमिति निश्चीयते ॥ निर्गुणायां तु विद्यायां यद्यपि विधानं
नास्ति तथाप्यकर्त्रात्मत्वबोधात्कर्मप्रदाह सिद्धिः ॥ अश्लेषइति चागामिषु कर्मसु कर्तृत्वमेव न प्रतिपद्यते ब्रह्मविदिति दर्शयति ॥ अ
तिक्रान्तेषु तु यद्यपि मिथ्याज्ञानात् कर्तृत्वं प्रतिपेदे इव तथापि विद्यासामर्थ्यान्मिथ्याज्ञाननिवृत्तेस्तान्यपि प्रविलीयन्त इत्याह
विनाशइति ॥ पूर्वसिद्धकर्तृत्वभोक्तृत्वविपरीतं हि त्रिष्वपि कालेषु अकर्तृत्वाभोक्तृत्वस्वरूपं ब्रह्माहमस्मि नेतः पूर्वमपि कर्ता भो
क्ता वाहमासं नेदानीं नापि भविष्यत्काल इति ब्रह्मविदवगच्छति ॥ एवमेव च मोक्ष उपपद्यते ॥ अन्यथा ह्यनादिकालप्रवृत्ता
नां कर्मणां क्षयाभावे मोक्षाभावः स्यात् ॥ न च देशकालनिमित्तापेक्षो मोक्षः कर्मफलवद्भवितुमर्हति ॥ अनित्यत्वप्रसंगात् ॥ प
रोक्षत्वानुपपत्तेश्च ज्ञानफलस्य ॥ तस्माद्ब्रह्माधिगमे दुरितक्षय इति स्थितं ॥ ९ ॥ १३ ॥ इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥ पू
र्वस्मिन्नधिकरणे बंधहेतोरघस्य स्वाभाविकस्याश्लेषविनाशौ ज्ञाननिमित्तौ शास्त्रव्यपदेशान्निरूपितौ ॥ धर्मस्य पुनः शास्त्री
यत्वाच्छास्त्रीयेण ज्ञानेनाविरोध इत्याशंक्य तन्निराकरणाय पूर्वाधिकरणन्यायातिदेशः क्रियते ॥ इतरस्यापि पुण्यस्य कर्मणः
एवं अघवदसंश्लेषो विनाशश्च ज्ञानवतो भवतः ॥ कुतः तस्यापि स्वफलहेतुत्वेन ज्ञानफलप्रतिबंधित्वप्रसंगात् ॥ उभे उ हैवै
ष एते तरतीत्यादिश्रुतिषु च दुष्कृतवत्सुकृतस्यापि प्रणाशव्यपदेशात् ॥ अकर्त्रात्मत्वबोधनिमित्तस्य च कर्मक्षयस्य सुकृतदु
ष्कृतयोस्तुल्यत्वात् ॥ क्षीयंते चास्य कर्माणीति चाविशेषश्रुतेः ॥ ९ वलाच्च ज्ञानात्कर्मक्षयसिद्धिरित्याह ॥ एवमेवेति ज्ञानात्कर्मक्षये सत्ये
वेत्यर्थः मोक्षस्य कर्मफलसाम्यमुक्तं निरस्यति न चेति ॥ १३ ॥ इतरस्यापि तु ॥ अतिदेशत्वात् संगत्याद्यपेक्षा ॥ ज्ञानात्पुण्यं क्षीयते न वेति पूर्ववत्संदेहे
ज्ञानं तु न पुण्यनाशकं शास्त्रीयत्वात्पुण्यवदित्यधिकाशंकामुक्त्वातिदेशं व्याचष्टे धर्मस्येत्यादिना ज्ञानं पुण्यनाशकं तन्मूलाविद्याघातित्वादिति न्यायो

भा· टी· प्र· ११५

ननुक्षीयंतेचेत्यविशेषश्रुतिः पापविषया सर्वेपाप्मानं तरतीति विशेषश्रुतेरित्यत आह॥ यत्रापिकेवलइति पापपुण्यक्षयपराधिकरणद्वयस्य फलमाह॥ पातेत्विति॥१४॥ अनारब्धकार्ये एव तु॥ उक्तकर्मक्षयं विषयीकृत्य क्षीयंते चेत्यविशेषश्रुतेस्तस्य तावदेव चिरमिति श्रुतेः संशयमा अ·पा ४।१

यत्रापिकेवलएवपाप्मशब्दस्तत्रापितेनैवपुण्यमप्याकलितमितिद्रष्टव्यं॥ ज्ञानफलापेक्षयानिकृष्टफलत्वात्॥ अस्तिच
श्रुतौपुण्येपिपाप्मशब्दः॥ नैनंसेतुमहोरात्रेतरतइत्यत्रसहदुष्कृतेनसुकृतमप्यनुक्रम्यसर्वेपाप्मानोतोनिवर्तंतइत्यविशेषेणै
वप्रकृतेपुण्येपाप्मशब्दप्रयोगात्॥ पातेत्विति तुशब्दोवधारणार्थः॥ एवंधर्माधर्मयोर्बंधहेत्वोर्विद्यासामर्थ्यादश्लेषविनाशसि
द्धेरवश्यंभाविनीविदुषःशरीरपातेमुक्तिरित्यवधारयति॥१०॥१४॥ अनारब्धकार्येएवतुपूर्वेतदवधेः॥१५॥ पूर्वयोरधि
करणयोर्ज्ञाननिमित्तःसुकृतदुःकृतयोर्विनाशोवधारितः॥ सकिमविशेषेणारब्धकार्ययोरनारब्धकार्ययोश्चभवतिउतवि
शेषेणानारब्धकार्ययोरेवेतिविचार्यते॥ तत्रउभेउहैवैषएतेतरतीत्येवमादिश्रुतिष्वविशेषश्रवणादविशेषेणैवक्षयइति॥ एवं
प्राप्तेप्रत्याह॥ अनारब्धकार्येएवत्विति॥ अप्रवृत्तफलेएवपूर्वेजन्मांतरसंचिते अस्मिन्नपिचजन्मनिप्राग्ज्ञानोत्प
त्तेःसंचितेसुकृतदुःकृतेज्ञानाधिगमात् क्षीयेते नत्वारब्धकार्येसामिभुक्तफले याभ्यामेतत् ब्रह्मज्ञानायतनंजन्म
निर्मितं॥ कुतएतत्तस्यतावदेवचिरंयावन्नविमोक्ष्येथसंपत्स्यइति शरीरपातावधिकरणात्क्षेमप्राप्तेः॥ इतरथाहिज्ञा
नादशेषकर्मक्षयेसतिस्थितिहेत्वभावात् ज्ञानप्राप्त्यनंतरमेवक्षेममश्नुवीत॥ तत्रशरीरपातप्रतीक्षांनाचक्षीत॥ ननुव
स्तुबलेनैवायमकर्त्रात्मावबोधःकर्माणिक्षपयन् कथंकानिचित्क्षपयेत्कानिचिच्चोपेक्षेत॥ नहिसमानेग्निबीजसंपर्के
केषांचित्बीजशक्तिःक्षीयतेकेषांचिन्नक्षीयतइतिशक्यमंगीकर्तुमिति॥ ॥ ह॥ पूर्वयोरितिजीवन्मुक्त्यसिद्धिरन्सिद्धिश्चेत्युभ

यत्रफलंपूर्वसिद्धांतन्यायेनपूर्वपक्षप्राप्तौउक्तोत्सर्गतःकर्मक्षतिःप्रारब्धान्यकर्मविषयेत्यपवादंसिद्धांतयत्येवमिति सामिशब्दोर्धवाचकः॥ प्रारब्धाद्यावन्नविमुच्यते तावानेवविलंबः तन्मोक्षेब्रह्मसंपद्यतइतिश्रुत्यर्थः॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

देहपातावधिलिंगात्तत्वविदां याज्ञवल्क्यादीनां देहधारणश्रुतिस्मृतिलिंगाच्च प्रारब्धकर्मणस्तत्त्वज्ञानं प्रति हेतुत्वेनोपजीव्यत्वाच्च प्राबल्य।
सिद्धेस्तत्प्रतिबद्धं तत्त्वज्ञानं न तत्सिद्ध्यर्थं अविद्यांशविक्षेपशक्त्या स्वयं विहाय आवरकाविद्यांशं नाशयतीत्याह॥ उच्यते न तावदिति॥ विक्षेपकाविद्या
लेश एव तत्संस्कारः॥ शिष्यान्प्रति जीवन्मुक्तो स्वानुभवमाह अपि च नैवेति॥२५॥ अग्निहोत्रादि तु नित्यं नैमित्तिकं कर्म ज्ञानात्प्रध्वस्तिनवेतिसंदेहे

उच्यते न तावदनारब्धकार्यं कर्मांशयं ज्ञानोत्पत्तिरूपपद्यते॥ आश्रिते च तस्मिन् कुलालचक्रवत्प्रवृत्तवेगस्यांतरालेप्र
तिबंधासंभवात् भवति वेगक्षयप्रतिपालनं॥ अकर्त्रात्मबोधोपि हि मिथ्याज्ञानबाधनेन कर्माण्युच्छिनत्ति बाधितमपि तु मिथ्या।
ज्ञानं द्विचंद्रज्ञानवत्संस्कारवशात्कंचित्कालमनुवर्त्तत एव॥ अपि च नैवात्र विवदितव्यं ब्रह्मविदः कंचित्कालं शरीरं ध्रियते
न वा ध्रियत इति॥ कथं ह्येकस्य स्वहृदयप्रत्ययं ब्रह्मवेदनं देहधारणं चापरेण प्रतिक्षेप्तुं शक्येत श्रुतिस्मृतिषु च स्थितप्रज्ञलक्षण
निर्देशेनैतदेव निरुच्यते॥ तस्मादनारब्धकार्ययोरेव सुकृतदुःकृतयोर्विद्यासामर्थ्यात्क्षय इति निर्णयः॥२१॥१५॥ अग्नि
होत्रादि तु तत्कार्यायैव तद्दर्शनात्॥१६॥ पुण्यस्याप्यश्लेषविनाशयोरघन्यायोतिदिष्टः सोतिदेशः सर्वपुण्यविषय इत्या।
शंक्य प्रतिवक्ति॥ अग्निहोत्रादीति॥ तुशब्द आशंकामपनुदति॥ यन्नित्यं कर्म वैदिकमग्निहोत्रादि तत्तत्कार्यायैव भव।
ति॥ ज्ञानस्य यत्कार्यं तदेवास्यापि कार्यमित्यर्थः॥ कुतः॥ तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेनेत्यादिदर्श
नात्॥ ननु ज्ञानकर्मणोर्विलक्षणकार्यत्वात् कार्यैकत्वानुपपत्तिः॥ नैष दोषः॥ ज्वरमरणकार्ययोरपि दधिविषयोर्गुडमंत्र
संयुक्तयोस्तृप्तिपुष्टिकार्यदर्शनात्॥ तद्वत्कर्मणोपि ज्ञानसंयुक्तस्य मोक्षकार्योपपत्तेः॥ नन्वनारभ्यो मोक्षः कथमस्य कर्मका
र्यत्वमुच्यते॥ नैष दोषः आरादुपकारकत्वात्कर्मणः ज्ञानस्यैव हि प्रापकं सत्कर्म प्रनाड्या मोक्षकारणमित्युपचर्यते॥ ९॥ उभे पुण्यपापे त
रतीत्यविशेषश्रुतेर्नेश्यतीत्याशंक्येतरस्यापीत्युक्तातिदेशस्य नित्यात्यनिरिक्तकाम्यपुण्यविषयत्वेनात्रापवादं सिद्धांतयति॥ पुण्यस्येत्यादिनाभ
त्र पूर्वपक्षे ज्ञानार्थनित्याद्यनुष्ठानासिद्धिः पंकप्रक्षालनन्यायात् सिद्धांते तु ज्ञानोत्पत्त्यर्थतात्तत्सिद्धिरिति विवेकः अत्र भाष्ये ज्ञानकर्मणोः साक्षादेक

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा॰भा॰ अत एवेति ज्ञानादूर्ध्वं कर्माभावात्पूर्वकर्मविषयमित्यर्थः निर्गुणविद्यायां कर्मसाहित्यं तृप्तिं प्रति भोजनस्य लाङ्गले नेव दर्शितं संप्रति सगुणवि अ॰पा॰
टी॰ द्यापरत्वेन सूत्रस्यांजस्यमाह ॥ सगुणास्विति ॥ १६ ॥ अतः सूत्रार्थं गृह्णाति किमित्यादिना यस्मादारब्धादन्यत्काम्यं पुण्यं पापं च तद्देव विदः सुहृ ४।१
र॰प्र॰

३९६ अत एव चातिक्रान्तविषयमेतत्कार्यैकत्वाभिधानं ॥ नहि ब्रह्मविद आगाम्यग्निहोत्रादि संभवति अनियोज्यब्रह्मात्मत्वप्रतिपत्तेः शास्त्रस्याविषयत्वात् सगुणासु तु विद्यासु कर्तृत्वानतिवृत्तेः संभवत्यागाम्यप्यग्निहोत्रादि ॥ तस्यापि निरभिसंधिनः कार्यान्तराभावाद्विद्यासंगत्युपपत्तिः ॥ १६ ॥ किंविषयं पुनरिदमश्लेषविनाशवचनं किंविषयं चाहो विनियोगवचनमेकेषां शाखिनां तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामिति अत उत्तरं पठति ॥ अतोऽन्यापि ह्येकेषामुभयोः ॥ १७ ॥ अतोऽग्निहोत्रादेर्नित्यात्कर्मणोऽन्यापि ह्यस्ति साधुकृत्या या फलमभिसंधाय क्रियते तस्या एष विनियोग उक्त एकेषां शाखिनां सुहृदः साधुकृत्यामुपयन्तीति ॥ तस्या एव चेदमघवदश्लेषविनाशनिरूपणमितरस्याप्येवमश्लेष इति ॥ तथा जातीयकस्य काम्यस्य कर्मणो विद्यां प्रत्यनुपकारकत्वे संप्रतिपत्तिरुभयोरपि जैमिनिबादरायणयोराचार्ययोः ॥ १७ ॥ यदेव विद्ययेति हि ॥ १८ ॥ समधिगतमेतदनन्तराधिकरणे नित्यमग्निहोत्रादिकं कर्म मुमुक्षुणा मोक्षप्रयोजनोद्देशेन कृतमुपात्तदुरितक्षयहेतुत्वद्वारेण सत्त्वशुद्धिकारणतां प्रतिपद्यमानं मोक्षप्रयोजनब्रह्माधिगमनिमित्तत्वेन ब्रह्मविद्यया सहैककार्यं भवतीति ॥ तत्राग्निहोत्रादिकर्माङ्गव्यपाश्रयविद्यासंयुक्तं केवलं चास्ति ॥ य एवं विद्वान्यजति य एवं विद्वाञ्जुहोति य एवं विद्वाञ्शंसति य एवं विद्वान्गायतीति ॥ तस्मादेवंविदमेव ब्रह्माणं कुर्वीत नानेवंविदं तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेदेत्यादिवचनेभ्यो विद्यासंयुक्तमप्यस्ति केवलमप्यस्ति तत्रेदं विचार्यते ॥ ७ ॥ ७ ॥ ३९६

द्विषतोः स्वसमानजातीयकं कर्म जनयति ॥ स्वयं च ज्ञानान्नश्यतीति भावः ॥ १७ ॥ यदेव विद्ययेति हि ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उक्तनित्यादिकं विषयमुपजीव्य सबीजं संशयमुक्त्वा पूर्वपक्षमाह विद्यासंयुक्तमेवेति अत्र पूर्वपक्षे कर्माङ्गोपास्तिहीनकर्मणो ज्ञानार्थ-
त्वासिद्धिः सिद्धान्ते तत्सिद्धिरिति भेदः भवतु विद्याविशिष्टस्य कर्मणो ज्ञानं प्रति शीघ्रकारित्वाख्यः कश्चिदतिशयो विद्यासामर्थ्यात् नैतावता

किं विद्यासंयुक्तमेवाग्निहोत्रादिकं कर्म मुमुक्षोर्विद्याहेतुत्वेन तया सहैककार्यत्वं प्रतिपद्यते तेन केवलं उत विद्यासंयुक्तं केवलं
चाविशेषेणेति ॥ कुतः संशयः ॥ तमेतमात्मानं यज्ञेन विविदिषन्तीति यज्ञादीनामविशेषेणात्मवेदनाङ्गत्वेन श्रवणाद्विद्यासंयु-
क्तस्य चाग्निहोत्रादेर्विशिष्टत्वावगमात् ॥ किं तावत्प्राप्तं ॥ विद्यासंयुक्तमेव कर्माग्निहोत्राद्यात्मविद्याशेषत्वं प्रतिपद्यते न वि-
द्याहीनं ॥ विद्योपेतस्य विशिष्टत्वावगमाद्विद्याविहीनात् ॥ यदहरेव जुहोति तदहः पुनर्मृत्युमपजयत्येवं विद्वानित्यादि-
श्रुतिभ्यः ॥ बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥ दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजयेत्यादिस्मृतिभ्यश्चेति ॥ एवं प्रा-
प्ते प्रतिपद्यते यदेव विद्ययेति हि सत्यमेतत् विद्यासंयुक्तं कर्माग्निहोत्रादिकं विद्याविहीनात्कर्मणोऽग्निहोत्रादेर्विशिष्टं वि-
द्वानिव ब्राह्मणो विद्याविहीनात् ब्राह्मणात् ॥ तथापि नात्यन्तमनपेक्षं विद्याहीनं कर्माग्निहोत्रादिकं ॥ कस्मात् तमेतमात्मा-
नं यज्ञेन विविदिषन्तीत्यविशेषेणाग्निहोत्रादेर्विद्याहेतुत्वेन श्रुतत्वात् ॥ ननु विद्यासंयुक्तस्याग्निहोत्रादेर्विद्याविहीनात्
विशिष्टत्वावगमाद्विद्याविहीनमग्निहोत्राद्यात्मविद्याहेतुत्वेनानपेक्षमेवेति युक्तं नैतदेवं ॥ विद्यासहायस्याग्निहोत्रादे-
र्विद्यानिमित्तेन सामर्थ्यातिशयेन योगादात्मज्ञानं प्रति कश्चित्कारणत्वातिशयो भविष्यति न तथा विद्याविहीनस्येति युक्तं क-
ल्पयितुं ॥ ननु यज्ञेन विविदिषन्तीत्यत्राविशेषेणात्मज्ञानाङ्गत्वेन श्रुतस्याग्निहोत्रादेरनङ्गत्वं शक्यमभ्युपगन्तुं ॥ तथा हि श्रुति-
र्यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति विद्यासंयुक्तस्य कर्मणोऽग्निहोत्रादेर्वीर्यवत्तरत्वाभिधानेन
स्वकार्यं प्रति कंचिदतिशयं ब्रुवाणा विद्याविहीनस्य तस्यैव तत्प्रयोजनं प्रति वीर्यवत्त्वं दर्शयति कर्मणश्च वीर्यवत्त्वं तद्यत्स्वप्रयो-
केवलस्य वैयर्थ्ये विविदिषाश्रुतिविरोधात् न च तत्र श्रुतौ यज्ञादिशब्दानां विद्योपेतकर्मपरतया संकोचो युक्तः ((जनसाधनप्रसहत्वं ॥

शा॰भा॰ टी॰ र॰प्र॰ ३९७

हि यतो यदेव विद्यये ति श्रुतिः केवलस्यापि वीर्यवत्त्वगमयतीति सिद्धांतग्रंथार्थः ॥ १८ ॥ भोगेन त्वितरे क्षपयित्वा संपद्यते ॥ नन्वविरक्तविषयः स किं-मारब्धक्षयानंतरं संसरत्युत नेति निमित्तभावाभावाभ्यां संशये सिद्धांतमुपक्रमते अनारब्धेति अनारब्धकर्मणः क्षयोक्तावारब्धस्य कथं क्षय इत्याकांक्षायामस्योत्थानात्संगतिः ॥ पूर्वपक्षे विदेहकैवल्यासिद्धिः सिद्धांते तत्सिद्धिरिति भेदः ॥ देहपातोत्तरमपि तत्त्ववित्संसरति संस्कारयोग्यत्वाद्यथा देहपातात्पूर्वं अ॰पा॰ ४।२

तस्माद्विद्यासंयुक्तं नित्यमग्निहोत्रादि विद्याविहीनं चोभयमपि मुमुक्षुणा मोक्षप्रयोजनोद्देशेनेह जन्मनि जन्मान्तरे च प्राक् ज्ञानोत्पत्तेः कृतं यत्तद्यथासामर्थ्यं ब्रह्माधिगमप्रतिबंधकारणोपात्तदुरितक्षयहेतुत्वद्वारेण ब्रह्माधिगमकारणत्वं प्रतिपद्यमानं श्रवणमननश्रद्धातात्पर्याद्यन्तरंगकारणापेक्षं ब्रह्मविद्यया सहैककार्यं भवतीति स्थितं ॥ २३ ॥ १८ ॥

भोगेन त्वितरे क्षपयित्वा संपद्यते ॥ १९ ॥ अनारब्धकार्ययोः पुण्यपापयोर्विद्यासामर्थ्यात्क्षय उक्तः ॥ इतरे त्वारब्धकार्ये पुण्यपापे उपभोगेन क्षपयित्वा ब्रह्म संपद्यते ॥ तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति ॥ ब्रह्मैव सन्ब्रह्माप्येतीति चैवमादिश्रुतिभ्यः ननु सत्यपि सम्यक्दर्शने यथा प्राग्देहपाताद्भेददर्शनं द्विचंद्रदर्शनन्यायेनानुवृत्तमेवं पश्चादप्यनुवर्तेत ॥ न निमित्ताभावात् ॥ उपभोगशेषक्षपणं हि तत्रानुवृत्तिनिमित्तं ॥ न च तादृशमत्र किंचिदस्ति ॥ ननु अपरः कर्माशयोऽभिनवमुपभोगमारप्स्यते ॥ न तस्य दग्धबीजत्वात् ॥ मिथ्याज्ञानावष्टंभं हि कर्मांतरं देहपाते उपभोगांतरमारभते ॥ तच्च मिथ्याज्ञानं सम्यक्ज्ञानेन दग्धमिति अतः साध्वेतदारब्धकार्यक्षये विदुषः कैवल्यमवश्यं भवतीति ॥ १९ ॥ भोगाधिकरणं ॥ २४ ॥ इति शारीरकमीमांसाभाष्ये चतुर्थाऽध्यायस्य प्रथमः पादः समाप्तः ॥

११ मित्यनारब्धाधिकरणदृष्टांतेन पूर्वपक्षमाह ॥ नन्विति ॥ भोगनिमित्तकर्माभावादेवसिद्धिः यत्तु संचितं कर्मांतरं तन्न निमित्तं फलस्य दग्धमूलत्वात् ॥ अविद्यादयो हि क्लेशाः कर्मणस्तत्फलस्य च मूलं तदुक्तं योगशास्त्रे क्लेशमूलः कर्माशयः सति मूले तद्विपाक इति तच्च मूलं ज्ञानाग्निना दग्धमिति कुतः पुनः संसारस्तस्माद्देहपाते कैवल्यमिति सिद्धं ॥ १९ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदानंदभगवत्कृतौ भाष्यरत्नप्रभायां चतुर्थस्याध्यायस्य प्रथमः पादः समाप्तः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथशारीरकसूत्रभाष्येरत्नप्रभायांचतुर्थाध्यायस्यद्वितीयपादःप्रारभ्यते

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा॰भा॰ श्रीगणेशाय नमः ॥ वाङ्मनसि दर्शनाच्छब्दाच्च ॥ ज्ञानफलोक्त्यनन्तरमुपासनफलं ब्रह्मलोकस्थं वक्तव्यं तच्चार्चिरादिमार्गगम्यं मार्गप्राप्तिश्चोत्क्रान्तिसा अ॰पा
टी॰ ध्या तस्मादुपास्तिफलासिद्ध्योत्क्रान्तिपादस्यास्याध्यायसंगतिः युक्तं चास्य पूर्वपादानन्तर्यं ज्ञानफलोक्त्यनन्तरं वक्तव्योपास्तिफलेनासिन्नत्वादित्याह ४।२
र॰प्र॰ ॥ अथेति ॥ ज्ञानिन इवोपासकस्याप्युत्क्रान्तिर्नेत्यत आह ॥ समानेति विद्वानुपासकः तस्यानुपासकवदुत्क्रान्तिरस्ति अज्ञत्वादिति वक्ष्यत इत्यर्थः ॥ प्रय
३९८

॥ वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥ अथापरासु विद्यासु फलप्राप्तये देवयानं पन्थानमवतारयिष्यन्प्रथमं तावद्यथाशास्त्रमुत्क्रान्तिक्रममन्वाचष्टे ॥ समाना हि विद्वदविदुषोरुत्क्रान्तिरिति वक्ष्यति ॥ अस्ति प्रायणविषया श्रुतिः ॥ अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामिति ॥ किमिह वाच एव वृत्तिमत्या मनसि संपत्तिरुच्यत उत वाग्वृत्तेरिति विशयः ॥ तत्र वागेव तावन्मनसि संपद्यत इति प्राप्तं ॥ तथा हि श्रुतिरनुगृहीता भवति इतरथा लक्षणा स्यात् ॥ श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या न लक्षणा ॥ तस्माद्वाच एवायं मनसि प्रलय इति ॥ एवं प्राप्ते ब्रूमः वाग्वृत्तिर्मनसि संपद्यत इति ॥ कथं वाग्वृत्तिरिति व्याख्यायते यावता वाङ्मनसीत्येवाचार्यः पठति ॥ सत्यमेतत्पठिष्यति तु परस्तादविभागो वचनादिति ॥ तस्मादत्र वृत्त्युपशममात्रं विवक्षितमिति गम्यते ॥ तत्त्वप्रविलयविवक्षायां तु सर्वत्रैवाविभागसाम्यात्किं परत्रैव विशिंष्यादविभाग इति ॥ तस्मादत्र वृत्त्युपसंहारविवक्षायां वाग्वृत्तिः पूर्वमुपसंह्रियते मनोवृत्ताववस्थितायामित्यर्थः ॥ कस्माद्दर्शनात् ॥ दृश्यते हि वाग्वृत्तेः पूर्वोपसंहारो मनोवृत्तौ विद्यमानायां न तु वाच एव वृत्तिमत्या मनस्युपसंहारः केनचिदपि द्रष्टुं शक्यते ॥ ननु श्रुतिसामर्थ्याद्वाच एवायं मनस्यप्ययो युक्त इत्युक्तं नेत्याह ॥ राम॰

१ तो म्रियमाणस्येत्यर्थः ॥ वाक्पदस्य करणमात्रवृत्त्युभयत्र निभ्यांकरणतद्वृत्त्योर्लयभानात्संशयः पूर्वपक्षे करणानां स्वरूपलयान्मृतमात्रस्य मुक्तिः ॥ सिद्धान्ते तु संसारसिद्धिः ॥ अनुपादाने मनसि वाचस्तत्त्वलयायोगेन व्यापारमात्रोपशमादिति विवेकः ॥ सूत्रे वृत्तिपदाध्याहारः कथमिति शङ्कते ॥ कथमिति उत्तरत्र हि सूत्रकृत्तत्त्वविद इंद्रियाणां स्वरूपलयं वक्ष्यति तद्बलादिहाध्याहार उचितः ॥ अज्ञस्यापींद्रियलयसाम्ये वक्ष्यमाणविशेषोक्त्ययोगादिति समाध्यर्थः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रकृतावेव विकारलय इति न्यायविरुद्धार्थं श्रुतिरपि न श्रूयत इति सिद्धान्तयति। अतत्प्रकृतित्वादिति। न्यायस्य निरवकाशत्वाद्बलीयस्त्वं शब्दस्य तु किर्वागिति श्रुत्यन्या लक्षणया वा सावकाशत्वमिति द्योतयितुं शब्दाच्चेत्युक्तं॥१॥ वाच्युक्तं न्यायं चक्षुरादिष्वतिदिशति। उपशान्तदेहोष्मा-त्तस्मादुत्क्रमणादूर्ध्वं पुनर्भवं प्रतिपद्यत इत्यर्थः। इन्द्रियशब्दस्य श्रुतिस्थस्य वृत्तिपरतयोपपत्तेः सर्वेन्द्रियवृत्तिलयश्चेदिष्टस्तर्हि वाङ्मनसीति पृथ

अतत्प्रकृतित्वात्। यस्माद्धि यत उत्पन्नं तस्य तत्र प्रलयो न्याय्यः। मृदीव शरावस्य। न च मनसो वागुत्पद्यत इति किंचन प्रमाणमस्ति। वृत्त्युद्भवाभिभवौ त्वप्रकृतिसमाश्रयावपि दृश्येते। पार्थिवेभ्यो हीन्धनेभ्यस्तैजसस्याग्नेर्वृत्तिरुद्भवति। अप्सु चोपशाम्यति। कथं तर्ह्यस्मिन्पक्षे शब्दो वाङ्मनसि संपद्यत इति। अत आह। शब्दाच्चेति। शब्दोऽप्यस्मिन्पक्षे वृत्तिवृत्तिमतोरभेदोपचारादित्यर्थः॥१॥ अत एव च सर्वाण्यनु ॥ २॥ तस्मादुपशान्ततेजाः पुनर्भवमिन्द्रियैर्मनसि संपद्यमानैरित्यत्राविशेषेण सर्वेषामेवेन्द्रियाणां मनसि संपत्तिः श्रूयते। तत्रापि अत एव वाच इव चक्षुरादीनामपि सवृत्तिके मनस्यवस्थिते वृत्तिलोपदर्शनात्तत्त्वप्रलयासंभवात्। शब्दोपपत्तेश्च वृत्तिद्वारेणैव सर्वाणीन्द्रियाणि मनोऽनुवर्तन्ते। सर्वेषां करणानां मनस्युपसंहाराविशेषे सति वाचः पृथग्ग्रहणं वाङ्मनसि संपद्यत इत्युदाहरणानुरोधेन ॥२॥ तन्मनः प्राण उत्तरात्॥ ३ समधिगतमेतद्वाङ्मनसि संपद्यत इत्यत्र वृत्तिसंपत्तिर्विवक्षितेति। अथ यदुत्तरं वाक्यं मनः प्राण इति किमत्रापि वृत्तिसंपत्तिरेव विवक्ष्यत उत वृत्तिमत्संपत्तिरिति विचिकित्सायां वृत्तिमत्संपत्तिरेवात्रेति प्राप्तम्। श्रुत्यनुग्रहात्। तत्प्रकृतित्वोपपत्तेश्च। तथा हि अन्नमयं हि सोम्य मन आपोमयः प्राण इत्यन्नयोनिं मन आमनन्त्यब्योनिं च प्राणम्। आपश्चान्नमसृजन्तेति श्रुतिः। अतश्च यन्मनः प्राणे प्रलीयते अन्नमेव तदप्सु प्रलीयते अन्नं हि मनः आपश्च प्राणः प्रकृतिविकाराभेदादिति। एवं प्राप्ते ब्रूमः॥ ६ ॥ ११२

व सूत्रं किमर्थमित्यत आह सर्वेषां करणानामिति॥२॥ तन्मनः प्राण उत्तरात्। वाक्यक्रमादर्थक्रमाच्चाधिकरणक्रमः। श्रुतिन्यायाभ्यां संशयः। पूर्वं प्रबल-न्यायविरोधाद्वागिति श्रुतेर्बाधः कृतः। इह त्वबात्मकप्राणस्यान्नात्मकमनःप्रकृतित्वेन प्रकृतौ विकारलय इति न्यायानुग्रहात् न मनःश्रुतिर्बाध्येति पू-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सिद्धांतस्त्ववत्तयोः प्रकृतिविकृतिभावेपि नतद्विकारयोः प्राणमनसोस्तद्भावो हिमघटयोरपि तद्भावप्रसंगात् इतोन्यायविरोधात् पूर्ववत् श्रुतिर्बोध्येति विवेकः॥ अगृहीतावाह्येंद्रियवृत्तयोयेनतत्तथालीनेंद्रियवृत्तिकंमनोपिवृत्तिलयेनैव प्राणेलीयतइत्यर्थः॥ एवमपीति प्राणस्याद्विकारत्वपक्षे। पीत्यर्थः तस्मादिति प्राणस्य साक्षान्मनः प्रकृतिकत्वाभावान्मनः शब्दो वृत्तिंलक्षयतीत्यर्थः॥३॥ सोध्यक्षेतदुपगमादिभ्यः उक्तन्यायसिद्धं प्राणस्यापि

तदप्यगृहीतबाह्येंद्रियवृत्तिमनोवृत्तिद्वारेणैव प्राणे प्रलीयत इति उत्तराद्वाक्यादवगंतव्यं॥ तथाहि सुषुप्सोर्मुमूर्षोश्च प्राणवृत्तौ परिस्पंदात्मिकायामवस्थितायां मनोवृत्तीनामुपशमो दृश्यते॥ नच मनसः॥ स्वरूपाप्ययः प्राणे संभवति अतत्प्रकृतित्वात्॥ ननु दर्शितं मनसः प्राणप्रकृतित्वं॥ नैतत्सारं॥ नहीदृशेन प्राणाडिकेन तत्प्रकृतित्वेन मनः प्राणे संपत्तुमर्हति॥ एवमपि ह्यन्ने मनः संपद्येताप्सु चान्नमप्स्वेव च प्राणः॥ नह्येतस्मिन्नपि पक्षे प्राणभावपरिणताभ्योद्भ्यो मनो जायत इति किंचन प्रमाणमस्ति ॥तस्मान्न मनसः प्राणे स्वरूपाप्ययः॥ वृत्त्यप्ययेपि तु शब्दोवकल्प्यते वृत्तिवृत्तिमतोरभेदोपचारादिति दर्शितं॥ ३ ॥ ३ ॥

॥ ३ ॥२।३॥ सोध्यक्षेतदुपगमादिभ्यः॥४॥ स्थितमेतद्यस्य यतोनोत्पत्तिस्तस्य तस्मिन्वृत्तिप्रलयो न स्वरूपप्रलय इति॥ इदमिदानीं प्राणस्तेजसीत्यत्र चिंत्यते॥ किं यथाश्रुति प्राणस्य तेजस्येव वृत्त्युपसंहारः किंवा देहेंद्रियपंजराध्यक्षे जीव इति॥ तत्र श्रुतेरनतिशंकनीयत्वात् प्राणस्य तेजस्येव संपत्तिः स्यात्॥ अश्रुतकल्पनाया अन्याय्यत्वादिति॥ एवं प्राप्ते प्रतिपद्यते॥ सोध्यक्ष इति॥ स प्रकृतः प्राणः अध्यक्षे विद्याकर्मपूर्वप्रज्ञोपाधिके विज्ञानात्मन्यवतिष्ठते तत्प्रधाना प्राण वृत्तिर्भवतीत्यर्थः॥ कुतः तदुपगमादिभ्यः॥ एवमेवेममात्मानमंतकाले सर्वे प्राणा अभिसमायंति॥ यत्रैतदूर्ध्वोच्छ्वासी भवतीति हि श्रुत्यंतरमध्यक्षोपगा

वृत्तिलयमुपजीव्य प्राणस्तेजसीति श्रुतेरुपगमादिश्रुतेश्च संशयमुक्त्वा जीवेलयं विनापि उपगमादिसंभव इति पूर्वपक्षयति स्थितमित्यादिना अत्र तेजःशब्दस्य मुख्यत्वं सिद्धांते तु भूतोपहितजीवलक्षकत्वमिति मत्वा सूत्रं योजयति स प्रकृत इत्यादिना ज्ञानकर्मवासनोपाधिक इत्यर्थः॥ तं जीवं प्रति प्राणानामुपगमानुगमनावस्थानश्रुतिभ्य इति हेत्वर्थः॥ यथा यात्रेच्छावंतं राजानं भृत्या उपगच्छंत्येवमेव परलोकजिगमिषुं जीवं सर्वे प्राणा आभि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तमुत्क्रामंतमित्यनुगमनंश्रुतंजीवेप्राणावस्थानश्रुतिमाह सविज्ञानइति॥जीवस्यप्राप्तव्यफलावगमायहिविज्ञानसाहित्यश्रुत्यामुख्यप्राणसहितकरणानांजीवेस्थितिर्भातीत्यर्थः॥४॥यद्यपिप्राणस्यतेजस्यव्यवधानेनलयःश्रुतस्तथाप्युभयश्रुत्यनुग्रहायप्राणोजीवेलीयतेजीवद्वाराचतदुपाधिषुतेजआदिभूतेष्वितिश्रुत्यर्थस्फुटीकरणार्थंसूत्रंगृह्णातिकथंतर्हीतिनचलयंविनापिजीवंप्रत्युपगमादिसंभवात्तेजःश्रुतिर्मुख्यास्त्वितिवाच्यंजीवप्राप्ता

सर्वान्प्राणानविशेषेणदर्शयति॥विशेषेणचतमुत्क्रामंतंप्राणोनूत्क्रामतीतिपंचवृत्तेःप्राणस्याध्यक्षानुगामितांदर्शयति॥तदनुवृत्तितांचेतरेषां॥प्राणमनूत्क्रामंतंसर्वेप्राणाअनूत्क्रामंतीति॥सविज्ञानोभवतीतिचाध्यक्षस्यांतर्विज्ञानवत्त्वप्रदर्शनेनतस्मिन्नपीतकरणग्रामस्यप्राणस्यावस्थानंगमयति॥ननुप्राणस्तेजसीतिश्रूयतेकथंप्राणोऽध्यक्षइत्यधिकावापःक्रियतेनैषदोषः॥अध्यक्षप्रधानत्वादुत्क्रमणादिव्यवहारस्य॥श्रुत्यंतरगतस्यापिचविशेषस्यापेक्षणीयत्वात्॥४॥कथंतर्हिप्राणस्तेजसीतिश्रुतिरित्यतआह॥भूतेषुतच्छ्रुतेः॥सप्राणसंपृक्तोऽध्यक्षस्तेजःसहचरितेषुभूतेषुदेहबीजभूतेषुसूक्ष्मेष्ववतिष्ठतइत्यवगंतव्यं॥प्राणस्तेजसीत्यतःश्रुतेः॥ननुचेयंश्रुतिःप्राणस्यतेजसिस्थितिंदर्शयतिनप्राणसंपृक्तस्याध्यक्षस्य॥नैषदोषः॥सोऽध्यक्षइत्यध्यक्षस्याप्यंतरालेप्युपसंख्यातत्वात्॥योपिहिस्रुघ्नान्मथुरांगत्वामथुरायाःपाटलिपुत्रंव्रजतिसोपिस्रुघ्नात्पाटलिपुत्रंयातीतिशक्यतेवदितुं॥तस्मात्प्राणस्तेजसीतिप्राणसंपृक्तस्याध्यक्षस्यैवतत्तेजःसहचरितेषुभूतेष्ववस्थानं॥५॥कथंतेजःसहचरितेषुभूतेष्वित्युच्यतेयावतैकमेवतेजःश्रूयतेप्राणस्तेजसीत्यतआह॥नैकस्मिन्दर्शयतोहि॥६॥नैकस्मिन्नेवतेजसिशरीरांतरप्रेप्सावेलायांजीवोवतिष्ठते॥कार्यस्यशरीरस्यानेकात्मकत्वदर्शनात्॥दर्शयतश्चैतमर्थंप्रश्नप्रतिवचने॥आपःपुरुषवचसइतितद्व्याख्यातंत्र्यात्मकत्वात्तुभूयस्त्वादित्यत्र॥श्रुतिस्मृतीचैतमर्थंदर्शयतःश्रुतिःपृथिवीमयआपोमयोवायुमयआकाशमयस्तेजोमयइ

गत्यप्राणस्यनिर्व्यापारत्वेनस्थितेरेवात्रलयत्वादितिभावः॥भूतेषुजीवस्थितिःकिंबलाद्व्याख्यायतइत्याशंक्यसोऽध्यक्षइतिसूत्रोदाहृतश्रुतिबलादित्याह नत्वित्यादिनाप्राणस्यजीवद्वाराभूतप्राप्तौदृष्टांतमाहयोपिहीति स्थूलदेहारंभायपंचीकृतभूतान्यावश्यकानीतिरंहत्यधिकरणेव्याख्यातं॥६॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा·भा· अणव्यः सूक्ष्मा मीयन्त इति मात्राः परिच्छिन्नाः प्राक्मोक्षादविनाशिन्यो दशार्धानां पञ्चानां भूतानां सूक्ष्मभागा इति याचत्॥ जीवस्य भूताश्रयत्वं कर्माश्र अ·पा·
टी· यत्वश्रुतिविरुद्धमित्याशंक्य कर्मनिमित्तत्वेनाश्रयः भूतानि तु देहोपादानत्वेनेत्युभयमविरुद्धमित्याह॥ ननु चेत्यादिना तौ याज्ञवल्क्यात्तं भागो यज्जीवा ४।२
र·प्र· धारभूतं तत्कर्मेति श्रुतेर्वचनं॥ ६॥ एवं वाह्येन्द्रियाणां मनसि प्रथमं वृत्तिलयस्तदा भावात् ततो मनोवृत्तेः प्राणे लयः प्राणवृत्तेर्भूतोपहितजीवे लयः।
५००

स्मृतिरपि॥ अण्व्यो मात्रा अविनाशिन्यो दशार्धानां तु याः स्मृताः॥ ताभिः सार्द्धमिदं सर्वं संभवत्यनुपूर्वश इत्यास्या॥ ननु चोपसंहृतेषु वागादिषु करणेषु शरीरान्तरप्रेप्सावेलायां क्वायं तदा पुरुषो भवतीत्युपक्रम्यश्रुत्यंतरं कर्माश्रयतां निरूपयति तौ ह यदूचतुः कर्म है वतद्वचतुरथ यत्प्रशशंसतुः कर्म हैव तत्प्रशशंसतुरिति॥ अत्रोच्यते॥ तत्र कर्मप्रयुक्तस्य ग्रहातिग्रहसंज्ञकस्येन्द्रियविषयात्म कस्य बंधनस्य प्रवृत्तिरिति कर्माश्रयतोक्ता इह पुनर्भूतोपादानाद्देहान्तरोत्पत्तिरिति भूताश्रयत्वमुक्तं॥ प्रशंसाशब्दादपि तत्र प्राधान्यमात्रं कर्मणः प्रदर्शितं॥ न त्वाश्रयान्तरं निवारितं तस्मादविरोधः॥ ७॥ ७॥ ७॥ ७॥ ३।६॥ समाना चासृत्यु पक्रमादमृतत्वं चानुपोष्य॥ ७॥ सेयमुत्क्रान्तिः किं विद्वदविदुषोः समाना किं वा विशेषवतीति विशयानानां विशेषवतीति तावत् प्राप्तं॥ भूताश्रयविशिष्टा ह्येषा॥ पुनर्भवाय च भूतान्याश्रीयन्ते न च विदुषः पुनर्भवः संभवति॥ अमृतत्वं हि विद्वानश्नुत इति स्थितिः तस्मादविदुष एवैषोत्क्रान्तिः॥ ननु विद्याप्रकरणे समाम्नानाद्विदुष एवैषा भवेत्॥ न स्वापादिवद्यथाप्राप्तानुकीर्तनात्॥ तथाहि यत्रैतत्पुरुषः स्वपिति नाम अशिशिषति नाम पिपासति नामेति च सर्वप्राणिसाधारणा एव स्वापादयो नुकीर्त्यन्ते विद्याप्रकरणेपि प्रतिपिपादयिषित वस्तुप्रतिपादनानुगुण्येन न तु विदुषो विशेषवन्तो विधित्स्यन्ते॥ एवमियमप्युत्क्रान्तिर्महा राम·
दत्युत्क्रान्तिव्यवस्थोक्ता सा च सर्वप्राणिषु तुल्येत्याह॥ समाना चासृत्युपोष्य॥ पुरुषस्य प्रयतो वाङ्मनसीत्यविशेषश्रुतेर्जनगतैवानुकीर्त्यते॥ विद्ययामृतमश्नुत इति श्रुतेश्च संशयमाह॥ सेयमिति॥ विशयानानां संदिहानानामित्यर्थः पूर्वपक्षे सगुणब्रह्मविदः संबंधित्वमुत्क्रान्तेर्विशेषः साध्य न ततोनुत्क्रान्त उपासको मुक्तिमश्नुत इति फलं सिद्धान्ते तूत्क्रान्तो ब्रह्मलोकभागीति फलभेदः॥ पूर्वपक्षमाक्षिप्य समाधत्ते ननु विद्येत्यादिना॥ ६॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विद्ययामृतत्वमितिश्रुतिर्निर्गुणविद्यावत्परा न तस्य प्राणा उत्क्रामन्तीति प्रतिषेधोऽपि तद्विषयः। अतः सगुणविदोऽप्यमृतस्यैवोत्क्रान्तिरिति सिद्धान्तयति। एवमिति। सृति मार्गस्तस्योपक्रमोऽर्चिःप्राप्तिस्ततः प्राक् तदा उत्क्रान्तिस्तुल्या ततउपासकोमूर्धन्यनाडीद्वारार्चिरादिमार्गं प्राप्नोति नान्य इति विशेषः। यत्तु दहरोपासकस्याः

यस्यां परस्यां देवतायां पुरुषस्य प्रयतस्तेजः संपद्यते स आत्मा तत्त्वमसीति प्रतिपादयितुं। प्रतिषिद्धा चैवाविदुषः न तस्य प्राणा उत्क्रामन्तीति। तस्मादविद्वद्विषयैवेति। एवं प्राप्ते ब्रूमः। समाना चैषोत्क्रान्तिर्वाङ्मनसीत्याद्या विद्वदविदुषोरासृत्युपक्रमाद्भवितुमर्हति। अविशेषश्रवणात्। अविद्वान्देहबीजभूतानि भूतसूक्ष्माण्याश्रित्य कर्मप्रयुक्तो देहग्रहणमनुभवितुं संसरति। विद्वांस्तु ज्ञानप्रकाशितं मोक्षनाडीद्वारमाश्रयते। तदेतदासृत्युपक्रमादित्युक्तं। नन्वमृतत्वं हि विदुषा प्राप्तव्यं न च तद्देशान्तरायत्तं तत्र कुतो भूताश्रयत्वं सृत्युपक्रमो वेति। अत्रोच्यते। अनुपोष्य चेदमदग्ध्वात्यन्तमविद्यादीन् क्लेशानपरविद्यासामर्थ्यादापेक्षिकममृतत्वं प्रेप्सते। संभवति सृत्युपक्रमो भूताश्रयत्वं च। न हि निराश्रयाणां प्राणानां गतिरुपपद्यते तस्माददोषः॥७॥ तदापीतेः संसारव्यपदेशात्॥८॥ तेजः परस्यां देवतायामित्यत्र प्रकरणसामर्थ्यात्तद्यथाप्रकृतं तेजः साध्यक्षं सप्राणं सकरणग्रामं भूतान्तरसहितं प्रयतः पुंसः परस्यां देवतायां संपद्यत इत्येतदुक्तं भवति। कीदृशी पुनरियं संपत्तिः स्यादिति चिन्त्यते। तत्रात्यन्तिक एव तावत्स्वरूपप्रविलय इति प्राप्तं तत्प्रकृतित्वोपपत्तेः। सर्वस्य हि जनिमतो वस्तुजातस्य प्रकृतिः परा देवतेति प्रतिष्ठापितं। तस्मादात्यन्तिकीयमविभागापत्तिरिति। एवं प्राप्ते ब्रूमः। तत्तेज आदि भूतसूक्ष्मं श्रोत्रादिकरणाश्रयभूतमापीतेः आसंसारमोक्षात्सम्यग्ज्ञाननिमित्तादवतिष्ठते योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतमित्यादिसंसारव्यपदेशात्। अन्यथा हि सर्वः प्रायणसमय एवोपाधिप्रत्यस्तमयादत्यन्तं ब्रह्म संपद्येत। तत्र विधिशास्त्रमनर्थकं स्यात्॥ मृतत्वं श्रुतं तस्यो

र्ध्वमायन्नमृतत्वमेतीति तदापेक्षिकमेव तत्प्रमुख्यं यं कामं कामयते सोऽस्य संकल्पादेव समुत्तिष्ठतीति भोगश्रवणादित्याह। अनुपोष्य चेदमिति उषदाह इति धातोरिदं रूपं॥७॥ तदापीतेः॥ पूर्वोदाहृतोत्क्रान्तिवाक्यशेषं व्याख्याय लिङ्गाश्रयपञ्चभूतानां किमात्यन्तिको ब्रह्मणि लय उतानात्यन्तिक इति लयसंशये उभयथा

दर्शनात्संशयमाह। कीदृशी पुनरियमिति। पूर्वत्रापेक्षिकममृतत्वमित्युक्तं तदयुक्तमित्याक्षेपात्संगतिः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ग.भा. पूर्वपक्षे मृतमात्रस्य मुक्तिसिद्धिः सिद्धान्ते तु कर्मविद्याशास्त्रबलात्सावशेषत्वस्य सिद्धिरिति विवेकः ॥ ८ ॥ ननु लिंगात्मकस्य तेजसः कथं सूक्ष्मत्वं नाडीद्वार अ.पा.
टी. गतिः कुतो वा केनचिन्मूर्तेन प्रतिघातो नास्ति कुतो वा न दृश्यत इत्यत आह सूक्ष्ममिति प्रमाणसौक्ष्म्याद्गतिरनुद्भूतस्पर्शरूपत्वात्स्वच्छत्वाद्प्रतिघातानुप ४।२
र.प्र. लब्धिरित्यर्थः ॥ ९ ॥ १० लिंगसद्भावे चोष्मलिंगकानुमानमाह ॥ अस्यैव चेति ॥ ११ ॥ प्रतिषेधादिति चेन्न शारीरात् ॥ पूर्वमनुपोष्येति पदेन दग्धाशेषक्लेश
५०१ विद्याशास्त्रं च ॥ मिथ्याज्ञाननिमित्तश्च बंधो न सम्यक्ज्ञानादृते विस्रंसितुमर्हति ॥ तस्मादाभूतसंप्लवात् संसारव्यपदेशान्मुक्तानित्येपि सुषुप्तप्रलयवत् बीजभावावशे
षैवैषां संसप तिरिति ॥ ८ ॥ सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥ तच्चेतरभूतसहितं तेजो जीवस्य अस्माच्छरीरात्प्रवसत आश्रयभूतं स्व
रूपतः परिमाणतश्च सूक्ष्मं भवितुमर्हति ॥ तथा हि नाडीनिःक्रमणश्रवणादिभ्योऽस्य सौक्ष्म्यमुपलभ्यते तत्र तनुत्वात्संचारोपपत्तिः
स्वच्छत्वाच्चाप्रतिघातोपपत्तिरत एव च देहान्निर्गच्छत्पार्श्वस्थैर्नोपलभ्यते ॥ ९ ॥ नोपमर्देनातः ॥ १० ॥ अत एव च सूक्ष्मत्वान्नास्य स्थू
लस्य शरीरस्योपमर्देन दाहादिनिमित्तेनेतरत्सूक्ष्मं शरीरमुपमृद्यते ॥ १० ॥ अस्यैव चोपपत्तेरेष ऊष्मा ॥ ११ ॥ अस्यैव च सूक्ष्मस्य
शरीरस्यैष ऊष्मा ॥ यमेतस्मिञ्छरीरे संस्पर्शेनोष्माणं विजानाति ॥ तथा हि मृतावस्थायामवस्थितेपि देहे विद्यमानेष्वपि च रूपा
दिषु देहगुणेषु नोष्मोपलभ्यते ॥ जीवदवस्थायामेव तूपलभ्यत इत्यत उपपद्यते प्रसिद्धशरीरव्यतिरिक्तव्यपाश्रय एवैष ऊष्मेति
॥ तथा च श्रुतिः ॥ उष्ण एवैव जीविष्यन् शीतो मरिष्यन्निति ॥ ७ ॥ ७ ॥ ७ ॥ ५ ॥ १२ ॥ प्रतिषेधादिति चेन्न शारीरात् १२ अ
मृतत्वं चानुपोष्येत्यतो विशेषणादात्यंतिकेऽमृतत्वे गत्युत्क्रांत्योरभावाभ्युपगमः ॥ तत्रापि केनचित्कारणेनोत्क्रांतिमाशंक्य प्रतिषे
धति ॥ अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो भवति न तस्य प्राणा उत्क्रामंति ब्रह्मैव सन् ब्रह्माप्येतीत्यतः पर
विद्याविषयात्प्रतिषेधान्न परब्रह्मविदो देहात्प्राणानामुत्क्रांतिरस्तीति चेत् ॥ ९ स्वनिर्गुणज्ञानिन उत्क्रांत्याद्यभावः सूचितस्तत्सात्र ४०१
सिध्यसमाधानात् व्यवहितेनास्य संगतिरित्याह ॥ अमृतत्वं चेति ॥ सकामस्य संसारो नत्वनंतरं निष्कामस्य मुक्तिप्रकरणार्थो य शब्दः ॥ आत्मकामत्वा
त्पूर्णानंदात्मवित्वादाप्तकामः प्राप्तपरमानंदः अतो निष्कामः अनभिव्यक्तानरवासनात्मककामशून्यस्तस्मादकामः व्यक्तवहिष्कामरहितः इदं श्रोयो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ज्ञानिन उत्क्रान्तिरस्ति नवेति पंचमीषष्ठीश्रुतिभ्यां संदेहे सिद्धान्तिशंकानिरासपूर्वकं पूर्वपक्षयति॥ नेत्यादिना॥ काण्वश्रुतौ तावत्तस्येति सर्वनाम्ना प्रकृतं ज्ञानिनं परामृश्य संबंधसामान्यमुक्तं तत्र माध्यंदिनशाखायां तस्मादित्यपादानत्वरूपविशेष उक्तो ग्राह्यस्तथा च जीवात्प्राणोत्क्रान्तिप्रतिषेधो भाति न देहात्तच्छब्देन देहस्यानुक्तेस्तस्मात् ज्ञानिनोऽप्युत्क्रान्तिरस्तीति ज्ञानवैयर्थ्यमिति पूर्वपक्षफलं॥१२॥ सिद्धान्ते तत्सार्थक्यमाह स्पष्टो

नेत्युच्यते॥ यतः शारीरादात्मन एष उत्क्रान्तिप्रतिषेधः प्राणानां न शरीरात्॥ कथमवगम्यते॥ न तस्मात्प्राणा उत्क्रामंतीति शाखांतरे पंचमीप्रयोगात् संबंधसामान्यविषया हि षष्ठी शाखांतरगतया पंचम्या संबंधविशेषे व्यवस्थाप्यते॥ तस्मादिति च प्राधान्यादभ्युदयनिःश्रेयसाधिकृतो देही संबध्यते न देहः॥ न तस्मादुच्चिक्रमिषोर्जीवात्प्राणा अपक्रामंति सहैव तेन संभवंतीत्यर्थः॥१२॥ स प्राणस्य च प्रवसतो भवत्युत्क्रान्तिर्देहादित्येवं प्राप्ते प्रत्युच्यते॥ स्पष्टो ह्येकेषां॥१३॥ नैतदस्ति यदुक्तं परब्रह्मविदोऽपि देहादस्त्युत्क्रान्तिः प्रतिषेधस्य देह्यपादानत्वादिति॥ यतो देहापादान एवोत्क्रान्तिप्रतिषेध एकेषां समाम्नातॄणां स्पष्ट उपलभ्यते॥ तथा हि आर्तभागप्रश्ने॥ यत्रायं पुरुषो म्रियत उदस्मात्प्राणाः क्रामंत्याहो नेतीत्यत्र नेति होवाच याज्ञवल्क्य इत्यनुत्क्रान्तिपक्षं परिगृह्य न तर्ह्ययमनुत्क्रान्तेषु प्राणेषु म्रियत इत्यस्यां आशंकायामत्रैव समवनीयंत इति प्रविलयं प्राणानां प्रतिज्ञाय तत्सिद्धये स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेत इति सशब्दपरामृष्टस्य प्रकृतस्योत्क्रान्त्यवधेरुच्छ्वयनादीनि समामनंति॥ देहस्य चैतानि स्युर्न देहिनस्तत्सामान्यान्न तस्मात्प्राणा उत्क्रामंति अत्रैव समवनीयंत इत्यत्राप्यभेदोपचारेण देहापादानस्यैवोत्क्रमणस्य प्रतिषेधो यद्यपि प्राधान्यं देहिन इति व्याख्येयं येषां पंचमीपा- ब्र॰

ठीति॥ अत्र पुरुषशब्दवाच्यो देह एवास्मादित्युत्क्रान्त्यवधिरुच्यते सशब्दपरामृष्टस्य प्रकृतस्य पुरुषस्योच्छ्वयनादिधर्मकस्य जीवत्वायोगादित्यर्थः॥ उच्छ्वयति बाह्यवायुपूरणाद्वर्धते॥ आध्मायति॥ आर्द्रभेरीवच्छब्दं करोतीत्यर्थः येषां पंचमीपाठस्तेषां यद्यपि देहिनः प्राधान्यं तथापि देहदेहिनोरभेदात्तस्मादिति देहं परामृश्य तदपादान एवोत्क्रान्तिप्रतिषेध इति व्याख्येयं तत्सामान्यादुक्तश्रुत्यास्य पाठस्यैकार्थत्वादिति योजना

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा·भा इदानींकाण्वपाठस्यानुगुण्यमाह ॥ येषांतुषष्ठीपाठइति ॥ संबंधविशेषाकांक्षायांभोक्तृप्राणानांभोगोपकरणत्वविशेषोऽत्रैवप्राणमयोमनोमय अ·पा·
टी· इतिपूर्वश्रुत्युक्तोग्राह्यः नशास्त्रांतरस्थमपास्तनत्वंग्राह्यंजीवादुत्क्रांतेरप्राप्तायाः प्रतिषेधायोगात् तेनविदुःसंबंधिप्राणानांउत्क्रांत्यपादानापेक्षायांचक्षुषो ४।२
र·प्र· वामूर्ध्नोवेत्युक्तदेहप्रदेशाएवग्राह्याः तथाचायमर्थः तस्यविदुषोभोगोपकरणात्मकाःप्राणाःदेहप्रदेशेभ्योनोत्क्रामंतीति एवंचप्राप्तोत्क्रांतिनिषेधार्थे
४०२

येषांतुषष्ठीपाठस्तेषांविद्वत्संबंधिन्युत्क्रांतिःप्रतिषिध्यतइतिप्राप्तोत्क्रांतिप्रतिषेधार्थत्वादस्यवाक्यस्यदेहापादानैवसाप्रतिषि-द्धाभवतिदेहादुत्क्रांतिःप्राप्तानदेहिनः ॥ अपिचचक्षुषोवामूर्ध्नोवान्येभ्योवाशरीरदेशेभ्यस्तमुत्क्रामंतंप्राणोनूत्क्रामतिप्राणमनूत्क्रामंतंसर्वेप्राणाअनूत्क्रामंतीत्येवमविद्वद्विषयंसप्रपंचमुत्क्रमणंसंसारगमनंचदर्शयित्वाइतिनुकामयमानइत्युपसंहृत्याविद्वत्कथामथाकामयमानइतिव्यपदिशतिविद्वांसं ॥ यदितद्विषयेप्युत्क्रांतिमेवप्रापयेदसमंजसएवव्यपदेशःस्यात् ॥ तस्मादविद्वद्विषयेप्राप्तयोर्गत्युत्क्रांत्योर्विद्वद्विषयेप्रतिषेधइत्येवमेवव्याख्येयंव्यपदेशार्थवत्ताय ॥ नचब्रह्मविदःसर्वगतब्रह्मात्मभूतस्यप्रक्षीणकामकर्मणउत्क्रांतिर्गतिर्वाउपपद्यते ॥ निमित्ताभावात् ॥ अत्रब्रह्मसमश्नुतइतिचैवंजातीयकाःश्रुतयोगत्युत्क्रांत्योरभावंसूचयंति ॥ १३ ॥ स्मर्यतेच ॥ १४ ॥ स्मर्यतेपिचमहाभारतेगत्युत्क्रांत्योरभावः ॥ सर्वभूतात्मभूतस्यसम्यग्भूतानिपश्यतः ॥ देवाअपिमार्गेमुह्यंत्यपदस्यपदैषिणइति ॥ ननुगतिरपिब्रह्मविदःसर्वगतब्रह्मात्मभूतस्यस्मर्यते ॥ शुकःकिलवैयासकिर्मुमुक्षुरादित्यमंडलमभिप्रतस्थेपित्राचानुगम्याहूतोभोइति प्रतिशुश्रावेति नसशरीरस्यैवायंयोगबलेनविशिष्टदेशप्राप्तिपूर्वकःशरीरोत्सर्गइतिद्रष्टव्यं ॥ सर्वभूतदृश्यत्वाद्युपन्यासात् ॥ नह्यशरीरंगच्छंतंसर्वेभूतानिद्रष्टुंशक्नुयुः ॥ तथाचतत्रैवोपसंहृतं ॥ शुकस्तुमारुताच्छीघ्रांगतिंकृत्वांतरिक्षगः ॥ दर्शयित्वाप्रभावंस्वंसर्वभूतगतोभवदिति ॥ ६ ॥ शाम·

त्वंवाक्यशेषेतिसर्वंचतुरस्रंअपिचेत्यस्यार्थः ॥ १३ ॥ सम्यगात्मभावेनभूतानिपश्यतःअपदस्यप्राप्यपदरहितस्यपदैषिणोदेवाअपिमार्गेमुह्यंतीतिमार्गंनजानंतीतितदभावादितिस्मृतियोजना ॥ स्मृत्यंतरविरोधंशंकते ॥ ननुगतिरपीतिसगुणविद्याबलेनैवायंगतिरितिपरिहरतिनसशरीरस्येति ॥ ६ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ननु नहि नद्योर्ध्येमायन्नमृतत्वमेतिसत्यवेनात् अद्धागमयतीत्यादिश्रुतीनां का गतिस्तत्राह ॥ गतीति ॥ २४ ॥ ६ ॥ तानि परेतथात्वाह पूर्वत्र गतिनिषेधेन
विदुत्कलानां घ्राणादीनामत्रैवलयउक्तः ॥ नमुपजीव्यस्य किं नतत्कलाप्रकृतिषु पृथिव्यादिषु स्यादुत परमात्मनीतिश्रुतिद्वयदर्शनात्संशयः कार्यः तत्र स्वा
स्वाप्रकृतौ विकारलय इति न्यायानुगृहीतया गताः कलाइतिश्रुत्या पूर्वपक्षमग्रे वदन्नादौ सिद्धान्तमाह ॥ तानीति ॥ यथा नद्यः समुद्रं प्राप्य लीयन्त एवमेवा
स्य परितः सर्वत्र द्रष्टुरिमाः प्राणश्रद्धाद्याः पुरुषायणाः पुरुषैकस्थिताः पुरुषमेव विज्ञेयं प्राप्य लयं गच्छन्तीत्यर्थः ॥ मनः प्राणयोरेकीकरणेन कला
तस्मादभावः परब्रह्मविदो गत्युक्तान्योगतिश्रुतीनां तु विषयमुपरिष्टात् व्याख्यास्यामः ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥
२४ ॥ ६ ॥ तानि परे तथा ह्याह ॥ २५ ॥ तानि पुनः प्राणशब्दोदितानीन्द्रियाणि भूतानि च परब्रह्मविदस्तस्मिन्नेव परस्मिन्नात्मनि प्र
लीयन्ते ॥ कस्मात् तथा ह्याह श्रुतिः ॥ एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्तीति ॥ ननु गताः क
लाः पंचदश प्रतिष्ठा इति विद्वद्विषयैवापरा श्रुतिः परस्मादात्मनोन्यत्रापि कलानां प्रलयमाह न सा खलु व्यवहारापेक्षा पार्थिवा
द्याः कलाः पृथिव्यादीरेव स्वप्रकृतीरपियन्तीति ॥ इतरा तु विद्वत्प्रतिपत्यपेक्षा पात्कृत्स्नं कलाजातं परब्रह्मविदो ब्रह्मैव संपद्यत इ
ति ॥ तस्माददोषः ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ १५ ॥ अविभागो वचनात् ॥ १६ ॥ स पुनर्विदुषः कलाप्रलयः किमितरेषामि
व सावशेषो भवति ॥ आहोस्विन्निरवशेष इति ॥ तत्र प्रलयसामान्यात्कलावशेषता प्रसक्तौ ब्रवीति ॥ अविभागापत्तिरेवेति ॥
कुतः वचनात् ॥ तथा हि ॥ कलाप्रलयमुक्त्वा वक्ति ॥ भिद्येते चासां नामरूपे पुरुष इत्येवं प्रोच्यते स एषोऽकलोऽमृतो भवतीति ॥
अविद्यानिमित्तानां च कलानां न विद्यानिमित्ते प्रलये सावशेषत्वोपपत्तिस्तस्मादविभाग एवेति ॥ ७ ॥ १६ ॥ ९ ॥ नां पंचदशत्वे ॥ प्रतिष्ठा
इति द्वितीयाबहुवचनं स्वस्वप्रकृतीः पृथिव्याद्या इत्यर्थः वस्तुगत्या विद्वद्दृष्ट्या परमात्मनि कलालयेपि लोकदृष्ट्या प्रतिष्ठासु लयोक्तिरविरुद्धा न था च क
लाः स्वप्रकृतिषु विलाप्य ताभिः सह पुरुषे लीयन्त इति श्रुतिद्वयतात्पर्यं ॥ १५ ॥ अविभागो वचनात् ॥ उक्तलयमुपजीव्य लयस्य द्वैधादर्शनात्संशयमाह
॥ स पुनरिति सुषुप्तिसिद्धिस्तत्सिद्धिश्चेत्युभयत्र फलं अवशेषो मूलकारणे शक्त्यात्मना स्थितिः पुनर्जन्मयोग्यतेति यावत् ॥ विमनः कलालयः सावशे
षः कलालयत्वात् सुषुप्तिवदिति पूर्वपक्षः विमतो निरवशेषः विद्याकृतत्वात् रज्जुविद्यया सर्पलयवदिति युक्त्युपेतश्रुत्या सिद्धान्तयति ब्रवीतीति ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भा· तदोकोग्रज्वलनं ॥ सृतेर्मार्गस्योपक्रमो नाडीप्रवेशनियमं संवक्तुं सूत्रभागव्याख्याद्वाराधिकरणविषयमाह ॥ तस्येति समुमूर्षोस्तेजोमात्रा इन्द्रियाणि ॥ अ·पा·
टी· तस्य हृदयस्याग्रं नाडीमुखं तस्य ज्वलनं भाविफलस्फुरणं प्रद्योतनाख्यं ॥ चक्षुषो वेत्यनियमश्रुतेस्तयोर्ध्वमायन्निति विशेषश्रुतेश्च संशयः ॥ कि ४।२

र·प्र· ४०३ तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥१७॥ समाप्ता प्रासंगिकी परविद्यागता चिन्ता संप्रति त्वपरविद्याविषयामेव चिंतामनुवर्त्तयति ॥ समाना चासृत्युपक्रमाद्विद्वदविदुषोरुत्क्रान्तिरित्युक्तं ॥ तमिदानीं सृत्युपक्रमं दर्शयति ॥ तस्योपसंहृतवागादिकलापस्योत्क्रमिष्यतो विज्ञानात्मन ओकः आयतनं हृदयं स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामतीति श्रुतेः ॥ तदग्रप्रज्वलनपूर्विका चक्षुरादिस्थानापादाना चोत्क्रांतिः श्रूयते ॥ तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निःक्रामति चक्षुषो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्य इति ॥ सा किमनियमेनैव विद्वदविदुषोर्भवति ॥ अथास्ति कश्चिद्विदुषो विशेषनियम इति विचिकित्सायां श्रुत्यविशेषादनियमप्राप्तावाचष्टे ॥ समानेपि विद्वदविदुषोर्हृदयाग्रप्रद्योतने तत्प्रकाशितद्वारत्वे च मूर्धस्थानादेव विद्वान्निष्क्रामति स्थानान्तरेभ्यस्त्वितरे कुतः विद्यासामर्थ्यात् ॥ यदि विद्वानपीतरवद्यतः कुतश्चिद्देहदेशादुत्क्रामेन्नैवोत्कृष्टं लोकं लभेत ॥ तत्रानर्थिकैव विद्या स्यात् ॥ तच्छेषगत्यनुस्मृतियोगाच्च ॥ विद्याशेषभूता च मूर्धन्यनाडीसंबद्धा गतिरनुशीलयितव्या विद्याविशेषेषु विहिता तामभ्यस्यंस्तयैव प्रतिष्ठत इति युक्तं ॥ तस्मात्हृदयालयेनैव ब्रह्मणा सूपासितेनानुगृहीतस्तद्भावं समापन्नो विद्वान्मूर्धन्ययैव शताधिकया शतादतिरिक्तयैकशततम्या नाड्या निष्क्राम रा·म· ४०३

सुपासकोप्यनुपासकवत् येन केनचिद्द्वारेण निर्गच्छति उत मूर्धन्यनाड्यैवेति ॥ अत्र पूर्वपक्षे विद्याकृतातिशयासिद्धिः ॥ सिद्धान्ते तत्सिद्धिरिति ।
विवेकः वचनादविभागवदनियम इति प्राप्ते सिद्धान्तयति ॥ आचष्ट इति येन केनचिन्मार्गेण निर्गतस्यापि ब्रह्मलोकप्राप्तौ विद्याशेषत्वेन मार्गा-
नुस्मृतिविधेः केवलादृष्टार्थत्वं स्यादतो न्वहं स्मृतेनैव मार्गेण गमनं युक्तमिति भावः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हार्दब्रह्मविद्विष्वक् नानाविधा अन्या नाड्यो अन्येषामित्यर्थः सुषुम्नाख्या नाडी हृदयान्निर्गता दक्षिणास्तितालुकंठं तत्स्तननासिकामध्यमभिभित्त्वा
ब्रह्मरंध्रमागता सूर्यरश्मिभिरेकीकृता ब्रह्मलोकमार्ग उपासकस्येति स्थितं ॥ १७ ॥ रश्म्यनुसारी ॥ प्रकरणशोधनपूर्वकमुपासकस्य रश्म्यनुसारि-
त्वविषयमाह अस्तीत्यादिना ॥ अथ यार्ध्याने एतदुत्क्रमणं यथा स्यात्तदा एतैरेव नाडीसंबद्धै रश्मिभिरुत्क्रामतीत्यर्थः ॥ अत्र संबंधस्य काल-

इतराभिरितरे ॥ तथा हि हार्दविद्यां प्रकृत्य समामनंति ॥ शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका ॥ तयोर्ध्वमा-
यन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवंतीति ॥ ॥ ॥ ॥ ॥ ॥ रश्म्यनुसारी ॥ १८ ॥ अस्ति हार्दविद्या ॥ अथ य-
दिदमस्मिन्ब्रह्मपुरे दहरं पुंडरीकं वेश्मेत्युपक्रम्य विहिता ॥ तत्प्रक्रियायामप्यथ यास्ता हृदयस्य नाड्य इत्युपक्रम्य सप्रपंचं ना-
डीरश्मिसंबंधमुक्त्वोक्तं ॥ अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्व आक्रमत इति ॥ पुनश्चोक्तं ॥ तयोर्ध्वमाय-
न्नमृतत्वमेतीति ॥ तस्माच्छताधिकया नाड्या निष्क्रामन् रश्म्यनुसारी निष्क्रामतीति गम्यते ॥ तत्किमविशेषेणैवाहनि रात्रौ
वा म्रियमाणस्य रश्म्यनुसारित्वमाहोस्विदहन्येवेति संशये सत्यविशेषश्रवणादविशेषेणैव तावद्रश्म्यनुसारीति प्रतिज्ञा-
यते ॥ १८ ॥ निशि नेति चेन्न संबंधस्य यावद्देहभावित्वाद्दर्शयति च ॥ १९ ॥ अस्त्वहनि नाडीरश्मिसंबंध इत्यहनि मृतस्यास्तु
रश्म्यनुसारित्वं रात्रौ तु प्रेतस्य न स्यात् नाडीरश्मिसंबंधविच्छेदादिति चेन्न ॥ नाडीरश्मिसंबंधस्य यावद्देहभावित्वात् याव-
द्देहभावी हि शिराकिरणसंपर्कः ॥ दर्शयति चैतमर्थं श्रुतिः ॥ अमुष्मादादित्यात्प्रतायंते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः
प्रतायंते तेऽमुष्मिन्नादित्ये सृप्ता इति ॥ निदाघसमये च निशास्वपि किरणानुवृत्तिरुपलभ्यते प्रतापादिकार्यदर्शनात् ॥ १ ॥

विशेषाश्रवणाद्रात्रौ रश्म्यभावाच्च संशयमाह ॥ तत्किमिति पूर्वोक्तनाडीसंबद्धरश्मीनामत्रोपजीव्यत्वात्संगतिः ॥ पूर्वपक्षे रात्रौ मृतस्य रश्मिप्राप्त्यर्थं
सूर्योदयप्रतीक्षास्तीति सिद्धांते नास्तीति मत्वा सिद्धांतं प्रतिजानीते ॥ अविशेषेणेति ॥ १८ ॥ पूर्वपक्षबीजमुपन्यस्य दूषयति ॥ निशीत्यादिना ॥ शिराना-
ड्यः ॥ प्रतायंते विस्तृता भवंति सृप्ताः संबद्धाः ॥ श्रुतसंबंधस्य रात्रौ सत्त्वे युक्तिमाह ॥ निदाघेति ॥ ॥ ॥ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ब्र.भा. नहि हेमन्तादिरात्रिषूष्मोपलब्धिः स्यादित्यत आह स्तोकेति सविता रात्रावप्यहर्दधातीति धारणाभिधानं स्तोकरश्म्यनुवृत्त्यभिप्रायमेवेत्यर्थः अ.पा.
टी. ॥ किंच यदि रात्रौ मृतस्य रश्मियोगं विनैवोर्ध्वगतिः स्यात्तदा रश्मिश्रुतेर्दिवामृतविषयतया संकोचः स्यादूर्ध्वगत्यभावे च विद्यायामप्रवृत्तिः ४।२
र.प्र. स्यात्तच्च प्रतीक्षयोर्ध्वगतिरिति वाच्यं रश्म्युदयात्प्राग्देहदाहे आदित्यप्रतीक्षावैयर्थ्यापातात्प्रतीक्षाश्रुतिविरोधाच्च तस्माद्यदाकदाचि।
५०४

स्तोकानुवृत्तेस्तु दुर्लक्ष्यत्वमृत्वन्तररजनीषु ॥ शैशिरेष्विव दुर्दिनेषु अहरेवैतद्रात्रौ विदधातीति चैतदेव दर्शयति यदि
च रात्रौ प्रेतो विनैव रश्म्यनुसारेणोर्ध्वमाक्रमेत रश्म्यनुसारानर्थक्यं भवेत् ॥ न ह्येतद्विशिष्याभिधीयते ॥ यो दिवा प्रैति स र-
श्मीनपेक्ष्योर्ध्वमाक्रमते यस्तु रात्रौ सोऽनपेक्ष्यैवेति ॥ अथ तु विद्वानपि रात्रिप्रायणापराधमात्रेण नोर्ध्वमाक्रमेत् पाक्षिकफ-
ला विद्येत्यप्रवृत्तिरेव तस्यां स्यात् ॥ मृत्युकालानियमात् ॥ अथापि रात्रावुपरतोऽहरागममुदीक्षेत ॥ अहरागमेऽपि अस्य कदा-
चिदरश्मिसंबंधार्हं शरीरं स्यात् पावकादिसंपर्कात् ॥ स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छतीति च श्रुतिरनुदीक्षां दर्श-
यति ॥ तस्मादविशेषेणैवेदं रात्रिंदिवं रश्म्यनुसारित्वं ॥७॥ ७ ॥ ७ ॥ ७ ॥१०॥१९॥ अतश्चायनेऽपि दक्षिणे ॥२०॥ अ-
तएवोदीक्षानुपपत्तेरपाक्षिकफलत्वाच्च विद्याया अनित्यकालत्वाच्च मृत्योर्दक्षिणायनेऽपि म्रियमाणो विद्वान्प्राप्नोत्ये-
व विद्याफलं ॥ उत्तरायणमरणप्राशस्त्यप्रसिद्धेर्भीष्मस्य च प्रतीक्षादर्शनात् ॥ आपूर्यमाणपक्षाद्यान् षडुदङ्ङेति मासां- श्री.
स्तानिति च श्रुतेरपेक्षितव्यमुत्तरायणमितीमामाशंकामनेन सूत्रेणापनुदति ॥ प्राशस्त्यप्रसिद्धिरविद्वद्विषया ॥ भीष्म ५०४

न्मृतस्य रश्मिप्राप्त्या झटिति ब्रह्मलोकप्राप्तिरिति सिद्धं ॥१९॥ एवं दक्षिणायने मृतो विद्वान् ((स्य प्रतिपालनमाचारप्रतिपालनार्थम् ॥
विद्याफलमाप्नोति न वेति विद्याया नित्यवत्फलश्रुतेरुत्तरायणप्राशस्त्यशास्त्राच्च संदेहे पूर्वोक्तहेतून्निर्दिशति ॥ अतश्चायनेऽपि दक्षिणे ॥
पूर्वपक्षमाशंक्यापनुदति ॥ उत्तरायणेत्यादिना ॥ अज्ञानामुत्तरायणे दैवान्मरणं चेत्प्रशस्तमित्यभिज्ञाभिवदनरूपाचारपरिपालनार्थं भी-
ष्मस्य प्रतीक्षा यान्षण्मासानिति श्रुतिस्तूत्तरायणदेवतापरेति वक्ष्यते ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तथा च देवतायाः सद्भासत्वात् विद्याया दक्षिणायनकालेपि तत्प्राप्तिरविरुद्धेति भावः॥२०॥ स्मृतिबलात्कालप्राधान्यं शंकते॥ ननु चेति
॥ श्रौतदहराद्युपासकस्यास्माभिः कालानपेक्षोक्तास्मार्ते योगिनां तु कालापेक्षा स्मृतावुच्यत इत्यविरोधमाह योगिन इति योगी दहराद्युपास
क एव स्मृत्युक्तः किं न स्यादित्यत आह स्मार्ते चेति भगवदाराधनबुद्ध्यानुष्ठितं कर्मयोगः॥ अनाश्रितः कर्मफलं कार्यं कर्म करोति यः॥ स सं
न्यासी च योगी चेति स्मृतेः॥ धारणापूर्वकोऽकर्तृत्वानुभवः सांख्यं इंद्रियाणींद्रियार्थेषु वर्तंत इति धारयन्निति स्मृतेः॥ ननु श्रुतिस्मृत्योर्भि

पितृप्रसादलभ्यस्वल्कंदमृत्युताख्यापनार्थं च॥ अतस्त्वर्थं वक्ष्यति आतिवाहिकास्तल्लिंगादिति॥२०॥ ननु च यत्र
काले त्वनावृत्तिमावृत्तिं चैव योगिनः॥ प्रयाता यांति तं कालं वक्ष्यामि भरतर्षभेति कालप्राधान्येनोपक्रम्याहरादिकाल
विशेषः स्मृतावपुनरावृत्तये नियमितः कथं रात्रौ दक्षिणायने वा प्रयातो नावृत्तिं यायादिति॥ अत्रोच्यते॥ योगिनः प्र
ति च स्मर्यते स्मार्ते चैते॥२१॥ योगिनः प्रति चायमहरादिकालविनियोगोऽनावृत्तये स्मर्यते॥ स्मार्ते चैते योगसांख्ये
न श्रौते॥ अतो विषयभेदात् प्रमाणविशेषाच्च नास्य स्मार्तस्य कालविनियोगस्य श्रौतेषु विज्ञानेष्ववतारः॥ नन्वग्निर्ज्यो
तिरहः शुक्लः षण्मासा उत्तरायणं॥ धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनमिति च॥ श्रौतावेतौ देवयानपितृ
याणौ प्रत्यभिज्ञायेते स्मृतावपीति उच्यते॥ तं कालं वक्ष्यामीति स्मृतौ कालप्रतिज्ञानाद्विरोधमाशंक्य परिहार उक्तः॥ यदा
पुनः स्मृतावपि अग्न्याद्या देवता एवातिवाहिका गृह्यंते तदा न कश्चिद्विरोध इति॥२१॥११॥ इति श्रीशंकरभगवत्पादकृतौ
चतुर्थाध्यायस्य द्वितीयः पादः समाप्तः॥ॐ

न्नार्थत्वमयुक्तं प्रत्यभिज्ञाविरोधादिति शंकते नन्वग्निरिति कालाग्रहिणं प्रति भिन्नार्थत्वम्
क्तं॥ यदि तु श्रौतार्थप्रत्यभिज्ञया कालशब्दो देवतापरस्तर्ह्यैकार्थ्यमेवेति समाध्यर्थः तस्माद्विद्यासामर्थ्यात्सर्वदैव दृष्टं गतस्य उपासकस्य फल
प्राप्तिरिति सिद्धं॥२१॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदानंदकृतौ श्रीमच्छारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां चतु-
र्थाध्यायस्य द्वितीयः पादः समाप्तः॥ भाष्य॥२१०॥ टीका॥१३५॥ सर्व॥३४५॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥इतिशारीरकसूत्रभाष्येरत्नप्रभायांचतुर्थाध्यायस्यद्वितीयपादःसमाप्तः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥ अथ शारीरकसूत्रभाष्ये रत्नप्रभायां चतुर्थोध्यायस्य तृतीयपादः प्रारम्भः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्री.भा. श्रीगणेशायनमः॥ एवंउत्क्रांतिंनिरूप्यतत्साध्यंमार्गंगंतव्यंचनिरूपयितुंपादमारभते॥ अर्चिरादिनातत्प्रथितेः वृत्तानुवादपूर्वकमाद्याधि- अ.पा. ४३
प्र.टी. करणस्यविषयंमार्गमाह॥ आसृतीति विरजाविरजसः निष्पापाइत्यर्थः श्रुतिविप्रतिपत्त्यासंशयः॥ पूर्वंयदाकदाचिन्मृतस्यापिफलप्राप्ति-
१०६ रुक्तातद्दृष्टेनकेनचिन्मार्गेणागतिरितिपूर्वपक्षफलंविकल्पः सिद्धांतेमार्गैक्यमितिविवेकः उपासनाभेदात्तच्छेषत्वेनध्येयानांमार्गाणांभेदः

॥अर्चिरादिनातत्प्रथितेः॥ १॥ आसृत्युपक्रमात्समानोत्क्रांतिरित्युक्तं॥ सृतिस्तुश्रुत्यंतरेष्वनेकधाश्रूयते॥ नाडीरश्मिसं-
बंधेनैका॥ अथैतैरेवरश्मिभिरूर्ध्वआक्रमतइति॥ अर्चिरादिकैकातेर्चिषमभिसंभवंत्यर्चिषोहरिति॥ सएतंदेवयानंपंथान-
मापद्याग्निलोकमागच्छतीत्यन्या॥ यदावैपुरुषोस्माल्लोकात्प्रैतिसवायुमागच्छतीत्यपरा॥ सूर्यद्वारेणतेविरजाःप्रयांतीतिचाप-
रा॥ तत्रसंशयः॥ किंपरस्परभिन्नाएताःसृतयःकिंवैकैवानेकविशेषणेति॥ तत्रप्राप्तंतावद्भिन्नाएवैताःसृतयइतिभि-
न्नप्रकरणस्थत्वात्॥ भिन्नोपासनाशेषत्वाच्च॥ अपिचअथैतैरेवरश्मिभिरित्यवधारणमर्चिराद्यपेक्षायामुपरुध्येत॥ त्वरावच-
नंचपीड्येतसयावत्क्षिप्येन्मनस्तावदादित्यंगच्छतीति॥ तस्मादन्योन्यभिन्नाएवैतेपंथानइति॥ एवंप्राप्तेऽभिदध्महेऽर्चिरादिनेति॥ स-
र्वोब्रह्मप्रेप्सुरर्चिरादिनैवाध्वनारंहतीतिप्रतिजानीमहे कुतः॥ तत्प्रथितेः॥ प्रथितोह्येषमार्गःसर्वेषांविदुषां॥ तथाहिपंचाग्निविद्या-
प्रकरणेयेचामीअरण्येश्रद्धांसत्यमुपासतइतिविद्यांतरशीलिनामपिअर्चिरादिकासृतिःश्राव्यते॥ स्यादेतत्॥ यासुविद्या-
सुनकाचिद्गतिरुच्यतेतास्वियमर्चिरादिकोपतिष्ठतांयासुत्वन्याश्राव्यतेतासुकिमित्यर्चिराद्याश्रयणमिति॥ अत्रोच्यते॥ भवे-
देतदेवंयद्यत्यंतभिन्नाएवैताःसृतयःस्युः॥ एकैवत्वेषासृतिरनेकविशेषणाब्रह्मलोकप्रतिपादिनीक्वचित्केनचिद्विशेषणेनोप- एम ४०६
लक्षितेतिवदामः सर्वत्रैकदेशप्रत्यभिज्ञानादितरेतरविशेषणविशेष्यभावोपपत्तेः॥

एवकाराच्चकिंचमार्गभेदेसत्यस्मादयंमार्गो-

त्वरयाप्रापकइतियुक्तंनमार्गैक्यमित्यर्थः उपासनाभेदेऽप्युपास्यब्रह्मैक्यवन्मार्गैक्यंअविरुद्धमितिसिद्धांतयत्येवमितितस्यमार्गस्यप्रसिद्धत्वादितिहेत्व-
र्थः। येचेत्यविशेषश्रुतिरश्रुतगतिविद्याविषयेतिमार्गभेदंशंकते॥ स्यादेतदिति॥ एकस्यैवमार्गस्यानेकान्यर्च्यादीनिविशेषणानीत्युक्तेलाघवान्मार्ग-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रत्यभिज्ञानाच्चेति समाध्यर्थः गंतव्यैकत्वं विवृणोति तथा हीति परावतो दीर्घायुषो हिरण्यगर्भस्य परा दीर्घाः समाः संवत्सरान् संति कार्यब्रह्मणो या जितिः सर्व त्र जयः व्यष्टिर्व्याप्तिः तां लभंत इत्यर्थः एवं गंतव्यैकत्वप्रत्यभिज्ञायां मार्गैक्यनिश्चयात् प्रकरणभेदोऽप्रयोजक इत्युक्तं संप्रत्येवकारत्वरावचनयोर्गतिमा ह। पतित्यादिना रात्रौ सूर्यरश्म्यभावाद्विदुषो रश्म्ययोगप्राप्तौ तन्निरासार्थ एवकारेणान्यव्यावृत्त्यर्थः यथा लौकिकमार्गे विलंबस्तथा अर्चिरादौ नेति त्व

प्रकरणभेदेऽपि हि विद्यैकत्वे भवतीतरेतरविशेषणोपसंहारवद्गतिविशेषणानामप्युपसंहारः॥ विद्याभेदेऽपि तु गत्येकदेशप्रत्य भिज्ञानाद्गंतव्याभेदाच्च गत्यभेद एव॥ तथा हि ते तेषु ब्रह्मलोकेषु पराः परावतो वसंति॥ तस्मिन्वसंति शाश्वतीः समाः॥ या ब्रह्मणो जितिर्या व्यष्टिस्तां जितिं जयंति तां व्युष्टिं व्यश्नुते॥ तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविंदंतीति च तत्र तत्र तदेवैकं फलं ब्रह्मलोकप्राप्तिलक्षणं प्र दर्श्यते॥ यत्त्वेतेरेवेत्यवधारणमर्चिराद्याश्रयणे तस्यादिति नैष दोषः॥ रश्मिप्राप्तिपरत्वादस्य॥ नह्येक एवशब्दो रश्मींश्च प्रापयितुमर्हत्यर्चि रादींश्च व्यावर्तयितुं॥ तस्माद्रश्मिसंबंध एवायमवधार्यत इति द्रष्टव्यं॥ त्वरावचनं त्वर्चिराद्यपेक्षायामपि गंतव्यांतरापेक्षयाक्षिप्रार्थ त्वान्नोपरुध्यते यथा निमिषमात्रेणात्रागम्यत इति॥ अपि चार्थेतयोः पथोर्नैकतरेणचनेति मार्गद्वयभ्रष्टानां कष्टं तृतीयं स्थानमा चक्षाणा पितृयाणव्यतिरिक्तमेकमेव देवयानमर्चिरादिपर्वाणं पंथानं प्रथयति॥ भूयांस्यर्चिरादिस्रुतौ मार्गपर्वाण्यल्पीयांसि त्वन्य त्र भूयसां चानुगुण्येनाल्पीयसां नयनं न्याय्यं इत्यतोऽप्यर्चिरादिना तत्प्रथितेरित्युक्तं॥ ——————————— ॥२॥ वायुमब्दादविशेष विशेषाभ्यां॥३॥ केन पुनः सन्निवेशविशेषेण गतिविशेषणानामितरेतरविशेषणविशेष्यभाव इति॥ तदेतत्सुहृद्भूत्वाचार्यो ग्रथयति॥ स एतं देवयानं पंथानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स इंद्रलोकं स प्रजापतिलोकं स ब्रह्मलोकमिति कौषीत किनां देवयानः पंथाः पठ्यते॥ तत्रार्चिरग्निलोकशब्दौ तावदेकार्थौ ज्वलनवचनत्वादिति नात्र सन्निवेशक्रमः कश्चिदन्वेष्यः॥ ॥२॥ एवचनोपपत्ति

रित्यर्थः॥ मार्गैक्ये लिंगमाह॥ अपि चेति॥ शुभमार्गबाहुल्ये तृतीयस्थानोक्तिर्न स्यादिति भावः उत्तरमार्गैक्येऽप्यर्चिरादिनेति विशेषणे को हेतुरित्यत आह॥ भू यांसीति॥२॥ उक्तं मार्गस्यैक्यमुपजीव्य पर्वक्रममाह॥ वायुमब्दात्॥ अर्चिरादिष्वस्मादयमनंतर इति क्रमेण विशेषणविशेष्यभाव उच्यत इत्यधिकरणस्य तात्प

अत्राग्न्यनंतरं पठितो वायुर्विषयः सकिंअर्चिरात्मकाग्नेरनंतरं उत संवत्सरात्पर इति पाठाद्दृश्यमाणविशेषश्रुतेश्च संशये सिद्धांतमेवोपक्रमते उच्यत इति पूरुष उपासकोस्माल्लोकाद्देहात्प्रैति निर्गच्छति तस्मै प्राप्ताय पुरुषाय स वायुस्तत्र स्वात्मनि विजिहीते छिद्रं करोति तेन वायुदत्तेन रथचक्रच्छिद्रतुल्येन द्वारेणोर्ध्वमादित्यं गच्छतीति श्रुत्यर्थः॥ इदानीं पूर्वपक्षमाह॥ कस्मात्पुनरिति॥ पाठबलादर्चिषोनंतरो वायुरित्यर्थः कौषीतकिनां पाठमात्रं न क्रमविशेषवाचीकश्चिच्छ

वायुस्त्वर्चिरादौ वर्त्मनि न श्रुतः कतमस्मिन्स्थाने संनिवेशयितव्य इति॥ उच्यते तेर्चिषमभिसंभवंत्यर्चिषो हरह्न आपूर्यमाणपक्ष मापूर्यमाणपक्षाद्यान्षडुदङेति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमित्यत्र संवत्सरात्परां चमादित्यादर्वाचं वायुमभिसंभवंति॥ कस्मात्॥ अविशेषविशेषाभ्यां॥ तथा हि स वायुलोकमित्यविशेषोपदिष्टस्य वायोः श्रुत्यंतरे विशेषोपदेशो दृश्यते॥ यदा वै पुरुषोस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्व आक्रमते स आदित्यमागच्छतीत्येतस्मादादित्याद्वायोः पूर्वत्वदर्शनाद्विशेषादब्दादित्ययोरंतराले वायुर्निवेशयितव्यः॥ कस्मात्पुनरग्नेः परत्वदर्शनाद्विशेषादर्चिषोनंतरं वायुर्न निवेश्यते॥ नैषोस्ति विशेष इति वदामः॥ ननूदाहृता श्रुतिः स एतं देवयानं पंथानमापद्याग्निलोकमागच्छति स वायुलोकमित्युच्यते॥ केवलोत्र पाठः पौर्वापर्येणावस्थितो नात्र क्रमवचनः कश्चिच्छब्दोस्ति॥ पदार्थोपदर्शनमात्रं ह्यत्र क्रियते॥ एतमेतं चागच्छतीति॥ इतरत्र पुनर्वायुप्रदत्तेन रथचक्रमात्रेण छिद्रेणोर्ध्वमाक्रम्यादित्यमागच्छतीत्यवगम्यते क्रमस्तस्मात्सूक्तं विशेषविशेषाभ्यामिति॥ वाजसनेयिनस्तु मासेभ्यो देवलोकं देवलोकादादित्यमिति समामनंति॥ तत्रादित्यानंतर्याय देवलोकाद्वायुमभिसंभवेयुः॥ वायुमब्दादिति तु छांदोग्यश्रुत्यपेक्षयोक्तं छांदोग्यवाजसनेयकयोस्त्वेकत्र देवलोको न विद्यते परत्र संवत्सरस्तत्र श्रुतिद्वयप्रत्ययादुभावप्युभयत्र ग्रथयितव्यौ॥ तत्रापि माससंबंधात्संवत्सरः पूर्वः पश्चिमो देवलोक इति विवेक्तव्यम्॥२॥

११ ब्दोस्ति काण्वानां तु तेनेत्यूर्ध्व इति च शब्दाभ्यां क्रमनिश्चयात्पाठबाध इति सिद्धांतार्थः अस्त्वर्चिरादिमार्गे छांदोग्यस्थे संवत्सरपाठाद्वायोरब्दात्परत्वं वाजिश्रुतिस्थे तु संवत्सरस्याश्रुतेः कथमब्दात्परो वायुरित्यत आह वाजेति नहि देवलोकाद्वायुमिति सूत्रं स्यादित्यत आह॥ वायुमब्दादिति त्विति संवत्सरस्य मासावयवित्वान्मासानंतर्यं संवत्सरात्परो देवलोकस्ततः परो वा

१८ युर्वायोः पर आदित्य इति श्रुतिद्वये क्रमो निष्पन्नस्तेनेति तृतीयाश्रुत्या वायोरादित्यपूर्वत्वावगमादिति सूत्रे तु वायुपदं देवलोकपूर्वकवायुपरमिति स्थितं॥२॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवंकौषीतकिभिरग्न्यनंतरंपठितस्यवायोःस्थानमुक्त्वावाय्वनंतरंपठितस्यवरुणस्यार्चिरादिमार्गेस्थानमाहतडितोधिवरुणःसंबंधात्पठितो
वरुणादिर्मार्गपर्वत्वेनसंबध्यतेनवेतिसंदेहेर्चिषोहरित्यादिपंचम्यार्चिरादीनांक्रमेणमार्गपर्वतयाबद्धत्वाद्वायोरिवस्थानविशेषश्रुत्यभावादत्रअस्या

तडितोधिवरुणःसंबंधात्॥३॥आदित्याच्चंद्रमसंचंद्रमसोविद्युतमित्यस्याविद्युतउपरिष्टात्सवरुणालोकमित्ययंवरु
णःसंबध्यते॥अस्तिहिसंबंधोविद्युद्वरुणयोः॥यदाहिविशालाविद्युतस्तीव्रस्तनयित्नुनिर्घोषाजीमूतोदरेषुप्रनृत्यंतिअथापः
प्रपतंति॥विद्योततेस्तनयतिवर्षिष्यतिवाइतिचब्राह्मणं॥अपांचाधिपतिर्वरुणइतिश्रुतिस्मृतिप्रसिद्धिः॥वरुणादधी
इंद्रप्रजापतीस्थानांतराभावात्पाठसामर्थ्याच्चागंतुकत्वादपिवरुणादीनामंतएवनिवेशोवैशेषिकस्थानाभावाद्धिविद्युत्वा
त्यार्चिरादिवर्त्मनि॥३॥आतिवाहिकास्तल्लिंगात्॥४॥तेष्वेवार्चिरादिषुसंशयःकिमेतानिमार्गचिन्हानि।उतभोगभूमयो
थवा‾‾ नेतारोगंतॄणामिति॥तत्रमार्गलक्षणभूताअर्चिरादयइतितावत्प्राप्तंतत्स्वरूपत्वादुपदेशस्य॥यथाहिलो
केकश्चिद्ग्रामंनगरंवाप्रतिष्ठासमानोनुशिष्यतेगछेतस्त्वममुंगिरिंततोन्यग्रोधंततोनदींततोग्रामंततोनगरंवाप्राप्स्य
सीति॥एवमिहाप्यर्चिषोहरन्हआपूर्यमाणपक्षंइत्याह॥अथवाभोगभूमयएताइतिप्राप्तं॥तथाहि॥लोकशब्देना
ग्न्यादीननुबध्नातिअग्निलोकमागछतीत्यादि॥लोकशब्दश्चप्राणिनांभोगायतनेषुभाष्यते॥मनुष्यलोकःपितृलो
कोदेवलोकइतिच॥तथाचब्राह्मणंअहोरात्रेषुते‾ लोकेषुसज्जंतइत्यादितस्मान्नातिवाहिकाअर्चिरादयोऽचेतनत्वा
दृष्यतेषामातिवाहिकत्वानुपपत्तिः॥चेतनाहिलोकेराजनियुक्ताःपुरुषादुर्गेषुमार्गेष्वतिवाह्यानतिवाहयंतीति॥३॥

नभा१

नोवरुणादिर्नसंबंध्यतइतिप्राप्तेसिद्धांतमाह॥आदित्यादिति॥अपांविद्युत्कार्यत्वेनसंबंधेमोहविद्योततइति॥वरुणस्याद्वाराविद्युत्संबंधादागंतुकानाम
मंतेनिवेशइतिन्यायाच्चविद्युदानंतर्येसतियथापाठमिंद्रप्रजापत्योःक्रमइत्यर्थः॥३॥एवमर्चिरादीनांक्रमंनिरूप्यस्वरूपंनिरूपयति॥आतिवाहिकास्तल्लिंगा
त्चिन्हनिर्देशसाम्याल्लोकशब्दाच्चेतनत्वलिंगाच्चसंशयः॥आद्यपक्षद्वयंपूर्वपक्षः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा॰भा॰ ॥ अर्चिरादयो विद्युदंतास्तेन तेनानेतारश्चामानवपुरुषेण नेत्रा सह पठितत्वादिति सिद्धांतयत्येवमित्यादिना यथाश्रुत्यमानवस्यास्तु नेतृत्वं नार्चि अ॰पा॰
र॰प्र॰टी॰ रादीनामिति शंकते॥ तद्वचनमिति पुरुषस्यामानवत्वं नेतृत्वं चेत्युभयपरत्वे वाक्यभेदः स्यादतोऽर्चिरादिपदैर्नेतार एवमानवाः प्रकृताः प्रकरण ४ ३
४०८ बलाद्विद्युदनंतरं मानवस्य नेतुः प्राप्तौ प्रकरणप्राप्तनेतृत्वानुवादेनामानवत्वमेकमेव प्रतिपाद्यत इति वक्तव्यमित्याह॥ नेति नेतृप्रकरणानंगीकारे
त्वमानवः पुरुषो गमयतीति वाक्यं भिद्येत अमानवत्ववन्नेतृत्वस्याप्यप्राप्तेरिति भावः॥ ४॥ नेतृत्वानुवादस्लिंगस्यानुग्राहकन्यायपरं सूत्रं गृह्णाति॥ नन्वि

एवं प्राप्ते ब्रूमः॥ आतिवाहिका एवैते भवितुमर्हंति॥ कुतस्तल्लिंगात्तथाहि चंद्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयतीति सिद्धवद्गमयितृत्वं दर्शयति॥ तद्वचनं तद्विषयमेवोपक्षीणमिति चेन्न प्राप्तमानवत्वनिवृत्तिपरत्वाद्विशेषणस्य॥ यद्यर्चिरादिषु पुरुषा गमयितारः प्राप्तास्ते च मानवास्ततो युक्तं तन्निवृत्त्यर्थं पुरुषविशेषणममानव इति॥ ४॥ ननु लिंगमात्रमगमकं न्यायाभावात् नैष दोषः॥ उभयव्यामोहात्तत्सिद्धेः॥ ५॥ येनावरार्चिरादिमार्गगास्ते देहवियोगात्संपिंडितकरणग्रामा इत्यस्वतंत्राः॥ अर्चिरादीनामप्यचेतनत्वादस्वातंत्र्यमित्यतोऽर्चिराद्यभिमानिनश्चेतना देवताविशेषा अतियात्रायां नियुक्ता इति गम्यते॥ लोकेऽपि हि मत्तमूर्छितादयः संपिंडितकरणाः परप्रयुक्तवर्त्मानो भवंति॥ अनवस्थितत्वादप्यर्चिरादीनां न मार्गलक्षणत्वोपपत्तिः॥ न हि रात्रौ प्रेतस्याह्नः स्वरूपाभिसंभव उपपद्यते॥ न च प्रतिपालनमस्तीत्युक्तं पुरस्तात्॥ ध्रुवत्वात्तु देवतात्मनां नायं दोषो भवति॥ अर्चिरादिशब्दता चैषामर्चिराद्यभिमानादुपपद्यते॥ अर्चिषोऽहरित्यादिनिर्देशस्त्वातिवाहिकत्वेऽपि न विरुध्यते॥ अर्चिषा हेतुना अहरभिसंभवति॥ अह्ना हेतुना पूर्यमाणपक्षमिति॥ ॥

ति॥ यद्यनेतारोऽचेतना एवार्चिरादयः तर्हि मार्गनेत्रोरुभयोरपि व्यामोहादस्वतंत्रत्वादूर्ध्वगतिर्न स्यादतः स्वयंप्रयत्नशून्यश्चेतनानंतरेण नेय इति लौ
किकन्यायानुग्रहात्तत्सिद्धेर्नेतृत्वसिद्धेरुक्तलिंगं न्यायोपेतमिति सूत्रार्थः पूर्वपक्षद्वयं दूषयति॥ अनवस्थितत्वादित्यादिना॥ अर्चिरहरादीनामस्थिरत्वा
द्रात्र्यादौ मृतस्य प्रतीक्षा नास्तीत्युक्तत्वाच्च न मार्गचिह्नत्वं भोग्यत्वं वा देवतात्वे त्वस्थिरत्वदोषो नास्तीत्यर्थः यत्तूपदेशस्वारस्याच्चिह्नत्वं भातीति तत्राह॥ वि

राम॰
४०८

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चिह्नत्वेनेतत्वसंशयाच्च वाक्यशेषान्निर्णय इत्याह अपि चेति॥ यदुक्तं लोकशब्दाद्भोग्यत्वमिति तन्नेत्याह॥ संपिंडितेनेति॥५॥ सूत्रांतरं गृह्णाति॥ कथं पुनरिति अमा-
नवो विद्युल्लोकमागतो वैद्युतस्तेनेत्यर्थः॥ श्रुतौ तु वैद्युतात्तौ लोकादित्यर्थः श्रुत्या वरुणादीनां नेतृत्वाभावेप्यनुग्राहकत्वेन मार्गांतर्भाव इति भावः॥ ६॥ एवं मार्गं निरू-

तथा च लोकप्रसिद्धेष्वप्यातिवाहिकेष्वेवंजातीयक उपदेशो दृश्यते गच्छ त्वमितो बलवर्माणं ततो जयसिंहं ततः कृष्णगुप्तमिति॥ अपि चोपक्र-
मे ते र्चिषमभिसंभवंतीति संबंधमात्रमुक्तं न संबंधविशेषः कश्चित् उपसंहारे तु स एतान्ब्रह्म गमयतीति संबंधविशेषोऽतिवाह्यातिवाहक-
त्वलक्षण उक्तस्तेन स एवोपक्रमेपीति निर्धार्यते॥ संपिंडितकरणत्वादेव च गंतॄणां न तत्रोपभोगसंभवः॥ लोकशब्दस्त्वनुपभुंजानेष्वपि गंतृषु ग-
मयितुं शक्यते॥ अन्येषां तल्लोकवासिनां भोगभूमित्वात् ततो ग्निस्वामिकं लोकं प्राप्तो ग्निनातिवाह्यते॥ वायुस्वामिकं प्राप्तो वायुनेति योजयितव्यं॥
॥५॥ कथं पुनरातिवाहिकत्वपक्षे वरुणादिषु तत्संभवः॥ विद्युतो ह्यधि वरुणादय उपक्षिप्ताः विद्युतस्त्वनंतरमाब्रह्मप्राप्तेरमानवस्यैव पुरुष-
स्य गमयितृत्वं श्रुतमिति॥ अत उत्तरं पठति॥ वैद्युतेनैव ततस्तच्छ्रुतेः॥६॥ ततो विद्युदभिसंभवनादूर्ध्वं विद्युदनंतरवर्तिनैवामानवेन पुरुषे-
ण वरुणलोकादिष्वतिवाह्यमाना ब्रह्मलोकं गच्छंतीत्यवगंतव्यं॥ तान्वैद्युतात्पुरुषो ऽमानवः स एत्य ब्रह्मलोकं गमयतीति तस्यैव गम-
यितृत्वश्रुतेः॥ वरुणादयस्तु तस्यैवाप्रतिबंधकरणेन साहाय्यानुष्ठानेन वा केनचिदनुग्राहका इत्यवगंतव्यं॥ तस्मात्साधूक्तमातिवा-
हिका देवतात्मानो र्चिरादय इति॥४॥६॥ कार्यं बादरिरस्य गत्युपपत्तेः॥७॥ स एतान्ब्रह्म गमयतीत्यत्र विचिकित्स्यते किं कार्य-
मपरं ब्रह्म गमयत्याहोस्वित्परमेवाविकृतं मुख्यं ब्रह्मेति॥ कुतः संशयः ब्रह्मशब्दप्रयोगाद्गतिश्रुतेश्च॥ तत्र कार्यमेव सगुणमप-
रं ब्रह्म एनान्गमयत्यमानवः पुरुष इति बादरिराचार्यो मन्यते॥ कुतः अस्य गत्युपपत्तेः अस्य हि कार्यस्य ब्रह्मणो गंतव्यत्वमुपपद्यते प्रदे-
शवत्त्वात् न तु परस्मिन्ब्रह्मणि गंतृत्वं गंतव्यत्वं गतिर्वावकल्प्यते सर्वगतत्वात्प्रत्यगात्मत्वाच्च गंतॄणां॥७॥

प्य गंतव्यं चिंतयति॥ कार्यं बाद-
रिरस्य गत्युपपत्तेः परब्रह्म गंतव्यमिति पूर्वपक्षे मार्गस्य मुक्त्यर्थता॥ कार्यब्रह्मेति सिद्धांते भोगार्थतेति मत्वा प्रथमं सिद्धांतमाह॥ तत्र कार्यमेवेति सर्वगतस्या-
पि प्रदेशांतरविशिष्टत्वेनाकाशस्य गंतव्यत्वं दृष्टं ब्रह्मणस्तु प्रत्यक्त्वान्न कथमपि गंतव्यतेत्यर्थः॥७॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा·भा· ब्रह्मलोकेष्विति बहुवचनलोकशब्दाधारसप्तमीश्रुतिभिर्गन्तव्यस्य परस्माद्ब्रह्मणो भेदः प्रतीयत इत्यर्थः ‖ नपुंसकब्रह्मशब्देन कारणवाचिना कार्यं लक्ष्यते गन्तव्यत्वेन न परं गन्तव्यमित्याह विशेषितत्वाच्चेति परब्रह्मणि भोग्यत्वोपचारो गौणः । अ·पा·
र·प्र·टी लोकश्रुतिरित्यर्थः ‖ ८ ‖ नपुंसकब्रह्मशब्देन कारणवाचिना कार्यं लक्ष्यते गन्तव्यत्वन्यायोपेतन बहुवचनाद्यनेकश्रुत्यनुग्रहाय ‖ ९ ‖ न चानावृत्तिलिंगात्परस्य गंत ४ ३
४०९

विशेषितत्वाच्च ‖ ८ ‖ ब्रह्मलोकान्गमयति ते तेषु ब्रह्मलोकेषु पराः परावतो वसंतीति च श्रुत्यंतरे विशेषितत्वात्कार्यब्रह्मविषयैव गतिरिति गम्यते ‖ नहि बहुवचनेन विशेषणं परस्मिन्ब्रह्मण्यवकल्पते ‖ कार्ये त्ववस्थाभेदोपपत्तेः संभवति बहुवचनं ‖ लोकश्रुतिरपि विकारगोचराया मेव सन्निवेशविशिष्टायां भोगभूमावंजसा गौणी त्वन्यत्र ब्रह्मैव लोकः एष संम्राडित्यादिष्वधिकरणाधिकर्त्तव्यनिर्देशोपि परस्मिन्ब्रह्म णि नांजसः स्यात्तस्मात्कार्यविषयमेवेदं नयनं ‖ ८ ‖ ननु कार्यविषयेपि ब्रह्मशब्दो नोपपद्यते ‖ समन्वये समस्तस्य हि जगतो जन्मादिकारणं ब्र ह्मेति स्थापितमित्यत्रोच्यते ‖ सामीप्यात्तु तद्व्यपदेशः ‖ ९ ‖ तुशब्द आशंकाव्यावृत्त्यर्थः ‖ परब्रह्मसामीप्यादपरस्य ब्रह्मणस्तस्मिन्नपि ब्रह्मश ब्दप्रयोगो न विरुध्यते ‖ परमेव हि ब्रह्म विशुद्धोपाधिसंबंधात्क्वचित्कैश्चिद्विकारधर्मैर्मनोमयत्वादिभिरुपासनायोपदिश्यमानमपरमिति स्थितिः ‖ ९ ‖ ननु कार्यप्राप्तावनावृत्तिश्रवणं न घटते ‖ नहि परस्मात्ब्रह्मणोन्यत्र क्वचिन्नित्यतां संभावयंति ‖ दर्शयति च देवयानेन प थाप्रस्थितानामनावृत्तिमेतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्त्तंत इति तेषामिह न पुनरावृत्तिरस्ति ‖ तयोर्ध्वमायन्नमृतत्वमेतीति । चेदत्र ब्रूमः ‖ कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ‖ १० ‖ कार्यब्रह्मलोकप्रलयप्रत्युपस्थाने सति तत्रैवोत्पन्नसम्यक्दर्शनाः संतस्तदध्यक्षेण हिरण्यगर्भेण सहातः परं परिशुद्धं विष्णोः परमं पदं प्रतिपद्यंत इति ‖ इत्थं क्रममुक्तिरनावृत्त्यादिश्रुत्यभिधानेभ्यो ऽभ्युपगंतव्या नह्यंजसैव गतिपूर्विका परप्राप्तिः संभवतीत्युपपादितं ‖ १० ‖ स्मृतेश्च ‖ ११ ‖ स्मृतिरप्येतमर्थमनुजानाति ‖ ब्रह्मणा स ह ते सर्वे संप्राप्ते प्रतिसंचरे ‖ परस्यांते कृतात्मानः प्रविशंति परं पदमिति ‖ तस्मात्कार्यब्रह्मविषया गतिः श्रूयत इति सिद्धांतः ‖ ११ ‖ ५ राम·
४०९

व्यता ‖ क्रममुक्त्या लिंगस्यान्यथा सिद्धेरिति भावः ‖ १० ‖ प्रतिसंचरो महाप्रलयः ‖ तस्मिन्प्राप्ते परस्य हिरण्यगर्भस्यांते समष्टिलिंगशरीररूपविकारा वसाने ब्रह्मलोकनिवासिनः कृतात्मानः शुद्धधियस्तत्रोत्पन्नसम्यक्धियः सर्वे ब्रह्मणा मुच्यमानेन सह परं पदं प्रविशंतीति योजना ‖ ११ ‖ ५ ‖

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवंसिद्धांतमुक्त्वातेननिरस्तंपूर्वपक्षमाह॥ कंपुनरित्यादिना॥ १२॥ दहरविद्यायांकठवल्लीषुपरब्रह्मप्रकरणेचतयोर्ध्वमायन्नितिगतिर्दर्शितासैवं।
ब्रह्मश्रुत्यमृतत्वलिंगाभ्यांप्रकरणाच्चपरविषयागतिरित्युक्तं॥ १३॥ संप्रतिप्रजापतेःसभांवेश्मप्राप्नुयामितिउपासकस्यमरणकालेकार्यप्राप्तिसंकल्पश्रुते
र्नपरंगंतव्यमितिशंकांनिरस्यतिनचकार्यइतिपरस्यप्रकृतत्वात्यशः पदस्यपरमात्मनामत्वप्रसिध्याशयः पदेनात्मोक्तिर्यश्आत्माब्राह्मणानामहंभवा

कंपुनःपूर्वपक्षमाशंक्यायंसिद्धांतःप्रतिष्ठापितःकार्यंबादरिरित्यादिनेति॥ सइदानींसूत्रैरेवोपप्रदर्श्यते॥ परंजैमिनिर्मुख्यत्वा
त्॥ १२॥ जैमिनिस्त्वाचार्यःसएतान्ब्रह्मगमयतीत्यत्रपरमेवब्रह्मप्रापयतीतिमन्यते॥ कुतःमुख्यत्वात्॥ परंहिब्रह्मब्रह्मशब्दस्यमु
ख्यमालंबनंगौणमपरं॥ मुख्यगौणयोश्चमुख्येसंप्रत्ययोभवति॥ १२॥ दर्शनाच्च॥ १३॥ तयोर्ध्वमायन्नमृतत्वमेतीतिचगति
पूर्वकममृतत्वंदर्शयति॥ अमृतत्वंचपरस्मिन्ब्रह्मण्युपपद्यते॥ नकार्येविनाशित्वात्कार्यस्य॥ अथयत्रान्यत्पश्यतितदल्पं
तन्मर्त्यमितिवचनात्परविषयैवचैषागतिः कठवल्लीषुपठ्यते॥ नहितत्रविद्यांतरप्रक्रमोस्ति॥ अन्यत्रधर्मादन्यत्राधर्मादि
तिपरस्यैवब्रह्मणःप्रक्रांतत्वात्॥ १३॥ नचकार्येप्रतिपत्त्यभिसंधिः॥ १४॥ अपिचप्रजापतेःसभांवेश्मप्रपद्यइतिनायंकार्यवि
षयःप्रतिपत्त्यभिसंधिः॥ नामरूपयोर्निर्वहितातेयदंतरातद्ब्रह्मेतिकार्यविलक्षणस्यपरस्यैवब्रह्मणःप्रकृतत्वाद्यशोहं
भवामिब्राह्मणानामितिचसर्वात्मत्वेनोपक्रमात्नतस्यप्रतिमाअस्तियस्यनाममहद्यश इतिचपरस्यैवब्रह्मणोयशोनाम
त्वप्रसिद्धेः॥ साचेयंवेश्मप्रतिपत्तिःगतिपूर्विकाहार्दविद्यायामुदिता॥ तदपराजितापूर्ब्रह्मणःप्रभुविमितंहिरण्मयमित्यत्र॥

मितयाराज्ञांयशोविशांयशइतिसार्वात्म्यलिंगाच्चपरप्राप्तिसंकल्पएवायमित्यर्थः॥ अस्तुवेश्मप्रतिपत्तीच्छापरब्रह्मविषयातथापिसाकथंगति
पूर्विकास्यादित्यतआहसाचेतितत्रब्रह्मलोकेविद्याहीनैरपराजितापूरस्तिब्रह्मणोहिरण्यगर्भस्यतेनैवप्रभुणाविमितंनिर्मितंहिरण्मयंवेश्मास्ति
तत्प्रतिपद्यतेविद्वानितिदहरविद्यायांगतिपूर्वकावेश्मप्राप्तिरुक्तातेनपरब्रह्मण्यपिवेश्मप्रतिपत्तिशब्दसामान्याद्गतिपूर्वकत्वंतस्याःसिध्यतीत्यर्थः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भा· ॥किंचपदगताविति धातुपाठात् वेश्मप्रपद्ये इत्यत्रमार्गापेक्षाभातीत्याह॥ परेरपीति॥ पूर्वपक्षमुपसंहरति तस्मादिति आद्यएवसिद्धांतपक्ष इति द्वि अ·पा·
·टी· कर्तुमुपक्रमतेनाविति॥ ब्रह्मशब्दमुख्यत्वादिहेतूनामाभासत्वंस्फुटयति॥ नहीति॥ गंतव्यत्वस्यब्रह्मलोकेस्थितिबहुवचनादेःसंकल्पादिवगंधादिदिव्य। ४ ३
१० भोगश्रुतेश्चपरब्रह्मण्यसंभवान्मुख्यार्थत्यागइत्यर्थः॥ यद्यप्येतद्वैसत्यकामपरंचापरंचब्रह्मेत्यादिश्रुतिप्रयोगसाम्याद्ब्रह्मशब्दउभयत्ररूढत।
यामुख्यएवतथापिपूर्णेपरस्मिन्नवयवार्थस्यनिरतिशयमहत्त्वस्यलाभादपरब्रह्मण्यमुख्यइत्यंगीकृतमितिमंतव्यं॥ यदुक्तंकठवल्लीषुप्रकरणब

परेरपिचगत्यर्थत्वान्मार्गापेक्षावसीयते॥ तस्मात्परब्रह्मविषयागतिःश्रूयतइतिपक्षांतरं॥ तावेतौद्वौपक्षावाचार्येणसूत्रितौगत्यु
पपत्त्यादिभिरेकोमुख्यत्वादिभिरपरः॥ तत्रगत्युपपत्त्यादयःप्रभवंतिमुख्यत्वादीनाभासयितुं॥ ननुमुख्यत्वादयोगत्युपपत्त्यादीनि।
त्याद्यएवसिद्धांतोव्याख्यातोद्वितीयःपूर्वपक्षः॥ नह्यसत्यपिसंभवेमुख्यस्यैवार्थस्यग्रहणमितिकश्चिदाज्ञापयिताविद्यते॥
परविद्याप्रकरणेपिचतत्स्तुत्यर्थंविद्यांतराश्रयगत्यनुकीर्तनमुपपद्यते॥ विष्वगन्याउत्क्रमणेभवंतीतिवत्॥ प्रजापतेःस
भांवेश्मप्रपद्यइतितुपूर्ववाक्यविच्छेदेनकार्येपिप्रतिपत्त्यभिसंधिर्नविरुध्यते॥ सगुणेपिचब्रह्मणिसर्वात्मत्वसंकीर्तनंसर्वकर्मा
सर्वकामइत्यादिवदवकल्पते॥ तस्मादपरविषयाएवगतिश्रुतयइति॥ केचित्पुनःपूर्वाणिपूर्वपक्षसूत्राणिभवंत्युत्तराणिसिद्धांत
सूत्राणीत्येतांव्यवस्थामनुरुध्यमानाःपरविषयाएवगतिश्रुतीःप्रतिष्ठापयंति॥ तदनुपपन्नंगंतव्यत्वानुपपत्तेर्ब्रह्मणः॥ यत्स
र्वगतंसर्वांतरंसर्वात्मकंचपरंब्रह्मआकाशवत्सर्वगतश्चनित्यइतिश्रुतिनिर्धारितविशेषंतस्यगंतव्यतानकदाचिदप्युपपद्यते॥ राम·
दंविश्वमिदंवरिष्ठंइत्यादिश्रुतिनिर्धारितविशेषंतस्यगंतव्यतानकदाचिदप्युपपद्यते॥ ((लाद्गतिःपरविषयेतितत्राहपरेतियथाविद्यासं ४१०
बद्धस्तुत्यर्थंतदसंबद्धनाडीनिरकीर्तनंतथापरविद्यास्तुत्यर्थंतत्प्रकरणेप्यपरविद्याश्रयगतिसंकीर्तनंयुज्यतेगतिंविनापिहिपरविद्यानिरतिश
यफलातस्यांत्वपरविद्याफलंगतिसाध्यमंतर्भवतीतिस्तुतिलाभादित्यर्थः॥ यदप्युक्तंप्राप्तिसंकल्पोपिप्रकृतपरविषयइतितत्रेत्याह॥ प्रजापतेरितिप्रजापतिस
भावेश्मश्रुतिमित्तसंघातात्मकपाकेनचप्रकरणंवाध्यंयशोहमितिसार्वात्म्यंतूपासनार्थमपरब्रह्मण्युपयुज्यतइत्यर्थः॥ स्वपक्षमुक्त्वापरमतंदूषयतिकेचि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥सर्वगतस्य स्वात्मभूतस्यापि ब्रह्मणः संसारदेशाद्देशांतरेण तत्कालात्कालांतरेण विशिष्टतया गंतव्यत्वं स्यादिति पृथिवीवयोर्दृष्टांताभ्यां शंकते॥
नन्विति पतनं विनैव प्राप्तं अनन्यत्वं अवस्थातद्वतोरभेदात्स्वात्मभूतत्वं॥ ननु युक्तं भूवयसोः प्राप्तयोरपि देशांतरकालांतरविशिष्टत्वेन गंतव्यत्वं तयो
र्गंतृभिन्नत्वात् ब्रह्मणस्तु गंतृभिन्नस्य कथं गंतव्यत्वं तत्राह सर्वशक्तीति यथा प्राप्ता भूः सा न गंतव्या यच्च गंतव्यं देशांतरं तन्न प्राप्तमिति कुतः प्राप्तस्य गं
तव्यता वयसोपि कालांतरेभिव्यक्तिमात्रं न गंतव्यत्वमिति वस्तुगतिः॥ अंगीकृत्य विशिष्टभूवयसोर्गंतव्यतां परब्रह्मणो देशकालवैशिष्ट्याभा

नहि गतमेव गम्यते॥ अन्यो ह्यन्य द्गच्छतीति प्रसिद्धं लोके॥ ननु लोके गतस्यापि गंतव्यता देशांतरविशिष्टा दृष्टा॥ यथा पृथिवीस्थ
एव पृथिवीं देशांतरद्वारेण गच्छतीति॥ तथाऽनन्यत्वेपि बालस्य कालांतरविशिष्टं वार्धकं स्वात्मभूतमेव गंतव्यं दृष्टं तद्वद्ब्रह्मणोपि स
र्वशक्त्युपेतत्वात्कथंचिद्गंतव्यता स्यादिति॥ न प्रतिषिद्धसर्वविशेषत्वाद्ब्रह्मणः॥ निष्कलं निष्क्रियं शांतं निरवद्यं निरंजनं॥
अस्थूलमनण्वह्रस्वमदीर्घमलोहितं सबाह्याभ्यंतरो ह्यजः॥ स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म स एष ने
ति नेत्यात्मेत्यादिश्रुतिस्मृतिन्यायेभ्यो न देशकालादिविशेषयोगः परमात्मनि कल्पयितुं शक्यते॥ येन भूप्रदेशवयोवस्थान्यायेना
स्य गंतव्यता स्यात्॥ भूवयसोस्तु प्रदेशावस्थादिविशेषयोगादुपपद्यते देशकालविशिष्टा गंतव्यता॥ जगदुत्पत्तिस्थितिप्रलयहेतुत्व
श्रुतेरनेकशक्तित्वं ब्रह्मण इति चेन्न विशेषनिराकरणश्रुतीनामनन्यार्थत्वादुत्पत्त्यादिश्रुतीनामपि समानमनन्यार्थत्वमिति चेन्न
तासामेकत्वप्रतिपादनपरत्वान्मृदादिदृष्टांतैर्हि सतो ब्रह्मण एकस्य सत्यत्वं विकारस्य चानृतत्वं प्रतिपादयच्छास्त्रं नोत्पत्त्यादिपरं भ
वितुमर्हति॥ कस्मात्पुनरुत्पत्त्यादिश्रुतीनां विशेषनिराकरणश्रुतिशेषत्वं न पुनरस्तीतरशेषत्वमितरासामिति॥ वान्न कथंचिदपि गंत
व्यतेत्याह नेत्यादिना॥ अनादिमत्परं ब्रह्मेत्याद्या स्मृतिः दृश्यविशेषस्य दृशिकल्पितत्वाद्दृगात्मनो निर्विशेषत्वेति न्यायः॥ सगुणमेव ब्रह्म सूत्रात्माऽपे
क्ष्या परं गंतव्यं निर्विशेषं तु नास्त्येवेति शंकते जगदुत्पत्तीति किं निर्विशेषस्यासत्वं मानाभावात्सविशेषश्रुतिविरोधाद्वा नाद्य इत्याह॥ नेति द्वितीयं शंक
ते उत्पत्त्यादीति सविशेषश्रुतीनां निर्विशेषश्रुतिशेषत्वान्न विरोध इत्याह नेति निर्विशेषश्रुतीनामेव सविशेषश्रुतिशेषत्वं किं न स्यादित्याह कस्मादिति॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तांसांस्तार्थं फलवत्त्वेन निराकांक्षत्वाच्छेषिता विशेषश्रुतीनां त्वफलत्वान्निषेध्यविशेषसमर्पणादिद्वारेण शेषत्वं फलवत्सन्निधावफलं तदङ्ग मिति न्यायादित्याह उच्यत इत्यादिना॥ न केवलं न्यायाच्छेषता किंतु श्रुत्यापीत्याह॥ प्रत्यक्षं त्विति तत्र मूलकारणे ब्रह्मण्येन तच्छुंगं जगदात्मकं कार्यमुत्पन्नमित्युपक्रम्य तेन शुंगेन सन्मूलमन्विच्छेत्युपसंहारे सत एव ज्ञेयत्वमुक्तं छांदोग्ये॥ तथा तैत्तिरीयकेपि जगज्जन्माद्युक्त्वा तद्ब्रह्म

उच्यते॥ विशेषनिराकरणश्रुतीनां निराकांक्षार्थत्वात्॥ नह्यात्मन एकत्वनित्यत्वशुद्धत्वाद्यवगतौ सत्यां भूयः काचिदाकांक्षोपजायते॥ पुरुषार्थसमाप्तिबुद्ध्युपपत्तेः॥ तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥ अभयं वै जनक प्राप्तोऽसि॥ विद्वान्न बिभेति कुतश्चन॥ एतं ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरवमित्यादिश्रुतिभ्यः॥ तथैव च विदुषां तुष्ट्यनुभवादिदर्शनात्॥ विकारानृताभिसंध्यपवादाच्च मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति॥ अतो न विशेषनिराकरणश्रुतीनामन्यशेषत्वमवगन्तुं शक्यते॥ नैवमुत्पत्त्यादिश्रुतीनां निराकांक्षार्थप्रतिपादनसामर्थ्यमस्ति॥ प्रत्यक्षं तु तासामन्यार्थत्वं समनुगम्यते॥ तथा हि॥ तत्रैतच्छुंगमुत्पतितं सोम्य विजानीहि नेदममूलं भविष्यतीत्युपन्यस्योदर्के सत एवैकस्य जगन्मूलस्य विज्ञेयत्वं दर्शयति॥ यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति च॥ एवमुत्पत्त्यादिश्रुतीनामैकात्म्यावगमपरत्वान्नानेकशक्तियोगो ब्रह्मणोऽतश्च गंतव्यत्वानुपपत्तिः॥ ॥ न तस्य प्राणा उत्क्रामंति ब्रह्मैव सन् ब्रह्माप्येतीति च परस्मिन् ब्रह्मणि गतिं निवारयति॥ तद्व्याख्यातं तत्स्पष्टो ह्येकेषामित्यत्र गतिकल्पनायां च गंता जीवो गंतव्यस्य ब्रह्मणोऽवयवो विकारो वाऽन्यो वा ततः स्यात् अत्यंततादात्म्ये गमनानुपपत्तेः॥ ९

ण एव ज्ञेयत्वं दर्शितमतः सृष्टिश्रुतीनां श्रुत्यैव निर्विशेषधीशेषताभातीत्यर्थः एवं ब्रह्मणो निर्विशेषत्वान्न गंतव्यतेति फलितमाह एवा मिति स्पष्ट इति निषेधाच्च परस्य न गंतव्यतेत्याह॥ न तस्येति॥ एवं गंतव्यालोचनया गतिं निरस्य गंत्रालोचनयापि निरस्यति गतिकल्पनायां चेत्या दिना भेदाभेदेन द्वौ कल्पावत्यंतभेदस्तृतीयः कल्पः न त्वत्यंताभेदकल्पः किमिति नोक्तस्तत्राहात्यंतेति· ॥ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कल्पत्रये किं दूषणमिति पृच्छति यद्येवमिति। कल्पद्वयेपि दोषांतरमाह विकारावयवपक्षयोश्चेति विकारावयवरूपजीवविशिष्टस्य ब्रह्मणः॥ स्थिरत्वाज्जीवानां गत्यागती न स्यातां न त्वचलानि स्थूलपाषाणस्थयोर्मंडूकपाषाणावयवयोश्चलनमस्तीत्यर्थः अस्माकं त्वज्ञानात्कल्पितोपा-
धिभिर्गत्यागतिविभ्रम इति भावः॥ तृतीयकल्पमनूद्य विकल्प्य दूषयति अथेत्यादिना अभेदस्तु निर्विरोधरूपो दोषो मम नास्तीति भेदाभेदवाद्याह॥

यद्येवं ततः किं स्यादत उच्यते॥ यद्येकदेशस्तेनैकदेशिनो नित्यप्राप्तत्वात्पुनर्ब्रह्मगमनमनुपपद्यते॥ एकदेशैकदेशित्वकल्प-
ना च ब्रह्मण्यनुपपन्ना निरवयवत्वप्रसिद्धेः॥ विकारपक्षेप्येतत्तुल्यं विकारेणापि विकारिणो नित्यप्राप्तत्वात्॥ न हि घटो मृदात्मतां परि-
त्यज्यावतिष्ठते॥ परित्यागे वाऽभावप्राप्तेः विकारावयवपक्षयोश्च तद्वतः स्थिरत्वाद्ब्रह्मणः संसारगमनमप्यनवक्लृप्तं॥ अथा-
न्य एव जीवो ब्रह्मणः सोऽणुर्व्यापी मध्यमपरिमाणो वा भवितुमर्हति॥ व्यापित्वे गमनानुपपत्तिर्मध्यमपरिमाणत्वे चाऽनित्यत्व-
प्रसंगोऽणुत्वे कृत्स्नशरीरवेदनानुपपत्तिः॥ प्रतिषिद्धे चाणुत्वमध्यमपरिमाणत्वे विस्तरेण पुरस्तात्परस्माच्चान्यत्वे जीवस्य त-
त्त्वमसीत्यादिशास्त्रबाधप्रसंगः॥ विकारावयवपक्षयोरपि समानोऽयं दोषः॥ विकारावयवयोस्तद्वतोऽनन्यत्वाद्दोष इति चेन्न मु-
ख्यैकत्वानुपपत्तेः॥ सर्वेषु चैतेषु पक्षेष्वनिर्मोक्षप्रसंगः संसार्यात्मत्वानिवृत्तेः निवृत्तौ वा स्वरूपनाशप्रसंगो ब्रह्मात्मत्वानभ्युपग-
माच्च यत्तु कैश्चित्कल्प्यते नित्यनैमित्तिकानि कर्माण्यनुष्ठीयंते प्रत्यवायानुत्पत्तये॥ काम्यानि प्रतिषिद्धानि च परिह्रियंते स्वर्गनरकान-
वाप्तये सांप्रतदेहोपभोग्यानि च कर्माण्युपभोगेनैव क्षप्यंत इत्यतो वर्तमानदेहपातादूर्ध्वं देहांतरप्रतिसंधानकारणाभावात्स्वरूपा-
वस्थानलक्षणं कैवल्यं विनापि ब्रह्मात्मतयैवंवृत्तस्य सेत्स्यतीति॥ तदसत्प्रमाणाभावात्॥ न ह्येतच्छास्त्रेण केनचित्प्रतिपादितं मोक्षा- त्यानि२ (र्थीत्यं समाचरेदिति।

विकारावयवयोरिति भिन्नयोरभेदो मुख्यो न युक्तः विरोधादिति परिहरति॥ नेति किं च पक्षत्रयमप्ययुक्तं संसारित्वस्य
तात्त्विकजीवभावस्य नाशे तात्त्विकजीवस्वरूपनाशप्रसंगात् न चास्माभिर्विवर्तत्वया ब्रह्मात्मत्वं जीवस्य तात्त्विकरूपमंगीकृतं यदस्य संसारनाशेपि न नश्ये-
दित्याह॥ सर्वेष्विति ननु किं ब्रह्मत्वेन संसाराभावः किल मोक्षः स च कर्माभावमात्रेण सेत्स्यतीति कर्मजडानां मतमुद्भाव्य निरस्यति यत्त्वित्यादिना॥ तदिति॥ एवंवृ-
त्तं मोक्षहेतुरित्यस्मिन्नर्थे मानाभावादित्यर्थः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा·भा· ॥ तर्कएवमानमित्यतआह॥ नचैतत्तर्कयितुमितिननुतवाप्येतत्तर्कमात्रमेकस्मिन्जन्मन्यनेकविरुद्धफलानांकर्मणांभोगायोगादस्त्यवशि अ·पा·
र·प्र·टी· ष्टंकर्मजन्मांतरस्यनिमित्तमित्याशंक्यतत्रमानमाह॥ कर्मशेषसद्भावसिद्धिश्चेति॥ संत्वनारब्धफलानिपुण्यपापानितेषांनित्याद्यनुष्ठानेनक्ष ३ १
४१२ याच्चजन्मांतरमितिशंकतेस्यादेतदिति पुण्येनपुण्यस्यननाशः अविरोधादन्यथातिप्रसंगात्पापस्यापिसर्वात्मनापुण्यनाश्यत्वेमानंनास्तीति

स्वमनीषिकयात्वेतत्तर्कितं॥ यस्मात्कर्मनिमित्तः संसारस्तस्मान्निमित्ताभावान्नभविष्यतीति॥ नचैतत्तर्कयितुंशक्यते॥ नि
मित्ताभावस्यदुर्ज्ञानत्वात् बहूनिहिकर्माणिजात्यंतरसंचितानीष्टानिष्टविपाकान्येकैकस्यजंतोःसंभाव्यंते॥ तेषांविरुद्धफलानांयु
गपदुपभोगासंभवात्कानिचिल्लब्धावसराणीदंजन्मनिर्मिमते॥ कानिचित्तुदेशकालनिमित्तप्रतीक्षाण्यासतइत्यतस्तेषामवशिष्टा
नांसांप्रतेनोपभोगेनक्षपणासंभवान्नयथावर्णितचरितस्यापिवर्तमानदेहपातेदेहांतरनिमित्ताभावःशक्यतेनिश्चेतुं॥ कर्मशे
षसद्भावसिद्धिश्च॥ तद्यइहरमणीयचरणास्ततःशेषेणेत्यादिश्रुतिस्मृतिभ्यः॥ स्यादेतत्॥ नित्यनैमित्तिकानितेषांक्षेपकाणि
भविष्यंतीति॥ तन्नविरोधाभावात्॥ सतिहिविरोधेक्षेप्यक्षेपकभावोभवति॥ नचजन्मांतरसंचितानांसुकृतानांनित्यनैमि
त्तिकैरस्तिविरोधः॥ शुद्धिरूपत्वाविशेषात्॥ दुरितानांत्वशुद्धिरूपत्वात्सतिविरोधेभवतुक्षपणं॥ नतुतावतादेहांतरनिमि
त्ताभावसिद्धिः सुकृतनिमित्तत्वोपपत्तेः दुश्चरितस्याप्यशेषक्षपणाऽनवगमात्॥ नचनित्यनैमित्तिकानुष्ठानात्प्रत्यवायानु
त्पत्तिमात्रंनपुनःफलांतरोत्पत्तिरितिप्रमाणमस्ति॥ फलांतरस्याप्यनुनिष्पादिनःसंभवात्॥ स्मरतिह्यापस्तंबः तद्यथाम्रेनि
मित्तेफलार्थेछायागंधावनूत्पद्येतेएवंधर्मंचर्यमाणमर्थाअनूत्पद्यंतइति॥ नचासतिसम्यग्दर्शनेसर्वात्मनाकाम्यप्रतिषिद्ध शप·
वर्जनंजन्मप्रायणांतरालेकेनचित्प्रतिज्ञातुंशक्यंसुनिपुणानामपिसूक्ष्मापराधदर्शनात्॥ ४१२

संचितपुण्यपापाभ्यांजन्मांतरंदुर्वारमित्याह॥ नत्वित्यादिना॥ क्रियमाणनित्यादिनापिजन्मस्यात्कर्मणापितृलोकइत्यविशेषश्रुतेःस्मृते
श्चेत्याह॥ नचनित्येतिप्रत्यवायनिरासार्थेनित्याद्याचारेसत्यनुपश्चात्फलांतरंनिष्पद्यतइत्यत्रदृष्टांतस्तद्यथेतिनिर्मितेआरोपितेसतीत्यर्थः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तथापि काम्यादिकर्मसत्त्वान्निश्चयो नास्तीत आह संशयीति तत्त्वं वित्तिज्ञानं विना देहपाते मोक्षस्य वेति निश्चयात्तलाभान्त्वसंशयसंततिरिति भावः॥ ब्रह्मभिन्नस्य जीवस्य कर्तृत्वादिस्वभावस्य मोक्षाशापि न युक्तेत्याह॥ न चेति कर्तृत्वादिरूपं कार्यं न स्वभावः किंतु तच्छक्तिरिति शंकते॥ स्यादेतदिति कार्यगम्यायाः शक्तेः कार्यस्यात्यंतानुत्पादे सत्त्वमयुक्तं अतः शक्तिसत्त्वे तद्विषयस्य कार्यस्यादृष्टदेशकालादिनिमित्तानां चात्मनाश

संशयितव्यं तु भवति तथापि निमित्ताभावस्य दुर्ज्ञानत्वमेव न चानभ्युपगम्यमाने ज्ञानगम्ये ब्रह्मात्मत्वे कर्तृत्वभोक्तृत्वस्वभावस्यात्मनः कैवल्यमाकांक्षितुं शक्यमग्नेरौष्ण्यवत्स्वभावस्यापरिहार्यत्वात्॥ स्यादेतत् कर्तृत्वभोक्तृत्वकार्यमनर्थो न तच्छक्तिस्तेन शक्त्यवस्थानेपि कार्यपरिहारादुपपन्नो मोक्ष इति॥ तच्च न शक्तिसद्भावे कार्यप्रसवस्य दुर्निवार्यत्वात्॥ अथापि स्यान्न केवला शक्तिः कार्यमारभते अनपेक्ष्यान्यानि निमित्तानि अत एकाकिनी सा स्थितापि नापराध्यतीति॥ तच्च न निमित्तानामपि शक्तिलक्षणेन संबंधेन नित्यसंबंधत्वात् तस्मात् कर्तृत्वभोक्तृत्वस्वभावे सत्यात्मन्यसत्यां विद्यागम्यायां ब्रह्मात्मतायां न कथंचन मोक्षं प्रत्याशास्ति॥ श्रुतिश्च नान्यः पंथा विद्यतेऽयनायेति ज्ञानादन्यं मोक्षमार्गं वारयति॥ परस्मादनन्यत्वेपि जीवस्य सर्वव्यवहारलोपप्रसंगः प्रत्यक्षादिप्रमाणाप्रवृत्तेरिति चेन्न॥ प्राक्प्रबोधात्स्वप्नव्यवहारवत्तदुपपत्तेः॥ शास्त्रं च यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्यादिना प्रबुद्धविषये प्रत्यक्षादिव्यवहारमुक्त्वा पुनः प्रबुद्धविषये यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिना तदभावं दर्शयति॥ तदेवं परब्रह्मविदो गंतव्यादिविज्ञानस्य बाधितत्वान्न कथंचन गतिरुपपादयितुं शक्या॥ किंविषयाः पुनर्गतिश्रुतय इत्युच्यते॥ सगुणविद्याविषया भविष्यंति॥ तथाहि॥ क्वचित्पंचाग्निविद्यां प्रकृत्य गतिरुच्यते॥ क्वचित्पर्यंकविद्यां क्वचिद्वैश्वानरविद्यां॥

क्तिद्वारा नित्यसंबद्धत्वान्मोक्षो न स्यादिति परिहरति तच्चेत्यादिना॥ मोक्षसिध्यर्थं जीवस्य ब्रह्मत्वांगीकारे संसारानुपपत्तिमाशंक्याज्ञानात्तदुपपत्तिमसकृदुक्तां स्मारयति परस्मादित्यादिना प्रासंगिकं परिहृत्य परं प्रकृतमुपसंहरति॥ तदेवमिति॥ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ब्र·भा·प्र·टी· ४९३ ननुपरविद्यायामप्याप्नोतिपरेनगतिःश्रुतेत्यतआह ब्रह्मविदाप्नोतीतिवैफल्याच्चगतेर्नपरविषयत्वमित्याहापिचेति॥ अनुचिंतनपक्षंप्रत्याह॥ नचनि- अ·४ पा·३

यत्रापिब्रह्मप्रकृत्यगतिरुच्यते॥ यथाप्राणोब्रह्मकंब्रह्मखंब्रह्मेति अथयदिदमस्मिन्ब्रह्मपुरेदहरंपुंडरीकंवेश्मेति।
चतत्रापिवामनीत्वादिभिः सत्यकामादिभिश्चगुणैः सगुणस्यैवोपास्यत्वात्संभवति॥ नक्वचित्परब्रह्मविषयागतिः॥
श्राव्यते यथागतिप्रतिषेधः श्रावितोनतस्यप्राणाउत्क्रामंतीति ब्रह्मविदाप्नोतिपरमित्यादिषुतुसत्यप्याप्नोतेर्गत्यर्थत्वे
वर्णितेनन्यायेनदेशांतरप्राप्त्यसंभवात्स्वरूपप्रतिपत्तिरेवेयमविद्याध्यारोपितनामरूपप्रविलयापेक्षयाभिधीयते॥ ब्रह्मैव
सन्ब्रह्माप्येतीत्यादिवदितिद्रष्टव्यं॥ अपिचपरविषयागतिर्व्याख्यायमानाप्ररोचनायवास्यात् अनुचिंतनायवा॥ तत्रप्ररो
चनंतावद्ब्रह्मविदोनगत्युक्त्याक्रियते स्वसंवेद्येनैवाव्यवहितेनविद्यासमर्पितेनस्वास्थ्येनतत्सिद्धेर्नचनित्यसिद्धनिःश्रे
यसनिवेदनस्यासाध्यफलस्यविज्ञानस्यगत्यनुचिंतनेकाचिदपेक्षोपपद्यते॥ तस्मादपरब्रह्मविषयागतिः॥ तत्रपरापर
ब्रह्मविवेकानवधारणेनापरस्मिन्ब्रह्मणिवर्तमानागतिश्रुतयःपरस्मिन्नध्यारोप्यंते॥ किंद्वेब्रह्मणीपरमपरंचेति॥ बाढंद्वे॥
एतद्वैसत्यकामपरंचापरंचब्रह्मयदोंकारइत्यादिदर्शनात्॥ किंपुनःपरंब्रह्मकिमपरमित्युच्यते॥ यत्राविद्याकृतनामरू
पादिविशेषप्रतिषेधादस्थूलादिशब्दैर्ब्रह्मोपदिश्यतेतत्परं॥ तदेवयत्रनामरूपादिविशेषेणकेनचिद्विशिष्टमुपासनायो
पदिश्यतेमनोमयः प्राणशरीरोभारूपइत्यादिशब्दैस्तदपरं॥ नन्वेवमद्वितीयश्रुतिरुपरुध्येत नाविद्याकृतनामरूपोपा
धिकतयापरिहृतत्वात्॥ तस्यचापरब्रह्मोपासनस्यतत्संनिधौश्रूयमाणंसयदिपितृलोककामोभवतीत्यादिजगदैश्वर्यल
क्षणंसंसारगोचरमेवफलंभवत्यनिवर्तितत्वादविद्यायास्तस्यचदेशविशेषावबद्धत्वात्तत्प्राप्त्यर्थंगमनमविरुद्धं॥ ः ॥ रम· ४९३

त्यसिद्धेति॥ कथंतर्हिकेश्चित्परविषयत्वंगतेरुक्तमित्याशंक्यभ्रांत्येत्याह॥ तत्रपरापरेति॥ प्रश्नपूर्वकंपरापरब्रह्मविभागंवदन्परब्रह्मणिगतेरर्थव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥ व्यापिनो जीवस्य कथं गतिस्तत्राह ॥ सर्वगतत्वेपीति ॥ १४ ॥ एवं गंतव्यं निरूप्य गंतॄन्निर्धारयति ॥ अप्रतीकालंबनान् ॥ सएतान्ब्रह्मगमयतीत्यविशेषश्रुतेस्तत्क्रतुन्यायाच्च संशयमाहेदमिति ॥ अनियमाधिकरणे तत्त्वविदोन्यत्र सर्वोपासकानां मार्गोपसंहार उक्तः इदानीमप्रतीकोपास

सर्वगतत्वेपि चात्मन आकाशस्येव घटादिगमने बुद्ध्याद्युपाधिगमनेगमनप्रसिद्धिरित्यवादिष्म तद्गुणसारत्वादित्यत्र ॥ तस्मात्कार्यं बादरिरित्येष एव स्थितः पक्षः ॥ परं जैमिनिरिति तु पक्षांतरप्रतिभानमात्रप्रदर्शनं प्रज्ञाविकाशनायेति द्रष्टव्यं ॥ ५ ॥ १४ ॥ अप्रतीकालंबनान्नयतीति बादरायण उभयथादोषात्तत्क्रतुश्च ॥ १५ ॥ स्थितमेतत्कार्यविषया गतिर्नपरविषयेति ॥ इदमिदानीं संदिह्यते किं सर्वान्विकारालंबनानविशेषेणैवामानवः पुरुषः प्रापयति ब्रह्मलोकमुत कांश्चिदेवेति ॥ किं तावत्प्राप्तं सर्वेषामेवैषां विदुषांमन्यत्र परस्माद्ब्रह्मणो गतिः स्यात् ॥ तथाह्यनियमः सर्वेषामित्यत्राऽविशेषेणैवैषां विद्यांतरेष्ववतारितेत्येवं प्राप्ते प्रत्याह ॥ अप्रतीकालंबनानिति ॥ प्रतीकालंबनान्वर्जयित्वा सर्वानन्यान्विकारालंबनान्नयति ब्रह्मलोकमिति बादरायण आचार्यो मन्यते ॥ नह्येवमुभयथाभावाभ्युपगमे कश्चिद्दोषोस्ति ॥

कानामेव मार्गेनिसर्वेषां विकारोपासकानामित्युभयथाभावोक्तौ पूर्वोक्तविरोधः स्यात्तस्मादुपासकमात्रस्योत्तरमार्गसिद्धिरिति पूर्वपक्ष
॥ फलं सिद्धांतेतूभयथाभावसिद्धिः ॥ अदोषादिति सूत्रेपदच्छेदः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अविरोधादित्यर्थः॥ अनियमः सर्वेषामिति सूत्रे सर्वशब्दस्य प्रतीकोपासकान्यपरत्वादिति भावः॥ यद्यपि प्रतीकध्यायिनामपि तृयाणां तृतीयस्थानयोरप्रवे
शादर्चिरादिमार्गो वाच्यस्तथापि तेषां विद्युत्पर्यंतमेव गमनमस्तु न ब्रह्मप्राप्तिर्ब्रह्मक्रतुत्वाभावात्। यं यं यद्ध्यायति स तत्प्राप्नोतीति हि तक्रतुन्यायः श्रुतिमू
लः प्रतीकेषु च नामादिषु ध्येयेषु॥ ब्रह्मणो गुणत्वान्न ब्रह्मध्यायित्वमस्ति अस्य च न्यायस्य पंचाग्निविद्यायामाहृत्यवादात्मन्यस्य वचनाद्बाधइष्ट इति

अनियमन्यायस्य प्रतीकव्यतिरिक्तेष्वप्युपासनेषूपपत्तेः॥ तक्रतुश्चास्योभययाभावस्य समर्थको हेतुर्द्रष्टव्यः॥ यो हि ब्रह्मक्र
तुः स ब्राह्ममैश्वर्यमासीदेदिति श्लिष्यते॥ तं यथा यथोपासते तदेव भवतीति श्रुतेः॥ ननु प्रतीकेषु ब्रह्मक्रतुत्वमस्ति प्रतीकप्रधान
त्वादुपासनस्य॥ नन्वब्रह्मक्रतुरपि ब्रह्म गच्छतीति श्रूयते॥ यथा पंचाग्निविद्यायां स एनान्ब्रह्म गमयतीति भवतु यत्रैवमाहृत्य
वाद उपलभ्यते॥ तदभावे त्वौत्सर्गिकेन तक्रतुन्यायेन ब्रह्मक्रतूनामेव तत्प्राप्तिर्नेतरेषामिति गम्यते॥ १५॥ विशेषं च दर्शयति॥ १६॥
नामादिषु प्रतीकोपासनेषु पूर्वस्मात्पूर्वस्मात्फलविशेषमुत्तरस्मिन्नुत्तरस्मिन्नुपासने दर्शयति॥ यावन्नाम्नो गतं तत्रास्य यथा
कामचारो भवति वा ग्वाव नाम्नो भूयसी यावद्वाचो गतं तत्रास्य यथाकामचारो भवति॥ मनो वाव वाचो भूय इत्यादिना स चायं
फलविशेषः प्रतीकतंत्रत्वादुपासनानामुपपद्यते॥ ब्रह्मतंत्रत्वे तु ब्रह्मणोऽविशिष्टत्वात्कथं फलविशेषः स्यात्तस्मान्न प्रतीकाल
बनानामितरैस्तुल्यफलत्वमिति॥ ६॥ १६॥ इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीमच्छंकरभगवत्पादकृतौ चतुर्थोऽध्यायस्य तृतीय[illegible]

सूत्रभाष्यार्थः॥ १५॥ किंच प्रतीकतारतम्येन फलतारतम्यश्रुतेर्न प्रतीकध्यायिनां ब्रह्मप्राप्तिरित्याह विशेषं चेति तस्मादसति वचने ब्रह्मध्यायिन एव ब्र
ह्म गंतार इति सिद्धं॥ १६॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदानंदभगवत्कृतौ भाष्यरत्नप्रभायां चतुर्थाध्यायस्य तृतीयपादः समाप्तः॥ भाष्य २६॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥ अथशारीरकसूत्रभाष्येरत्नप्रभायांचतुर्थोध्यायस्यचतुर्थपादःप्रारम्भः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शा·भा· श्रीगणेशाय नमः॥ पूर्वपादे ब्रह्मोपासकानां कार्यब्रह्मप्राप्तिरुक्ता संप्रति तेषामैश्वर्यविशेषं ब्राह्मलोकिकं पादस्योत्तरार्धेन प्रपंचयिष्यन्नादावभ्यर्हितपरवि- अ·पा·
र·प्र·टी· द्याप्राप्यं निर्विशेषब्रह्मभावमाह॥ संपद्याविर्भावः स्वेनशब्दात्॥ निर्गुणविद्याफलवाक्यमुदाहृत्य स्वशब्दस्य स्वीयागंतुकरूपस्वात्मरूपवाचित्वाभ्यां ४ ४
४१५ संशयमाह॥ एवमिति॥ पूर्वपक्षे मोक्षस्य स्वर्गादविशेषः सिद्धांते विशेष इति फलं तत्र मोक्ष आगंतुकः फलत्वात्स्वर्गवदिति न्यायो येन याभिनिष्पत्ति

श्रीगणेशाय नमः॥ १॥ संपद्याविर्भावः स्वेनशब्दात्॥ १॥ एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपे-
णाभिनिष्पद्यत इति श्रूयते॥ तत्र संशयः॥ किं देवलोकाद्युपभोगस्थानेष्विवागंतुकेन केनचिद्विशेषेणाभिनिष्पद्यते॥ आहोस्वि-
दात्ममात्रेणेति॥ किं तावत्प्राप्तं स्थानांतरेष्विवागंतुकेन केनचिद्रूपेणाभिनिष्पत्तिः स्यान्मोक्षस्यापि फलत्वप्रसिद्धेरभिनिष्पद्यत इति।
चोत्पत्तिपर्यायत्वात्स्वरूपमात्रेण चेदभिनिष्पत्तिः पूर्वास्वप्यवस्थासु स्वरूपानपायान्न विभाव्येत॥ तस्माद्विशेषेण केनचिदभिनिष्प-
द्यत इति॥ एवं प्राप्ते ब्रूमः॥ केवलेनैवात्मनाविर्भवति न धर्मांतरेणेति॥ कुतः स्वेन रूपेणाभिनिष्पद्यत इति स्वशब्दात्। अन्यथा हि स्वशब्दे-
नेति विशेषणमनवक्लृप्तं स्यात्। नन्वात्मीयाभिप्रायः स्वशब्दो भविष्यति नतस्यावचनीयत्वात्। येनैव हि केनचिद्रूपेणाभिनिष्पद्यते तस्यै-
वात्मीयत्वोपपत्तेः स्वेनेति विशेषणमनर्थकं स्यात्। आत्मवचनतायां त्वर्थवत्केवलेनैवात्मरूपेणाभिनिष्पद्यते नागंतुकेनापररूपे-
णापीति॥ १॥ कः पुनर्विशेषः पूर्वास्ववस्थास्विह च स्वरूपानपायसाम्ये सतीत्यत आह॥ मुक्तः प्रतिज्ञानात्॥ २॥ योऽत्राभिनिष्पद्यत इत्यु-
क्तः स सर्वबंधविनिर्मुक्तः शुद्धेनैवात्मनावतिष्ठते। पूर्वत्र त्वंधो भवत्यपि रोदितीव विनाशमेवापीतो भवतीति चावस्थात्रयकलुषिते-
नात्मनेत्ययं विशेषः॥ कथं पुनरवगम्यते मुक्तोऽयमिदानीं भवतीति॥ प्रतिज्ञानादित्याह॥ तथा ह्येतं त्वेव ते भूयोऽनुव्याख्यास्यामीत्य-
वस्थात्रयदोषविहीनमात्मानं व्याख्येयत्वेन प्रतिज्ञायाशरीरं वाव संतं॥ श्रुत्या पूर्वपक्षमाह॥ किमित्यादिना॥ स्वशब्दश्रुतिबाधितो ४१५
न्यायः॥ अभिनिष्पत्तिश्च साक्षात्कारस्तु त्वभिप्राया बंधध्वंसजन्मनौपचारिकेवेति मत्वा सिद्धांतयति॥ एवमिति मोक्षस्य फलत्वेन प्राप्तागंतुकत्वनि- राम·
रासार्थः स्वशब्द इति युक्तं स्वीयवाचित्वेनानर्थकानुवादः स्यादित्यर्थः॥ १॥ सूत्रांतरं गृह्णाति कः पुनरिति॥ जागरितेह्यंध्यादिदेहधर्मवान्भवति स्वप्ने तु हतइ ४१५

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अपिचपुत्रादिनाशाद्रोदितीवभवतिसुषुप्तौतुविशेषाज्ञानाद्धिनस्पृश्येतेनिबंधदशायांकलुषितात्मनातिष्ठतिमोक्षेतुविगलिताखिलदुःखःपरितःप्रद्योत-
मानपूर्णानंदात्मनावतिष्ठतइतिमहान्विशेषइत्यर्थः॥२॥कार्यगोचरमितिकार्यंज्योतिःप्राप्तमित्यर्थः॥कार्यंप्राप्तोपिमुक्तःकिंनस्यादित्यतआह॥नचाननिवृत्त

नप्रियाप्रियेस्पृशतइतिचोपन्यस्यस्वेनरूपेणाभिनिष्पद्यतेसउत्तमःपुरुषइतिचोपसंहरति॥तथाख्यायिकोपक्रमेपियआत्मापहत
पाप्माविजरोविमृत्युरित्यादिमुक्तात्मविषयमेवप्रतिज्ञानं॥फलत्वप्रसिद्धिरपिमोक्षस्यबंधनिवृत्तिमात्रापेक्षानापूर्वोपजननापेक्षा॥य
दप्यभिनिष्पद्यतइत्युत्पत्तिपर्यायत्वंतदपिपूर्वावस्थापेक्षं॥यथारोगनिवृत्तावरोगोभिनिष्पद्यतइतितद्वत्तस्माददोषः॥२॥आत्माप्रकरणा
त्॥३॥कथंपुनर्मुक्तइत्युच्यते॥यावतापरंज्योतिरुपसंपद्येतिकार्यगोचरमेवैनंश्रावयति॥ज्योतिःशब्दस्यभौतिकेज्योतिषिरूढत्वात्॥
नचाननिवृत्तोविकारविषयात्कश्चिन्मुक्तोभवितुमर्हति॥विकारस्यार्त्तत्वप्रसिद्धेरिति॥नैषदोषोयतआत्मैवात्रज्योतिःशब्देनावेद्यते॥प्रकर-
णात्॥यआत्मापहतपाप्माविजरोविमृत्युरितिहिप्रकृतेपरस्मिन्नात्मनितात्कस्माज्झटितिकंज्योतिःशक्यंग्रहीतुं॥प्रकृतहानाप्रकृतप्रक्रियाप्रसं-
गात्ज्योतिःशब्दस्यात्मन्यपिदृश्यते॥तद्देवाज्योतिषांज्योतिरिति॥प्रपंचितंचैतत्ज्योतिर्दर्शनादित्यत्र॥२॥अविभागेनदृष्टत्वात्॥४॥प
रंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यतेयःसकिंपरस्मादात्मनःपृथगेवभवत्युताविभागेनैवावतिष्ठतइतिवीक्षायांसत्रपर्येतीत्यधिकर-
णाधिकर्तव्यनिर्देशाज्ज्योतिरुपसंपद्येतिचकर्तृकर्मनिर्देशात्भेदेनैवावस्थानमितियस्यमतिस्तंव्युत्पादयति॥अविभक्तएवपरेणात्मनामु-
क्तोऽवतिष्ठते॥कुतः दृष्टत्वात्॥तथाहि॥तत्त्वमस्यहंब्रह्मास्मियत्रनान्यत्पश्यतिनतुतद्द्वितीयमस्तिनतोन्यद्विभक्तंयत्पश्येदित्येवमादीनि
वाक्यान्यविभागेनैवपरमात्मानंदर्शयंति॥यथादर्शनमेवचफलंयुक्तंतत्क्रतुन्यायाद्यथोदकंशुद्धेशुद्धमासिक्तंतादृगेवभवति॥एवंमुनेर्वि-
जानतआत्माभवतिगौतमेतिचैवमादीनिमुक्तस्वरूपेणपराणिवाक्यान्यविभागमेवदर्शयंतिनदीसमुद्रादिनिदर्शनानिच॥भेद-
निर्देशस्तुअभेदेप्युपचर्यतेसभगवःकस्मिन्प्रतिष्ठितइतिस्वेमहिम्नीति॥आत्मरतिरात्मक्रीडइतिचैवमादिदर्शनात्॥४॥२॥ ॥

निरूप२

इति॥३॥अविभागेनदृष्टत्वात्॥स्वरूपस्थितंमुक्तमुपजीव्यवादिविवादाद्ब्रह्मभेदाभेदसंशयेसत्यत्वंनभेदंपूर्वपक्षमुक्त्वासिद्धांतमाह॥यस्येति॥४॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ब्राह्मेणजैमिनिः॥ उक्तंब्रह्मस्वरूपमुपजीव्य सकिंसत्येनसर्वज्ञत्वादिधर्मेणयुक्तमितिश्रुतिरुतधर्मस्यशशशृंगवदत्यंतासत्वाच्चिन्मात्रात्मनातिष्ठति किंवावस्तुतश्चिन्मात्रोपिजीवांतरव्यवहारदृष्ट्याकल्पितसर्वज्ञत्वादिमानितिमुनिविप्रतिपत्तेःसंशयेसत्याद्यंपूर्वपक्षमाह॥अधुनेत्यादिना॥नन्वस्यसिद्धेरेवफलंद्रष्टव्यंसोन्वेष्टव्यइतिविध्यर्थउद्देशोयआत्मेत्यादिरुपन्यासशब्दार्थः॥आदिपदाद्विधिव्यपदेशग्रहः॥तत्राज्ञातज्ञापकोविधिस्तमाह॥तथासततेति॥

ब्राह्मेणजैमिनिरुपन्यासादिभ्यः॥५॥ स्थितमेतत्स्वेनरूपेणेत्यत्रात्ममात्ररूपेणाभिनिष्पद्यतेनागंतुकेनापररूपेणेति॥अधुनातुतद्विशेषबुभुत्सायामभिधीयते॥स्वमस्यरूपंब्राह्ममपहतपाप्मत्वादिसत्यसंकल्पत्वावसानंतथासर्वज्ञत्वंसर्वेश्वरत्वंचतेनस्वरूपेणाभिनिष्पद्यतइतिजैमिनिराचार्योमन्यते॥कुतः॥ उपन्यासादिभ्यस्तथात्वावगमात्॥ तथाहि॥ यआत्मापहतपाप्मेत्यादिनासत्यकामः सत्यसंकल्पइत्येवमंतेनोपन्यासेनैवमात्मकतामात्मनोबोधयति॥तथासतत्रपर्येतिजक्षत्क्रीडन्रममाणइत्यैश्वर्यरूपमावेदयति॥तस्यसर्वेषुलोकेषुकामचारोभवतीतिच॥सर्वज्ञःसर्वेश्वरइत्यादिव्यपदेशाश्चैवंउपपन्नाभविष्यंतीति॥५॥ चितितन्मात्रेणतदात्मकत्वादित्यौडुलोमिः॥६॥ यद्यप्यपहतपाप्मत्वादयोऽभेदेनैवधर्मानिर्दिश्यंतेतथापिशब्दविकल्पजाएवैते॥पाप्मत्वादिनिवृत्तिमात्रंहितत्रगम्यते॥चैतन्यमेवत्वस्यात्मनःस्वरूपमितितन्मात्रेणरूपेणाभिनिष्पत्तिर्युक्ता॥तथाचश्रुतिःएवंवाअरेऽयमात्मानंतरोऽबाह्यःकृत्स्नःप्रज्ञानघनएवेत्येवंजातीयिकाऽनुगृहीताभविष्यति॥सत्यकामत्वादयस्तुयद्यपिवस्तुस्वरूपेणैवधर्माउच्यंतेसत्याःकामाअस्येतितथाप्युपाधिसंबंधाधीनत्वात्तेषां॥नचैतन्यवत्स्वरूपत्वसंभवोऽनेकाकारत्वप्रतिषेधात्॥प्रतिषिद्धंहिब्रह्मणोनेकाकारत्वंनस्थानतोपिपरस्योभयलिंगमित्यत्र॥ ॥ सर्वज्ञइत्यादिस्तुव्यपदेशअ

यंहितोद्देशःविध्यभावान्नापिविधिःसिद्धवन्निर्देशादित्यर्थः॥५॥सत्यत्वादिधर्माणांसत्यत्वंदूषयन्नत्यंतासत्वपक्षमाहचितितन्मात्रेणेति॥चितिश्चैतन्यंशब्दज्ञानाद्योविकल्पोसन्प्रत्ययस्तज्जाअत्यंतासंतइतियावत्॥अतत्वभावरूपधर्माणामसत्वंभावधर्माणांतुसत्वमित्याशंक्यतेषामप्यौपाधिकत्वादस

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चिन्मात्रे मुक्ते जक्षणादिश्रुतिः कथं तत्राह॥ अत एवेति॥ सर्वधर्मनिषेधादेवेत्यर्थः॥ ६॥ धर्माणां सत्यत्वमसत्यं नासत्वं चेति पक्षद्वयमयुक्तं अन्ते। तत्श्रुतीनां सर्वज्ञत्वादिश्रुतिव्यवहारयोश्च बाधापातात् तत्तृतीयपक्षः श्रेयानिति सिद्धांतयति॥ एवमपीति॥ अत्र केचिन्मुह्यंति॥ अखंडचि। न्मात्रज्ञानान्मुक्तस्याज्ञानाभावात्कुत आज्ञानिकधर्मयोग इति तदन्यं बोधनीयाः॥ यदीश्वरधर्मास्त एव चिदात्मनि मुक्ते जीवांतरैर्व्यवह्रियंत इति॥ न च मूलाविद्यैक्यात्तन्नाशे कुतो जीवांतरमिति वाच्यं न वयं तन्नाशे जीवांतरव्यवहारं ब्रूमः॥ किं तु तदंशनाशे नांशांतरस्याध्यात्मिक।

अत एव जक्षणादि संकीर्तनमपि दुःखाभावमात्राभिप्रायं स्तुत्यर्थमात्मरतिरित्यादिवत् द्विमुख्यान्येव रतिक्रीडामि। थुनान्यात्मनिमित्तानि शक्यंते वर्णयितुं द्वितीयविषयत्वात्तेषां॥ तस्मान्निरस्ताशेषप्रपंचेन प्रसन्नेनाव्यपदेश्येन बो धात्मनाभिनिष्पद्यत इत्यौडुलोमिराचार्यो मन्यते॥ ६॥ एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः॥ ७॥ एव मपि पारमार्थिकचैतन्यमात्रस्वरूपाभ्युपगमेपि व्यवहारापेक्षया पूर्वस्याप्युपन्यासादिभ्योवगतस्य ब्राह्मस्यैश्वर्यरू। पस्याप्रत्याख्यानादविरोधं बादरायण आचार्यो मन्यते॥ ७॥ ३॥ संकल्पादेव तु तच्छ्रुतेः॥ ८॥ हार्दविद्यायां श्रूयते॥ स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठंतीत्यादि॥ तत्र संशयः किं संकल्प एव केवलः पित्रादिस। मुत्थाने हेतुरुत निमित्तांतरसहित इति॥ तत्र सत्यपि संकल्पादेवेति श्रवणे लोकवन्निमित्तांतरापेक्षतायुक्ता॥ यथा लोकेऽ स्मदादीनां संकल्पाद्गमनादिभ्यश्च हेतुभ्यः पित्रादिसंपत्तिर्भवत्येवं मुक्तस्यापि स्यादेवं दृष्टविपरीतं न कल्पितं भविष्यति॥ संकल्पा देवेति तु राज्ञ इव संकल्पितार्थसिद्धिकरीं साधनांतरसामग्रीं सुलभामपेक्ष्योच्यते॥ ९ शरीरद्वयाभिमानिनो मुक्तावंशांतरोपाधिका जी

वा व्यवहर्तार इति वदामः न हि नानाविद्यापक्ष एव कुतो नाद्रीयते जीवभेदस्यावश्यकत्वादिति चेन्न प्रकृतिनां त्वं प्रतिजीवं प्रपंचभेदद्वयाद्यप्रामाणि। कानेकार्थगौरवादिति सर्वं चतुरसं मतएकाविद्यापक्ष एव श्रेयान् अंशभेदेन च बंधमुक्तिव्यवस्थेति संक्षेपः॥ ७॥ ३॥ एवं परविद्याफलमुक्तमिदा नीमपरविद्याफलं प्रपंचयति संकल्पादेव तु तच्छ्रुतेः॥ स्वकारस्यायोगान्ययोगव्यवच्छेदसाधारण्यात्संशयः ब्रह्मलोकं गतस्योपासकस्य संक

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भोगसामग्रीसंकल्पत्वाद्स्मदादिसंकल्पवत्॥ नचैवकारविरोधः संकल्पेनसामग्र्या अयोगव्यवच्छेदेनसौलभ्यार्थत्वात्॥ यत्तानंगीकारेभोगपुष्कसिद्धेश्चेतिपूर्वपक्षार्थः॥ अत्रलोकदृष्टान्तानुसरणंफलंसिद्धांतेतुविद्याबलेनसंकल्पस्यैवभोगपुष्टिकरत्वसिद्धिरितिभेदः किंचयदि भोगसंकल्पानंतरमपि यत्नांतरसाध्यनिमित्तापेक्षास्यात्तर्हि निमित्तप्राप्तेः प्राक्जातसंकल्पस्यवंध्यत्वंस्यात्भोगेविलंबाच्चतःसत्य॥

नचसंकल्पमात्रसमुत्थानाः पित्रादयोमनोरथविजृंभितवच्चंचलत्वात्पुष्कलंभोगंसमर्पयितुंपर्याप्ताः स्युरिति॥ एवंप्राप्तेब्रूमः॥ संकल्पादेवतुकेवलात्पित्रादिसमुत्थानमिति॥ कुतस्तच्छ्रुतेः संकल्पादेवास्यपितरःसमुत्तिष्ठंतीत्यादिकाहिश्रुतिर्निमित्तांतरापेक्षायांपीड्येत॥ निमित्तांतरमपितुयदिसंकल्पानुविधाय्येवस्याद्भवतुनतुप्रयत्नांतरसंपाद्यंनिमित्तांतरमितीष्यतेप्राक्नतत्संपत्तेर्वंध्यसंकल्पत्वप्रसंगात्नचश्रुत्यवगम्येर्थेलोकवदितिसामान्यतोदृष्टंक्रमतेसंकल्पबलादेवचैषांयावत्प्रयोजनंस्थैर्योपपत्तिःप्राकृतसंकल्पविलक्षणत्वान्मुक्तसंकल्पस्य॥ ८॥ अतएवचानन्याधिपतिः॥ ९॥ अतएवचावंध्यसंकल्पत्वादनन्याधिपतिर्विद्वान्भवति॥ नास्यान्योधिपतिर्भवतीत्यर्थः॥ नहिप्राकृतोपिसंकल्पयन्नन्यस्वामिकत्वमात्मनःसत्यंगतोसंकल्पयति॥ श्रुतिश्चैतद्दर्शयत्यथयइहात्मानमनुविद्यव्रजंत्येतांश्चसत्यान्कामांस्तेषांसर्वेषुलोकेषुकामचारोभवतीति॥ ९॥ ४॥ अभावंबादरिराहह्येवं॥ १०॥ संकल्पादेवास्यपितरःसमुत्तिष्ठंतीत्यादिश्रुतेर्मनस्तावत्संकल्पसाधनंसिद्धं॥ शरीरेंद्रियाणिपुनःप्राप्तैश्वर्यस्यविदुषःसंतिनवासंतीतिसमीक्ष्यते॥ तत्रबादरिस्तावदाचार्यःशरीरस्येंद्रियाणांचाभावंमहीयमानस्यविदुषोमन्यते॥ कस्मादेवंह्याहाम्नायोमनसैतान्कामान्पश्यन्रमतेयएतेब्रह्मलोकइति॥ १ संकल्पश्रुतेर्नयत्नांतरापेक्षेत्याह॥ निमित्तांतरमपित्विति॥ ८॥ नन्वीश्वराधीनस्यविदुषःकथंसंकल्पमात्राद्भोगसिद्धिस्तत्राह॥ अतएवेति॥ ईश्वरधर्मएवविदुष्याविर्भूतइतिनसंकल्पभंगइतिभावः॥ ९॥ एवकारत्वन्मनसेतिविशेषणेनान्ययोगव्यवच्छेदाद्देहाद्यभावइतिपूर्वपक्षयति॥ अभावंबादरिराहह्येवं॥ अत्रापिवादिविवादात्संशयः तत्रदेहादयोनसंत्येवसदासंत्येवेतिचपक्षद्वयंपूर्वपक्षः कालभेदेनेच्छयासंतिनसंतिचेति सिद्धांतपक्षोद्रष्टव्यः॥ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

फलंतुतन्नश्रुतेर्मुख्यत्वमितिविवेकः॥१०॥११॥द्वादशाहवदितियएवंविद्वांसः सत्रमुपयंतीत्युपायिचोदनागम्यत्वश्रुतेर्द्वादशाहस्यस
त्रत्वंआसतेतिचोपयंतीतिवाचोदितत्वंसत्रलक्षणमितिस्थितेः तथाद्वादशाहेनप्रजाकामंयाजयेदितियजतिचोदनादर्शनान्नियतकर्तृ॥

यदिमनसाशरीरेंद्रियैश्चविहरेत्मनसेतिविशेषणंनस्यात्तस्मादभावःशरीरेंद्रियाणांमोक्षे॥१०॥भावंजैमिनिर्विकल्पाम
ननात्॥११॥जैमिनिस्त्वाचार्योमनोवच्छरीरस्यापिसेंद्रियस्यभावंमुक्तंप्रतिमन्यते॥यतःसएकधाभवतित्रिधाभवतीत्यादिना
नेकधाभावविकल्पमामनंति॥नह्यनेकविधताविनाशरीरभेदेनांजसीस्यात्॥यद्यपिनिर्गुणायांभूमविद्यायांअयमनेक
धाभावविकल्पःपठ्यतेतथापिविद्यमानमेवेदंसगुणावस्थायामैश्वर्यंभूमविद्यास्तुतयेसंकीर्त्यतइत्यतःसगुणविद्याफलभावे
नोपतिष्ठतइत्युच्यते॥११॥द्वादशाहवदुभयविधंबादरायणोतः॥१२॥बादरायणःपुनराचार्योतएवोभयश्रुतिलिंगदर्शना
दुभयविधत्वंसाधुमन्यते॥यदासशरीरतांसंकल्पयतितदासशरीरोभवतियदात्वशरीरतांतदाऽशरीरइति॥सत्यसंकल्प
त्वात्संकल्पवैचित्र्याच्च॥द्वादशाहवत्यथाद्वादशाहःसत्रमहीनश्चभवतिउभयलिंगश्रुतिदर्शनादेवमिदमपीति॥१२॥तन्व
भावेसंध्यवदुपपत्तेः॥१३॥यदातुतनोःसेंद्रियस्यशरीरस्याभावस्तदायथासंध्येस्थानेशरीरेंद्रियविषयेष्वविद्यमानेष्वप्युप
लब्धिमात्राएवपित्रादिकामाभवंति॥एवंमोक्षेपिस्युरेवंह्येतदुपपद्यते॥१३॥भावेजाग्रद्वत्॥१४॥भावेपुनस्तनोर्यथाजागरि
तेविद्यमानाएवपित्रादिकामाभवंत्येवंमुक्तस्याप्युपपद्यते॥५॥१३॥प्रदीपवदावेशस्तथाहिदर्शयति॥१५॥भावंजैमिनिर्विक
ल्पामननादित्यत्रसशरीरत्वंमुक्तस्योक्तंतत्रत्रिधाभावादिषुअनेकशरीरसर्गेकिंनिरात्मकानिशरीराणिदारुयंत्राणीवसृज्यंतेकिं
वासात्मकान्यस्मदादिशरीरवदितिभवतिवीक्षातत्रचात्ममनसोर्भेदानुपपत्तेरेकेनशरीरेणयोगादितराणिशरीराणिनिरात्मकानी
त्येवंप्राप्तेप्रतिपद्यते॥प्रदीप
कत्वावगमेनहिरात्रादिवदहीनत्वंचेत्यर्थः॥१२॥१३॥प्रदीपवदावेशः॥संकल्पमात्रान्निर्मितदेहानुपजीव्यतेषूभय
थादर्शनात्संशयमाह॥भावमिति॥अनादिलिंगशरीरस्यैकस्मिन्नेवशरीरेभावान्निर्मितानेकदेहेषुभोगासिद्धिःपूर्वपक्षफलं॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सिद्धांतेनत्तसिद्धिरितिमत्वासूत्रंव्याचष्टे॥ यथेत्यादिनासएकधात्रिधापंचधेत्यादिश्रुत्याविदुषस्त्वानेकधाभावउक्तः विद्वांस्तुनदेहोनापिचिन्मात्रःकिं
तुलिंगोपहितात्मानचतस्यलिंगभेदंविनाऽनेकत्वंसंभवति॥ अतःश्रुतिबलादेकस्यैवानादिलिंगस्यानेकदेहेषुप्रवेशेनभेदएष्टव्यःयद्यपिमूलप्रदी
पस्यवर्त्यंतरेषूत्पन्नदीपानांचात्यंतभेदोस्तिलिंगस्यतुदेहभेदकृतोभेदोनस्वतःस्वतोलिंगभेदेतदुपहितजीवभेदादनुसंधानानुपपत्तेः॥ आगंतुका
नेकलिंगसृष्टावसत्कार्यवादापाताच्चतथापिप्रदीपत्वजात्यैकेनव्यक्त्यैक्यारोपाद्दृष्टांतदार्ष्टांतिकयोःसाम्यंद्रष्टव्यं॥ तथाचयथाप्रदीपोनेकवर्तिषुप्र

यथाप्रदीपएकोऽनेकप्रदीपभावमापद्यतेविकारशक्तियोगादेवमेकोपिसन्विद्वानैश्वर्ययोगादनेकभावमापद्यसर्वाणिशरी
राण्याविशति॥ कुतस्तथाहिदर्शयतिशास्त्रमेकस्यानेकभावंसएकधाभवतित्रिधाभवतिपंचधासप्तधानवधेत्यादि॥ नैतद्दारुयंत्रो
पमाभ्युपगमेऽवकल्पते॥ नापिजीवांतरावेशे॥ नचनिरात्मकानांशरीराणांप्रवृत्तिःसंभवति॥ यत्त्वात्ममनसोर्भेदानुपपत्तेर
नेकशरीरयोगासंभवइति॥ नैषदोषः॥ एकमनोनुवर्तीनिसमनस्कान्येवापराणिशरीराणिसत्यसंकल्पत्वात्स्रक्ष्यति॥ सृ
ष्टेषुचतेषूपाधिभेदादात्मनोपिभेदेनाधिष्ठातृत्वंयोक्ष्यते॥ एषैवचयोगशास्त्रेषुयोगिनामनेकशरीरयोगप्रक्रिया॥ १५॥ क
थंपुनर्मुक्तस्यानेकशरीरावेशादिलक्षणमैश्वर्यमभ्युपगम्यते॥ यावतातत्केनकंविजानीयान्नतुतद्द्वितीयमस्तिततोन्य
द्विभक्तंयद्विजानीयात्॥ सलिलएकोद्रष्टाद्वैतोभवतीतिचैवंजातीयकाश्रुतिर्विशेषविज्ञानंवारयतीति॥ अतउत्तरंपठति॥

विशतिएवंविद्यायोगबलाद्धिहिलिंगस्यव्यापित्वादनेकदेहेषुयुगपदावेशइतिसूत्रार्थः॥ विदुषोनेकधात्वंश्रुतमन्यथानघटतइत्याह॥ नैतदिति॥ इत
श्वसात्मकत्वमित्याह॥ नचनिरात्मकानामिति॥ यदनादिमनएकदेहस्थंतदनुसारीणिदेहांतरस्थानिमनांसिभवंतितदवस्थानांतन्नियम्यत्वसंभवा
दिति॥ अत्रयोगशास्त्रसंमतिमाह॥ एषैवेति॥ निर्माणचित्तान्यस्मितामात्रात्प्रवृत्तिभेदेप्रयोजकंचित्तमेकमनेकेषामितिहिभगवत्पतंजलिनासू
त्रितंयोगिनोभिमानमात्रान्निर्माणचित्तानिनिर्माणदेहेषुभवंतितेषांनियामकमनादिचित्तमित्यर्थः॥ १५॥ उत्तरसूत्रव्यावर्त्यशंकामाहकथंपुनरि

प्रदीपवदावेशस्तथाहिदर्शयति॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ननु तद्द्वितीयमस्तीति क्वचित्सुषुप्तिमधिकृत्योक्तं तत्केन कमित्यादि क्वचिन्मुक्तिं प्रकृत्योक्तं एवं विशेषज्ञानाभाववचनं सुषुप्तिमुक्त्यन्यतरापेक्षं सगुणोपासकस्य भोगोक्तौ न विरुध्यते भिन्नविषयत्वादित्याह॥ स्वाप्ययेति॥ तत्रैव श्रुतौ तदधिकारवशात्सुषुप्त्यादिप्रकरणबलादुक्तवचनानामन्यतरापेक्षात्वमाविष्कृतं हि यतस्ततो वगम्यत इत्यर्थः॥ अत्र समुत्थानादिवाक्यं मुक्तिविषयं यत्र सुप्त इति सुप्तिविषयमिति विभागः॥१६॥

स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि॥१६॥ स्वाप्ययः सुषुप्तं स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षत इति श्रुतेः। संपत्तिः कैवल्यं॥ ब्रह्मैव सन्ब्रह्माप्येतीति श्रुतेस्तयोरन्यतरामवस्थामपेक्ष्यैतद्विशेषसंज्ञाभाववचनं क्वचित्सुषुप्तावस्थामपेक्ष्योच्यते॥ क्वचित्कैवल्यावस्थां॥ कथमवगम्यते यतस्तत्रैवैतदधिकारवशादाविष्कृतमेतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति॥ यत्र त्वस्य सर्वमात्मैवाभूद्यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यतीत्यादिश्रुतिभ्यः॥ सगुणविद्याविपाकावस्थानं त्वेतत्स्वर्गादिवदवस्थान्तरं यत्रैतदैश्वर्यमुपवर्ण्यते तस्माद्दोषः॥१६॥ ६॥ जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च॥१७॥ ये सगुणब्रह्मोपासनात्सहैव मनसेश्वरसायुज्यं व्रजंति किं तेषां निरवग्रहमैश्वर्यं भवत्याहोस्वित्सावग्रहमिति संशयः॥ किं तावत्प्राप्तं निरंकुशमेवैषामैश्वर्यं भवितुमर्हति॥ आप्नोति स्वाराज्यं सर्वेऽस्मै देवा बलिमावहंति तेषां सर्वेषु लोकेषु कामचारो भवतीत्यादिश्रुतिभ्यः॥ इत्येवं प्राप्ते पठति॥ जगद्व्यापारवर्जमिति॥ जगदुत्पत्त्यादिव्यापारं वर्जयित्वान्यदणिमाद्यात्मकमैश्वर्यं मुक्तानां भवितुमर्हति॥ जगद्व्यापारस्तु नित्यसिद्धस्यैवेश्वरस्य॥ कुतः॥ तस्य तत्र प्रकृ

॥६॥ जगद्व्यापारवर्जं॥ संकल्पादेवेत्यादिनोक्तैश्वर्यस्य जगत्सृष्ट्यादिव्यतिरिक्तविषयत्वेनात्रापवादात्संगतिः॥ उभयथादर्शनात्संशयः ईश्वरनानात्वं पूर्वपक्षफलं सिद्धांते तु विद्यायोगिनामीश्वरनियम्यत्वादेकस्य नित्यसिद्धस्येश्वरस्यैव जगत्कर्तृत्वसिद्धिरिति विवेकः प्रलयात्सर्गसमये यस्येक्षणपूर्वकं कर्तृत्वं श्रुतौ प्रकृतं तस्यैव नियंतृत्वादिर्जगद्व्यापारः॥ नह्युपासकानां देहं विनेक्षणं संभवति॥

रा·भा· किंचेश्वरस्यनित्यसिद्धत्वान्नशब्दैकसमधिगम्यत्वाच्चजगत्स्रष्टृत्वंयुक्तंनतुतत्प्रसादलब्धसिद्धीनांजीवानामित्याह॥ नित्यशब्दनिबंधनत्वाच्चेति॥ अ·पा·
-श्री· किंचविदुषांसमप्राधान्येमिथोविरोधःएकंप्रत्यन्येषांगुणत्वेत्वेकएवेश्वरइत्याह॥समनस्कत्वादिति॥१७॥अधिकारेनियोजयत्यादित्यादीनित्या। ४ ४
४१९ धिकारिकःसचासौमंडलस्थश्चतस्यप्राप्यत्वोक्तेरित्यर्थः मनसस्पतिःसूर्यमंडलांतस्थःपरमात्मातत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनः

असन्निहितत्वाच्चेतरेषां॥परएवहीश्वरोजगद्व्यापारेऽधिकृतस्तमेवप्रकृत्योत्पत्त्याद्युपदेशात्॥नित्यशब्दनिबंधनत्वा
च्चतदन्वेषणविजिज्ञासनपूर्वकंत्वितरेषामणिमाद्यैश्वर्यंश्रूयते॥तेनासंनिहितास्तेजगद्व्यापारे॥समनस्कत्वादेवचैते
षामनैकमत्येकस्यचित्स्थित्यभिप्रायःकस्यचित्संहाराभिप्रायइत्येवंविरोधोपिकदाचित्स्यादथकस्यचित्संकल्प
मन्वन्यस्यसंकल्पइत्यविरोधःसमर्थ्येतततःपरमेश्वराकूततंत्रत्वमेवेतरेषामितिव्यवतिष्ठते॥१७॥प्रत्यक्षोपदेशा
दितिचेन्नाधिकारिकमंडलस्थोक्तेः॥१८॥अथयदुक्तमाप्नोतिस्वाराज्यमित्यादिप्रत्यक्षोपदेशान्निरवग्रहमैश्वर्यंविदु
षांन्याय्यमितितत्परिहर्तव्यं॥अत्रोच्यतेनायंदोषः॥आधिकारिकमंडलस्थोक्तेः॥आधिकारिकोयःसवितृमंडलादि
षुविशेषायतनेष्ववस्थितःपरईश्वरस्तदायत्तैवेयंस्वाराज्यप्राप्तिरुच्यते॥यत्कारणमनंतरमाप्नोतिमनसस्पतिमि
त्याह॥योहिसर्वमनसांपतिःपूर्वसिद्धईश्वरस्तंप्राप्नोतीत्येतदुक्तंभवति॥तदनुसारेणैवचानंतरंवाक्पतिश्चक्षुष्पतिःश्रो
त्रपतिर्विज्ञानपतिश्चभवतीत्याह॥एवमन्यत्रापियथासंभवंनित्यसिद्धेश्वरायत्तमेवेतरेषामैश्वर्यंयोजयितव्यं॥१८॥ तम·
४१९

प्रचोदयादितिश्रुतेः॥तथाचयदिपूर्वंनिरंकुशंस्वाराज्यमुक्तंस्यात्तर्हिईश्वरस्याग्रेप्राप्यतांनब्रूयादतोभोगेस्वाराज्यंनजगज्जन्मादिष्विति
भावः वाक्पतित्वादिकमपीश्वराधीनमित्याहतदनुसारेणेति॥उक्तंन्यायंकामचारादिवाक्येष्वतिदिशत्येवमिति॥१८॥ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जगद्व्यापारउपासकप्राप्यः तदुपास्सनिष्ठत्वात्संकल्पसिध्यादिवदित्याशंक्योपास्यस्यनिर्गुणस्वरूपेव्यभिचारमाह॥ विकारावर्तिचेति॥१९॥ नि
र्गुणस्वरूपेप्रमाणमाह॥दर्शयतश्चेति॥यथाज्ञानाभावान्निर्गुणंनप्राप्तंतथाध्यानाभावाज्जगत्सृष्ट्यादिनप्राप्यतेध्यानाभावश्चविध्यभावादिति

विकारावर्तिचतथाहिस्थितिमाह॥१९॥ विकारावर्त्यपिचनित्यमुक्तंपारमेश्वरंरूपमस्तिनकेवलंविकारमात्रगोचरंसवि
तृमंडलाद्यधिष्ठानं॥तथाहि॥ अस्यद्विरूपांस्थितिमाह्याम्नायस्तावानस्यमहिमाततोज्यायांश्चपूरुषः॥पादोस्यसर्वाभूतानित्रिपा
दस्यामृतंदिवीत्येवमादिः॥ नचतन्निर्विकाररूपमितरालंबनाःप्राप्नुवंतीतिशक्यंवक्तुं॥ अतत्क्रतुत्वात्तेषाम् तस्माद्यथैवद्विरूपेपर
मेश्वरेनिर्गुणंरूपमनवाप्यसगुणएवावतिष्ठंते॥एवंसगुणेपिनिरवग्रहमैश्वर्यमनवाप्यसावग्रहएवावतिष्ठंतइतिद्रष्टव्यं॥१९॥
दर्शयतश्चैवंप्रत्यक्षानुमाने॥२०॥दर्शयतश्चविकाराऽवर्तित्वंपरस्यज्योतिषःश्रुतिस्मृती॥नतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतो
भांतिकुतोयमग्निरिति॥नतद्भासयतेसूर्योनशशांकोनपावकइतिच॥तदेवंविकारावर्तित्वंपरस्यज्योतिषःप्रसिद्धमित्यभिप्रायः
॥२०॥भोगमात्रसाम्यलिंगाच्च॥२१॥इतश्चननिरंकुशंविकारालंबनानामैश्वर्यं॥यस्माद्भोगमात्रमेवैषामनादिसिद्धेनेश्वरेणसमा
नमितिश्रूयते॥तमाहापोवैखलुमीयंतेलोकोसाविति॥यथैतांदेवतांसर्वाणिभूतान्यवंत्येवंहैवंविदंसर्वाणिभूतान्यवंति॥तेनो
एतस्यैदेवतायैसायुज्यंसलोकतांजयतीत्यादिभेदव्यपदेशलिंगेभ्यः॥२१॥नन्वेवंसतिसातिशयत्वादंतवत्त्वमैश्वर्यस्यस्यात्त
तश्चैषामावृत्तिःप्रसज्येतेति॥अतउत्तरंभगवान्बादरायणआचार्यःपठति॥

१९भावः॥२०॥ तमुपासकंब्रह्मलोकगतमाहहिरण्यग
र्भः मयाखल्विमाआपोअमृतरूपामीयंतेभुज्यंतेनेनवाप्यसौलोकोऽमृतोदकलक्षणइत्यर्थः॥श्रुत्यंतरमाह॥यथेति॥भोगसाम्येदृष्टांतोयथेत्यर्थः॥
तेनोइत्युशब्दोप्यर्थःसलोकतामपीत्यन्वयःसायुज्यंसमानदेहत्वंक्रमेणमुक्तिर्वा॥२१॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शास्त्रसमाप्तिंसूचयन्सूत्रकारंपूजयति॥ भगवानिति॥ भगवत्त्वंसर्वज्ञत्वंसूत्रद्वाराशिष्याणामाचारेस्थापनात् आचार्यत्वं॥ बादरायणपदेनबद
रिकाश्रमवासोक्त्यानित्यसर्वज्ञस्यपरमगुरोर्नारायणस्यप्रसादद्योतनात्तत्प्रणीतशास्त्रेनिरवद्यतांद्योतयति॥ सगुणविद्यायाःसातिशयफलत्वे
पिततोनिर्गुणविद्ययानावृत्तिरित्याह॥ अनावृत्तिःशब्दादनावृत्तिःशब्दात्येब्रह्मलोकंगच्छंतितंप्राप्यनावर्तन्तइतिसंबंधः॥ लोकंविशिनष्टि
यस्मिन्निति इतोस्मात्पृथिवीलोकात्तृतीयस्यांदिवियोब्रह्मलोकस्तस्मिन्नरइतिण्यइतिचार्णवतुल्यौसुधाहूदावित्यर्थः ऐरमदत्वमयंमदीयंमद

अनावृत्तिःशब्दादनावृत्तिःशब्दात्॥२२॥ नाडीरश्मिसमन्वितेनार्चिरादिपर्वणादेवयानेनपथायेब्रह्मलोकंशास्त्रोक्तविशे
षणंगच्छंति॥ यस्मिन्नरश्चण्यश्चार्णवौब्रह्मलोकेतृतीयस्यामितोदिवियस्मिन्नैरंमदीयंसरोयस्मिन्नश्वत्थःसोमसवनोयस्मि
न्नपराजितापू ब्रह्मणोयस्मिंश्चप्रभुविमितंहिरण्मयंवेश्मयश्चानेकधामंत्रार्थवादादिप्रदेशेषुप्रपंच्यतेतेतंप्राप्यनचं
द्रलोकादिवत्भुक्तभोगाआवर्तंते॥ कुतस्तयोर्ध्वमायन्नमृतत्वमेतितेषांनपुनरावृत्तिरेतेनप्रतिपद्यमानाइमंमानवमा
वर्तंनावर्तंतेब्रह्मलोकमभिसंपद्यतेनचपुनरावर्ततइत्यादिशब्देभ्यः॥ अंतवत्त्वेपित्वैश्वर्यस्ययथानावृत्तिस्तथावर्णितंका
र्यात्ययेतदध्यक्षेणसहातःपरमित्यत्र॥ सम्यग्दर्शनविध्वस्ततमसांतुनित्यसिद्धनिर्वाणपरायणानांसिद्धैवानावृत्तिः॥६

करंसरःसोमसवनअमृतवर्षी॥ यद्यपितेषामिहनपुनरावृत्तिरिमंमानवमितिचश्रुतिष्विहेममितिविशेषणादस्मिन्कल्पेब्रह्मलोकंगतानां
कल्पांतरआवृत्तिर्भाति तथापीश्वरोपास्तिंविनापंचाग्निविद्याश्वमेधदृढब्रह्मचर्यादिसाधनैर्येगतास्तेषांतत्त्वज्ञाननियमाभावादावृत्तिःस्या
त् येतुदहरादीश्वरोपास्त्यागतास्तेषांसगुणविद्याफलक्षयेपिनिरवग्रहेश्वरानुग्रहलब्धात्मज्ञानान्मुक्तिनियमइत्यभिप्रेत्याह॥ अंतवत्त्वे
पित्विति॥ नन्वत्रसूत्रकृतासगुणविदामेवानावृत्तिरुक्तानिर्गुणविदांतत्रकोहेतुरित्याशंक्यतेषामावृत्तिशंकाभावादित्याह॥ सम्यगिति॥६

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तदाश्रयणेनेति सगुणविद्यामावृत्तिप्राप्तौ सम्यग्दर्शनाश्रयणेनैवानावृत्तिः साधिता अतः स्वतएव सम्यग्दर्शिनामावृत्तिशंकानेति किमुवा-
च्यमित्यर्थः यत्राध्यायसमाप्तिस्तत्र पदमात्रस्याभ्यासो दर्शितइह सूत्रस्यैवाभ्यासाच्छास्त्रसमाप्तिर्द्योत्यत इत्याह ॥ अनावृत्तिः शब्दादिति ॥
एवं समन्वयोक्त्या ब्रह्मात्मैक्यस्य वेदांतप्रमाणकत्वमवधारितं वाक्यार्थज्ञाने स्मृतितर्कादिसर्वप्रकारविरोधः परिहृतः साधनसंपत्ति
श्च दर्शिता तत्साद्विवेकादिसाधनसंपन्नस्य श्रवणाद्यावृत्तिनिरस्तसमस्तप्रतिबंधस्याखंडात्मसंबोधात्समूलबंधध्वंसे सत्याविर्भूतनिष्क
लंकानंतस्वप्रकाशचिदानंदात्मनावस्थानमिति सिद्धं ॥ २२ ॥ नानाविधग्रंथजातं वीक्ष्य सम्यग्ययामति ॥ शारीरकस्य भाष्यस्य कृता व्याख्या

तदाश्रयणेनैव हि सगुणशरणानामप्यनावृत्तिसिद्धिरिति ॥ अनावृत्तिः शब्दादनावृत्तिः शब्दादिति सूत्राभ्यासः शास्त्रपरिस
माप्तिं द्योतयति ॥ २२ ॥ ७ ॥ इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीमच्छंकरभगवत्पादकृतौ चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तः
॥ ४ ॥ अध्यायश्चतुर्थः ॥ अधिकरणे ॥ १९२ ॥ समग्रग्रंथः सूत्राणां २०० भाष्य ९५०० रामानंदी १९७०० ॥ ॥

सतां मुदे ॥ १ ॥ अंतर्यामी जगत्साक्षी सर्वकर्ता रघूद्वहः ॥ अतोऽत्र दोषो यः कश्चित् स्याद्देवोढा वेति शासनात् ॥ २ ॥ वक्षस्यक्ष्णोश्च पार्श्वे करतलयुग-
ले कौसुभाभां दयां च सीतां कोदंडदीक्षामभयवरयुतां वीक्ष्य रामांगसंगः ॥ स्वस्याः कृत्सादिनीयं हृदि कृतमननाभाष्यरत्नप्रभाख्या स्वात्मा
नंदैकलुब्धा रघुवरचरणांभोजयुग्मं प्रपन्ना ॥ ३ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोपालसरस्वतीपूज्यपादशिष्यश्रीगोविंदानंदभग-
वत्कृतौ शारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तः ॥ ४ ॥ सूत्राणि ५५५ भाष्य ॥ ७७० ॥ टी० ॥ १५० ॥ ॥
श्रीव्याससूत्रभाष्याख्यो ग्रंथः सम्यक्प्रयत्नतः श्रीमदमरदासाख्यविदुषा शोधितं मुदा १ श्रीशंकराचार्यकृतं तु भाष्यं रत्नप्रभासंवलितं हि काश्याम् गोवर्द्धनाख्येन तु धीमतेदं पंक्तिरवक्षिरुचिरपंक्तिकवं ॥ २ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इदं शारीरकमीमांसाभाष्यं भाष्यरत्नप्रभाख्यटीकासहितं श्रीमद्रदासाभिधेयेन
विदुषा सम्यक् शोधितं श्रीकाशीपुर्य्यां गोवर्द्धनदासाभिधेयेन स्वकीयहरिहररत्ना-
कराख्ययन्त्रालये मुद्रितं येषां विमलमतीनामस्यादानेऽभिलाषस्यात्तैर्नेपाकुञ्जगल्ली
निख्यातायाः पण्यवीथिकायाः पश्चिमद्वारस्य समीपे गोवर्द्धनदासपदवाच्यस्य पुस्त
कालये संमिलिष्यतीति ॥ ० ॥ श्रीसम्वत् १९४३ मी: माघवदी ७ वाररविजनवरीता० १६

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥इतिशारीरकसूत्रभाष्ये रत्नप्रभायां चतुर्थाध्यायस्य चतुर्थपादः समाप्तः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri